CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S D P B
Coll. No. 724

Title [illegible]

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 924 Subject: Medicine.

Title: Maharnava.

Author: Scribe:

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.1" by 5.1" Extent: 412 foll.

Language: Sanskrit Script: Devanagari

Remarks: ——

महार्णवं प्रा॰ भा॰ १

॥ श्रीगणेशाय नमः ॥ ॥ ॐ नमः परमात्मने ॥ ॥ नमः सकलकल्याणजन्मावनाय पिनाकि-
ने ॥ नमो लक्ष्मीनिवासाय देवतायै गिरां नमः ॥१॥ प्रवाजाद्रिप्रसस्य स्तुतिनिचयपर्या
यपुषे नमो विघ्नश्रेणीविघनपटिष्ठाय महसे ॥ जगत्याद्युत्पत्तिस्थितिलयनिरासास
रचनाविनोदासक्तायमणातफलसिद्धिप्रतिभुवे ॥२॥ यदंघ्रिं द्विरानाथमुकुरद्वराप्पेराधि
तनक्तिनराननतीर्थैः ॥ श्रीचंडिकायामीश्वरणारविंदद्वंद्वं महे तत्कुलदेवतायाः ॥३॥ प्र
कृष्टचलत्कुंडलसत्कपोलगंडस्थलं महार्हमणिमेखलं मरकतांकुरश्यामलं ॥ करे
तुकरुणां सदाकलितपंचषाष्टकं मम महः किमपि मोहनं कृपटतो रावं केशवं ॥४॥ कौं
तेकृतागसि रुषा परुषप्रवाणं कुवीकृतायमवसनार्धनियंत्रणेन ॥ मौनेन मानम
धिगच्छति याद रातुसाणावृतीहरविनक्ततनुः श्रिवं वः ॥५॥ आसीद्दसीमगुणदाककु
ला भुरामवंतु घत्मन्नत मुनकीर्त्तिघनप्रकाशः ॥ जाकैः सदा रुदिधृतो गुणसंनिवि १

ष्टः श्रीरत्नपालनृपतिर्भुवनैकरत्नं ॥६॥ तस्यात्मजो नरहपाल इति प्रसिद्धः सिद्धांगना
जनसमाजसुसिद्धकीर्त्तिः दानेन यः सुकृतिनां त्विप तिस्म दैन्यं सैन्यं च वैन्यसदृशः
प्रतिनृपतीनां ॥७॥ सुतोऽस्य जातः सुकृतात्मतस्य कश्चिन्सदैवोवनृवायमसत्वलक्ष्म
त्यमवेक्ष्य तातो नाम्नाहरिश्चंद्र इति व्यधत्त ॥८॥ तस्यात्मजोऽनूदतुलप्रतापः साधारणो
नृमिषपतिर्वदान्यः ॥ यन्नूतपूर्वामवनीश्वराणामजीगपद्योजगति स्वकीर्त्तिं ॥९॥ बंध
च्छिदाविरुदकीर्त्तिमिहान्वितार्या ऊताः परत्र च न चैव विधातुमिच्छुः ॥ कीनाशपाश
चयबंधनिमोचनार्थं तीर्थत्रयीकरविमुक्तिमचीकरद्यः ॥१०॥ अस्यात्मजः श्रीम
दनेन ॥ नाम्ना धाम्ना च रूपेण च संगतार्थः ॥ रोपारुणेच्चत्तुषि मद्विपत्तौ नितांतकां
तारसमाश्रितोऽनूत ॥११॥ यः कृपानाराम न धर्मामतनानि संनिबंधाप्य ॥ कृत्वा
स्वकीर्त्तिमेकां महीदत्त्वानृत्तिं नेदेन ॥१२॥ परिशीलयता कर्जकलापं विदधानेन

चन्द्ररिपुः प्रबंधान्मदनेन महात्मना प्रमेनेतिपा जगत्तां प्रथितान्तनतनोजराजकीर्त्ति
॥१३॥ पुत्रे पुत्रस्तपिकजत्र युगेष्यतस्य पुत्रौ जगन्न यविस्तत्र रकौ त्रिंपूरौ राजा तौ प्रि
यावृतितरां प्रथमप्रसूतौ नीनौम होन्नतिमतस्य गुणौ विनीतौ ॥१४॥ उदारशीलौ सु
मनोविज्ञासमनामनोज्ञ त्तरे हावनकेलिजेतौ ॥ मदोदयावर्धितमंगलांगौ यौ रामक
ष्णाविति संमतौ तौ ॥१५॥ मछेत्सया तु करणं न सुवानदृध्ः शक्नोति कर्त्तुम परः कृ
तस्रु ज्ञोपि दानं निदानमखिलं प्रविजनोर्यसिधेः कीर्त्तिं दिगंतविरतान्यतन्त दाया
॥१६॥ अप्रतिमतत्रः पुण्यां एषामलत्रस्तयोरनूजः घः अपरोमांधात्र गुणैर्मांधातागीय
ते जगति ॥१७॥ सोयं सुकृतविधातृ रिपुकुलजेता नवतिमांधाता विदुन्मुखे नमति २
मानसकृतिरत्नं महार्णवं नाम ॥१८॥ श्रुतिस्मृतिपुराणानि समालोक्य यथा मति
निबध्यते समासेन निबंधाय महार्णवः ॥१९॥ तत्र तावद्व्यासमास कलकर्मविपाको

गित्वेन कर्मविपाकरूपरोगादि निवृत्त्यर्थं प्रायश्चित्तादेरवश्यकर्तव्यत्वं प्रतिपाद्यते।
तथा च यस्तु हन्ता स रोगी स्यादित्यादिरोगनिदानकथनात् निदानोच्छेदेन च व्याधिनिवृ
त्तेरवगतत्वान्निदा ॥ नच्छेदाय हत्यादिजन्यरोगमुक्तौ पादकृच्छ्रार्धपादिकादि प्राय
श्चित्तं व्याधिप्रतिकृतिदानादिकर्तव्यं अत्र केचित्प्रत्यवतिष्ठंते॥ पापपूर्वस्य तत्प्राय
प्रायश्चित्तादिकर्तव्यमिति यदुच्यते नैतत्संगतं। नहि प्रारब्धफलस्य पूर्वनाशे कि
मपि प्रयोजनमस्ति। फलस्य प्रारब्धत्वात्॥ यथा लक्ष्यवेधः न्यक्षः फलाय चापनिःसृ
तशरो वेधुस्तथापारस्य वा कारणरूपस्यास्तितं नापेक्षते॥ तथा रोगरूपफले प्रारब्धे
सति तत्कारणं तत्स पापापूर्वस्य सत्त्वं नापेक्षते॥ अथ रोगादिरूपफलनाशस्य फ
लं निदानात्मक दुरितापूर्वनाशाय प्रायश्चित्तादि कर्तव्यमिति चेत्॥ न समवायिका
रणनाशे शरीरनाशेन वतस्य रोगादेर्नाशेन निमित्तकारणदुरितापूर्वनाशेन॥ यथा मह

महार्णव
३

दिनाशेनैव घटादिनाशो न दंडचक्रादिनाशेन न च सहजसिद्धं कौनख्यादिकं प्रमा-
देष्टुं शक्यते॥ अपि चानरकतिर्यग्योन्यादिजन्मदुःखपरंपरामनुभूतवतः॥ कौनख्या-
दि विकारस्य चरमं फलं॥ ततउत्पन्नमात्रेण फलेन स्वकारणदुरितापूर्वनाशो जन्यते॥ मंथ-
नजनिताग्नेसमुत्तरणिनेवारणिध्वंसः तस्मात्पापविनाशार्थं व्रतचर्येति व्यर्थश्रमः॥
नतावच्चरमं फलमिति निश्चेतुं शक्यते यतः कस्मिन्नेव जन्मनि कौनख्यादि निश्च-
ये चरमफलत्वनिश्चयो भवेत्॥ न च तथा॥ अनेकजन्मोपभोग्यतात्तस्य॥ तथा च
शातातपीयकर्मविपाके॥ महापातकजं चिह्नं सप्तजन्मानि जायते॥ उपपापोद्भवं पंच
त्रीणि पापसमुद्भवमिति॥ सप्तजन्मानि॥ अनिव्याप्त्येतदर्थ॥ मनुसप्तस्वपि जन्मस्वेकमे- ३
व फलमनुगतमिति तस्य चरमफलत्वादुत्पन्ने चरमफले निमित्तकारणस्य दुरिता-
पूर्वस्य स्वयमेव नष्टत्वात्॥ तदर्थं प्रायश्चित्तादिविफलमिति चेत्॥ उत्पन्नोदिष्टे

निमित्तकारणं नापेक्षते न तत्त्पद्यमानः॥ सप्तमएव जन्मन्युत्पन्नमिमवधीयते कौ-
नख्यादिकं ततः पूर्वं तत्त्पद्यमानमेव॥ अवस्थोत्तरानुभावात्॥ अथवा प्रतिजन्मनि त-
मेव कौनख्यादिकं उत्पद्यते॥ तत्र च निमित्तं पूर्वदुरितापूर्वमनुवर्ततेऽतस्ते-
सप्तमं वा जन्मप्रथमादिवा जन्मेत्यज्ञानात्सत्तेसंभावितदुरितापूर्वनिवृत्त्यर्थं प्राय-
श्चित्तादिकं विधेयमेव। अतएव शातातपीयकर्मविपाके॥ प्रतिजन्म भवेत्तेषां
चिह्नं तत्पापसूचकं॥ प्रायश्चित्ते कृते याति पश्चात्तापवतां पुनरिति॥ यदुक्तं न च कौ-
नख्यादिकं प्रमातादेष्टुं शक्यत इति॥ तदुक्तं शेषानुमानमिव विरुद्धं तत्प्रायश्चित्ता-
द्यनंतरमेव तत्तद्रोगनिवृत्तेर्दृष्टत्वात्॥ यत्र चानिवृत्तिस्तत्र कर्मवैगुण्यं चरमजन्मत्वं वा
कल्प्यं॥ निमित्तभूतदुरितापूर्वस्य प्रायश्चित्तादिभिर्निवृत्तौ समवायिकारणभूतवि-
षमधात्वारब्धशरीरापगमेन कार्यस्यापि रोगादेर्निवृत्तिः॥ एतदेव पापपूर्वस्य विनाश-

नेप्रयोजनं॥ यत्र षडंगुलजत्वादेरनिवृत्तिस्तत्रानेकजन्मोपभोगं षडंगुलजत्वादेर्जन्मांतरे
निवृत्तिः प्रायश्चित्तादिके कृते सतीत्यवगंतव्यं तस्माद्रोगनिवृत्त्यर्थं कर्त्तव्यं प्रायश्चित्तादि
कं॥ ॥महार्णवाख्येमहतिनिबंधे मांधातृनाम्नोमदनात्मजस्य॥ सत्कर्मरत्नौघनिधा
नमाद्यस्तुंगस्तरंगोयमगात्समाधः॥ ॥अथपरितापाः॥ तत्र शातातपीयेकर्मवि
पाके प्रायश्चित्तविहीनानां महापातकिनां नृणां॥ नरकांते भवेज्जन्म चिह्नांकितशरी
रिणां॥ प्रतिजन्म भवेत्तेषां चिह्नं तत्पापसूचकं॥ प्रायश्चित्ते कृते याति पश्चात्तापवतां
पुनः॥ महापातकजं चिह्नं सप्तजन्मनि जायते॥ उपपापोद्भवं पंच त्रीणि पापसमु
द्भवं॥ दुःकर्मजातानां रोगा यांति चैवं क्रमाच्छमं॥ जपैः सुरार्चनैर्होमैर्दानैस्तेषां श
मो भवेत्॥ पूर्वजन्मकृतं पापं॥ नरकस्य परिक्षये बाधते व्याधिरूपेण॥ तस्य जप्या
दिभिः शमः॥ कुष्ठं च राजयक्ष्मा च प्रमेहो ग्रहणी तथा॥ मूत्रकृच्छ्राश्मरीकासा अ ४

कृच्छ्राश्मरीकासा अतिसारभगंदरौ॥ दुष्टव्रणं गंडमाला पक्षाघातोक्षिनाशनं॥ इत्ये
वमादयो रोगा महापापोद्भवाः स्मृताः॥ जलोदरं यकृत्प्लीहशूलरोगव्रणानि च॥ श्वासा
जीर्णज्वरच्छर्दिभ्रममोहगलग्रहाः॥ रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः॥ दंडापा
तनिकश्चित्रवपुःकंपविचर्चिकाः॥ वल्मीकपुंडरीकाद्या रोगाः पापसमुद्भवाः॥ तथा
र्शआद्या नृणां रोगा अतिपापाद्भवंति हि॥ अन्ये च बहवो रोगा जायंते दोषसंकरात्॥ उच्यं
ते च निदानानि प्रायश्चित्तानि च क्रमात्॥ महापापेषु सर्वेषु स्यादर्धं तूपपातके॥ दद्या
त्पापेषु षष्ठांशं कल्प्यं व्याधिबलाबलं॥ महापापेषु सर्वस्वादित्यादि समर्थविषयेज्ञे
यं॥ असमर्थस्य तु षष्ठ्यादिकं वक्ष्यति॥ अपसाधारणं तत्र गोदानादिषु कथ्यते॥ गो
दाने वत्सयुक्ता गौः सुशीला च पयस्विनी॥ वृषदाने सुचोनड्वान्सयुक्तांबरकांचनः॥ निवर्त्त
नानि च दाने द्रव्याद्या द्विजातये॥ निवर्त्तनस्वरूपं परिमाणप्रकरणे वक्ष्यते॥ तथा सुव

महा० णंपरिमाणमपि॥सुवर्णं तथा निष्कं तु तदर्धार्धं प्रमाणतः॥सुदुकूलं चाम्बरदाने तस्मिं सोप
स्करं द्विजोत्तम॥महिषीं महिषीदाने दद्यात्स्वर्णं वराहृतं॥सुवर्णं चावरं चेति ग्रहः॥द
५ द्याद्गजमजादाने सुवर्णोपलसंयुतं॥पलजत्ताणामपि परिमाणप्रकरणे वक्ष्यते॥ ॥जल
सुत्रावचं पुष्पं प्रदद्याद्देवतार्चने॥दद्याद्द्विजसहस्राय मिष्टान्नं द्विजभोजने॥ब्राह्मण
भोजने सहस्रसंख्यापुष्पेषु लक्षमित्यादि सर्वं शाकविषयं॥अशक्तस्य शक्त्यनुसारेण क
र्त्तव्यं॥रुद्रजपो लक्षपुष्पैः पूजयित्वा त्र्यंबकं॥कार्यदशाज्येषु शान्त्रद्दशांशांशं गुग्गुलेन तु॥कु
त्वा त्रिषेचनं कुर्यान्मंत्रैर्वरुणदैवतैः॥शांतिकं गणशांतिश्च ग्रहशांतिकपूर्वकं॥धा
न्यदाने सुवर्णं धान्यं पारीपुष्टिसमन्वितं वस्त्रदाने दुकूलं च देयं कूर्पूरसंयुतं॥रुद्रजप ५
इत्यादि रुद्रस्य रूपं ऋषिदेवतादि चाग्रे वक्ष्यते॥मंत्रैर्वरुणदैवतैः॥दशांशेन होमानं
तरं वा सतैर्मंत्रैर्यजमानमभिषिंचेत्॥यदेकादशवारानुजपेत्॥तदाएकवारहला

होमः कार्यः॥अयमेव दशांशहोम तत्र च प्रतिमंत्रं स्वाहान्तान्दश मुक्त्वा यजुयात्तस
कलरुद्राहस्यैकवारमेव जुहुयात्॥मंत्रविच्छेदस्त्वाध्ययनादेवागंतव्यः तेऽयमत्र चाग्रे
पि प्रदर्शते॥गणशांतिर्गणेश्वरशांतिः सा चाग्रे निधास्यते॥ग्रहशांतिर्नवग्रहशांतिः॥
इयमप्यग्रे निपुणं प्रदर्श्यते॥खारीलक्षाणां परिमाणप्रकरणे वक्ष्यते॥प्रायश्चित्तोप
क्रमप्रकारमाह॥॥दत्त्वा पं चाथ चतुर उपवेश्य द्विजान्नृपसुतान्॥तेषामनुज्ञया स
र्वं प्रायश्चित्तमुपक्रमेत्॥विधाय वैश्वदेवं श्राद्धं साकल्यं निजकाम्यया॥धेनुं दद्याद्द्विजेभ्यो
यद्दक्षिणां च स्वशक्तितः॥तेषामनुक्तमेत्यादि तेषां ब्राह्मणानामनुज्ञया प्रायश्चि
त्तं नवती निज्ञवेतेरथ्याहरः उपक्रमे प्रायश्चित्तस्योपक्रमे विभिन्नमुद्दिश्य श्राद्धं वि
दधीत॥अथधारीयत इति श्राद्धं॥तच्च साकल्यं पिंडदानरहितं धेनुं दद्यात्॥स
ज्ञामासुपवेशितानां ब्राह्मणानां ब्रह्मदंडत्वेन दक्षिणादिकं तु श्राद्धांगत्वेन ब्रह्मदंडत्वे

महा॰
६

नच या धेनुर्दीयते॥ साच न प्रत्यह धेनुः अपितु प्रत्याम्नायवाराकृतः॥ बहुत्व श्रेदेका
दीयेत तत्रदातैः सा विक्रेया स्यात्॥ विक्रयश्च निषिद्धो गिरसा॥ बहुत्वोन प्रदेयानि गोर्ग
हे त्रायमनं स्मृमः॥ विनक्रदक्षिणास्ये तादातारं तारयं तिहि॥ एकाएकस्य दातव्या नव
हुत्यः कथंचन॥ सा तु विक्रयमापन्ना दहत्यासप्तमं कुलमिति॥ धेनुं दद्याद्विजेत्यो
य इति णां च स्वशक्तितः॥ ॥इत्युक्तं तदनंतरं कृत्यमाह॥ ॥अनेककृत्यपथात्राक्वाव
स्थानेकरैर्द्विजान्॥ याचेतदंडवत्कृत्वा प्रायश्चित्तं यथोदितं॥ तेषामनुत्तया कृत्वा
प्रायश्चित्तं यथाविधि॥ पुनस्तान् परिपूर्णार्थं मर्च्चयेद्विधिवद्विजान्॥ दद्या द्वताङ्गदाना ६
नितेभ्यः श्रद्धासमन्वितः॥ व्रताङ्गदानानि॥ ॥गोतं हिरण्यरजतं तिजवासो घृतधान्यल
वणदानानि॥ अन्यान्यपि विशेषविहितानि दानानि व्रताङ्गदानानीत्युच्यंते॥ संतुष्टा ब्रा
ह्मणा दद्युरछिद्रं व्रतकारिणो॥ अछिद्रमस्त्विति दं वाक्यं दस्यक्रं मुरित्यर्थः अथवाव

ह्मणावचनमेवाछिद्रं वाक्यं॥ व्रतछिद्रं तपछिद्रं यछिद्रंयज्ञकर्मणि॥ सर्वं नवतुनेछि
द्रं यस्य चेछंति वै द्विजाः॥ ब्राह्मणा यानि भाषंते मन्यंते तानि देवताः॥ सर्वदेवमया वि
प्रा न तद्वचनमन्यथा॥ उपवासो व्रतं चैव स्नानं तीर्थफलं तपः॥ विप्रैः संपादितं यस्य सं भौ॰४
संपन्नं तस्य तद्भवेत्॥ ब्राह्मणा जंगमं तीर्थं निर्जलं सार्वकामिकं। तेषां वाक्योदकेनैव शुध्यं
ति मलिना जना॥ संपन्नमिति यद्वाक्यं वदंति क्षितिदेवताः॥ प्रणम्य शिरसा धार्यं म
ग्निष्टोमफलं लभेत्॥ ते मोनुज्ञामिति प्राप्य प्रतिपद्य तथाविधम्॥ भोजयित्वा द्विजान्
नत्वा भुंजीत सह बंधुभिः॥ इति ज्ञाताज्ञातपापकर्मविपाकोक्तपरिभाषा॥ ॥अथ क
र्मविपाकसारोक्तपरिभाषा॥ अथ कर्मत्ययोपापौ रुछ्रव्याधिविपर्ययौ॥ क्लेशा
सहत्वात्तत्रायोगादप्याधिकर्द्वितः कृछ्रं राष्ट्रेन प्राजापत्यकृछ्रं चांद्रायणादीन्युच्यं
ते तेषां सर्वेषां क्लेशसाध्यत्वात् तत्रन्यूनानि च्छान्नि धास्यंते॥ प्राजापत्यादिकरा॥

महा॰
१

मेककोटिः व्याधिविपर्ययो नाम व्याधिप्रतिकृतिदानं ॥ इदं त्वपरा कोटिः ॥ एवं चाद्ये प
क्षे न कृच्छ्रकरणं ॥ पक्षे साक्षात्कृच्छ्राद्याचरणस्यैकेनात्मकत्वात् ॥ कृच्छ्रप्रत्याम्नायत्वेन
गां दद्यात् ॥ कृच्छ्रादिषु प्रत्याम्नायत्वेन गावो दातव्या इत्यर्थः ॥ तत्र कस्मिन् कृच्छ्रे किं सं
ख्याका गावो दातव्या इत्यत आह ॥ एकां कृच्छ्रातिकृच्छ्रे द्वे तिस्रश्चांद्रायणे हते ॥ ग
वामप्रत्याम्नायेन निष्कं वा सार्धीतिज्ञातकृच्छ्रः जपदानेपि तस्यैकं कूष्मांडगणहोमकृत् ॥
सर्वपापप्रणुत्यर्थमथ व्याधिविपर्ययः ॥ एकां कृच्छ्र इत्यादि ॥ एकां गां कृच्छ्रे प्राजापत्ये ॥ नि
ष्कं तन्त्तांणपरिमाणप्रकरणेऽभिधास्यते च ॥ प्रायेण कर्मविपाकेऽतीतपापत्वेन प्रह
र्षिकप्रायश्चित्तापेक्षयाऽधिकप्रायश्चित्तप्राप्तनावात् ॥ साज्ञीतिज्ञातकृच्छ्रप्र १
त्याम्नायत्वेन गवादिकं दद्यादिति साज्ञीतिकृच्छ्रः ॥ अथवा ॥ कृत्वा वा ब्रह्महत्यायाः
षडब्दं कृच्छ्रमाचरेदिति संज्ञाविततपापनिवृत्त्यर्थं साज्ञीतिज्ञातकृच्छ्रः षडब्दप्रायश्चि

त्तप्रत्याम्नायत्वे न गवादिदानान्नवेदित्यर्थः जपदानेपीति ॥ जपश्च दानं च जपदाने ते
अपि कुर्वीत ॥ तत्र जपेन तरत्समंदीत्यादिपरामार्थे विहितं सौरादिसूक्तं नवती
त्यर्थः ॥ दानं गोभूहिरण्यादीनां ॥ तानि च पूर्वमभिहितानि ॥ सर्वपापप्रणुत्यर्थं कूष्मां
डगणहोमकृत् ॥ अथवा व्याधिविपर्ययः ॥ वक्ष्यत इति विशेषः ॥ कर्मणस्त्वयोपाय
त्वेनापापक्षयमभिहितं कृच्छ्रादिकरणं व्याधिप्रतिकृतिदानं चेति तत्र कृच्छ्रश्चाष्ट
: तपः प्रधानं कर्म्मं चैषै कूष्मांडगणहोमाद्य ॥ पितपः प्रधानं वितितावपि प्राजापत्या
दिकृच्छ्रकोटावेवांतर्भवतः अतः समग्रं कृच्छ्रकोटिमभिधाय व्याधिप्रकृतिदानं व
क्तव्यं तस्मात्कूष्मांडगणहोमाद्यभिधीयते ॥ यत्र कर्मणि यद्देवादेवहेडनमित्या
द्यो मंत्रास्तैत्तिरीयारण्यके समाम्नाता ॥ स कूष्मांडहोमः ॥ यस्मिं श्चायेनु यमसु
पर्येति च तथा अग्नेर्मन्वे प्रथमस्य प्रचेतस इत्याद्या ऋचस्तैत्तिरीय ब्राह्मणा ॥ स

मा्म्नातः॥ सगणहोमः॥ ॥तत्र जमदग्निप्रोक्तकूष्मांडहोमविधिः॥ ॥अथातः संप्रव-
क्ष्यामि कूष्मांडविधिमुत्तमं। एनसां स्खलनस्थानां प्रायश्चित्तं तु वैदिकं॥ अकु-
र्वन्विहितं कर्म निंदितं च समाचरन्॥ प्रसक्तश्चेंद्रियार्थेषु प्रायश्चित्ती भवेद्द्वि-
जः॥ केशश्मश्रु वापयित्वा स्नात्वा पुण्ये जलाशये॥ आज्यभागानंतरेण कूष्मा-
ण्डैर्जुहुयाद्द्विजः। यद्देवेत्यनुवाकैश्च त्रिभिर्जुह्वाज्यमन्वहं॥ वैश्वानरायेत्येता-
भिस्तमग्निमुपतिष्ठेत परित्वाधाय समिधं जपादि प्रतिपद्यते। कर्मादिश्वेति जुहु-
यात्पूतः स्वर्गं समश्नुते॥ संवत्सरं ब्रह्महा तु मासं वै वीरहा द्विजः॥ चतुर्विंशतिरा-
त्रांस्तु परिवित्तोपदाहितः॥ द्वादश स्वर्गदिधिषुपत्नीः दृशा वहन्नपि॥ स्वर्गदिधि-
षुः ज्येष्ठे अकृताधाने सति कनीयान् यद्यग्नीनादधाति॥ तदा ज्येष्ठः स्वर्गदिधिषु-
रित्युच्यते॥ परिवित्तिरित्यर्थः॥ तिस्रो रात्रीस्तु कुनखवाशीलितो भवति द्विजः॥ न ८

मांसमन्नमश्नीयान्नोपेयात्कामिनीमपि नोवासी नखट्वायां जुगुप्सेतानृताद्द्विजः॥ पयो-
व्रतं ब्राह्मणस्य यवागूः क्षत्रियस्य तु॥ आमिक्षा चैव वैश्यस्य प्रायश्चित्तार्थमिष्यते॥ सा-
वित्रीं च जपेन्नित्यं पवित्राणि च शक्तितः॥ सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमिष्यते॥ इति
जमदग्निप्रोक्तकूष्मांडविधिः॥ ॥अथ बौधायनप्रोक्तकूष्मांडहोमविधिः। अथ कूष्मां-
डैर्जुहुयात्॥ योऽपूत इव मन्येत यथा॥ भ्रूणहेवमेष भवति॥ यो योनौ रेतः सिंचति यद-
र्वाचीनमेनो भ्रूणहत्यायाः तस्मान्मुच्यत इति॥ अयोनौ रेतः सेकः स्वप्नादन्यत्र भ्रूण-
हत्या। सो वा पवित्रकामो अमावास्यायां पौर्णमास्यां वा केशश्मश्रुलोमनखानि वापयित्वा
ब्रह्मचारिकल्पेन व्रतमुपैति संवत्सरं मासं चतुर्विंशतिं द्वादश षडहं त्र्यहं वा रात्रौ नमां-
समश्नीयान्न स्त्रियमुपेयान्नोपरि शयीत जुगुप्सेतानृतात्। पयो व्रततम इति प्रथमः क-
ल्पः। यावकं वोपभुंजीत। कृच्छ्रं द्वादशरात्रं वाचरेत् भिक्षेत वा तद्विधिष्विति॥ तद्विधिषु

तच्छ्रुणतैकत्वकर्मादिविधिषु॥ एकत्वकाम्यचितनैत्त्वाहारेणैकत्वकादशीन्निष्पादयेदि
त्यर्थः॥ यवागूं राजन्यस्यामिक्षा वैश्यस्य॥ यदि मन्येतोपदस्यामीति ओदनं धानाः सक्तून्
घृतमित्यनुव्रतयेदात्मनोऽनुपदासायेति॥ प्राप्तरुणपाकर्यंतिककर्मणाग्निमुपसमाधा
य संपरिस्तीर्य परिधानप्रभृत्यग्निमुखात्कृत्वा सावित्री पुरोनुवाक्यामनूच्य सावित्र्या
पक्वान्नं जुहोति॥ अपस्विष्टकृते॥ हव्यवाहमग्निमातिषाहं रक्षोहणं पृतनासु जिष्णुं ज्यो
तिष्मंतं दीद्यतं पुरंधिमग्निं स्विष्टकृतमाहुवे मोमिलनन्यस्विष्टमग्ने अभितत्पृण॥ हि
विश्वं देवपृतना अभिष्या उरुं नः पंथां प्रदिशन्विभाहि ज्योतिष्मद्धेह्यजरं न आयुः॥ इतिमा
ज्यमाच्चतुरोंशं जुहोति अथ कूष्मांडैर्यद्देवा देवहेडनं यददीव्यन्नृणमहं बभूव आयुषे
विश्वतो दधदित्येतस्मिन्निरनुवाकैः प्रतिमंत्रमाज्यस्याहुत्वा सिंहे व्याघ्र इति॥ चतस्त्र
: सुवाहुतीः अग्ने अभ्यावर्तिन्नग्ने अंगिरः पुनरूर्जा सह रय्येति वहुत्वा समित्तास्येमंजमा

न लोके वस्याप वैश्वानरायप्रतिवेदयाम इति दात्रार्वै नस्रक्षेनोपतिष्ठते॥ यन्मया
मनसा वाचा कृतमेनः कदाचन॥ सर्वस्मात्तस्मान्नः कदाचन॥ सर्वस्मात्तस्मान्मेलितो
मोग्धि त्वं हि वेत्थ यथातथं स्वाहेति समिधमाधाय वरं ददाति॥ जयप्रभृति सिद्धमाधेनु
वरप्रदानात्॥ इति बौधायनप्रोक्तकूष्मांडहोमविधिः॥ ॥ अथ कूष्मांडहोमविधिमं
त्रानुष्ठानपावानुष्ठानक्रमसहितः प्रदर्श्यते॥ तत्रैकं जपमदश्वि प्रोक्तः॥ पक्वहोमादिरहि
तो लघुकल्पः प्रदर्शितः॥ अपरस्तु पक्वहोमादिसहितो गुरुकल्पो बौधायनप्रोक्तो नि
रूपितः॥ सर्वशास्त्रादिकरणन्यायेन वक्तुं निर्निरूपितः कूष्मांडहोमणकरणे वेति गु
णोपसंहारन्यायेनाविरुद्धसकलांगोपसंहारः कर्तव्यः॥ अथवा एतत्सिगुरुणां गुरू
णि लघुनि लघुनि लघुनीति गौतमस्मरणात्॥ अपनो दयपापात्य लेलघुः पक्षः स्वी
कार्यः॥ इतरथा गुरुपक्षादितर इति व्यवस्था। महापातकादि दोषदूषितः कृतया

मह० यस्त्रिरात्रोपि मनःपरितोषं न प्रतिपद्यते॥ यस्याग्रेनावयवोपि मनःपरितोषं न प्रतिपद्य
१० ते। यस्याग्न्यमयोनैवारतः सिंचति यस्य ब्रह्मलावकं साक्षात् दद्यावार्षिकादि गुरुस्या
यस्त्रिरात्रा नाम विषयाणि महापातकादीनि करोति योपि पवित्रतत्कामः स कूष्मांडहो
मं कुर्वीत यस्यानाहिकर्माणि विकीर्यंति सोपि कूष्मांडियुक्तो उग्निर्जुहुयात्॥ अ
थ प्रयोगः॥ अमावास्यायां वा पौर्णमास्यां वा अन्यत्र वा विहितकाले पूर्वाह्णे केशश्मश्रु
लोमनखानि वापयित्वा तीर्थे वा गृहे वा च मंत्रतत्र मौक्तानां पुण्याहवाचनानि कृत्वा स्थ
ण्डिलेमुपकल्प्य स्वगृह्योक्तविधिनाग्निं प्रतिष्ठाप्य प्राणायाममग्निप्रतिष्ठापनपूर्वं पक्षा
द्दिनाम अमुकप्रयोजनार्थं कूष्मांडहोमं करिष्य इति संकल्प्य चतुर्होमपक्षे मया १०
न्वारब्धे सविता देवता चतुर्हविः आघारांते त्रसिर्यंजिलप्य निर्वापपात्रासादनं चरुपाका
न्तं यथागृह्यं विधाय पक्वं चरुमभिघार्योद्वास्य प्रतिष्ठितमभिघार्यावदानधर्मेण

वदाय सावित्र्या पुरोनुवाक्यामनूच्य सावित्र्यैव याज्यया जुहुयात्॥ यस्या विश्वामित्र
ऋषिः॥ सविता देवता गायत्री छंदः चरुहोमे विनियोगः॥ ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि धियो यो नः प्रचोदयात्॥ ॐमिति सावित्रीं पुरोनुवाक्यामनूच्य सावित्र्यैव
याज्यया जुहुयात्॥ यस्या विश्वामित्र ऋषिः॥ सवितारं पुनरपि सावित्रीमेव याज्या
पठित्वा स्वाहा सवित्र इति जुहोति ततः स्विष्टकृतमवदाय हव्यवाहनमिति पुरोनु
वाक्यामनूच्य स्विष्टमग्ने इति याज्यया जुहुयात्॥ हमोर नमो विश्वेदेवा ऋषयः
अग्निः स्विष्टकृद्देवता॥ अनुष्टुप् विराट् छंदः स्विष्टकृद्धोमे विनियोगः॥ हव्यवाहन
मग्निमातिषाहं रक्षोहणं पृतनासु जिष्णुं ज्योतिष्मंतं दीद्यंतं पुरंधिमग्निं स्विष्टकृ
तमाहुवेमोमिति पुरोनुवाक्यामनूच्य स्विष्टमग्ने अभितत् पृणाहि विश्वा देव पृतना
ना अविष्यं कृणु हन्नः पथ्या प्रदिशं विता हि ज्योतिष्मद्धेह्यजरन्न आयुः॥ इति याज्या

म.ह. स्वाहांतांपवित्वाज्जुहोति॥ अत्रायमेस्विष्टकृतइतिउदेवपत्तागः॥ कृतशेषमग्नेः पुरस्ता
११ तत्र आस्यपर्योक्षुनिदधीत॥ अयमदेवादेवहेडनमितित्रिभिरनुवाकैराज्यहोमः॥ क
चनसाविन्याप्यकहोमानंतरं स्विष्टकृतमवदाय स्थापयित्वायदेवादेवेत्यादिभिराज्य
होमं विधाय ततः स्विष्टकृद्धोममिच्छंति॥ येचपवहोमंन कुर्वते तेषामाज्यभागानं
तरमेवतैरेवत्रिभिरनुवाकैरेवाज्यहोमः॥ तत्र यदेवादेवहेडनमित्येकविंशत्यृचंप्र
थमानुवाकस्य॥ ब्रह्मास्वयंभूः ऋषिः लिंगोक्तादेवताः॥ आदितआरभ्यक्रमेणाच
तस्रोनुष्टुभश्छंदः॥ पंचमीत्रिष्टुप्षष्ठ्यवसानाअतिजगती सप्तमीजगती
अष्टमीत्रिष्टुप्॥ नवमीषट्पदाजगती दशमीबृहती ततोद्वेषट्पदे त्राकुर्यात्रयोद ११
शीत्रिष्टुप्॥ चतुर्दशीसप्तपदाअष्टिः॥ पंचदश्यनुष्टुप्॥ षोडश्यनुष्टुप् विराट्सप्त
दशीगायत्री ततस्तिस्रस्त्रिष्टुभः॥ एकविंश्यनुष्टुप्॥ आज्यहोमेविनियोगः॥ ॥ अयम

त्राः॥ यदेवादेवहेडनं देवासश्चकृमावयं॥ आदित्यास्तस्मान्मामुंचतर्त्तस्यर्त्तेनमामयेतस्वा
हा॥ आदित्येभ्यः स्वाहा॥ आदित्येभ्यइदंत्यागो॥ नमंत्रेतपाती॥ एवमुत्तरत्रापिविवेत्तेयं॥
देवाजीवनकाम्यायद्वाचानृतमूदिम तस्मान्नइहमुंचत विश्वेदेवाः सजोषसः स्वाहा॥ वि
श्वेभ्योदेवेभ्यः॥२॥ ऋतेनद्यावापृथिवीऋतेनत्वंसरस्वती ऋतान्मापाद्येनसोयत्किंचानृत
मूदिमस्वाहा॥ द्यावापृथिवीभ्यांसरस्वत्यैच॥ इन्द्राग्नीमित्रावरुणौसोमोधाताबृहस्पतिः॥ तेनोमुं
चंत्वेनसोयदन्यकृतमारिमस्वाहा॥ इन्द्राग्निमित्रावरुणौसोमोधाताबृहस्पतिः॥ तेनोमुंचंत्वे
नसोयदन्यकृतमारिमस्वाहा॥ इन्द्राग्निमित्रावरुणसोमधातृबृहस्पतिभ्यः॥४॥ सजा
तशंसादुतजामिशंसाज्ज्यायसः शंसादुतवाकनीयसः॥ अनाधृष्टंदेवकृतंयदेनस्त
स्मात्त्वमस्माज्जातवेदोमुमुग्धि स्वाहा॥ जातवेदसे॥५॥ यद्वाचायन्मनसाबाहुभ्यामूरु
भ्यामष्ठीवद्भ्यांशिश्नैर्यदनृतंचकृमावयं॥ अग्निर्मातस्मादेनसोगार्हपत्यः प्रमुंचतुचकृ

म.हा०
मयानिदुष्कृतान्स्वाहा॥गार्हपत्यायाग्नये॥६॥येनत्रितोअर्णवान्निर्बभूवयेनसूर्यंतमसोनिर्मु
१२
मोच।येनेंद्रोविश्वाअजहादरातीस्तेनाहंज्योतिषाज्योतिरानशानआक्षित्स्वाहाअग्न
ये॥७॥यत्कुसीदमप्रतीत्तंमयेहयेनयमस्यनिधिनाचरामि।एतत्तदग्नेअनृणोभवा
मिजीवन्नेवप्रतितत्तेदधामिस्वाहाअग्नये॥८॥यन्मयिमातागर्भेसति॥एनश्चकारय
त्पिता॥अग्निर्मातस्मादेनसःगार्हपत्यःप्रमुंचतुदुरितायानिचकृमकरोतुमामन
नेनसंस्वाहा॥गार्हपत्यायाग्नये॥९॥यदापिपेषमातरंपितरंपुत्रःप्रमुदितोधयन्॥
अहिंसितौपितरौमयातत्॥तदग्नेअनृणोभवामिस्वाहा।अग्नये॥१०॥यदंतरिक्षंप
पृथिवीमुतद्यांयन्मातरंपितरंवाजिहिंसिमअग्निर्मातस्मादेनसःगार्हपत्यःप्रमुंचतुदु १२
रितायानिचकृमकरोतुमामनेनसंस्वाहागार्हपत्यायाग्नये॥११॥यदाशसानिःशसा
भिःशसायत्पराशसायदेनश्चकृमानूतनंयत्पुराणंअग्निर्मातस्मादेनसःगार्हपत्यः

प्रमुंचतुदुरितायानिचकृमकरोतुमामनेनसंस्वाहागार्हपत्यायाग्नये॥१२॥अतिक्रामामि
दुरितंपदेनजहामिरिप्रंपरमेसधस्थे।यत्रायंतिसुकृतोनापिदुष्कृतस्तमारोहामिसुकृ
तांनुलोकंस्वाहाअग्नये॥१३॥त्रितोदेवाअमृजतैतदेनस्त्रितएतन्मनुष्येषुममृजे।ततो
मायदिकिंचिदानशे॥अग्निर्मातस्मादेनसःगार्हपत्यःप्रमुंचतुदुरितायानिचकृमकरो
तुमामनेनसंस्वाहाअग्नयेगार्हपत्याय॥१४॥दिविजाताअप्सुजातायाजाताओषधीभ्यः
अथोयाअग्निजाआपस्तानःशुंधंतुशुंधनीःस्वाहाअद्भ्यः॥१५॥यदापोनक्तं
दुरितंचरामयद्वादिवानूतनंयत्पुराणंहिरण्यवर्णास्ततउत्पुनीतनःस्वाहाअद्भ्यः॥१६॥
इमंमेवरुणश्रुधीहवमद्याचमृडयत्वामवस्युराचके॥स्वाहावरुणाय॥१७॥तत्त्वायामि
ब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिःअहेडमानोवरुणेहबोध्युरुशंस
मानआयुःप्रमोषीःस्वाहावरुणाय॥१८॥त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोअव

यासिसीष्टाः यजिष्टो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुअग्निवरुणाभ्यां ग्ध्यस्मत
स्वाहा मु॥१०॥ स त्वन्नो अग्नेवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अव यक्ष्व नो वरु
णं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा॥ अग्नीवरुणाभ्यां त्वमग्ने अयास्य
यासन्मनसा हितः अयासन् हव्यमूहिषे या यातो धेहि भेषजं स्वाहा॥ अग्नये अयसे
॥॥ इति प्रथमोनुवाकः॥॥ महदोत्यमिति द्वितीयानुवाकस्य त्रयोदशर्चस्य ब्रह्मास्व
यंभूऋषिः लिंगोक्ता देवताः आद्या प्रस्तारपंक्तिः द्वितीयाद्याश्चतस्रस्त्रिष्टुभः॥ षष्ठी
गायत्री सप्तम्याद्यास्तिस्रस्त्रिष्टुभः दशम्यनुष्टुप् एकादशी चतुष्पदोष्णिक् द्वादश्यनु
ष्टुप् त्रयोदशी त्रिष्टुप् आज्यहोमे विनियोगः॥ महदोत्यं नाम हे बभूवादितिसेवा १२
संजगरजनेभ्यः अग्निर्मातस्मादिंद्रस्य सवितानौ प्रमुंचतां स्वाहा॥ अग्नये॥१॥ यद्
स्तम्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजिघ्रमानः॥ उग्रंपश्याचराष्ट्रभृच्च तान्यप्सर

सं वमुदत्तामृणानि स्वाहाऽप्सरोभ्यः॥२॥ उग्रंपश्ये राष्ट्रभृत्किल्बिषाणि यदक्षवृत्त
मनुदत्तमेतत्॥ नेन्मऋणानृणावदित्समानो यमस्य लोके अधिरज्जुरायस्वाहा॥ मंत्रो
क्तदेवताय्यै॥३॥ अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः॥ क्षयन्नस्मभ्य
मसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि॥ स्वाहा वरुणाय॥४॥ उदुत्तमं वरुणपाशम
स्मदवाधमं वि मध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम
स्वाहा॥ वरुणाय॥५॥ इमं मे वरुण तत्वा यामि॥ त्वंनो अग्ने स त्वं अग्न इति च तस्य
:प्रथमानुवाके लिखिता अत्रापि ग्राह्याः॥६॥ संकुसुको विकुसुको निर्ऋथो यश्च नि
स्वनः ते यस्म यक्ष्म नाम नागसौ दूरादूरमचीचरत स्वाहा॥ मंत्रोक्तदेवताभ्यः॥१॥
नि यं यक्ष्मम चा च ते कृत्यां निर्ऋतिं च॥ तेन यो स्मत्समृच्छातै तमस्मै प्रसुवामि स्वाहा
मंत्रोक्तदेवताय्यै। ३ः सत्तानुदं ग्मातां घृणेनानुघृणेन च॥ तेनान्यो ३ स्मत्समृच्छा

तैतमस्मै प्रसुवामसि स्वाहा मंत्रोक्तदेवताभ्यः॥१२॥ संवर्चसा पयसा संतनूभिरगन्म
हि मनसा संशिवेन॥ त्वष्टा सुदत्रो विदधातु रायोनुमार्ष्टु तन्वो यद्विलिष्टं स्वाहा।
त्वष्ट्रे॥१३॥ इति द्वितीयोनुवाकः॥ आयुष्ट इति तृतीयोनुवाकस्य सप्तदशर्चस्य ब्रह्मा
स्वयंभूरृषिः लिंगोक्ता देवता आद्यानुष्टुप् द्वितीया तृतीये त्रिष्टुभौ ततस्तिस्रो गायत्र्य
स्यः सप्तम्यष्टम्यौ त्रिष्टुभौ ततः षडनुष्टुभः पंचदशी ककुप् षोडश्यनुष्टुप् सप्तदशी प
च पराद्या ककुम्मत्यपि वा॥ आज्यहोमे विनियोगः॥ आयुष्टे विश्वतो दधदयमग्निर्वरेण्य
ः॥ पुनस्ते प्राण आयाति परायक्ष्मं सुवामि ते स्वाहा॥ अग्नये॥१॥ आयुर्दा अग्ने हविषो
जुषाणो घृतप्रतीको घृतयोनिरेधि घृतं॥ पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षता १५
दिमं स्वाहा॥ अग्नये॥२॥ इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुणं संशि
शाधि मातेवास्मा अदिते शर्म यच्छ विश्वेदेवा जरदष्टिर्यथासत् स्वाहा। अग्न्यादिमंत्रो

क्तदेवताभ्यः॥३॥ अग्न आयूंषि पवस आसुवोर्जमिषं च नः॥ आरे बाधस्व दुच्छुनां स्वाहा
अग्नये इदं मंत्रोक्तदेवताभ्यः॥४॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं। दधद्रयिं मयि
पोषं॥ स्वाहा॥ अग्नये॥५॥ अग्निरृषिः पवमानः पांचजन्यः पुरोहितः तमीमहे महा
गयं स्वाहा॥ अग्नये॥६॥ अग्ने जातान् प्रणुदा नः सपत्नान् प्रत्यजातान् जातवेदो नुदस्व। अ
स्मै दीदिहि सुमना अहेळंछर्मंते स्याम त्रिवरूथ उद्भौ स्वाहा॥ अग्नये जातवेदसे॥७॥
सहसा जातान् प्रणुदा नः सपत्नान् प्रत्यजातान् जातवेदो नुदस्व॥ अधि नो ब्रूहि सु
मनस्यमानो वयं स्याम प्रणुदा नः सपत्नान् स्वाहा॥ जातवेदसे॥ अग्ने यो नोऽभितो ज
नो वृको वारो जिघांसति तांस्त्वं जहि वस्वस्मभ्यमाभर स्वाहा। अग्नये रक्षोघ्ने॥९॥
अग्ने यो नो निदासति समानो यश्च निष्ट्यः॥ तं वयं समिधं कृत्वा तुभ्यमग्ने अपि दध्मसि
॥स्वाहा॥ अग्नये॥१०॥ यो नः शपादशपतो यश्च नः शपतः शपात्॥ उषाश्च तस्मै नि

मकृसर्वंपापंसमूहतांस्वाहा॥ उपसेनिमृचे॥११॥ योनःसपत्नोयोरणोमर्त्तोभित्रिदासति
देवाः॥ इध्मस्येवप्रक्षायतोमातस्योच्छेषिकिंचनस्वाहा॥ देवेभ्यः॥१२॥ योमांद्वेष्टिजात
वेदोयंचाहंद्वेष्मियश्चमां॥ सर्वांस्तानग्नेसंदहयांश्चाहंद्वेष्मियेचमांस्वाहा॥ अग्न
येजातवेदसे॥१३॥ योअस्मभ्यमरातीयात्॥ यश्चनोद्वेषतेजनः॥ निंदाद्योअस्मांधि
प्साच्चसर्वांस्तान्मस्मृष्णाकुरुस्वाहा॥ मंत्रोक्तदेवताभ्यै॥१४॥ संशितंमेब्रह्मसंशितंवी
र्यंबलंसंशितंक्षत्रमजिष्णुर्यस्याहमस्मिपुरोहितः॥ स्वाहा॥१५॥ उदेषांबाहूअ
तिरमुदुवर्चोअथोबलं॥ क्षिणोमिब्रह्मणामित्रानुन्नयामिस्वांअहं॥ स्वाहा॥ मंत्रोक्त
देवताभ्यै॥१६॥ पुनर्मनःपुनरायुर्मआगात्पुनश्चक्षुःपुनःश्रोत्रंमआगात्॥ पुनःप्रा
णःपुनराकूतंमआगात्पुनश्चित्तंपुनराधीतंमआगात्॥ वैश्वानरोमेदब्धस्तनू
पावबाधतांदुरितानिविश्वास्वाहा॥ वैश्वानराय॥१७॥ इतितृतीयोनुवाकः॥ ॥इम

नुवाकत्रयेणाज्यंस्रुचाप्रतिमंत्रंकृत्वायजमानोग्नेर्दक्षिणतः॥ समित्पाणिरुदङ्मुखस्ति
ष्ठन्वैश्वानरायप्रतिवेदयामीतिद्वादशर्चेनसूक्तेनाग्निमुपस्थायचयन्मयामन
सेत्यनयास्वाहान्तयासमिधमग्नौप्रक्षिप्यजयादिहोमंकुर्वीत॥ ततश्चजमदग्नि
मते॥ बौधायनमतेऽनुवाकत्रयेणाज्यहोमानंतरंसिंहेव्याघ्रइत्याद्याभिश्च
तसृभिःस्वाहाकृताभिराज्यस्यप्रत्येकंहुत्वातथाग्नेऽस्यावर्चन्तित्सा इत्याद्याभिश्चतस
सृभिरपिस्वाहाकृताभिःप्रत्येकंहुत्वायजमानःपूर्वोक्तप्रकारेणसमिधंपूर्वोक्तमंत्रे
णाग्नौप्रक्षिप्यजयादीन्हुत्वाप्रणीतामोक्षणब्रह्मविसर्जनांतंकर्मकुर्वीत॥ मेधा
जपहोमानंतरंस्विष्टकृद्धोममन्वतेसमिदाधानानंतरंततःपूर्ववत्स्विष्टकृतंहु
त्वाजयादिकंकुर्वीत॥ ततश्चकर्मविपाककतारतम्यानुसारेणपूर्वोक्तत्रिरात्रा
दिसंवत्सरांतपर्यंताणामंधेच्छामन्यतमपक्षाश्रयणेनकर्त्तव्यं॥ यावत्कर्मस

महा॰ १९ माग्निपयोव्रतं ब्राह्मणस्य यवागूव्रतं राजन्यस्य आमिक्षाव्रतं वैश्यस्य यदि मन्येत पयो
व्रतादिभिः क्षीणो नश्यामीति तदा ओदनादिभिः पूर्वोक्तैः शरीरधारणं कुर्वीत ॥ पयोऽ
तमिक्षादेरसमर्थः पयोव्रतब्राह्मणः सकृद्भुंजीत । तथा क्षत्रियो यवागूं वैश्य आ
मिक्षामिति ॥ ॥अथ सिंहे व्याघ्र इत्यादयो मंत्राः कृष्यादिसहिताः प्रदर्श्यन्ते ॥ सिंहे व्या
घ्र इति चतसृणां सोम ऋषिः ॥ त्विषिर्देवता ॥ त्रिष्टुप् छंदः ॥ आज्यहोमे विनियोगः ॥ सिं
हे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या देवी सुभगा जजान सान आगन्वर्च
सा संविदाना स्वाहा त्विष्यै ॥१॥ या राजन्ये दुंदुभावायतायामश्वस्य क्रंद्ये पुरुषस्य
मायौ ॥ इंद्रं या देवी सुभगा जजानेत्यादि ॥२॥ या हस्तिनि द्वीपिनि या हिरण्ये त्विषि १९
रश्वेषु पुरुषेषु गोषु ॥ इंद्रं या देवी सुभगेत्यादि ॥३॥ रथे अक्षेषु वृषभस्य वाजे वा
ते पर्जन्ये वरुणस्य शुष्मे इंद्रं या देवी इत्यादि ॥४॥ अग्ने अभ्यावर्तिन्निति चतसृणाम

ग्निर्ऋषिः ॥ अग्निरभ्यावर्ती देवता ॥ आद्या पंचपदा पंक्तिः ॥ द्वितीया पंचपदा महा
बृहती ॥ इतरे द्वे गायत्र्यौ ॥ आज्यहोमे विनियोगः ॥ अग्ने अभ्यावर्तिन्नभि मा वर्तस्व ॥
आयुषा वर्चसा सन्या मेधया प्रजया धनेन स्वाहा ॥ अग्नये अभ्यावर्तिने ॥१॥ एवमुत्त
रमंत्रेषूह्यस्त्यागः ॥ अग्ने अंगिरः शतं ते संत्वावृतः सहस्रं त उपावृतः तासां पोषस्य
पोषेण पुनर्नो नष्टमाकृधि पुनर्नो रयिमाकृधि । स्वाहा ॥२॥ पुनरूर्जा निवर्तस्व पुन
रग्न इषायुषा ॥ पुनर्नः पाहि विश्वतः स्वाहा ॥३॥ सह रय्या निवर्तस्वाग्ने पिन्वस्व धा
रया ॥ विश्वप्स्न्या विश्वतस्परि स्वाहा ॥४॥ अथ समिधमादायोपस्थानं कुर्वीत वैश्वा
नराय ते इत्यनेन सूक्तेन । अस्य सूक्तस्य द्वादशर्चस्य ब्रह्मास्वयंभू ऋषिः ॥ वैश्वानराद्या लि
ङ्गोक्ता देवताः ॥ आद्ये त्रिष्टुभौ ॥ तृतीया चतुर्थ्यावनुष्टुभौ ॥ ततस्तिस्रस्त्रिष्टुभः ॥ अष्ट
मी पंक्तिः ॥ ततो द्वे त्रिष्टुभौ ॥ एकादशद्वादश्यौ च पंचपदे शक्कर्यौ उपस्थाने विनि

योगः॥ वैश्वानराय प्रतिवेदयामो यदीनृणं संगरो देवतासु॥ स एतान्पाशान्प्रमुंचन्प्र
वेद स नो मुंचतु दुरितादवद्यात्॥१॥ वैश्वानरः पवयान्नः पवित्रैर्यत्संगरमभिधावा
म्याशां। अनाजानन्मनसा याचमानो यदत्रैनो अव तत्सुवामि॥२॥ अमी ये सुभगे दिवि
विचृतौ नाम तारके॥ प्रेहामृतस्य यच्छतामेतद्बद्धकमोचनं॥३॥ विजिहीष्व लोकान्कृ
धि बंधान्मुंचासि बद्धकं। योनेरिव प्रच्युतो गर्भः सर्वान्पथो अनुष्व॥४॥ स प्रजानन्प्रति
गृभ्णीत विद्वान्प्रजापतिः प्रथमजा ऋतस्य। अस्माभिर्दत्तं जरसः परस्तादच्छिन्नं तंतु
मनुसंचरेम॥५॥ ततं तंतुमन्वेके अनुसंचरंति येषां दत्तं पित्र्यमायनवत्। अबंध्वेके १७
ददतः प्रयच्छाद्दातुं चेच्छक्नवांसः स्वर्ग एषां॥ आरेभाथामनुसंरभेथां समानं पं
थामवथो घृतेन। यद्वां पूर्तं परिविष्टं यदग्नौ तस्मै गोत्रायेह जायापती संरभेथां॥७॥ य
दंतरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसिम॥ अग्निर्मा तस्मादेनसो गा

र्हपत्यः प्रमुंचतु दुरितानि चकृम॥८॥ भूमिर्माता दितिर्नो जनित्रं भ्रातांतरिक्षम
भिशस्त्या नः॥ द्यौर्नः पिता पित्र्याच्छं भवासि जामिमित्वा माविवित्सि लोकात्॥९॥
यत्र सुहार्दः सुकृतो मदंति विहाय रोगं तन्वाः स्वायाः॥ अश्लोणा अंगैरहुताः स्वर्गे
तत्र पश्येम पितरं च पुत्रं॥१०॥ यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वा करि
ष्यन्॥ यद्देवानां चक्षुष्यागो अस्ति यदेव किंच प्रतिजग्राहमग्निर्मा तस्मादनृ
णं कृणोतु॥११॥ यदन्नमद्मि बहुधा विरूपं वासो हिरण्यमुत गामजाविं। यद्देवा
नां चक्षुष्याग इत्यादि॥१२॥ एवमग्निमुपस्थायमन्नमेतन्नमर्चांसमिधमग्नौ नि
दधीत॥ अस्याः ऋचो ब्रह्मा स्वयंभूः ऋषिः॥ अग्निर्देवता॥ अनुष्टुप् छंदः॥ समिद्धोमे
विनियोगः॥ यन्मया मनसा वाचा कृतमेनः कदाचन॥ सर्वस्मात्तस्मान्मेलितो
मोग्धि त्वं हि वेत्थ यथातथं स्वाहा। अग्नये॥१॥ अथ प्रजमादि होमः॥ आज्यहोमात् पू

म०हा० वमेव स्विष्टकृद्धोमाकरणपक्षे पूर्ववृत्तेन हविषा स्विष्टकृतं जुहोति। तत्र पूर्वोक्ताव
१८ पि मंत्रौ सौकर्यार्थं पुनरपि प्रदर्श्यंते। हव्यवाहनमित्येषा पुरोनुवाक्या स्विष्टम
ग्न इत्येषा याज्या द्वयोरेतयोर्विश्वेदेवा ऋषयः॥ अग्निः स्विष्टकृद्देवता अनुष्टुप् त्रि
राट् छंदः॥ स्विष्टकृद्धोमे विनियोगः॥ हव्यवाहनमजिमातिषाहं रक्षोहणं पृतनासु जि
ष्णुं॥ ज्योतिष्मंतं दीद्यतं पुरंधिमग्निं स्विष्टकृतमाहुवे मो मिति पुरोनुवाक्यामनूच्य स्वि
ष्टमग्ने अभितत्पृणाहि विश्वा देवः पृतना अभिष्य। उरुं नः पंथां प्रदिशं विभा
हि ज्योतिष्मद्धेह्यजरं न आयुरिति। याज्यां स्वाहांतां पठित्वा जुहुयात्॥ अग्नये
स्विष्टकृत इदं न ममेति त्यागः॥ अथ हुतशेषमग्नेः पुरस्तादन्यत्पात्रे पुनर्निधाय १८
कर्मसमृद्ध्यर्थं जयादिहोमं करिष्य इत्यभिलप्य जयादिहोमं कुर्वीत। तत्र जयो
दशानां यज्ञरूपाणां जयामंत्राणां विश्वेदेवा ऋषयः॥ प्रतिमंत्रं मंत्रप्रथमपदो

क्ता गुणविशिष्टा देवता। आज्यहोमे विनियोगः॥ कर्मसमृद्ध्यर्थे वा विनियोगः॥ चित्तं
च स्वाहा॥ इदं चित्ताय॥ अत्र स्वाहा चित्तायेत्यादि त्यागः॥ एवमेव स्वाहांतमुत्त
रत्रापि द्रष्टव्यं॥१॥ चित्तिश्च स्वाहा॥ चित्त्यै॥२॥ आकूतं च स्वाहा॥ आकूताय॥३॥ आ
कूतिश्च स्वाहा॥ आकूत्यै॥४॥ विज्ञातं स्वाहा॥ विज्ञाताय॥५॥ विज्ञानं च स्वाहा॥ विज्ञाना
य॥६॥ मनश्च स्वाहा॥ मनसे॥७॥ शाक्करीश्च स्वाहा॥ शाक्करीभ्यः॥८॥ दर्शश्च स्वाहा॥
दर्शाय॥९॥ पूर्णमासश्च स्वाहा॥ पूर्णमासाय॥१०॥ बृहच्च स्वाहा॥ बृहते॥११॥ रथंतरं
च स्वाहा॥ रथंतराय॥१२॥ प्रजापतिर्जयानिंद्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु त
स्मै विशः समनमंत सर्वाः स उग्रः स हि हव्यो बभूव स्वाहा॥ प्रजापतये॥१३॥ इति
जयाः॥ अथाभ्यातानाः॥ अष्टादशानामभ्यातानानां विश्वेदेवा ऋषयः॥ प्रतिमंत्रं प्रथ
मपदोक्ता गुणविशिष्टा देवता। यजुष्ट्वान्न छंदोनियमः॥ आज्यहोमे कर्मसमृ

म०हा०
१८

र्थेवा विनियोगः॥ अग्निर्भूतानामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामा
शिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यां स्वाहा॥ अग्नयेभूतानामधिप
तये उत्तरमंत्रेषु समावत्वित्यादेरनुषंगः॥१॥ इंद्रो ज्येष्ठानामधिपतिः समावत्वस्मि
न् इंद्राय ज्येष्ठानामधिपतये॥२॥ यमः पृथिव्याधिपतिः॥ समावत्वस्मिन् यमाय
पृथिव्याधिपतये॥३॥ वायुरंतरिक्षस्याधिपतिः समावत्वस्मिन् वायवेंतरिक्ष
स्याधिपतये॥४॥ सूर्यो दिवोधिपतिः समावत्वस्मिन् सूर्याय दिवोधिपतये॥५॥
चंद्रमा नक्षत्राणामधिपतिः समावत्वस्मिन् चंद्रमसे नक्षत्राणामधिपतये॥६॥
बृहस्पतिर्ब्रह्मणोधिपतिः समावत्वस्मिन् चंद्रमसे नक्षत्राणामधिपतये बृहस्पतये ब्र १८
ह्मणोधिपतये॥७॥ मित्रः सत्यानामधिपतिः समावत्वस्मिन्मित्राय सत्यानामधिप
तये॥८॥ वरुणोपामधिपतिः समावत्वस्मिन्मित्राय सत्यानामधिपतये॥८॥ वरुणो

पामधिपतिः समावत्वस्मिन्॥ वरुणायापामधिपतये॥९॥ समुद्रः स्रोत्यानामधि
पतिः समावत्वस्मिन्॥ समुद्राय स्रोत्यानामधिपतये॥१०॥ अन्नं साम्राज्यानामधि
पतिस्तन्मावत्वस्मिन्॥ अन्नाय साम्राज्यानामधिपतये॥११॥ सोम उषधीनामधि
पतिः समावत्वस्मिन् सोमाय उषधीनामधिपतये॥१२॥ सविता प्रसवानामधिप
तिः समावत्वस्मिन्॥ सवित्रे प्रसवानामधिपतये॥१३॥ रुद्रः पशूनामधिपतिः स
मावत्वस्मिन् रुद्राय पशूनामधिपतये॥१४॥ अप उपस्पृश्येत्॥ त्वष्टा रूपाणामधिप
तिः समावत्वस्मिन् त्वष्ट्रे रूपाणामधिपतये॥१५॥ विष्णुः पर्वतानामधिः समावत्वस्मि
न्॥ विष्णवे पर्वतानामधिपतये॥१६॥ मरुतो गणानामधिपतयः स्ते मावंत्वस्मिन्॥
मरुद्भ्यः॥ गणानामधिपतिभ्यः॥१७॥ पितरः पिताः महाः परेवरे ततास्ततामहाः॥
इह मावंत्वस्मिन्॥ पितृभ्यः पितामहेभ्यस्ततेभ्यः स्ततामहेभ्यः॥१८॥ इत्यभ्यातानाः

॥ अथ राष्ट्रभृतः॥ अत्र आम्नायपाठेन द्वादश मंत्राः॥ अर्थतस्तत्र द्वाविंशतिः॥ ता-
षां द्वाविंशतेर्यजुषां विश्वेदेवा ऋषयः॥ स्वस्वमंत्रोक्तगुणविशिष्टगंधर्वाप्सरस
श्च देवताः॥ आम्नायपाठेन सप्तमस्य द्वादशर्चस्य च भुवनस्यपति दें वृता आज्यहो
मे विनियोगः॥ कर्मसमृध्यर्थे वा विनियोगः॥ ऋताषाडृतधामाग्निर्गंधर्वः स न इ
दं ब्रह्म क्षत्रं पातु तस्मै स्वाहा॥ ऋतसहे ऋतधाम्नेऽग्नये गंधर्वाय इदं न मम॥१॥ तस्यौ
षधयोऽप्सरस ऊर्जो नाम स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। ओषधीभ्योऽप्सरोभ्यः ऊ
र्ग्भ्यः॥२॥ संहितो विश्वसामा सूर्यो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा॥ सुषुम्ण
सूर्यरश्मयश्चंद्रमसे गंधर्वाय तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ता इदं ब्रह्म
क्षत्रं पातु ताभ्यः स्वाहा॥ नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यः॥६॥ भुज्युः सुपर्णो यज्ञो गं
धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा॥ भुज्यवे सुपर्णाय यज्ञाय गंधर्वाय॥७॥

तस्य दक्षिणा अप्सरसः स्तावा नाम ता इदं ब्रह्म क्षत्रं पातु ताभ्यः स्वाहा॥ दक्षिणा-
भ्योऽप्सरोभ्यः स्तावाभ्यः॥८॥ प्रजापतिर्विश्वकर्मा मनो गंधर्वः स न इदं ब्रह्म क्षत्रं
पातु तस्मै स्वाहा॥ प्रजापतये विश्वकर्मणे मनसे गंधर्वाय॥९॥ तस्य ऋक्सामान्यप्स
रसो वह्नयो नाम ता इदं ब्रह्म क्षत्रं पातु ताभ्यः स्वाहा॥ ऋक्सामभ्योऽप्सरोभ्यो वह्निभ्य
॥१०॥ इषिरो विश्वव्यचा वातो गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा॥ इषिराय
विश्वव्यचसे वाताय गंधर्वाय॥११॥ तस्यापोऽप्सरसो मुदा नाम ता इदं ब्रह्म क्षत्रं पा
तु ताभ्यः स्वाहा॥ अद्भ्योऽप्सरोभ्यो मुद्भ्यः॥१२॥ भुवनस्य पते यस्य त उपरि गृहा
इह च स नो रास्वाज्यानिं रायस्पोषं सुवीर्यं संवत्सरीणां स्वस्ति स्वाहा॥ भुवनस्य
पतये॥१३॥ परमेष्ठ्यधिपतिर्मृत्युर्गंधर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा॥ परमे
ष्ठिनेऽधिपतये मृत्यवे गंधर्वाय॥१४॥ तस्य विश्वमप्सरसो भुवो नाम ता इदं ब्रह्म क्ष

त्रं पातु ताभ्यः स्वाहा॥ विश्वस्या अप्सरोभ्यो नूर्ज्ज्यः॥१५॥ स्वदितिः सूनृतिर्ज्जनकः सुपर्णः प
र्जन्यो गंधर्वः स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा॥ सुदितये सुनृतये जनकाय सुपर्णा
य पर्जन्याय गंधर्वाय॥१६॥ तस्य विद्युतो प्सरसो रुचो नाम ता इदं ब्रह्म क्षत्रं पातु ता
भ्यः स्वाहा॥ विद्युद्भ्यो प्सरोभ्यो रुग्भ्यः॥१७॥ दूरे हेतिरमृडयो मृत्युर्गंधर्वः स इदं ब्रह्म क्ष
त्रं पातु तस्मै स्वाहा॥ दूरे हेतयेऽमृडयो मृत्यवे गंधर्वाय॥१८॥ तस्य प्रजा अप्सर
सो भीरुवो नाम ता इदं ब्रह्म क्षत्रं पातु ताभ्यः स्वाहा॥ प्रजाभ्यो प्सरोभ्यो भीरुभ्यः॥१९
॥ चारुः कृपणकाशी कामो गंधर्वः स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा॥ चारवे कृ
पणकाशिने कामाय गंधर्वाय॥२०॥ तस्या यो प्सरसः शोचयंती नाम ता इदं ब्र
ह्म क्षत्रं पातु ताभ्यः स्वाहा॥ आधिभ्यो प्सरोभ्यः॥ शोचयंतीभ्यः॥२१॥ स नो भुवन
स्य पते यस्य त उपरि गृहा इह च उरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा॥ भुव

नस्य पतये॥२२॥ इति राष्ट्रभृतः॥ जयाभ्यातानां राष्ट्रभृन्नेति गणत्रयमंत्रोपहोमा इत्यु
च्यंते॥ तथा समनंतरवक्ष्यमाणाः प्रजापतइत्याद्यस्विष्टकृदंताः पंचाप्युपहोमा
अभिधीयंते॥ एते पंच प्रायश्चित्तार्थमपि॥ तत्र पंचानां मंत्राणां प्रजापतय इत्याद्यानां
मध्ये प्रथमांत्ययोर्विश्वे देवा ऋषयः मध्यस्थितानां व्यस्तानां तिसृणां व्याहृतीनां क्र
मेण जमदग्निभरद्वाजकश्यपा ऋषयः॥ आदितश्चारभ्य प्रजापतिरग्निर्वायुः सूर्योग्नि
स्विष्टकृदिति देवताः प्रजापतइति त्रिष्टुप्॥ आद्याव्याहृतिर्देवी गायत्री द्वे उष्णिग्बृह
यदस्येति त्रिष्टुब्यजुः॥ आज्यहोमे कर्मसमृद्ध्यर्थे वा विनियोगः॥ प्रजापते न त्व
देतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम
पतयो रयीणां स्वाहा॥ प्रजापतये॥१॥ भूः स्वाहा। अग्नये।२। भुवः स्वाहा॥ वायवे।२।
स्वः स्वाहा। सूर्याय॥३॥ यदस्य कर्मणोत्यरीरिचं यद्वान्यूनमिहाकरं। अग्निष्टत्स्वि

महा० ष्टकृद्विद्वान्स्विष्टं सुहुतं करोतु स्वाहा॥ अग्नये स्विष्टकृते॥ ५॥ आज्यभागसमिधम
२२ मये स्वाहेत्याज्यभागाप्यपक्वहोमपक्षे बर्हिरंजनपरिधिप्रहरणसंस्त्रावहोमांते कु
र्वीत॥ विश्वेभ्यो देवेभ्यः संस्रावभागेभ्य इति संस्रावभागास्थेषा बृहतः प्रस्तरेष्ठाः॥
बर्हिषदश्च देवाः॥ इमां वाचमभिविश्वे गृणंत आसद्यास्मिन्बर्हिषि मादयध्वमि
ति॥ अयमाज्यभिन्नाहुतयः॥ तत्रानाज्ञातत्रयं प्रथमतो जुहुयात्॥ अनाज्ञातत्र
यस्य विश्वेदेवा ऋषयः॥ अग्निर्देवता आद्ये द्वे अनुष्टुभौ तृतीया त्रिष्टुप् अनाज्ञातहोम
निरूपणे विनियोगः॥ अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु॥ अग्ने तदस्य क
ल्पय त्वं हि वेत्थ यथातथं स्वाहा॥ अग्नये॥ १३॥ पुरुषसंमितो यज्ञो यज्ञः पुरुषसं २२
मितः॥ अग्ने तदस्य कल्पयेत्यादि॥ २॥ यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते म
र्तासः॥ अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवान् ऋतुशो यजाति स्वाहा॥ अग्नये

॥१३॥ पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः॥ अग्ने तदस्य कल्पयेत्यादि॥ २॥ यत्पाक
त्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्तासः॥ अग्निष्टद्धोता क्रतुविद्विजानन्यजि
ष्ठो देवान् ऋतुशो यजाति स्वाहा॥ अग्नये॥ ३॥ अथ त्वन्नो अग्न इति द्वाभ्यां होम॥ एत
योर्द्वयोर्ब्रह्मा स्वयंभूऋषिः॥ अग्निवरुणौ देवते त्रिष्टुप् छंदः॥ विपर्यासांतरायदोषनि
रसने विनियोगः॥ त्वन्नो अग्ने वरुणस्य हेडो अवयासिसीष्ठाः॥ यजिष्ठो वह्नितमः
शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्॥ स्वाहा॥ अग्नीवरुणाभ्यां॥ १॥ स त्वन्नो अ
ग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अव यक्ष्व नो वरुणं रराणो वीहि मृडीकं
सुहवो न एधि। स्वाहा॥ अग्नीवरुणाभ्यां॥ २॥ अथ केचित्तमग्ने अयासीत्यनया जुहुति
॥ अस्य ब्रह्मा स्वयंभू ऋषिः॥ अग्निर्देवता॥ अनुष्टुप् छंदः॥ सर्वप्रायश्चित्तार्थे
विनियोगः॥ त्वमग्ने अयास्ययासन्मनसा हितः॥ अयासं हव्यमूहिषे मानो धेहि भे

 यज्ञः स्वाहा॥ अग्नये अयसे॥१॥ अथ यजुर्न्येष परिहारार्थं भुवः स्वाहेति जुहुयात्॥ अत्र
 कृष्णादिभागे व्याहृतिहितं॥ अथ यत इन्द्रेति स्वस्तिदेति वा द्वाभ्यां जुहुयात्॥ अनयोर्विश्वेदे
वा ऋषयः॥ इन्द्रो देवता॥ अनुष्टुप् छंदः॥ न्यूनातिरेकपरिहारार्थे विनियोगः॥ यत इन्द्र
भयामहे ततो नो अभयं कृधि मघवं छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि स्वाहा
॥ इन्द्राय॥१॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी॥ वृषेन्द्रः पुर एतु नः स्वस्तिदा अभ
यंकरः स्वाहा॥२॥ अथ यन्म आत्मनः पुनरग्निरिति च इति द्वाभ्यां जुहुयात्तक्रमेणाप्र
जुर्दं इत्रयोरनयोर्विश्वेदेवा ऋषयः॥ आद्यस्याग्निर्जातवेदा देवता॥ द्वितीयस्याग्नी
बृहस्पत्यश्विनो देवताः॥ अनुष्टुप् छंदः॥ कर्मणः साद्गुण्यार्थत्वे विनियोगः॥ यन्म
आत्मनो मिंदाभूदग्निस्तत्पुनराहार्जातवेदा विचर्षणिः॥ स्वाहा॥ अग्नये॥ जातवे
दसे॥१॥ पुनरग्निश्चक्षुरदात्पुनरिन्द्रो बृहस्पतिः॥ पुनर्मे अश्विना युवं चक्षुराधत्तम

तुष्टानक्रमः॥ ॥ महार्णवाख्ये महितेऽत्र बंधे मांधातृनाम्नो मदनात्मजस्य॥ सत्कर्म
रत्नौघनिधिर्द्वितीयस्तुरगस्तरंगो यमगाद्गाधः॥ ॥ अथ गणहोमः स च यथास्वं स्वम
तानुसारेण तावदभिधीयते॥ आधानस्य वा काम्यानां कर्मणां वा आदौ पवित्रत्वादि
कामनया वा यदैतत्कर्म कर्तव्यं॥ येषु कर्मसु पतिपत्न्योः सहाधिकारः॥ तेषामाधाना
हीनामादौ पत्नीसहितोऽन्यत्र पवित्रत्वकामनादावेकाकी स्वयं यजमानो दर्शेष्ट्या सा
नोरदर्शोधारयमाणः प्राणानायम्यामुकप्रयोजनार्थं सप्ताहं सवनत्रयं गणहोमं हो
ष्यामीति॥ संकल्प्य स्वस्वगृह्यानुसारेणाग्निस्थापनाप्रभृति स्थालीपाकवत्प्रति
ष्ठितं चरुवर्जमाघारणांतं कृत्वा॥ पात्रप्रयोगकाले प्रोक्षणीपात्रेण सह प्रणीतापात्रं स
तंतुत्रिर्वेष्टितकूर्चं च प्रयुनक्ति प्रणीता॥ प्रणयनकाले प्रणीता॥ आसाद्य॥ क
त्तरे सपवित्रमप आनीयोत्पूय निदधाति आज्यविलापनप्रभृति अग्निमुखांते क

महा०
२५

र्गणि कृते चरौ घृतमानीय दर्व्यामुपस्तीर्य द्विरवदायाभिघार्याग्नेनमेतिषड्ऋचेन सूक्तेन॥
सहस्रशीर्षेति षोडशर्चेन अग्नेनयेति द्वाविंशत्यृचेन नमस्कार सूक्तेन यो वामित्रावरुणे
त्येनेन गणेन चतुर्मंत्रेण॥ यो वामित्रावरुणेत्यनेन चाष्टमंत्रेण पवमानः॥ सुवर्जने
न चानुवाकेन सप्तदशर्चेन मधे वा देव हेडनमिति। विंशत्यृचेनाछिद्रपवित्रेनानुवा
केन वैश्वानरोनत्र्यृचेनाष्टमंत्रेण चत्वार्यष्टत्रिर्गणैः प्रतिमंत्रं जुहोति॥ अपि वा सकृ
दुपहत्य जुहुयात्॥ ततो जयादयः॥ जयादिहोमपक्षे॥ जयादीन् हुत्वा स्विष्टकृ
तं जुहोति॥ तत्र सकृदुपस्तरणमवदानं द्विरभिघारणं च। ततस्मावृत्रिष्टं कर्म
यथापूर्वं कुर्वीत॥ अस्य कर्मणः॥ प्रायश्चित्तार्थत्वे चाज्याः परिधयः॥ प्रकारांतर २५
त्वे परिधिप्रहरणं न भवति। ततः कर्त्ता रामाहाय चतुःप्यमगत्वा। पारम्भ तालनं कृत्वा
चम्यमाप्सुरवस्मासीनः कर्ता रामाहाय। सिहेमेमन्युरित्यनुवाकेन॥ कर्त्तृरास्यांस्वा

हो: स्वाहा॥ अग्नये इंद्राय बृहस्पतये अश्विनीभ्यां च॥ २॥ अथ इदं विष्णुः त्र्यंबकमि
त्यानयोहोमः॥ तत्र क्रमेण सोमो विश्वेदेवाश्च ऋषयः॥ विष्णुरुद्रश्च देवते॥ यथाक्र
मक्रमेण गायत्र्यनुष्टुप्छंदांसि॥ नियमासननवाद्दोषनिवृत्त्यर्थे विनियोगः॥ इदं
विष्णुर्विचक्रमे त्रेधा निदधे पदं। समूढमस्य पांसुरे स्वाहा॥ विष्णवे॥ १॥ त्र्यंबकं य
जामहे सुगंधिं पुष्टिवर्धनं॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् स्वाहा॥ रु
द्राय॥ २॥ अथ यत्वाग्निर्गीर्भिरिति मंत्रेण जुहुयात्॥ अस्या विश्वेदेवा ऋषयः॥ इंद्रो हरे
वा देवता॥ त्रिष्टुप्छंदः॥ वर्मकाजस्वरस्यानन्तोपपरिहारार्थे विनियोगः॥ आत्विगी
र्भिर्देतो नकू नमाप्यायय हरिवो वर्धमानः॥ यदा स्तोतृभ्यो महि गोत्रा रुजासि भू
यिष्ठ भाजो अध ते स्याम स्वाहा॥ इंद्राय हरिवते॥ १॥ अथ पुनस्त्वेन्धनमाज्यस्तव्या
हृतित्रिस्य होमः॥ व्याहृतीनामप्यादीनि प्रागन्निहितानि॥ पुनस्त्वेत्यस्या अग्निर्ऋषि

॥ वसुरुद्रादित्या देवताः॥ ऋष्टुप्छंदः॥ मंत्रचतुष्टयस्याप्युपजातदोषपरिहारे विनियो
गः॥ अत्र व्याहृतिभिर्हुत्वा पुनस्त्वेत्यनया जुहुयात्॥ द्विपरीतं वा॥ पुनस्त्वादित्या रुद्रा व
सवः समिंधतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः॥ घृतेन त्वं तन्वो वर्धयस्व सत्याः संतु यज
मानस्य कामाः॥ स्वाहा॥ वसुभ्यो रुद्रेभ्य आदित्येभ्यश्च॥ अप समस्ताभिर्व्याहृतिभिर्जु
हुयात्॥ अस्य मंत्रस्य जमदग्निर्ऋषिरराजन्यगवृषभः॥ प्रजापतिर्देवता॥ दैवी बृहती
छंदः॥ सर्वप्रायश्चित्तार्थे विनियोगः॥ भूर्भुवः स्वः स्वाहा॥ प्रजापतय इदं न मम॥ अ
पपरिषेचनादि ब्रह्मविसर्जनांतं कर्म कुर्वीत॥ एतच्च कर्म मौंजीव्रतदिनादिते
षु प्रतिदिनमावर्त्तनीयं॥ अत्र कूष्मांडहोमे तैत्तिरीयब्राह्मणसमाम्नाता गृहीता
मंत्राः॥ गं॥ ज्ञावजनंत इति तत्र कांडानुक्रमेणार्षमभिहितं॥ अतः स्वशाखांतरा
नुसारेणार्षभेदेपि न विरोधः॥ एवमेवोत्तरत्र गणहोमेष्ववगंतव्यं॥ ॥ कूष्मांडहोमा

त्मनश्छायां दृष्ट्वा॥ पत्नीभिः सह कर्ता स्वस्यात्मनश्छायां दृष्ट्वा॥ सुमित्रिया न आप
ओषधयः संत्विति॥ नमांकिंचिज्जलमानीय॥ दुर्मित्रियास्तस्मै संत्वित्यासमित्यादिना प्र
ष्टतः कृत्वशंत्क्षिपेत्॥ यस्मामस्मादित्ति द्वेष्यो भवति॥ ततश्चाप उपस्पृश्य गृहं व्रजेत्॥ गृ
हं समाह त्रिषु सवनेषु हुत्वा अंते आशीर्वचनं कारयेत्॥ ब्राह्मणभोजनं कुर्वीत सप्ता
हं सवनत्रये मौनव्रती सन् हविष्याशी नियतेंद्रियश्च भवेदिति॥ ॥ इत्यापस्तंबीयो
गणहोमविधिः॥ अथ बौधायनमतेन गणहोमविधिः॥ कामानां कर्मणामाधान
स्य चाश्रेय एवापवित्रकामनात एगणहोमं कुर्यात्॥ पूर्वाह्णेग्निं प्रतिष्ठाप्य नांतस्व
त्वा॥ प्राणानायम्य सकलपापक्षयार्थं मनोषकर्मानुष्ठानयोग्यतासिद्ध्यर्थं वा गण
होमं करिष्ये॥ तत्र सविता देवता॥ आघारवृत्तेत्रमित्यादि॥ संकल्प्य पक्वहोमांतं कृ
त्वाऽवशिष्टचरौ प्रभूतमाज्यमानीय॥ मेक्षणेनोपघातं जुहोति॥ अग्नेनयेति॥ षड्दे

म हा ० नवविंशस्सूक्तेन सहस्रशीर्षेति ॥ पुरुषसूक्तेनाष्टादशर्चेन ॥ अग्नेर्मन्वे तिसृणामस्
२६ सूक्तेन द्वाविंशत्यृचेन चतुष्प्रतीकेन मा वा मित्रावरुणेति ॥ चत्वारो मंत्राः सानुषंगाः मा
वां मित्रावरुणावश्या विन्दक्षे सानुषंगाः ॥ इत्य ८ होमुचं गणान्या पवमानः सुवरित्ये
तानुवाकेन सप्तदशर्चेन यद्देवा देवहेडनमित्यच्छिद्रपवितेनानुवाकेन विंशत्यृचे
न वैश्वानरो न ऊत्ये त्यष्टाविर्गतौ त्वमु तरस्रा तं च रूणा कृत्वा स्विष्टकृतमवदायश्या ह
त्वा स्विष्टकृदादि वरदानान्तं कृत्वोदपात्रमादायमनैर्ऋतीदिशंगत्वा चतुष्पथउविसृप
॥ उदपात्रं पुरो निधाय ॥ तत्रात्मनो रूपमवेक्षमाणः पाप्मनो विनिधीत् ॥ पाप्मानं वि
विच्य तत्र तत्र निधाय विनिधीन्मंत्रान्सिंहे मम न्युरिन्नं तमनुवाकं निगद्य ॥ निनी २६
याथः परास्य पात्रमनवेक्षमाणस्त्वागत्य हस्तपादं प्रक्षाल्य तेनैव मध्येतमेसस्ना
नं कुर्यात् ॥ एवमेव सप्ताहं सवनत्रये कृत्वा ॥ सप्ताहं ते पायसेन सर्पिषा ब्राह्मणा

न्नो जपित्वा ते व्योगो न्नमिति जहिरं तपानि दत्वा ॥ सर्वेभ्यः पापेभ्यः प्रमुच्यते ॥ मह
तः पातकादपि काम्यानां कर्मणामाधानादि कर्मणां च योग्यो भवति ॥ इमां क्रियामाचा
र्यपिरमाद्गणामात्मनश्च कुर्यात् ॥ नान्यस्य कुर्वन्नश्यति ॥ कारयिता तु सर्वस्मात्पा
पं प्रमुच्यते ॥ अहायनस्तुमासपक्षान्नस्य विकल्पिताः कालाः ॥ अष्टानां गणानां
होममात्रमपि कुर्यात् ॥ एकं वा गणं जुहुयात् ॥ जपे द्वादशपूर्वान्दशापरान्त्यनावे
क विंशं वा वत्सुपश्यति तावत्सुनाति यत्तत्सारयति यस्मै तदाह यस्मात्तदाहेत्या
ह भगवान्बौधायनः ॥ ॥ बौधायनप्रोक्तगणहोमविधिः ॥ अथ मंत्रपाठानुक्रम
सहितो गणहोमविधिः ॥ प्रारभ्यते ॥ अत्रापि गुरुलघुकल्परूपाउ होमो त्क्रौ
च व्यवस्थाप्याख्या ॥ आधानं चिकीर्षुः काम्यकर्माणि वा चिकीर्षुस्तदादौ यदा वा स
त्वा ह्वादशवार्षिकादि महाप्रायश्चित्तविषयन्तपापनिवृत्तिकामना तदा चमजमा

म०ह०
२७ नस्थानानिसंकर्मनिर्वर्त्यमेधुकर्मसुपन्नासहाधिकारस्तत्रपत्नीसहितःपत्नीवर्जुते
ऽग्निविद्यानिस्नात्निश्चसहितःपापक्षयार्थत्वेऽस्यकर्मणःस्वयमेवैकःपवित्रपाणि
र्दर्भेष्वासीनःप्राणानायम्यामुकप्रयोजनार्थंसप्ताहंसवनत्रयेगणहोमंकरिष्या
मीतिसंकल्प्यसंकल्पात्पूर्वंपश्चाद्वायथायोगंस्नानमग्निप्रतिष्ठाप्यमयापार्गस्वंचनप्रधा
नचरुहोमात्प्रागंगभूतपक्वहोमकरणपक्षेतत्रसवितादेवताआघारवन्तंत्रमि
त्याद्यानिजप्यस्थानीपाकवत्समस्तवहंतीत्यादिप्रतिष्ठितचर्वंजिघारणंतंकृत्वा
पात्रप्रयोगसमयेप्रोक्षणीपात्रेणसहप्रणीतापात्रंतथानंतुनिर्वेष्टितंकलशं
चप्रमुज्यप्रणीताप्रणयनकालेप्रणीताआसाद्यततःसपवित्रेकलशेआपआ २७
नीयोत्सूयप्रणीतापात्रस्योत्तरतोनिदधीत॥ततआज्यस्थालीप्रतिष्ठापनान्तंविर्जप
नप्रज्वलनमुखांतंकृत्वाऽग्निगन्तपक्वहोमकरणपक्षेचरुमवदानधर्मेणादाय

कृष्णांऽहोमोक्तरीत्यागायत्र्यापुरोनुवाक्यामनूच्यतामेवयाज्यांपठित्वास्वा
हेतिजुहोति।सपवित्रइत्यक्तेद्रव्यत्यागः॥आपस्तंबमतेऽग्निमुखानंतरमेवप्रधा
नचरुहोमः॥बौधायनमतेत्वंगभूतपक्वहोमानंतरं॥अपचरौप्रभूतंघृत
मानीयदर्व्यामपस्तीर्यद्विरवदायाभिघार्याग्नेनयेतिसूक्तेनअग्नेस्यवस्वसमा
णःपुरुषसूक्तादिनित्यमुत्तरंत्रांतप्रतिमंत्रंजुहुयात्॥बौधायनमतेत्ववदान
धर्मेणादायपूर्वोक्तैरेवमंत्रैर्मेक्षणेनोपघातंजुहुयात्॥ ॥अग्नेनयेतिषड्ऋच
स्यपवित्रस्यसूक्तस्यविश्वेदेवाऋषयःअग्निर्देवतात्रिष्टुप्छंदः॥चरुहोमेविनि
योगः॥अग्नेनयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान्॥युयोध्यस्म
ज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेमस्वाहा॥अग्नये॥१॥प्रवःशुक्रायभा
नवेभरध्वंहव्यंमतिंचाग्नयेसुपूतं।योदैव्यानिमानुषाजनूंषिविश्वानिविद्म

महा० २८

नाजिगातिस्वाहा॥ अग्नये॥२॥ अछागिरोमतयोदेवयंतीरग्निंयंतिद्रविणंभिक्षमाणाः॥
सुसंदृशंसुप्रतीकंस्वंचंहव्यवाहमरतिंमानुषाणांस्वाहा॥ अग्नये॥३॥ अग्नेत्वमस्म
द्युयोध्यमीवाअग्निंत्राअभ्यमंतकृष्टी॥ पुनरस्मभ्यंसुवितायदेवक्षांविश्वेभिरजरेभि
र्यजत्र॥ स्वाहा॥ अग्नये॥४॥ अग्नेत्वंपारयानव्योअस्मांस्वस्तिभिरतिदुर्गाणिविश्वापू
श्चपृथ्वीबहुलानउर्वीभवातोकायतनयायशंयोः स्वाहा॥ अग्नये॥ प्रकारवोमनना
वच्यमानांदेवद्रीचीनयथ्यादेवयंतः॥ दक्षिणावाड्वाजिनीप्राच्येतिहविर्भरंत्यग्नयेघृ
ताचीस्वाहा॥ अग्नये॥५॥ इत्येकसूक्तंअग्नयेकोणगणः॥ ॥सहस्रशीर्षेत्यस्याष्टदशर्च
स्यपुरुषसूक्तस्यप्रजापतिरृषिः॥ जगद्बीजःपुरुषोनारायणोवादेवताआद्याःपंच [illegible]
दशानुष्टुभः अंत्यास्तिस्रस्त्रिष्टुभः चरुहोमेविनियोगः॥ सहस्रशीर्षापुरुषः सह
स्राक्षःसहस्रपात्॥ सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं॥ स्वाहा॥ जगद्बीजायपुरुषायना

रायणायेति॥ एवमुत्तरत्रमंत्रेष्वपि॥१॥ पुरुषएवेदंसर्वंयद्भूतंयच्चभाव्यं॥ उतामृ
तत्वस्येशानोयदन्नेनातिरोहति॥ स्वाहा॥ एतावानस्यमहिमातोज्यायांश्चपूरुषः॥ पा
दोस्यविश्वाभूतानित्रिपादस्यामृतंदिविस्वाहा॥३॥ त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहा
भवत्पुनः॥ ततोविष्वङ्व्यक्रामत्साशनानशनेअभिस्वाहा॥४॥ तस्माद्विराडजाय
तविराजोअधिपूरुषः॥ सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरःस्वाहा॥५॥ य
त्पुरुषेणहविषादेवायज्ञमतन्वत॥ वसंतोअस्यासीदाज्यंग्रीष्मइध्मःशरद्धविःस्वा
हा॥६॥ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः॥ देवायद्यज्ञंतन्वानाअबध्न
न्पुरुषंपशुं॥ स्वाहा॥७॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः॥ तेनदेवाअयजंत
साध्याऋषयश्चये॥ स्वाहा॥८॥ तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यं॥ पशूंस्तां
श्चक्रेवायव्यानारण्याग्राम्याश्चये॥ स्वाहा॥९॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानि

महा० २८ जज्ञिरे॥ छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥ स्वाहा॥१०॥ तस्मादश्वा अजायं
त येच के चोभयादतः॥ गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः॥ स्वाहा॥११॥ यत्पु
रुषं व्यदधुः कतिधा व्यकल्पयन्॥ मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते स्वाहा॥१२॥
ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत स्वा
हा॥१३॥ चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिंद्रश्चाग्निश्च प्राणाद्वायु
रजायत स्वाहा॥१४॥ नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्त्तत। पद्भ्यां भूमिर्दिशः श्रो
त्रात्तथा लोकां अकल्पयन्॥ स्वाहा॥१५॥ वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमस
स्तु पारे॥ सर्वाणि रूपाणि विचिंत्य धीरो॥ नामानि कृत्वाभिवदन्यदास्ते स्वाहा॥१६॥ धा २८
ता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान्प्रदिशश्चतस्रः॥ तमेवं विद्वानमृत इह भवति
नान्यः पंथा अयनाय विद्यते॥ स्वाहा॥१७॥ यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्र

थमान्यासन्॥ ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः॥ स्वाहा॥ जगद्बी
जाय पुरुषाय नारायणायेति वा॥१८॥ इति द्वितीयं सूक्तं॥२॥ अथ यमपरोगणः॥ अ
ग्ने मन्वेति द्वाविंशर्चस्य मणारसूक्तस्य विश्वे देवा ऋषयः॥ लिंगोक्ता देवताः आदितः स
प्त उपरिष्टाज्ज्योतिषः अष्टमी चतुष्पदा पंक्तिः॥ ततः पंच उपरिष्टाज्ज्योतिष चतुर्द
शी पथ्यापंचदशी षोडशी अनुष्टुभौ सप्तदशी गायत्री ततस्त्रिष्टुभ ऊनविंशी चोपरि
ष्टाज्ज्योतिषौ अंत्ये द्वे त्रिष्टुभौ चरुहोमे विनियोगः॥ अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पां
चजन्यं बहवः समिंधते विश्वस्यां विशि प्रविविशिवांसमीमहे स नो मुंचत्वंहसः॥ स्वा
हा॥ अग्नये॥१॥ यस्येदं प्राणन्निमिषद्यदेजति॥ यस्य जातं जनमानं च केवलं॥ स्तौम्य
ग्निं नाथितो जोहवीमि स नो मुंचत्वंहसः स्वाहा॥ अग्नये॥२॥ इंद्रस्य मन्वे प्रथमस्य
प्रचेतसो वृत्रघ्नः स्तोमा उपमामुपागुः यो दाशुषः सुकृतो हवमुप गंता स नो मुंचतु

॰ हसः स्वाहा॥ इंद्राय॥३॥ यः संग्रामं नयति सं वशी युधे यः पुष्टानि सं॰ सृजति त्रयाणि
॥ स्तौमींद्रं नाथितो जोहवीमि स नो मुंचत्वं॰ हसः॥ स्वाहा॥ इंद्राय॥४॥ मन्वे वां मित्रावरुणा
तस्य वित्तं॰ सत्यौजसा द्रु॰ हणा यं नुदेथे॥ या राजानं॰ सरथं याथ उग्रा ता नो मुंचतमं
हसः॥ स्वाहा मित्रावरुणाभ्यां॥५॥ यो वां रथ ऋजुरश्मिः सत्यधर्मा मिथुश्चरंतमुपयाति
दूषयन्॥ स्तौमि मित्रावरुणा नाथितो जोहवीमि तौ नो मुंचतमागसः॥ स्वाहा मित्रावरुणा
भ्यां॥६॥ वायोः सवितुर्विदथानि मन्महे यावात्मन्वद्विशथो यौ च रक्षतः॥ यौ विश्वस्य परि
भू बभूवथुः स्तौ नो मुंचतमागसः॥ स्वाहा वायुसवितृभ्यां॥७॥ उप श्रेष्ठा न आशिषो देवयो
र्धर्मे अस्थिरन्॥ स्तौमि वायुं॰ सवितारं नाथितो जोहवीमि तौ नो मुंचतमागसः॥ स्वा
हा वायुसवितृभ्यां॥८॥ रथीतमौ रथीनामह्व ऊतये शुभं गमिष्ठौ सुयमेभिरश्वैः॥ ययो
र्वां देवौ देवेष्वनिशितमोजः स्तौ नो मुंचतमागसः स्वाहाश्विभ्यां॥९॥ यदयातं वह

तुः सूर्यां त्रिचक्रेण संसदमिच्छमानौ॥ स्तौमि देवावश्विनौ नाथितो जोहवीमि तौ नो
मुंचतमागसः॥ स्वाहाश्विभ्यां॥१०॥ मरुतां मन्वे अधि नो ब्रुवंतु प्रेमां वाचं विश्वाम
वंतु विश्वे॥ आशून् हुवे सुयमानूतये ते नो मुंचंत्वेनसः॥ स्वाहा मरुद्भ्यः॥११॥ तिग्ममायु
धं वीडितं॰ सहस्वद्दिव्यं शर्द्धः पृतनासु जिष्णु॥ स्तौमि देवान्मरुतो नाथितो जो
हवीमि ते नो मुंचंत्वेनसः॥ स्वाहा महामरुद्भ्यः॥१२॥ देवानां मन्वे अधि नो ब्रुवंतु प्रेमां
वाचं विश्वामवंतु विश्वे॥ आशून् हुवे सुयमानूतये ते नो मुंचंत्वेनसः॥ स्वाहा विश्वेभ्यो
देवेभ्यः॥१३॥ यदिदं माभिशोचति पौरुषेयेण दैव्येन स्तौमि विश्वान्देवान्नाथितो जो
हवीमि ते नो मुंचंत्वेनसः॥ स्वाहा विश्वेभ्यो देवेभ्यः॥१४॥ अनु नोद्यानुमतिर्यज्ञं देवेषु
मन्यतां॥ अग्निश्च हव्यवाहनो भवतं दाशुषे मम॥ स्वाहानुमत्यै हव्यवहे अग्न
ये॥१५॥ अन्विदनुमते त्वं मन्यासे शं च नः कृधि क्रत्वे दक्षाय नो हिनु प्र ण आयूंषि तारिष

म०हा०
३१

त्॥ स्वाहानुमत्यै॥१६॥ वैश्वानरो न ऊत्या प्रयातु परावतः॥ अग्निरुक्थेन वाहसा॥
स्वाहा॥ वैश्वानरायाग्नये॥१७॥ पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश॥ वै
श्वानरः सहसा पृष्टो॥ अग्निः स नो दिवा स रिषस्पातु नक्तं॥ स्वाहा वैश्वानरायाग्नये॥
॥१८॥ येन ऋषयो तामसि तेत्रिरो जोतिर्मे प्रतिष्ठे आजवतां वसूनां॥ द्यौर्मिथ्याद्यावापृथि वी
नाधितो जोहवीमि ते नो मुंचतमंहसः स्वाहा द्यावापृथिवीभ्यां॥१९॥ ऊवीरोदसी वृरि
वः कृणोतं क्षेत्रस्य पत्नी अधितो बभूवतुः॥ द्यौर्मिथ्याद्यावापृथिवी नाधितो जोहवीमि ते नो
मुंचतमंहसः॥ स्वाहा द्यावापृथिवीभ्यां॥२०॥ यत्ते वंयं पुरुषत्रा यविष्ठ विद्वांसश्चकृमा
कच्चनागः॥ कृधी स्वस्मां अदितेरनागा व्येनांसि शिश्रथो विष्वगग्ने स्वाहाग्नये॥२१ ३१
॥यथा ह तद्वसवो गौर्यं चित् पदि षिता ममुंचता यजत्राः॥ एवा त्वमस्मत् प्रमुंचा व्यंह
ः प्रातार्यग्ने प्रतरं न आयुः॥ स्वाहाग्नये॥२२॥ इति तृतीयं सूक्तं॥ अयं परतीयो गणः॥ ॥

यावामिंद्रावरुणे त्येषां चतुर्णां मंत्राणां विश्वे देवा ऋषयः॥ इंद्रावरुणौ देव
ते॥ चरुहोमे विनियोगः॥ यावामिंद्रावरुणा यतव्यात नूस्तयेहमंहसो मुंचतं स्वा
हा इंद्रावरुणाभ्यां॥१॥ यावामिंद्रावरुणा सहस्यात नूस्तयेहमंहसो मुंचतं स्वा
हा॥ इंद्रावरुणाभ्यां॥२॥ यावामिंद्रावरुणा रक्षस्यात नूस्तयेहमंहसो मुंचतं॥ स्वा
हा॥ इंद्रावरुणाभ्यां॥३॥ यावामिंद्रावरुणा तेजस्यात नूस्तयेहमंहसो मुंचतं॥
स्वाहा॥ इंद्रावरुणाभ्यां॥४॥ अयं चतुर्थो गणः॥ ॥ यो वामिंद्रावरुणा विस्पष्टानामजु
मंत्राणां विश्वे देवा ऋषयः॥ इंद्रावरुणौ देवते चरुहोमे विनियोगः॥ यो वामिंद्रावरुणा
वग्नौ स्रामस्तं वामेतेनावयजे॥ स्वाहा इंद्रावरुणाभ्यां॥१॥ यो वामिंद्रावरुणा द्विपात्सु
पशुषु स्रामस्तं वामेतेनावयजे॥ स्वाहा इंद्रावरुणाभ्यां॥२॥ यो वामिंद्रावरुणा चतुः
ष्पात्सु पशुषु स्रामस्तं वामेतेनावयजे॥ स्वाहा॥ इंद्रावरुणाभ्यां॥३॥ यो वामिंद्रावरु

महा०
३२

णाग्नौ स्त्रामस्तं वामे तेनावयजे स्वाहा॥ इंद्रावरुणाभ्यां॥ हे पुस्त्रामं स्तं वामे तेनावयजे॥
॥ स्वाहा इंद्रावरुणाभ्यां॥ ५॥ यो वामिंद्रावरुणावप्सु स्त्रामं स्तं वामे तेनावयजे॥ स्वाहा इंद्रा
वरुणाभ्यां॥ ६॥ यो वामिंद्रावरुणावोषधीषु स्त्रामस्तं वामे तेनावयजे॥ स्वाहा इंद्रा
वरुणाभ्यां॥ ७॥ यो वामिंद्रावरुणा वनस्पतिषु स्त्रामस्तं वामे तेनावयजे॥ स्वाहा इं
द्रावरुणाभ्यां॥ ८॥ अयं पंचमो गणः॥ ॥ पवमानः सुवर्जन इति सप्तदशर्चस्यानुवा
कस्य सोमऋषिः॥ लिंगोक्ता देवता॥ पवमानो ऽनुवर्जन इति सप्तदशर्चस्यानुवाक
स्य सोमऋषिर्वा देवताः॥ आद्ये द्वे गायत्र्यौ तृतीयानुष्टुप् चतुर्थी॥ पंचम्यौ गाय
त्र्यौ ततो द्वे अनुष्टुभौ॥ अष्टमी गायत्री ततोऽष्टावनुष्टुभः॥ सप्तदशी त्रिष्टुप् चरुहोमे ३२
विनियोगः॥ ॥ पवमानः सुवर्जनः पवित्रेण विचर्षणिः॥ यः पोता स पुनातु मा स्वा
हा पवमानाय पावमानी स्तोत्रा॥ उत्तरमंत्रेष्वपि पावमान्यै॥ इति वाउद्देशताः॥

॥ पुनंतु मा देवजनाः पुनंतु मनवो धिया॥ पुनंतु विश्वा आयवः स्वाहा॥ देवजनम
नुविश्वन्नः आयुष्मः॥ २॥ जातवेदः पवित्रवत्पवित्रेण पुनीहि माप्रुकेण देवदी
व्यत्॥ अग्ने क्रत्वा क्रतूँ२ रनु स्वाहा॥ जातवेदसे अग्नये॥ ३॥ यत्ते पवित्रमर्चिषि
अग्ने विततमंतरा॥ ब्रह्म तेन पुनीमहे॥ स्वाहा अग्नये॥ ४॥ उभाभ्यां देव सवितः
पवित्रेण सवेन च॥ इदं ब्रह्म पुनीमहे॥ स्वाहा सवित्रे॥ ५॥ वैश्वदेवी पुनती देव्या
गाद्यस्यै बह्वीस्तनवो वीतपृष्ठाः॥ तया मदंतः सधमाद्येषु वयं स्याम पतयो रयी
णां॥ स्वाहा वैश्वदेव्यै पुनत्यै॥ ६॥ वैश्वानरो रश्मिभिर्मा पुनातु वातः प्राणेनेषिरो म
योभूः॥ द्यावापृथिवी पयसा पयोभिर्ऋतावरी यज्ञिये मा पुनीतां॥ स्वाहा वैश्वानराय
वाताय इषिराय मयोभुवे द्यावापृथिवीभ्यां च॥ ७॥ बृहद्भिः सवितः स्तृभिर्वर्षिष्ठै
र्देवमन्मभिः॥ अग्ने दक्षैः पुनीहि मा॥ स्वाहा॥ सवित्रे अग्नये॥ ८॥ येन देवा अपु

ननामेनापोदिव्यंकश्चरः॥ तेनदिव्येनब्रह्मणा इदंब्रह्मपुनीमहे॥ स्वाहा दिव्यायब्र
ह्मणे॥ ८॥ यः पावमानीरध्येतिऋषिभिः संभृतंरसं॥ सर्वंसपूतमश्नातिस्व
दितंमातरिश्वना॥ स्वाहा पावमानीभ्यः॥ पावमानीर्योअध्येतिऋषिभिः संभृ
तंरसं॥ तस्मैसरस्वतीदुहेक्षीरंसर्पिर्मधूदकं॥ स्वाहा पावमानीभ्यः॥११॥
पावमानीः स्वस्त्ययनीः सुदुघाहिपयस्वती॥ ऋषिभिः संभृतोरसोब्राह्मणेष्वमृतं
हितं स्वाहा॥ पावमानीभ्यः॥१२॥ पावमानीर्दिशंतुनइमंलोकमथोअमुं॥ कामान्स
मर्धयंतुनोदेवीर्देवैः समाहृताः॥ स्वाहा॥ पावमानीभ्यः॥१३॥ पावमानीः स्वस्त्ययनी
ःसुदुघाहिघृतश्चुतः॥ ऋषिभिः संभृतोरसोब्राह्मणेष्वमृतंहितं स्वाहा॥ पावमा
नीभ्यः॥१४॥ येनदेवाः पवित्रेणात्मानंपुनतेसदा॥ तेनसहस्रधारेण पावमान्यः
पुनंतुमा॥ स्वाहा॥ पावमानीभ्यः॥१५॥ प्राजापत्यंपवित्रंशतोद्यामंहिरण्मयं॥ ३३

तेनब्रह्मविदोवयंपूतंब्रह्मपुनीमहे॥ स्वाहा॥ पावमानीभ्यः॥ प्राजापत्यायपवि
त्रायस्वाहा॥१६॥ इंद्रः सुनीतीसहमापुनातुसोमः स्वस्त्यावरुणः समीच्या॥ यमोराजा
प्रमृणाभिः पुनातुमा॥ जातवेदामूर्जयंत्यापुनातुस्वाहा॥ इंद्रायसुनीत्यासहिताय॥
स्वस्त्यासहितायसोमाय॥ समीच्यासहितायवरुणाय॥ प्रमृणाभिः सहिताययमा
यरोजसेमूर्जयंत्यासहितायजातवेदसेच॥१७॥ अयंतुपस्थेगणः॥ मदेवा देवहेड
नमित्यस्यछिद्रपवितस्यविंशत्यृचस्यानुवाकस्यविश्वेदेवाऋषयः॥ लिंगोक्तादेवताः॥ आ
द्यानुष्टुप्द्वितीयाषडवसानाजगतीमहापंक्तिस्तृतीयानुष्टुप्चतुर्थीत्रिष्टुप्॥
पंचमोसप्तपदा॥ अतिशक्वरीषष्ठीत्रिष्टुप्सप्तमीषडवसानातिजगती॥ अष्ट
मीषट्पदाजगती॥ नवमीबृहती॥ ततोद्वेषट्पदेशाक्वर्यौ॥ द्वादशीत्रिष्टुप्॥ त्रयो
दशीसप्तपदा॥ अष्टिचतुर्दशस्यनुष्टुप्॥ पंचदश्यनुष्टुप्विराट्॥ षोडशीगायत्री॥

महा०
३४
नतः॥ त्रिस्तस्त्रिष्टुभः॥ विंशात्यनुष्टुप्॥ चरुहोमे विनियोगः॥ यद्देवा देवहेडनं देवास
श्चकृमा वयं॥ आदित्यास्तस्मान्मुंचतर्त्तस्यर्त्तेन मामुत स्वाहा॥ आदित्येभ्यः॥१॥ देवा
जीवनकाम्या यद्वाचानृतमूदिम॥ अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु॥ दुरिता
यानि चकृम करोतु मामनेनसं स्वाहा॥ अग्नये गार्हपत्याय॥२॥ ऋतेन द्यावापृथिवी
ऋतेन त्वं सरस्वति। कृतान्मा मुंचतांहसो यदन्यकृतमारिम स्वाहा। द्यावापृथि
वीभ्यां। सरस्वत्यै च॥३॥ सजातशंसादुत वा जामिशंसात् ज्यायसः शंसादुत वा
कनीयसः अनाधृष्टं देवकृतं यदेनस्तस्मात्वमस्मान् जातवेदो मुमुग्धि स्वाहा। जातवे
दसे॥४॥ यद्वाचा यन्मनसा बाहुभ्यामूरुभ्यामष्ठीवद्भ्यां शिश्नैर्यदनृतं चकृमा वयं॥ ३४
अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु॥ दुरितानि यानि चकृम करोतु मामनेनसं स्वा
हा॥ अग्नये गार्हपत्याय॥५॥ यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजिघ्न

मानः॥ दूरेपश्या च राष्ट्रभृच्च तान्यप्सरसावनुदत्तामृणानि स्वाहा॥ राष्ट्रभृद्भ्यामप्सरो
भ्यः॥६॥ यददीव्यन्नृणमहं चकार यद्वा दास्यन् संजगार जनेभ्यः॥ अग्निर्मा तस्मादे
नसो गार्हपत्यः प्रमुंचतु दुरितानि यानि चकृम करोतु मामनेनसं स्वाहा॥ अग्नये गार्ह
पत्याय॥७॥ यन्मयि माता गर्भे सति एनश्चकार यत्पिता॥ अग्निर्मा तस्मादित्यादि॥
॥८॥ यदा पिपेष मातरं पितरं पुत्रः प्रमुदितो धयन्॥ अहिंसितौ पितरौ मया तत्त
दग्ने अनृणो भवामि॥ स्वाहा॥ अग्नये॥९॥ यदंतरिक्षं पृथिवीमुत द्यां यन्मातरं
पितरं वा जिहिंसिम। अग्निर्मा तस्मादित्यादि॥१०॥ यदाशसा निशसा यत्पराशं
सा यदेनश्चकृमा नूतनं यत्पुराणं॥ अग्निर्मा तस्मादित्यादि॥११॥ अतिक्रामा
मि दुरितं यदेनः जहामि रिप्रं परमे सधस्थे। यत्र यंति सुकृतो नापि दुःकृतस्तमा
रोहामि सुकृतां नु लोकं स्वाहा॥ अग्नये॥१२॥ त्रिते देवा अमृजतैतदेनस्त्रित एतन्म

महा० ३५

तुभ्येषु मा मरजे ततो मा यदि किंचिदानृते ॥ अग्निर्मा तस्मादि ॥ १३ ॥ दिविजाता अप्सुजाता
या जाता ओषधीभ्यः ॥ अथो या अग्निजा आपः ता नः शुंधंतु शुंधनीः ॥ स्वाहा ॥ अप्सु ॥ १४ ॥
यदापो नक्तं दुरितं चराम यद्वा दिवा नूतनं यत्पुराणं ॥ हिरण्यवर्णास्तत उत्पुनीत नः ॥ स्वा
हा ॥ अप्सु ॥ १५ ॥ यदापो नक्तं दुरितं चराम यद्वा दिवा नूतनं यत्पुराणं ॥ हिरण्यवर्णा
स्तत उत्पुनीत नः ॥ स्वाहा ॥ १६ ॥ इमं मे वरुण श्रुधी हवमद्या च मृडय ॥ त्वामवस्युरा च
के स्वाहा वरुणाय ॥ १७ ॥ तत्त्वा यामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः ॥
अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॥ वरुणाय ॥ १८ ॥ त्वन्नो अ
ग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानः वि ३५
श्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वाहा अग्नीवरुणाभ्यां ॥ १९ ॥ स त्वन्नो अग्नेवमो भवोती
ते दिष्ठो अस्या उषसो व्युष्टौ ॥ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न ए

धि स्वाहा अग्नीवरुणाभ्यां ॥ १९ ॥ त्वमग्ने अयास्ययासन्मनसा हितः ॥ अयासहव्यम
हिषे या नो धेहि भेषजं स्वाहा अग्नये अयसे ॥ २० ॥ अथ मन्तुवाकः सप्तमो गणः ॥ ७ ॥
वैश्वानरो न ऊत्येत्यष्टानां मंत्राणां विश्वे देवा ऋषयः वैश्वानरो देवता ॥ आद्येगा
यत्र्यौ द्वितीया जगती ततस्तिस्रस्त्रिष्टुभः सप्तमी जगती अष्टमी त्रिष्टुप् चतुर्होमे वि
नियोगः ॥ वैश्वानरो न ऊत्या प्रयातु परावतः ॥ अग्निरुक्थेन वाहसा स्वाहा ॥ अग्नये
वैश्वानराय ॥ १ ॥ ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिं ॥ अजस्रं घर्ममीमहे
स्वाहा ॥ अग्नये वैश्वानराय ॥ २ ॥ वैश्वानरस्य दंसनाभ्यो बृहदरिणादेकः स्वपस्य
या कविः ॥ उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा स्वाहा ॥ अग्नये
वैश्वानराय ॥ ३ ॥ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश ॥
वैश्वानरः सहसा पृष्टो अग्निः ॥ स नो दिवा स रिषः पातु नक्तं स्वाहा ॥ अग्नये वैश्वान

राय॥४॥जातो यदग्ने भुवना व्यख्यः पशुन्न गोपा इर्यः परिज्मा वैश्वानर ब्रह्मणे विंद गातुं यू
यं पात स्वस्तिभिः सदा नः स्वाहाग्नये वैश्वानराय॥५॥त्वमग्ने शोचिषा शोशुचान आरो
दसी अपृणा जायमानः॥ त्वं देवाँ अभिशस्तेरमुंचो वैश्वानर जातवेदो महित्वा स्वाहाग्नये वै
श्वानराय जातवेदसे॥६॥अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरं सुवीर्यं॥ व
यं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः॥ हीदिस धस्व सीवा न्नप
न्नो दमूना॥ अवासयास्त्रिभ्रुमतीरदीदेर्धर्मे विभुस्तु परिजर्जुराणः स्वाहाग्नये वैश्वा
नराय॥७॥वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः॥ इतो जातो विश्वमि
दं विचष्टे वैश्वानरो यतते सूर्येण स्वाहाग्नये वैश्वानराय॥८॥अथ मरुद्गणाः॥ इत्य ३६
ष्टाग्निगर्तेः प्रतिमंत्रं उक्तं रक्षांतं चतुर्गृणा कृत्वा जयादिहोमान्कुर्यात्॥ न वा जयादयो
भवंति॥ जयादिमंत्राः कूष्मांड होमो प्रदर्शिताः॥ यदस्य कर्मणो त्यरीरिचमित्येतदं

ताः॥ जयादिहोमपक्षे जयादिहोमानंतरं स्त्रुवेणोपस्तीर्य सकृदवदाय द्विरभिघार्य
अग्नये स्विष्टकृते स्वाहेति स्विष्टकृतं जुहुयात्॥ जयाद्यकरणपक्षे प्रधानहोमानं
तरं स्विष्टकृतं जुहुयादित्यापस्तंवमतं॥ बौधायनमते तु प्रधानचतुर्होमानंतरं अ
वदानधर्मेण स्विष्टकृतमवदाय विश्वेदेवा अभिष्टिः स्विष्टकृद्देवतावनुष्टुविराड्
छंदस्कौ याज्यानुवाक्यामंत्रौ पठित्वा जुहुयात् मंत्रौ तु॥ हव्यवाहमभिमातिषाहं
रक्षोहणं पृतनासु जिष्णुं॥ ज्योतिष्मंतं दीद्यतं दीद्यतं पुरंधिमग्निं स्विष्टकृतमाहुवेमे
मिति पुरोनुवाक्या अनन्त्वा॥ ततश्च स्विष्टकृतमग्ने अभितरणाहि विश्वादेवपत
ता अभिष्य॥ उदुत्तमः पंथां प्रदिचाभ्विनाहि ज्योतिष्मध्येस्यजरन्न आयुः स्वाहाग्नये
स्विष्टकृते॥ एवं स्विष्टकृतं कृत्वा ब्राह्मणवरणांतं तत्कर्मकुर्वीत आपस्तंवमते तु स्विष्ट
कृतं कृत्वा अन्वारब्धायामाज समिधमग्नये स्वाहेत्यग्नावाधाय रुद्राय तंतिचराय स्वाहेति इ

महा०
३१

ध्मवंधनीमपिकृत्वाप्त्वनूयाजसमिधममयेस्याहेलमाभाधायरुग्राममैतनस्यअस्यक
र्मणः प्रायश्चित्तार्थत्वेपरिधिप्रहरणान्ताव॥ प्रकारांतरत्वेतुवर्हिरंजनपरिधिप्रहरणा
स्९स्रावहोमांतंकर्मकृत्वाततः प्रायश्चित्ताहुतीर्जुहुयात्॥ संस्रावादिहोमप्रका
रोपिसमंत्रकोविश्वेभ्योदेवेभ्यः संस्रावभागेभ्यइत्यादिनाग्नयेनजयादिहोमांतरं
कूष्मांडहोमाप्रकरणेप्रदर्शितः॥ अथमंतव्यमेपिब्रह्मविसर्जनांतेकर्मणिसंहृ
तापूर्वासादितकलशमादायनैरुतींदिशंगत्वाचतुष्पथउपविश्यपादौप्रक्षाल्या
चम्यप्राङ्मुखउपविश्यकलशंपुरोनिधायतत्रपत्नीभिःसहकर्तृत्वेताभिःसहअ
थैकस्यैवकर्तृत्वेतदास्वयमेवयजमानः कलशआत्मनोरूपमवेक्षमाणोविनि ३१
र्दिष्टकमंत्रसमुदायात्मकंसिंहेमेमन्युरित्यनुवाकंवौधायनाचार्यप्रणीतकल्पसू
त्रस्थंपठेत्॥ अस्यानुवाकस्यसौत्रत्वादेवनऋष्यादयः प्रदर्शिताः॥॥ सिंहेमेम

न्युर्व्याघ्रेमेंतरामयोवृकेमेंक्षुच्छ्वेमेपिपासिर्द्वन्वतिमेपिपासाराजगृहेमेशनायाऽश्म
नियेतंद्रिर्गर्दभेमेरिरंसा॥ शार्यकेमेक्रीरम्यसोमेवेपथुःकूर्मेमेंगरोवस्तेमेऽपस्मा
ऽग्नियोमेमत्स्यन्ताररुद्येमेपाप्मासपत्नेमेनिरावृड्डकीर्नेमेऽहक्तिःपरस्वतिमेऽस
मृद्धिःखङ्गेमआर्तिर्गवयेआर्तिर्येमअंधंगोरेमेव्याधिर्मयूरेमेमत्तेशकाणोधायां
मेस्वेदोजरायांमेहिमःकृकलासाकुनौमेनारुन्ताकशेमेपापगंधउलूकेमेस्वकम्प
राःकोकेमईर्ष्यामर्कटेमेदुर्बुद्धिःकुललेमेमःस्थालत्लेमेप्रष्याउष्ट्रेमेनृनोकु
रूपमेन्नमउर्व्यामश्वाव्यंकेशामगंधःकुमार्यांमेलंकारःसूकरेमेकंदशुःपराजु
निमेस्वप्नोऽजगरेमेदुःस्वप्नोविषुतिमेस्मयौनौजाजामांमेक्रोधःशारदेमेपाप्माऽ
लक्ष्मीःस्त्रीषुमेनृतमजासुमेककशोब्रासेमइत्याभूःडेमेस्तेयंवैरूपेमेकार्मकृत्यं
राजन्यबंधुनिमेऽज्ञानंनैषादेमेब्रह्महत्याकुलिंगेमेहनवधुरुलत्लेमेविलासउ

डिणीमेवमितिः किंपुरुषुमेरोरोहोपिनिर्मेनें श्वपदस्तिनिमेकिलासः मुनिमेदुरिष्टं
स्तावृन्मेषुमेम्लेछोविदेहेब्रुमेमेध्यमस्त्रतपांमेऽब्रजस्तातुम्बरित्रमारव्युनिमे
दंतरोगोमतिकायांमेम्बृत्कृत्याः मुकेमेहरिमाममूरेमेजल्पाहषेमेजरावामेमेपा
पवादश्रमस्तुमेश्रमोब्रह्मलोजेस्तमेकिल्बिषमहोपहिपाप्मक्तत्तरपनात्रिनोनवानः
पाप्मनस्मुकृतस्मलोकोपाप्मलेसविहृतोमानर्पप्मानजहातिनमुखाजहिमोव
मंश्रन्मत्रास्मित्रास्मिन्निविश्रातः सहास्तात्तोश्रमसोमोनोदेष्टिसरिष्यतिम
पुद्रिष्मस्तमुजहीन्मनिमंत्रायस्याभस्यदित्रिदेष्योजवतितांद्रिन्नामेतामपउप
सिंचेतएष्टतः दुर्मित्रास्तस्मैभूयासुर्योस्मान्द्वेष्टियंचवयंद्विष्मइति॥ अथापउस्पृश्य
पानमनवेक्षमाणाग्रयथेतं देवयजनंप्रविशेत्॥ ततस्नायीत॥ एवंसप्ताहंत्रिषुस
वनेषुकृतांतेश्राचार्यवचनंकारयित्वा। पायसेनसर्पिषायपारांकिब्राह्मणान्भो

जयित्वातेभ्योदत्तिजहिरण्यानिदद्यात्॥ यावन्कृतंसवनत्रयेमौनीसकृधवि
ष्याशीनियतेंद्रियश्चनवेत्॥ एवंकुर्वन्सर्वेभ्यः पाप्मभ्यः प्रमुच्यते॥ ॥इतिश्रीम
हार्णवाख्येमहतिप्रबंधेमांधातृनाम्नोमदनात्मजस्य॥ सत्कर्मरत्नौघनिधिस्तती
यस्तुंगस्तरंगोयममगाद्गाढगोधः॥ ॥कर्मविपाकपरिज्ञायायांश्रासंगिकंपरिसमा
प्यप्रकृतमनुसरामः॥ अथकर्मत्वयोपायौकुष्ठव्याधिविपर्ययो॥ क्रोशासहत्वात्त
त्रापेगोदद्याश्राधिकर्शितः॥ एकांत्कृछेतिहृछूदेतिस्त्रश्चांत्रायणेव्रते॥ गवामनां
वेनिधंकवासाशीतित्रातकृछ्रदः॥ जपदानेपितस्यक्तंकूष्मांडगणहोमकृत्॥ सर्व
पापप्रमुएतल्पंमपवाधिविपर्ययः॥ इत्येतेश्लोकाः कूष्मांडहोमान्नाग्व्याख्याताः॥
तत्रापव्याधिविपर्यइत्यनेनव्याधिप्रतिकृतिदानंवसतइति॥ प्रतिज्ञातंतद्दिदानी
व्याधिप्रतिकृतिदानविधिस्तदुपयुक्तंकिंचिदाह॥ प्रतिमाद्भिः प्रकाराध्यिदेवता॥

म०ह० देवतात्मिका॥ आतंकोदेवता॥ तत्रतत्रपूज्याधिदेवता॥ प्रायेणसूर्यः॥ सर्वेषांरोगा
३८ णामधिदैवतं॥ आरोग्यंभास्करादिच्छेदितिप्रख्याश्रुतिःस्मृतिः॥ तत्रव्याधिप्रति
मायांआतंकनाम्नीदेवताभवति॥ तत्रपूज्याधिदेवता॥ तत्रव्याधिप्रतिप्रतिमाद्रव्यप
रिमाणंचाह॥ हेम्नः पलात्तदर्धार्धात्तदर्धार्धात्मकल्पयेत्॥ सूर्यप्रतिमालक्षणमाह
॥ सूर्यंद्विलोचनंपद्मेदधानंकरद्वये॥ व्याधिप्रतिमाजानुतोत्तु॥ तत्रव्याधिहरप्र
करणेपृथक्पृथगभिधास्यते॥ व्याधिभेदात्प्रतिमालक्षणान्यपिज्ञातानि॥ मंडपप
रिमाणंवेदिकापरिमाणंचाह॥ षोडशाष्टादशाष्टौवापिहस्तास्तैर्मंडपेकृते॥ तन्मा
देनोत्तरप्राच्यांहस्तोच्छ्रायांचवेदिकां॥ षोडशाष्टादशाष्टौवाहस्तास्तत्परिमितांशांति ३८
कर्मसुजंभवति॥ तैर्हस्तैः स्तसंख्याकहस्तपरिमितएवमंडपोभवेत्॥ तस्मिन्मंडपेस
तितन्मादेनमंडपस्यचतुर्थांशेनवेदिकामेमहस्तोन्नतांकुर्वीत॥ मंडपस्यपंचतु

र्थांशयामस्यचतुर्थांशायामामस्यवेदिकामानवतीत्यर्थः॥ उत्तरप्राच्यामंडपांत
रीशानदिग्विभागेस्मरणांवेदत्यास्मतदंतेशांतंकुर्वीतंसमसंधंसदाचारसुवानंद
रुणामहं॥ इरिइंमंत्रतत्रतत्रनिहत्रस्यप्रतिग्रहात्॥ आचार्यंवृणुयाच्छक्तिनम्र
ः सत्कारपूर्वकं॥ शक्तिनम्रः॥ शास्त्रतुसारेणवस्त्रालंकारादिनाचार्यमिवरूण
काजेकृत्वामध्याचार्याधीनोभवेत्॥ सशक्तिनम्रइत्युच्यते॥ सत्कारोगंधपुष्पादि
तिः पूजनं॥ आचार्यकृत्यमाह॥ कृतोपवासस्तांशांत्यौप्रतिमामधिवासयच्च॥ तांप्रति
मांरोगप्रतिमामधिदेवतारूपसूर्यप्रतिमांच॥ आतंकनाम्नीममुकव्याधिदेवताम
धिवासयच्च॥ तांप्रतिमांरोगप्रतिमामधिदेवतारूपसूर्यप्रतिमांच॥ आतंकनाम्नीममु
कव्याधिदेवतामधिवासयामीतिवेदिकायाउपरिप्रतिमांगंधपुष्पाद्यत्ते॥ रधिवासय
आतंकनाम्नेअमुकव्याधिदेवतायैनमइतिषोडशोपचारपूजांविदधीत॥ अथवाय

ष्टमाणा सौराष्ट्राक्षरमंत्रेण वा पूजयेत्॥ एवं रोगदेवतामधिवास्य अधिदैवतं सूर्यमपि
सूर्यप्रतिमायामधिवासयेत्॥ ततः सौराष्ट्राक्षरमंत्रेण पूजयेत्॥ तदनंतरकृत्यमाह॥ अ
र्द्धरात्रे तु तौ विप्रैश्चतुर्भिर्मंडपाद्बहिः॥ प्राच्यां याम्यसमां सादि बलिं निक्षिप्य मंत्रतः॥ वि
प्रैर्युतः आचार्यः बलिदानमंत्रमाह॥ आदित्या वसवो रुद्रा दैवत्ता नियन्त्रणाः॥ ब
लिना तेन दत्तेन शांतिं कुर्वंतु सर्वदा॥ इति जागरमाहुषसि स्नात्वा धारयन्वाससी नवे
निर्मले चंदनवद्युक्ते स्नुक्माल्यानुलेपनः॥ सालंकारः सपर्यां ते मंडपस्याधिवेदिकां॥
मंडपस्य सपर्यांत इत्यन्वयः॥ अधिवेदिकां वेदिकायामुपरि मंडलं चतुरस्रं वा तन्म
ध्ये अष्टदलांबुजं॥ लिखिता पिष्टचूर्णेन तत्रोपर्युपरि क्रमात्॥ तिलानां पंचचतुरैर्लि
ङ्गिर्गोणैस्त्वथाष्टभिः॥ पलैश्चतुर्भिर्द्वाभ्यां वा ताम्रपात्रं नवेत्तु वं॥ शालेयैरत्नैः सुवर्णसौ
रेणाष्टाक्षरेण तां स्थापितां पंचगव्येन वस्त्रालंकारशालिनीं॥ मंडलं चतुरस्रं वेत्यादि॥

गोमयेमंडलाकारं चतुष्कोणं वा उपलिप्ते वेदिरासकायाः एवोपरि॥ तत्रोपर्युपरि
क्रमात्॥ तत्र अष्टदलांबुजे॥ वक्ष्यमाणद्रव्याणि एकस्योपर्येकमित्येवं क्रमाद्भ
वेतीत्यर्थः॥ पंच वा चत्वारो वा पंच चत्वारो त्रयो वा चत्वारो वा पंच वा पंच वा अष्टै
वेति तिलद्रोणानां संख्या॥ अत्रायं क्रमः॥ उपलिप्ते वेदिकाप्रदेशे अष्टदलपद्मस्यो
परि उक्तसंख्याकास्तिला॥ पनीया॥ तस्मिंस्तिलराशौ उपलक्ष्योन चतुष्टयेन वा घ
टेताम्रपात्रं निक्षिपेत्॥ तस्मात्रमक्तैः पूरयेदिति॥ सौरेणाष्टाक्षरेण तां अत्र प्रति
मां च पंचगव्येन अष्टाक्षरेण प्रकारेण स्थापितां वस्त्रालंकारयुतां तां ताम्रपात्रस्योपरि
अक्षतमध्ये अष्टदलपद्मं लिखित्वा वक्ष्यमाणप्रकारेण मध्ये विन्यस्य वक्ष्यमाणं कु
र्वीतेति॥ दीप्यमानप्रभावक्त्रां सांद्रसिंदूररञ्जितां॥ पद्मे दधाने हस्ताभ्युद्घृणिः सूर्यमा
दित्यो मन्त्रस्याष्टाक्षरस्य सौरमंत्रस्य देवनागः॥ ऋषिः सूर्यो देवता गायत्री छंदः॥ अन

महा.
४१

तरन्समाह॥ प्रतिमामपि बिम्बस्य तत्र देवं दिवाकरं। दीप्यमानप्रभाचक्रं सांद्रसिंदूरसं
निभं॥ पद्मयोर्द्धयोर्हस्ताभ्यां स्मेरवक्त्रं द्विलोचनं॥ दिव्याम्बरणसंपन्नं रक्तस्रग्गंधवाससं
॥ सांगहेमारविंदस्य कर्णिकायां निवेशयेत्॥ मूलेपूर्वादिपत्राणां शुक्रांगारकबुधास्तम
॥ गुरुमंदेंदुकेतूंस्त्वनक्षत्राणि स्त्रियस्त्रियः मध्यतः पूर्वपत्राग्रे देवतां तानि बिम्ब
सेत्॥ प्रतिमामपीत्यादि अपिशब्दः समुच्चये॥ अत्रापरोगप्रतिमां दिवाकरप्रति
मां च बिम्बस्येत्यर्थः॥ सिद्धो भवति॥ सांगहेमारविंदस्येति॥ अंगानि दलानि॥ अष्टदलो
पेतसौवर्णकमलस्य कर्णिकायां मध्यभागे निवेशयेद्दिवाकरं विन्यसेदित्यर्थः॥ मू ४१
ले आदित्याग्रे तमः राहुः मध्यतः पूर्वपत्राग्रे मध्यतः कर्णिकामध्ये पूर्वपत्राग्रे पूर्व
दलस्यांते॥ अयमर्थः॥ सौवर्णकमलस्य पूर्वदलप्रथमभागे शुक्रं स्थापयेत्॥ एव
माग्नेयदलादिषु अंगारकप्रभृतीन् श्लोकपाठक्रमेण स्थापयेत्॥ कर्णिकामध्ये सूर्य

समीपे अश्विनीभरणीकृत्तिकाचेति त्रीणि नक्षत्राणि स्थापयेत्॥ पूर्वदलस्याग्रे रोहि
ण्यादीनि त्रीणि एवमुत्तरत्रापि प्रदक्षिणाकारं त्रीणि नक्षत्राणि विन्यसेदिति॥ ततः
किमित्याह॥ यथास्वनाममंत्रेण गंधपुष्पाक्षतादिभिः सर्वोपचारैस्तान्समभ्यर्च्य क्षीरा
हारं निवेदयेत्॥ नाममंत्रेणेति॥ सर्वग्रहमातपातरेण सौरमंत्रेण व्याधिप्रतिमा
माः शुक्रादिग्रहाणामश्विन्यादिनक्षत्राणां च चतुर्थ्यंतेन नमोयुक्तेन तत्र देव
तानाममंत्रेण चतुर्भिर्ऋत्विग्भिः सह तत्राचार्यः तत्रैव तिलैरात्रिसमीपे वे
दिकायां पूर्वदिग्विधान्यराशौ गबहुसमालगुणोपेतान् पंचकलशान् स्थापयेदित्या
ह॥ तत्रैव सहितो विप्रैश्चतुर्भिर्लोहितांबरान्॥ निर्व्रणांश्च वनीरथैर्युक्तांश्चामी
करेण च॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्तीर्थसंगमात्॥ राजद्वाराच्च ह्रदात्कलैर्मृ
त्तिकानां सचंदनैः॥ मृत्तिकानां ह्रदाकलैः स्वं उदित सर्वः॥ अश्वस्थानादित्यः आहृते

महा॰
४२

मृत्तिकानां शाकलैः स्नंदनसहितैर्युक्तानीत्यन्वयः॥ रोचनागुग्गुलाभ्यां च पुण्यतीर्थांबु
पूरितान्॥ पल्लवाजैः कृतमुखान् सितवस्त्रेणावेष्टितान्॥ पंचाभिषेककलशान् धान्य
राशौ विनिक्षिपेत्॥ ततः किं कुर्यादित्याह॥ आपोहिष्ठादिभिर्मंत्रैर्हिरण्येत्यादिभिस्त्रि
भिः पवमानानुवाकेन शान्त्यध्यायानुवाकतः॥ शान्तो वातानुवाकेन घोषयेच्छांतिवाचनं॥
आपोहिष्ठेति त्र्यृचस्य सिंधुद्वीप ऋषिः॥ आपो देवता गायत्री छंदः॥ शांतिपाठे विनियोगः॥
आपोहिष्ठा मयोभुवस्ता न ऊर्जे दधातन॥ महे रणाय चक्षसे॥१॥ यो वः शिवतमो रस
स्तस्य भाजयतेह नः॥ उशतीरिव मातरः॥२॥ तस्मा अरंगमाम वो यस्य क्षयाय जि
न्वथ॥ आपो जनयथा च नः॥ हिरण्यवर्णा इति त्र्यृचस्याग्निकांडांतः पातित्वनाभिर्ऋ ४२
षिः॥ आपो देवता त्रिष्टुप् छंदः॥ शांतिपाठे विनियोगः॥ हिरण्यवर्णाः शुचयः पावका
यासु जातः कश्यपो यास्विंद्रः॥ अग्निं या गर्भं दधिरे विरूपास्ता न आपः शंस्योना भ

वंतु॥१॥ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानां॥ मधुश्चुतः शुचयो याः
पावकाः स्ता आपः शं स्योना भवंतु॥२॥ यासां देवा दिवि कृण्वंति भक्षं या अंतरिक्षे बहु
धा भवंति॥ याः पृथिवीं पयसोंदंति शुक्रास्ता न आपः शंस्योना भवंतु॥३॥ ॥पवमानः
सुवर्जन इत्यस्य मनुवाको गणहोमप्रकरणे प्रदर्शितः॥ ॥शान्त्यध्यायानुवाकेनेत्यनेना
ध्यायनगणखापरिपठितयोर्द्वयां निरूपलक्ष्यते॥ अत्र च वेदक्रमेण प्रथमत इषे
त्वा॰ तिः पठनीया पश्चात्पानुपूर्वीशांतिः॥ अथाश्वलायनघोषशांते राप्या द्विविधीयंते॥
आनो भद्रा इति दशर्चं सूक्तं॥ गौतमेन राहूगणेन दृष्टं वैश्वदेवं आद्याः पंच सप्तमी च
जगत्यः षष्ठी विराट्स्थाना शेषास्त्रिष्टुभः॥ स्वस्तिनो मिमीतामिति पंचर्चं वात्रय आत्रे
येण स्वस्त्यात्रेयेण दृष्टो वैश्वदेव्यति त्रिष्टुभो द्वे अनुष्टुभौ शान्त्वेद्राग्नी इति पंचदशा
र्चं सूक्तं वसिष्ठेनार्षं वैश्वदेवं त्रैष्टुभं नरस्तोहवामिति पंचविंशत्यर्चं सूक्तं मांगिरसेन पायु

नादृष्टमाग्नेयं त्रैष्टुभं चतुरनुष्टुबंतमाशुः शिशानइतित्रयोदशर्चं सूक्तं मैंद्रं अप्रतिरथेन
दृष्टमैंद्रं त्रैष्टुभं चतुर्थी वार्हस्पत्यं सामलानुष्टुप् मारुती॥ मुंचामित्वेति पंचर्चं सूक्तं प्राजा
पत्येन यक्ष्मनाशनेनदृष्टमैंद्रं त्रैष्टुभं तमं त्यानुष्टुप्॥ अयं सुवाजिनमिति ऋचं सूक्तं अरि
ष्टनेमिना दृष्टं तार्क्ष्यं त्रैष्टुभं सर्वेषामेतेषां शांतिपाठे विनियोगः॥ एवमार्षादि वि
दित्वा शांतिपाठे देवपरत्वेन मंत्राः कृते॥ अथ मोषशांतिवर्गः॥ आनोभद्राः क्रतवो य
न्तु विश्वतोदब्धासो अपरीतास उद्भिदः। देवानो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो
दिवेदिवे॥१॥ देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभिनो निवर्त्तताम्॥ देवानांस
ख्यमुपसेदिमा वयं देवानआयुः प्रतिरंतु जीवसे॥२॥ तान्पूर्वया निविदा हूमहे वयं ४३
भगं मित्रमदितिं दक्षमस्रिधं॥ अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा
मयस्करत्॥३॥ तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः॥ तद्ग्रावाण

सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवं॥४॥ तमीशानं जगतस्तस्थुषस्पतिं धि
यंजिन्वमवसे हूमहे वयं॥ पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥५॥
स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः॥ स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्व
स्ति नो बृहस्पतिर्दधातु॥६॥ पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्म
यः॥ अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह॥७॥ भद्रं कर्णेभिः
शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम
हि देवहितं यदायुः॥८॥ शतमिन्नु शरदो अंति देवा यत्रा नश्चक्रा जरसं तनूनां॥ पुत्रासो
यत्र पितरो भवंति मानो मध्या रीरिषतायुर्गंतोः॥९॥ अदितिर्द्यौरदितिरंतरिक्षमदितिर्मा
ता स पिता स पुत्रः॥ विश्वे देवा अदितिः पंचजना अदितिर्जातमदितिर्जनित्वं॥ इदमेकं सूक्तं॥
॥ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः॥ स्वस्ति पूषा असुरो दधा

तु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥१॥ स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य
यस्पतिः ॥ बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवंतु नः ॥२॥ विश्वे देवा नो
अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये देवा अवंत्वृभवः स्वस्तये स्वस्ति नो अदिते
कृधि ॥४॥ स्वस्ति पंथामनुचरेम सूर्याचंद्रमसाविव ॥ पुनर्ददताघ्नता जानता संगमेम
हि ॥५॥ इत्येको वर्गः ॥ अत्र परिशिष्टस्य ऋग्द्वयमामनंति ॥ तद्यथा ॥ स्वस्त्ययनं तार्क्ष्य
मरिष्टनेमिं महद्भूतं वायसं देवानां ॥ असुरघ्नमिंद्रसखं समत्सु बृहद्यशो नावमिवा
रुहेम ॥१॥ अंहोमुचमांगिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यं प्रयतपाणिः शरणं
प्रपद्ये स्वस्ति संबाधेष्वभयं नो अस्तु ॥२॥ इति परिशिष्टस्य ऋग्द्वयं ॥ छ ॥ शं न इंद्राग्नी ४४
भवतामवोभिः शं न इंद्रावरुणा रातहव्या ॥ शमिंद्रासोमा सुविताय शं योः ॥ शं न इंद्रा
पूषणा वाजसातौ ॥१॥ शं नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु संतु रायः ॥ शं

नः शं सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥३॥ शं नो धाता शमु धर्त्ता
नो अस्तु शं न उरूची भवतु स्वधाभिः शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवा
नि संतु ॥३॥ शं नो अग्निर्ज्योतिरनीको अस्तु शमादित्येभिर्वरुणः सुशंसः ॥ शं नो रुद्रो
रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ॥ शं नो मित्रावरुणावश्विना शं ॥ शं नः
सुकृतानि संतु शं न इषिरो अभि वातु वातः ॥४॥ शं नो द्यावापृथिवी पूर्वहूतौ शमंतरि
क्षं दृशये नो अस्तु । शं न ओषधीर्वनिनो भवंतु शं नो रजसस्पतिरस्तु जिष्णुः ॥५॥ शं न
इंद्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ॥ शं नो रुद्रो रुद्रेभिर्जलाषः शं न
स्त्वष्टा ग्नाभिरिह शृणोतु ॥६॥ शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु संतु य
ज्ञाः ॥ शं नः स्वरूणां मितयो भवंतु शं नः प्रस्वः शं वस्तु वेदिः ॥७॥ शं नः सूर्य उरुचक्षा उदे
तु शं नश्चतस्रः प्रदिशो भवंतु ॥ शं नः पर्वता ध्रुवयो भवंतु शं नः सिंधवः शमु संत्वापः ॥८॥

म ह्रा० ४५ शन्नो अदितिर्भवतु व्रतेभिः शन्नो भवंतु मरुतः स्वर्काः ॥ शन्नो विष्णुः शमु पूषा नो अस्तु शन्नो
भवित्रं शंवस्तु वायुः ॥ ९ ॥ शन्नो देवः सविता त्रायमाणः शन्नो भवंतूषसो विभातीः ॥ शन्नः
पर्जन्यो भवतु प्रजाभ्यः शन्नः क्षेत्रस्य पतिरस्तु शंभुः ॥ १० ॥ शन्नो देवा भवंतु शं सरस्व
ती सह धीभिरस्तु ॥ शमभिषाचः शमु रातिषाचः शन्नो दिव्याः पार्थिवाः शन्नो अप्याः ॥ ११
॥ शन्नः सत्यस्य पतयो भवंतु शन्नो अर्वंतः शमु संतु गावः ॥ शन्न ऋभवः सुकृतः सुह
स्ताः शन्नो भवंतु पितरो हवेषु ॥ १२ ॥ शन्नो अज एकपाद्देवो अस्तु शन्नोहिर्बुध्न्यः शं समु
द्रः ॥ शन्नो अपां नपात्पेरुरस्तु शन्नः पृश्निर्भवतु देवगोपा ॥ आदित्या रुद्रा वसवो जुषंतेदं
ब्रह्म क्रियमाणं नवीयः ॥ शृण्वंतु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥ १४ ॥ ४५
ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ॥ ते नो रासंतामुरुगायमद्य
यूयं पात स्वस्तिभिः सदा नः ॥ १५ ॥ इदमपरं सूक्तं ॥ ॥ रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठ

ष्ठमुप यामि शर्म ॥ शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तं ॥ १ ॥ अ
योदंष्ट्रो अर्चिषा यातुधानानुपस्पृश जातवेदः समिद्धः ॥ आ जिह्वया मूरदेवान्रभ
स्व क्रव्यादो वृक्त्व्यपि धत्स्वासन् ॥ २ ॥ उभोभयाविन्नुपधेहि दंष्ट्रा हिंस्रः शिशानोव
रं परं च ॥ उतांतरिक्षे परि धेहि राजन् जंभैः संधेह्यभि यातुधानान् ॥ ३ ॥ यज्ञैरि
षूः संनममानो अग्ने वाचा शल्याँ अशनिभिर्दिहानः ॥ ताभिर्विध्य हृदये यातुधाना
न्प्रतीचो बाहून्प्रति भंध्येषां ॥ ४ ॥ अग्ने त्वचं यातुधानस्य भिंधि हिंस्राशनिर्हरसा हं
त्वेनं प्र पर्वाणि ॥ जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णं ॥ ५ ॥ यत्रेदानीं प
श्यसि जातवेदस्तिष्ठंतमग्न उत वा चरंतं ॥ यद्वांतरिक्षे पथिभिः पतंतं तमस्ता विध्य श
र्वा शिशानः ॥ ६ ॥ उतालब्धं स्पृणुहि जातवेद आलेभानादृष्टिभिर्यातुधानात् ॥ अग्ने
पूर्वो नि जहि शोशुचान आमादः क्ष्विंकास्तमदंत्वेनीः ॥ ७ ॥ इह प्र ब्रूहि यतमः सो

महा०
४६

अग्ने यो यातुधानो य इदं कृणोति। तमारभस्व समिधा यविष्ठ नृचक्षसश्चक्षुषे रंधयैनं॥८॥
तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञं प्रांचं वसुभ्यः प्रणय प्रचेतः॥ हिंस्रं रक्षांस्यभि शोशुचानं
मा त्वा दभन्यातुधाना नृचक्षः॥९॥ नृचक्षा रक्षः परि पश्य विक्षु तस्य त्रीणि प्रति शृणी
ह्यग्रा। तस्याग्ने पृष्टीर्हरसा शृणीहि त्रेधा मूलं यातुधानस्य वृश्च॥१०॥ त्रिर्यातुधानः प्र
सितिं त एत्वृतं यो अग्ने अनृतेन हंति। तमर्चिषा स्फूर्जयं जातवेदः समक्षमेनं गृणते नि
वृङ्धि॥११॥ तदग्ने चक्षुः प्रति धेहि रेभे शफारुजं येन पश्यसि यातुधानं॥ अथर्ववज्
ज्योतिषा दैव्येन सत्यं धूर्वंतमचितं न्योष॥१२॥ यदग्ने अद्य मिथुना शपातो यद्वाचस्तृ
ष्टं जनयंत रेभाः॥ मन्योर्मनसः शरव्या जायते या तया विध्य हृदये यातुधानान्॥१३॥ ४६
परा शृणीहि तपसा यातुधानान्पराग्ने रक्षो हरसा शृणीहि परासुतृपो अभि शोशुचा
नः॥१४॥ परा देवा वृजिनं शृणंतु प्रत्यगेनं शपथा यंतु तृष्टाः॥ वाचास्तेनं शरव ऋ

च्छंतु मर्मन्विश्वस्यैतु प्रसितिं यातुधानः॥१५॥ यः पौरुषेयेण क्रविषा समंक्ते यो अश्व्येन
पशुना यातुधानः॥ यो अघ्न्याया भरति क्षीरमग्ने तेषां शीर्षाणि हरसापि वृश्च॥१६॥
संवत्सरीणं पय उस्रियायास्तस्य माशीद्यातुधानो नृचक्षः॥ पीयूषमग्ने यतमस्तितृ
प्सात्तं प्रत्यंचमर्चिषा विध्य मर्मन्॥१७॥ विषं गवां यातुधाना पिबंत्वा वृश्च्यंतामदितये दुरे
वाः परैनान्देवः सविता ददातु परा भागमोषधीनां जयंतां॥१८॥ सनादग्ने मृणसि यातुधाना
न्न त्वा रक्षांसि पृतनासु जिग्युः॥ अनु दह सहमूरान्क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः॥
॥१९॥ त्वं नो अग्ने अधरादुदक्तात्त्वं पश्चादुत रक्षा पुरस्तात्॥ प्रति ते ते अजरासस्तपि
ष्ठा अघशंसं शोशुचतो दहंतु॥ पश्चात्पुरस्तादधरादुदक्तात्कविः काव्येन परि पाहि
राजन्॥ सखे सखायमजरो जरिम्णेऽग्ने मर्ताँ अमर्त्यस्त्वं नः॥२१॥ परि त्वाग्ने पुरं वयं
विप्रं सहस्य धीमहि॥ धृषद्वर्णं दिवेदिवे हंतारं भंगुरावतां॥२२॥ विषेण भंगुरावतः प्र

मह्०

तिग्मरक्षसो दह ॥ अग्ने तिग्मेन शोचिषा तपुरग्राभिर्ऋष्टिभिः ॥२३॥ प्रत्यग्ने मिथुना दह
यातुधाना किमीदिना ॥ संत्वा शिशामि जागृह्यदब्धं विप्र मन्मभिः ॥२४॥ प्रत्यग्ने हरसा ह
रः शृणीहि विश्वतः प्रति यातुधानस्य रक्षसो बलं विरुज वीर्यं ॥२५॥ एतदंतम परसूक्त
॥ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनां ॥ संक्रंदनोनिमिष ए
कवीरः शतं सेना अजयत्साकमिंद्रः ॥१॥ संक्रंदनेनानिमिषेण जिष्णुना युत्कारेण दु
श्च्यवनेन धृष्णुना ॥ तदिंद्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥२॥ स इषुहस्तैः
स निषंगिभिर्वशी संस्रष्टा स युध इंद्रो गणेन ॥ संसृष्टजित्सोमपा बाहुशर्ध्युग्रध
न्वा प्रतिहिताभिरस्ता ॥३॥ बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ॥ प्र ४१
भंजन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां ॥४॥ बलविज्ञाय स्थविरः प्र
वीरः सहस्वान्वाजी सहमान उग्रः ॥ अभिवीरो अभिसत्वा सहोजा जैत्रमिंद्र रथमा

तिष्ठ गोवित् ॥५॥ गोत्रभिदं गोविदं वज्रबाहुं जयंतमज्म प्रमृणंतमोजसा ॥ इमं सजा
ता अनु वीरयध्वमिंद्रं ॥ सखायो अनु संरभध्वं ॥६॥ अभि गोत्राणि सहसा गाहमानोऽद
यो वीरः शतमन्युरिंद्रः ॥ दुश्च्यवनः पृतनाषाळयुध्योऽस्माकं सेना अवतु प्र युत्सु
॥७॥ इंद्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ॥ देवसेनानामभिभंजतीनां ज
यंतीनां मरुतो यंत्वग्रं ॥८॥ इंद्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रं ॥ म
हामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥९॥ उद्धर्षय मघवन्नायुधान्यु
त्सत्वनां मामकानां मनांसि ॥ उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यंतु
घोषाः ॥१०॥ अस्माकमिंद्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयंतु ॥ अस्माकं वी
रा उत्तरे भवंत्वस्माँ उ देवा अवता हवेषु ॥११॥ अमीषां चित्तं प्रतिलोभयंती गृ
हाणांग्यप्वे परेहि ॥ अभि प्रेहि निर्दह हृत्सु शोकैरंधेनामित्रास्तमसा सचंतां ॥१२॥ प्रे

महा० ४८

ताजयतानरइंद्रोवःशर्मयच्छतु॥ उग्रावःसंतुबाहवोनाधृष्यायथासथ॥०॥३॥ एतदंतम
न्तत्सूक्तं॥ ॥मुंचामित्वाहविषाजीवनायकमज्ञातयक्ष्मादुतराजयक्ष्मात्॥ ग्राहिर्जग्राह
यदिवैतदेनंतस्याइंद्राग्नीप्रमुमुक्तमेनं॥१॥ यदिक्षितायुर्यदिवापरेतोयदिमृत्योरंतिकं
नीतएव॥ तमाहरामिनिर्ऋतेरुपस्थादस्पार्षमेनंशतशारदाय॥२॥ सहस्राक्षेणशत
शारदेनशतायुषाहविषाहार्षमेनं॥ शतंयथेमंशरदोनयातींद्रोविश्वस्यदुरित
स्यपारं॥३॥ शतंजीवशरदोवर्धमानःशतंहेमंतांछतमुवसंतान्॥ शतमिंद्राग्नीस
विताबृहस्पतिःशतायुषाहविषेमंपुनर्दुः॥४॥ आहार्षंत्वाविदंत्वापुनरागाःपुनर्नव
॥ सर्वांगसर्वंतेचक्षुःसर्वमायुश्चतेविदं॥ इदमन्यत्सूक्तं॥ त्यमूषुवाजिनंदेवजूतं ४८
सहावानंतरुतारंरथानां॥ अरिष्टनेमिंपृतनाजमाशुंस्वस्तयेतार्क्ष्यमिहाहुवेम॥१॥
इंद्रस्येवरातिमाजोहुवानाःस्वस्तयेनावमिवारुहेम॥ उर्वीनपृथ्वीबहुलेगंभीरेमावा

मेतौमापरेतौरिषाम॥२॥ सद्यश्चिद्यःशवसापंचकृष्टीःसूर्यइवज्योतिषापस्ततान॥ स
हस्रसाःशतसाअस्यरंहिर्नस्मावरंतेयुवतिंनशार्यां॥३॥ एतदेकंसूक्तं॥ अत्रसंहि
तावसानत्रागस्त्यंकृण्वंयंपरिछिंदंपवित्वानमोब्रह्मणइत्यादिकंपठंति॥ ॥तद्यथा॥ ॥
तच्छंयोराहृणीमहेगातुंयज्ञायगातुंयज्ञपतयेदैवीस्वस्तिरस्तुनःस्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वंजि
गातुभेषजंशंनोअस्तुद्विपदेशंचतुष्पदे॥ नमोब्रह्मणेनमोस्त्वग्नयेनमःपृथिव्यैनमओ
षधीभ्यः॥ नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेकरोमीसेतत्रिःपठेत्॥ शंनोअ
पिवातयमनःशांतिःशांतिः॥ ॥इत्याप्लावनीयघोषशांतिः॥ ॥अपनेतैत्तिरीयाणांघो
षशांतिः॥ ॥तत्रशंनोवातःपवतामित्यस्यानुवाकस्यसोमकांडंतःपातित्वात्सोमऋ
षिः॥ वातादयोलिंगोक्तादेवताः॥ आद्याषट्पदाजगतीद्वितीयागायत्री॥ इडामीवास्त्वग्नी
तिप्रतिष्ठासीतिचद्वेयजुषी॥ आवातवाहीतिद्वेअनुष्टुभौ॥ यदहोवाततइतिपंचदशपं

म०न्या०
५८

क्षिः॥ वातस्त्वा वायविति देवता यजुरौ प्रपद्य इति अन्तरिक्षं मह इति प्राणापोनाविति चत्वारि यजूं
षि॥ धुतिरक्तत्रिरिति त्रिष्टुप्॥ कयानश्चित्र इति तिस्रो गायत्र्यः॥ वयः सुपर्णा योनाविति
चत्वारि यजूंषि॥ धुतिरिति त्रिष्टुप्॥ कयानश्चित्र इति तिस्रो गायत्र्यः॥ वयः सुपर्णा इ
ति त्रिष्टुप्॥ शन्नो देवीति देवी गायत्र्या॥ सुमित्रिया न इति दुर्मित्रिया इति च द्वे यजुषी॥ आपो हि ष्ठेति
तिस्रो गायत्र्यः॥ पृथिवी शान्ता तेति अन्तरिक्षं शान्तं नमिति द्यौः शान्ता ति पृथिवी शान्ति रिति ते या हं
शांत्वेति राहस्री स्त्वेति च यजूंषि उदायुषे त्यनुष्टुप्॥ तच्चक्षुरिति सा कृतिः॥ य उदगादि
ति पंक्तिश्छन्दः छन्दः॥ ब्रह्मणस्पोतस्मसीति यजुरादिका॥ मा महेदो धीति एक पदा गाय
त्री मेधा मनीषेति यजुः॥ आजिगीत्रिरित्यनुष्टुप्॥ ब्रह्म प्रावादिष्मेय यजुः॥ शान्ति पाठे विनि ५८
योगः॥ ॥अथ शान्त्यनुवाकः॥ ॥शन्नो वातः पवतां मातरिश्वा शन्नस्तपतु सूर्यः॥ अह
नि शं भवन्तु नः शं रात्रीः प्रतिधीयतां शमुषा नो व्युच्छतु शमादित्य उदेतु नः॥१॥ शिवा नः शं

तमा नव सुमृडीका सरस्वति॥ मा ते व्योम संदृशि॥२॥ इडायै वास्त्वसि वास्तुमद्वास्तुम
न्तो भूयास्म मा वास्तोश्छित्स्मह्यवास्तुः स भूयाद्यो स्मान्द्वेष्टि यं च वयं द्विष्मः॥३॥ प्रतिष्ठा
प्रतिष्ठावन्तो भूयास्म प्रतिष्ठायाः छित्स्मह्य॥ प्रतिष्ठः स भूयाद्यो स्मान्द्वेष्टि यं च वयं द्विष्म
ः॥४॥ आ वात वाहि भेषजं वि वात वाहि यद्रपः॥ त्वꣳ हि विश्वभेषजो देवानां दूत ईय
से॥५॥ द्वाविमौ वातौ वात आ सिंधोरा परावतः॥ दक्षं मे अन्य आवातु परान्यो वातु
यद्रपः॥६॥ यददो वात ते गृहेऽमृतस्य निधिर्हितः॥ ततो नो देहि जीवसे ततो नो धे
हि भेषजं॥ ततो नो मह आवह॥७॥ वात आ वातु भेषजं शंभूर्मयोभूर्नो हृदे॥ प्रण आ
यूंषि तारिषत्॥८॥ इंद्रस्य गृहोऽसि तं त्वा प्रपद्ये सगुः साश्वः सह यन्मे अस्ति तेन॥ भूः
प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवः सुवः प्रपद्ये वायुं प्रपद्येऽनार्तां देवतां प्रपद्ये
अश्मानमाखणं प्रपद्ये प्रजापतेर्ब्रह्मकोशं ब्रह्म प्रपद्य उं प्रपद्ये॥१०॥ अंतरिक्षं म उर्वंतरं

दृंहं त्नम॥ पर्वताश्च मामावाताः स्वस्त्यास्वस्तिमां तथास्वस्त्यास्वस्तिमानसानि॥ ११॥ प्राणा
पानौ मृत्योर्मापातम्प्राणापानौ मामाहासिष्टं मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु म
यि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु॥ १२॥ द्युभिरक्तुभिः परिपातमस्मानरिष्टेभि
रश्विना सौभगेभिः॥ तन्नो मित्रो वरुणो मामहन्तामदितिः सिंधुः पृथिवी उत द्यौः॥ १३॥
कया नश्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृता॥ १४॥ कस्त्वा सत्यो
मदानां मंहिष्ठो मत्सदंधसः दृढा चिदारुजे वसु॥ १५॥ अभी षुणः सखीनामविता ज
रितृणां॥ शतं भवास्यूतये॥ १६॥ वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमा
नाः॥ अप ध्वांतमूर्णुहि पूर्द्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान्॥ १७॥ शन्नो देवीर
भिष्टय आपो भवंतु पीतये॥ शंयोरभिस्रवंतु नः॥ १८॥ ईशाना वार्याणां क्षयंतीश्चर्षणी
नां॥ अपो याचामि भेषजं॥ १९॥ सुमित्रा न आप ओषधयः संतु॥ २०॥ दुर्मित्रास्तस्मै

न्तु यो स्मान्द्वेष्टि यं च वयं द्विष्मः॥ २१॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन॥ म
हे रणाय चक्षसे॥ २२॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः॥ उशतीरिव मातरः॥ २३॥
तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ २४॥ पृथिवी शांता सा
ग्निना शांता सा मे शांता शुचं शमयतु॥ २५॥ अंतरिक्षं शांतं तद्वायुना शांतं तन्मे शांतं शुचं
शमयतु॥ २६॥ द्यौः शांता सादित्येन शांता सा मे शांता शुचं शमयतु॥ २७॥ पृथिवी शांतिरंतरिक्षं
शांतिर्द्यौः शांतिरवांतरदिशाः शांतिरग्निः शांतिर्वायुः शांतिरादित्यः शांतिश्चंद्रमाः शां
तिर्नक्षत्राणि शांतिरापः शांतिरोषधयः शांतिर्वनस्पतयः शांतिर्गौः शांतिरजा शांतिरश्व
: शांतिः पुरुषः शांतिर्ब्रह्म शांतिर्ब्राह्मणः शांतिः शांतिरेव शांतिः शांतिर्मे अस्तु शांतिः
॥ २८॥ तयाहं शांत्या सर्वशांत्या मह्यं द्विपदे चतुष्पदे च करोमि शांत्या सर्व शांत्या मह्यं
ति शांतिर्मे अस्तु शांतिः॥ २९॥ एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं

धर्मश्चैतानि मोत्तिष्ठन्तमनुत्तिष्ठंतु मां श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं ध
र्मश्चैतानि मामा हासिषुः॥३०॥ उदायुषा स्वायुषोदोषधीनां रसेनोत्पर्जन्यस्य शुष्मेणो
दस्थाममृतां अनु॥३१॥ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवे
म शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं ज्यो
क्च सूर्यं दृशे॥ य उदगान्महतोर्णवाद्विभ्राजमानः सरिरस्य मध्यात्स माहृषभो रोहिता
क्षः सूर्यो विपश्चिन्मनसा पुनातु॥३३॥ ब्रह्मणश्चोतमसि ब्रह्मण आणीस्थो ब्रह्मण आ
वपनमसि धारितेंद्रं पृथिवी ब्रह्मणा मही धोधिस्तसत्॥३४॥ मेधा मनीषे मा विशतां स
मीचीन् तस्य नव स्यावरुध्यै सर्वमायुरयाणि॥३५॥ आत्मिगीर्भिर्यदतो न जनमाप्या ५१
य यहरि वोवर्द्धमानः॥ मदास्तेदस्तोमदिगोत्रारुजासिन्नुपिएताजो अधतेस्याम॥
३६॥ ब्रह्मप्रवादिष्मतन्नोमा हासीत्॥३७॥ ॐ शांतिः शांतिः॥ ॥इतिते राय घोष शां

तिः॥ ॥अथ प्रासंगिकं परिसमाप्य प्रकृतमनुसरामः॥ पंचाग्निषेककलशान् धा
न्यराशौ विनिक्षिपेत्॥ आपो हि ष्ठादिभिर्मंत्रैर्हिरण्यवर्णादिभिस्तिसृभिः॥ पवमानानु
वाकेन शान्न इंद्रानुवाकतः॥ शन्नो वातानुवाकेन शान्न इंद्रानुवाकतः॥ शन्नो वातानु
वाकैन घोषयेच्छांतिवाकैश्च नमिष्कक्क मधुनात्तदनंतरं कृत्वा मा हविर्धायकत्वे ब्राह्मणांश्च
तुरो ब्राह्मणान् जपेत्॥ अनुत्तेनामितैर्वारेरर्ड्ढं नचरणेन वा॥ देवतालिंगमंत्राणां एताते
:परिचारिते॥ आग्नेय्यां दिशि कुंडे वा स्थंडिले वा कृताशनं॥ स्थापयित्वा स्वगृह्योक्तमु
क्त्वाकं समिधा हविः॥ ससंपाद्य ततः पात्रासमवसिच्यानि घार्यं च चरुं तिलांश्च सर्वं हुं
त्वा स्वतंत्रमुदाहरन्॥ वारान् सहस्रं वाष्टशतमष्टाविंशतिमेव वा॥ कृत्वा पूर्णाहुतिं चां
ते प्रणीतामोक्षमाचरेत्॥ विधायकत्वे ब्रह्माणमित्यादि विधायत्वे ब्राह्मणां दत्वा तथा दे
वतालिंगमंत्राणां जपे चतुरो ब्राह्मणान्वरयेत्स्वयं॥ विधायकत्वमुपदृष्टं॥ ब्रह्मासु

पञ्चाशद्भवति॥ ब्रह्मवरणं न केवलं॥ वरुणमाणहोमकर्मार्थमपि तु विशिष्टसकलकर्मा
र्थमपि देवतालिंगमंत्राणामिति बहुवचनान्मंत्रबहुत्वमवगम्यते॥ मूलमंत्रश्च घृणिः
सूर्य इत्येकएव दर्शितः॥ तस्मादयमभिप्रायः॥ रोगप्रतिमादाने सर्वत्र सूर्यएवाधिदेव
ता॥ व्याधिनां निघ्नत्वात्॥ अतश्च जलरोगादिषु वरुणादयो देवतास्तद्वंतीनि तदभिप्राये
ण मंत्राणामिति बहुत्वं॥ किं च एकस्मिन्नपि कर्मणि आतंकसूर्यादिग्रहनक्षत्राणां प्रस
क्तात्तदभिप्रायेणापि मंत्राणामिति बहुवचनं॥ अत एव मूलमंत्रजपे चतुरो ब्राह्मणान्
वृणीत इतरमंत्रजपे त्वेकमेकं यथासंभवं वा तत्र जपसंख्यामाह॥ अयुतेनामितैरित्या
दिना॥ अयुतेन वारैः अयुतार्द्धेनेत्यर्थः॥ अमितैर्वा वारैः॥ अयुताधिकैर्वेत्यर्थः॥ अर्धे ५२
न अयुतार्द्धेन॥ चरणेन अयुतपादेन॥ इयं च संख्या प्रधानमंत्रजपे सूर्यव्यतिरिक्ते
रग्रहाणां तत्तन्मंत्रजपे तु शास्त्रानुसारेण प्रधानमंत्रजपसंख्यातो न्यूनसंख्या कल्पा

॥ तैः परिच्छादित इति॥ तैराचार्यब्रह्मप्रभृतिभिः॥ कुंडे वा॥ स्थंडिले वा परिश्चारिते परि
कल्पिते तत्र हुताशनं स्थापयित्वेत्यन्वयः॥ अर्कसमिधो हविः तत्संपाद्येति तस्मिन्हो
मे अर्कसमिधो भवंति हविश्च भवति॥ हविर्नामाज्यं चरुश्च॥ तत्संपाद्य आज्यस्य संपाद
नं स्वगृह्योक्तप्रकारेण संस्कारः चरोस्तु या देवता यष्टव्या तत्संबंधित्वेन चतुरो मुष्टी
न्निर्वपतीत्यादिविधिना निरूप्य श्रपणं॥ संपादनं॥ ततः पात्र्यामवसिच्याभिघार्य ततः
पाकानंतरं पात्र्यां चरुस्थाल्यां अवसिंच्याभिघार्य तदनंतरं चरुमुत्तरतउद्वास्याऽ
भिघार्य च प्रत्यभिघार्य समिधो हुत्वा आज्यं च हुत्वा ततश्चरुं तिलांश्च जुहुयात्॥ सा
हां तन्मूलमंत्रमुपाहरत्॥ मूलमंत्रः व्यावाप्यादि व्याधिप्रतिमादेवतानुतत्तवायुवरुणा
दि देवताप्रकाशको मंत्रः॥ आरोग्यं भास्करादिच्छेद्धनमिच्छेदिति वचनाद्धिदेवता
रूपस्य सूर्यप्रकाशकः॥ प्रागभिहितो घृणिः सूर्य इत्येषाक्षरमंत्रोपि मूलमंत्रः॥ होम

संख्यामाह॥ वैरागसहस्रं चाष्टशतमष्टाविंशतिमेव चेति॥ अत्र प्रधानहोमो व्याधिप्र
तिमादेवतोद्देशेन होमः सूर्योद्देशेन होमश्च॥ अतः सूर्यव्यतिरिक्तग्रहहोमे च प्रधानहो
मापेक्षया न्यूनसंख्या परिकल्प्या कृत्वा पूर्णाहुतिं चांते प्रणीतामोक्षमाचरेत्॥ एवं पूर्वो
क्तप्रकारेण कृत्वांते पूर्णाहुतिमपि वक्ष्यमाणमंत्रैर्हुत्वा प्रणीतामोक्षं पूर्णपात्रवि
मोकं कुर्यात्॥ ॥ अथ देवतालिंगमंत्राणामित्यनेन पदेन सविता मंत्राः प्रदर्श्यंते॥ तत्र
मूले पूर्वादिपत्राणां शुक्रांगारबुधास्तमः गुरुमंदेंदुकेतुश्च नक्षत्राणि त्रिंशः स्त्रि शा
न्येतद्वचनोपात्तक्रमेण ग्रहमंत्राः प्रदर्श्यंते॥ व्याधिप्रतिमादाने देवतावासुचरुणादि
रूपात देवताप्रकाशको वैदिको मंत्रोऽयास्यः॥ अथवा सर्वत्र व्याधिप्रतिमादाने सौ
रमंत्र एव न्यासः॥ स च पूर्वोक्तो घृणिः सूर्य इत्येष अष्टाक्षरो मंत्रः॥ उद्यन्नद्येत्यृचो वा॥ उ
द्यन्नद्येति ऋचस्य प्रस्कण्व ऋषिः सूर्यो देवता अनुष्टुप् छंदः॥ जपे विनियो ५३

गः॥ विनियोगस्य क्रियमाणजपहोमपूजादिभेदेन पार्थक्यं भवति॥ उद्यन्नद्य मित्रम
ह आरोहन्नुत्तरां दिवं॥ हृद्रोगं मम सूर्य हरिमाणं च नाशय॥ शुकेषु मे हरिमाणं रो
पणाकासु दध्मसि॥ अथो हारिद्रवेषु मे हरिमाणं निदध्मसि॥ उदगादयमादित्यो वि
श्वेन सहसा सह द्विषंतं मह्यं रंधयन्मो अहं द्विषते रधं इत्यस्य अंच सौरमंत्रः॥ शुक्रं
ते अन्यदिति शुक्रमंत्रस्य नरद्वाज ऋषिः शुक्रो देवता त्रिष्टुप् छंदः॥ पूजादौ विनि
योगः॥ एवमुत्तरत्रापि विनियोगो ज्ञेयः॥ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अ
हनी द्यौरिवासि॥ विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु॥ ॥ अ
ग्निर्मूर्द्धेति अंगारकमंत्रस्य विरूप ऋषिः अंगारको देवता गायत्री छंदः॥ अग्निर्मू
र्द्धा दिवः ककुत्पतिः पृथिव्या अयं अपां रेतांसि जिन्वति॥ ॥ उद्बुध्यस्वेति बुधमंत्र
स्य अग्निर्ऋषिः बुधो देवता त्रिष्टुप् छंदः॥ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सं

महा॰
५४

॰ सजेषामयंवस्य अग्निपुनः कराबेस्तापितरं सुवानमन्यातांसीतयितंतुमेधां॥ ॥
कयानश्चित्र इत्यस्य राहुमंत्रस्य वामदेवऋषिः॥ राहुर्देवता गायत्री छंदः॥ कया
नश्चित्रआभुवदूती सदावृधः॥ सखाकयाशचिष्ठयावृता॥ ॥ बृहस्पते अती यस्से
तिमंत्रस्य गृत्समदऋषिः॥ बृहस्पतिर्देवता त्रिष्टुप्छंदः॥ बृहस्पते अतियदर्यो अर्हा
द्युमद्विभाति क्रतुमज्जनेषु॥ यद्दीदयच्छवसऋतप्रजात तदस्मासु द्रविणं धेहि चित्रं
॥ ॥ शन्नोदेवीरिति शनैश्चरमंत्रस्य सिंधुद्वीपऋषिः शनिर्देवता गायत्री छंदः॥ शं
नोदेवीरभिष्टय आपो भवंतु पीतये॥ शंयोरभिस्रवंतु नः॥ ॥ आप्यायस्वेति सोममं
त्रस्य गौतमऋषिः॥ सोमो देवता गायत्री छंदः॥ आप्यायस्व समेतु ते विश्वतः सोम ५४
वृष्ण्यं भवा वाजस्य संगथे॥ ॥ केतुं कृण्वन्निति त्री केतुमंत्रस्य मधुच्छंद ऋषिः॥ के
तवो देवता गायत्री छंदः॥ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे॥ समुषद्भिरजा

यथाः॥ ॥ इति ग्रहमंत्राः॥ ॥ अथ नक्षत्रमंत्राः॥ तत्र तेषामार्षाद्यभिधीयंते॥ अ
ग्निर्नः पातु कृत्तिकेत्यादीनां नक्षत्रेष्टिपरिपठितानां मंत्राणां विश्वेदेवा ऋषयः॥ अ
मत्ताग्निः प्रजापतिः सोमरुद्र अदितिर्बृहस्पतिः सर्पाः पितरोर्यमाभगः॥ सविता
त्वष्टा वायुरिंद्राग्नी मित्र इंद्रः प्रजापतिर्गुणाविद्विष्टानिर्ऋतिरापो विश्वेदेवा ब्रह्मा वि
ष्णुर्वसवो वरुणो अजैकपादहिर्बुध्न्यः॥ पूषाश्विनौ यमः॥ इति देवताः॥ त्रिष्टुप्
छंदः॥ आद्यानुष्टुप्छंदः॥ आद्यानुष्टुप्॥ पुरंदरामेति जगती जपे विनियोगः॥
अत्र यद्यत्कर्म होमादिक कर्तव्यं भवति तत्र तत्कर्मणि होमादौ विनियोगो वाच्यः॥
अथ मंत्राः॥ अग्निर्नः पातु कृत्तिका नक्षत्रं देवमिंद्रियं॥ इदमासां विचक्षणं हवि
रासं जुहोतन॥ ॥ यस्य भांति रश्मयो यस्य केतवः॥ यस्येमा विश्वा भुवनानि स
र्वाः स कृत्तिकाभिरभिसंवसानः अग्निर्नो देवः सुविते दधातु॥ १॥ प्रजापते मे रो

म.हा० हिणी वेतुपत्नी विश्वरूपा बृहती चित्रभानुः॥ सो नो यज्ञस्य सुविते दधातु यथा जीवे
५५ म शरदः सुवीराः॥३॥ रोहिणी देव्युदगात्पुरस्तात्॥ विश्वारूपाणि प्रतिमोदमाना॥ प्रजा
पतिं हविषा वर्द्धयंती॥ प्रिया देवानामुपयातु यज्ञं॥४॥ सोमो राजा मृगशीर्षेण आग
न्॥ शिवं नक्षत्रं प्रियमस्य धाम॥ आप्यायमानो बहुधा जनेषु॥ रेतः प्रजां यजमाने दधा
तु॥५॥ यत्ते नक्षत्रं मृगशीर्षमस्ति॥ प्रियं राजन्प्रियतमं प्रियाणां॥ तस्मै ते सोम हविषा
विधेम॥ शन्न एधि द्विपदे शं चतुष्पदे॥६॥ आर्द्रया रुद्रः प्रथमान एति॥ श्रेष्ठो देवानां पतिरघ्न्या
नां॥ नक्षत्रमस्य हविषा विधेम॥ मा नः प्रजां रीरिषन्मोत वीरान्॥७॥ हेती रुद्रस्य परिणो
वृणक्तु॥ आर्द्रा नक्षत्रं जुषतां हविर्नः॥ प्रमुंचमानो दुरितानि विश्वा॥ अपाघशंसं नुदता ५५
मरातिं॥ पुनर्नो देव्यदितिः स्पृणोतु॥ पुनर्वसू नः पुनरेतां यज्ञं॥ पुनर्नो देवा अभियंतु स
र्वे॥ पुनः पुनर्वो हविषा यजामः॥८॥ एवा न देव्यदितिरनर्वा॥ विश्वस्य भर्त्री जगतः प्रति

ष्ठा॥ पुनर्वसो हविषा वर्द्धयंती॥ प्रियं देवानामप्येतु पाथः॥१०॥ बृहस्पतिः प्रथमं जा
यमानस्तिष्यं नक्षत्रमभि संबभूव॥ श्रेष्ठो देवानां पृतनासु जिष्णुः॥ दिशोनु सर्वा अभयं
नो अस्तु॥११॥ तिष्यः पुरस्तादुत मध्यतो नः॥ बृहस्पतिर्नः परिपातु पश्चात्॥ बाधेतां द्वे
षो अभयं कृणोतु॥ सुवीर्यस्य पतयः स्याम॥१२॥ इदं सर्पेभ्यो हविरस्तु जुष्टं॥ आश्रेषा येषा
मनुयंति चेतः॥ ये अंतरिक्षं पृथिवीं क्षियंति॥ ते नः सर्पासो हवमागमिष्ठाः॥१३॥ ये रोच
ने सूर्यस्यापि सर्पाः॥ ये दिवं देवीमनुसंचरंति॥ येषामाश्रेषा अनुयंति कामं॥ तेभ्यः स
र्पेभ्यो मधुमज्जुहोमि॥१४॥ उपहूताः पितरो ये मघासु॥ मनोजवसः सुकृतः सुकृत्याः॥ ते
नो नक्षत्रे हवमागमिष्ठाः॥ स्वधाभिर्यज्ञं प्रयतं जुषंतां॥१५॥ ये अग्निदग्धा येनग्नि
दग्धाः॥ येमुं लोकं पितरः क्षियंति॥ यांश्च विद्म यां उ च न प्रविद्म॥ मघासु यज्ञं सुकृतं जुष
तां॥१६॥ गवां पतिः फल्गुनीनामसि त्वं॥ तदर्यमन्वरुण मित्र चारु॥ तं त्वा वयं समिता

रं सनीनांजीवाजीवंतु सुपसं विशेम॥१७॥ येते मा विश्वा भुवनानि संजिता यस्य देवा अ
नुसयंति चेतः॥ अर्यमाराजाजरस्तुविष्मान्फल्गुनीनामृषभो रोरवीति॥१८॥ श्रेष्ठो देवानां
भगासि तत्त्वा विदुः फल्गुनीस्तस्य वित्तात्॥ अस्मभ्यं क्षत्रमजरं सुवीर्यं गोमदश्ववदु
पसंनुदेह॥१९॥ भगो ह दाता भगो देवीः फल्गुनीराविवेश॥ भगस्येत्तं प्रसवं गमेम यत्र
देवैः सधमादं मदेम॥२०॥ आयातु देवः सवितोपयातु हिरण्ययेन सुवृता रथेन वहं
हस्तं सुभगं विद्मनापसं प्रयच्छंतं पपुरीं पुण्यमच्छ॥२१॥ हस्तः प्रयच्छत्वमृतं वसीयः दक्षि
णेन प्रतिगृभ्णीम एनत्॥ दातारमद्य सविता विदेय यो नो हस्ताय प्रसुवाति यज्ञं॥२२॥
त्वष्टा नक्षत्रमभ्येति चित्रां सुभंससं युवतिं रोचमानां॥ निवेशयन्नमृतं मर्त्यांश्च रूपाणि
पिंशन्भुवनानि विश्वा॥२३॥ तन्नस्त्वष्टा तदु चित्रा विचष्टां तन्नक्षत्रं भूरिदा अस्तु
मह्यं॥ तन्नः प्रजां वीरवतीं सनोतु गोभिर्नो अश्वैः समनक्तु यज्ञं॥२४॥ वायुर्नक्षत्रम

भ्येति निष्ट्यां तिग्मशृंगो वृषभो रोरुवाणः समीरयन्भुवना मातरिश्वा॥ अ
पद्वेषांसि नुदतामरातीः॥२५॥ तन्नो वायुस्तदु निष्ट्या शृणोतु तन्नक्षत्रं भूरिदा अ
स्तु मह्यं॥ तन्नो देवासो अनुजानंतु कामं यथा तरेम दुरितानि विश्वा॥२६॥
दूरमस्मच्छत्रवो यंतु भीताः तदिंद्राग्नी कृणुतां तद्विशाखे तन्नो देवा अनुमदंतु यज्ञं
पश्चात्पुरस्तादभयं नो अस्तु॥२७॥ नक्षत्राणामधिपत्नी विशाखे श्रेष्ठाविंद्राग्नी
भुवनस्य गोपौ विषूचः शत्रूनपबाधमानौ अपक्षुधं नुदतामरातिं॥२८॥ ऋध्या
स्मै हवैनमसोपसद्य मित्रं देवं मित्रधेयं नो अस्तु॥ अनूराधान्हविषा वर्धयंतः श
तं जीवेम शरदः समीराः॥२९॥ चित्रं नक्षत्रमुदगात्पुरस्तात्॥ अनूराधास इति
यद्वदंति तन्मित्र एति पथिभिर्देवयानैर्हिरण्ययैर्विततैरंतरिक्षे॥३०॥ इंद्रो ज्ये
ष्ठामनु नक्षत्रमेति यस्मिन्वृत्रं वृत्रतूर्ये ततार॥ तस्मिन्वयममृतं दुहानाः क्षु

धंतरेमदुरितिंदुरिष्टिं॥३१॥पुरंदरायवृषभायधृष्णवेअषाढायसहमानायमीढुषे॥इन्द्राय
ज्येष्ठायमधुमद्दुहानाउरुंकृणोतुयजमानायलोकं॥३२॥मूलंप्रजांवीरवतींविदेयपराच्ये
तुनिर्ऋतिःपराचागोभिर्नक्षत्रंपशुभिःसमक्तंअहर्भूयाद्यजमानायमह्यं॥३३॥अहर्नोअद्य
सुवितेदधातुमूलंनक्षत्रमितियद्वदंति॥पराचींवाचानिर्ऋतिंनुदामिशिवंप्रजायैशिवम
स्तुमह्यं॥३४॥यादिव्याआपःपयसासंबभूवुर्याअंतरिक्षउतपार्थिवीर्याः॥यासाम
षाढाअनुयंतिकामंतानआपःशंस्योनाभवंतु॥३५॥याश्चकूप्यायाश्चनाद्याःसमु
द्रियाःयाश्चवैशंतीरुतप्रासचीर्याः॥यासामषाढमधुभक्षयंतितानःशंस्योनाभवंतु॥
॥३६॥तन्नोविश्वेउपशृण्वंतुदेवाःतदषाढाअभिसंयंतुयज्ञं॥तन्नक्षत्रंप्रथतांपशुभ्यः
कृषिर्वृष्टिर्यजमानायकल्पतां॥३७॥शुभ्राःकन्यायुवतयःसुपेशसःकर्मकृतःसुकृतो
वीर्यावतीः॥विश्वान्देवान्हविषावर्धयंतीःअषाढाःकाममुपयांतुयज्ञं॥३८॥यस्मिन्ब्र

ह्माभ्यजयत्सर्वमेतत्अमुंचलोकमिदमूचसर्वं।तन्नोनक्षत्रमभिजिद्विजित्यश्रियंद
धात्वहृणीयमानं॥३९॥उभौलोकौब्रह्मणासंजितेमौतन्नोनक्षत्रमभिजिद्विचष्टां॥त
स्मिन्वयंपृतनाःसंजयेमतन्नोदेवासोअनुजानंतुकामं॥शृण्वंतिश्रोणाममृतस्यगो
पांपुण्यामस्याउपशृणोमिवाचं॥महींदेवींविष्णुपत्नीमजूर्यांप्रतीचीमेनांहविषायज
मः॥४१॥त्रेधाविष्णुरुरुगायोविचक्रमेमहींदिवंपृथिवीमंतरिक्षं॥तच्छ्रोणैतिश्रव
इच्छमानापुण्यंश्लोकंयजमानायकृण्वती॥४२॥अष्टौदेवावसवःसोम्यासःचतस्रो
देवीरजराःश्रविष्ठाः॥तेयज्ञंपांतुरजसःपुरस्तात्संवत्सरीणममृतंस्वस्ति॥४३॥य
ज्ञंनःपांतुवसवःपुरस्तात्दक्षिणतोभियंतुश्रविष्ठाः॥पुण्यंनक्षत्रमभिसंविशाममानो
अरातिरघशंसागन्॥४४॥क्षत्रस्यराजावरुणोधिराजःनक्षत्राणांशतभिषग्वसि
ष्ठः॥तौदेवेभ्यःकृणुतोदीर्घमायुःशतंसहस्राभेषजानिधत्तः॥४५॥यज्ञंनोराजाव

महार्त्स॰ रुण उपयातु नन्नो विश्वे अधिसंयंतु देवाः॥ तन्नो नक्षत्रं शतभिषग्जुषाणं दीर्घमायुः प्रतिर
५८ द्भेषजानि॥ अजएकपादुदगात्पुरस्ताद्विश्वाभूतानि प्रतिमोदमानः॥ तस्य देवाः प्रसवं यंति
सर्वे प्रोष्ठपदासो अमृतस्य गोपाः॥४७॥ विभ्राजमानः समिधान उग्रः आंतरिक्षमरुहदगंद्यां
॥ तं सूर्यं देवमजमेकपादं प्रोष्ठपदासोमपाः सोम्यासः प्रोष्ठपदासो अधिरक्षंति सर्वे॥४९
॥ चत्वार एकमभिकर्म देवाः प्रोष्ठपदास इति यान्वदंति॥ ते बुध्नियं परिषद्यं वंनस्तुः अहिं र
क्षंति नमसोपसद्य॥५०॥ पूषा रेवत्यंवेति पंथां पुष्टिपती पशुपा वाजबस्त्यौ॥ इमानि हव्या प्र
यता जुषाणा सुगैर्नो यानैरुपयातां यज्ञं॥५१॥ क्षुद्रान्पशून्रक्षतु रेवती नः गावो नो अश्वां
अन्वेतु पूषा अन्नं रक्षंतौ बहुधा विरूपं वाजं स॥ नुतां यजमानाय यज्ञं॥५२॥ तदश्विनावश्व ५८
युजोपयातां शुभंगमिष्ठौ सुयमेभिरश्वैः॥ स्वं नक्षत्रं हविषा यजंतौ मध्वा संपृक्तौ यजुषा
समक्तौ॥५३॥ यौ देवानां भिषजौ हव्यवाहौ विश्वस्य दूतावमृतस्य गोपौ॥ तौ नक्षत्रं जुजुषा

णोपयातां नमोश्विभ्यां कृण्मः॥५४॥ अप पाप्मानं भरणीर्भरंतु तद्यमो राजा भगवान्विचष्टां
॥ लोकस्य राजा महतो महान्हि सुगं नः पंथामभयं कृणोतु॥५५॥ यस्मिन्नक्षत्रे यम एति रा
जा यस्मिन्नेनमभ्यषिंचंत देवाः॥ तदस्य चित्रं हविषा यजाम अप पाप्मानं भरणीर्भरंतु
॥५६॥ इति नक्षत्रमंत्राः॥ अथ पूर्णाहुतिमंत्राः॥ समुद्रादूर्मिरिति द्वचस्य गौतमो वाम
देवऋषिः॥ अग्निर्देवता त्रिष्टुप्छंदः॥ मूर्धानं दिव इत्यस्य बार्हस्पत्यो भरद्वाजऋषिः॥
वैश्वानरो देवता॥ त्रिष्टुप्छंदः॥ पुनस्त्वादित्या इत्यस्याग्निर्ऋषिः अग्निर्देवता त्रिष्टुप्छंदः॥ व
सुरुद्रादित्या देवताः॥ त्रिष्टुप्छंदः॥ पूर्णा दर्वीत्यस्य विश्वे देवा ऋषयः॥ शतक्रतुर्देवता अनु
ष्टुप्छंदः॥ सप्त ते अग्ने इत्यस्याग्निर्ऋषिः सप्तवानग्निर्देवता जगती त्रिष्टुब्वा॥ सर्वेषां मंत्रा
णां पूर्णाहुतौ विनियोगः॥ समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट्॥ घृतस्य
नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः॥१॥ वयं नाम प्रब्रवामा घृतेनास्मिन्यज्ञे धा

महा०
५८

र्यामानमोत्तिः॥उपब्रह्माग्रणवछस्समानंचतुःशृंगेवमीक्षैरणतत्॥२॥चत्वारिशृंगात्र
योअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्यत्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यां॥आ
आविवेश॥३॥मूर्द्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं॥कविंसम्राज
मतिथिंजनानामासन्नःपात्रंजनयंतदेवाः॥१॥पुनस्त्वादित्यारुद्रावसवःसमिंधतांपुन
र्ब्रह्माणोवसुनीथयज्ञैः॥घृतेनत्वंतनुवोवर्द्धयस्वसत्याःसंतुयजमानस्यकामाः॥१॥पूर्णा
दर्विपरापतसुपूर्णापुनरापत॥वस्नेवविक्रीणावहाइषमूर्जंशतक्रतो॥१॥सप्ततेअ
ग्नेसमिधःसप्तजिह्वाःसप्तऋषयःसप्तधामप्रियाणि॥सप्तहोत्राःसप्तधात्वायजंति
सप्तयोनीरापृणस्वघृतेनस्वाहा॥१॥अग्नयेवैश्वानरायवसुरुद्रादित्येभ्यःशतक्रतवेअ ५८
ग्नयेसप्तवतेच॥इतिपूर्णाहुतिमंत्राः॥ ॥एवंपूर्णाहुतेःप्रणीतामोक्षसंवानंतरंकिंकुर्या
दित्यतआह॥अनुलोमाघयालिंगमंत्रीन्मामनुपादत॥॥माज्युत्त्वस्याज्यसंपातैरस्य

ज्योगानिरोगिणः॥अछिन्नायेणदर्भाणांहेमगर्भेणमुष्टिनानिष्कमज्यततःशांतिंवाच
यन्ब्राह्मणैःसह॥तैःस्नानंकलशंभोत्तिःरत्निषिच्यस्वयंपुनः॥माकंमेवस्त्रथापूर्व
दत्तेनगत्तेनवाससा॥रुत्साहृत्प्रतिगृह्णीयात्स्वदक्षिणमथातुरः॥उत्तरांजिसुखंःस्व
नवस्त्रमाल्यानुलेपनः॥शांतिर्ग्रहाणांनिर्वृत्तंबहूनांनुविमोचनं॥पूर्वाभिमुखमा
चार्यमभ्यर्च्यप्रतिमांतुतां॥प्रदद्याद्दक्षिणांतस्मैमध्याह्नेसमुपस्थिते॥अनुलोमाघ
यालिंगमित्यादि॥अनुलोम्येन॥अनुपादतःपादप्रभृतिशिरःपर्यंतमित्य
र्थः॥घयालिंगं॥तत्तद्रवप्रवस्थरोगनिराकरणद्योतकमंत्रपदंलिंगं॥तदनतिक्रमे
णअन्वीत्यांअन्वीतेनाभिकाभ्यामित्येतत्स्कंपठन्॥आज्यसंपातैःहोमकालेकृ
त्वाप्रत्याहुतिएकस्मिन्पात्रेआज्यबिंदवस्थापनीयाः॥तेबिंदवआज्यसंपाताइत्य
च्यते॥अयमर्थः॥आज्यसंपातैःमाज्युत्वस्यरोगिणःअंगान्यानुलोम्येनाभ्यज्यआचार्य

महा० अग्निर्मामित्येतत्सूक्तं पठन्॥ अच्छिन्नाग्रेण दर्भाणां मुष्टिना सुवर्णशलाकागर्भेण शिरः प्र
६० भृति पादपर्यंतं रोगिणोंगानि मध्यालिंगं निमृज्य ततः शांतिपाठं कुर्वन्नृत्विगादिभिर्ब्राह्म
णैः सहितस्तैः पूर्वस्थापितैः स्नानकलशजलैस्तं रोगिणमभिषिच्य स्वयमाचार्यः पुनर्यथापूर्वं
आनुलोम्येनाग्निर्मामित्येतत्सूक्तं पठन्नेव दर्भगर्भेण वाससा परिमार्जयेदिति॥ अ
भिषेककाले पूर्वस्थापितकलशस्थितमंत्रपूतपाद्यः परिशेषमेव दर्भमंगलस्नाना
र्थं अत्रावपात्रांतरे मंत्रपूतं पयो गृहीत्वास्य शिरस्योक्षन् शांतिपाठं कुर्वद्भिरभिषेकः का
र्यः कृत्वावृत्त्यतिग्रहणीमादित्यादिकृतग्रहस्य रोगिणा आहृतपरिधापितो रोगशांतिप्रतिपत्त्य
र्थः॥ अथ सदक्षिणांतिप्रतिपत्त्यर्थः॥ अयमसदक्षिणं॥ व्याधिप्रतिमादानं प्रतिगृहीता आचा ६०
र्यादिप्रतिग्रहणीयात्॥ आतुरो रोगी श्वेतवस्त्रादिभिरलंकृत उत्तराभिमुखः सन्पूर्वाभि
मुखमाचार्यमभ्यर्च्य तां प्रतिमां व्याधिप्रतिमां सूर्यप्रतिमां च दद्यात्॥ ग्रहशांतिकारणे हे

बंधानां च विमोचनं निर्बलबद्धविमोचनं तु सति संभवे॥ ग्रहशांतिर्नवग्रहशांतिसाध्याये
दर्शयिष्यते॥ अत्र सूर्यप्रतिमायामावरणपूजारूपेण ग्रहपूजा प्रदर्शिता न प्राधान्येन॥ अ
तः समर्थश्चेत्पृथक्ग्रहयज्ञं कुर्वीतेति मुख्यपक्षः॥ असमर्थश्चेदावरणपूजयैव ग्र
ह पूजा निर्वर्त्येति गौणपक्षः॥ तां प्रतिमां दद्यादित्युक्तं॥ तत्रोक्तं यत्र प्रतिमादानमंत्रमाह
॥ पद्मोद्भवः पद्मकरः सप्ताश्वरथवाहनः॥ प्रतिमादानेन दत्तेन तुष्येत्सर्वजगद्गुरुः॥ इह
जन्मनि यत्पापमन्यजन्मनि वा कृतं॥ सप्तजन्माप्रलयमांतत्सर्वं शमयत्वसौ॥ प्रत्यये
क्तानं मंत्रेणानेन दत्त्वा तं प्रणिपत्य क्षमापयेच्च॥ आसीमांतमनुव्रज्य तन्मुखं नावलोकये
त्॥ तन्मुखं प्रतिग्रहीतुर्मुखं आचार्येणाप्यनुज्ञातः प्रतिष्ठोत्सवं निजं आचार्यस्य प्रति
ग्रहात्परतः तेदनुज्ञात ऋत्विग्भ्यो दक्षिणां दत्वा धनमभ्यर्चितो धनं तदरेभ्यः संतर्प्य दीना
नाथानुपस्थितान्॥ मंगलध्वनितोयैः सर्वौषधिपल्लवैः॥ मंत्राभिमंत्रितैः स्नातः

कृतकौतुकमंडनः॥ प्रसन्नचेताः पुण्याहं वाचयित्वा द्विजान्॥ अर्ह्यं वा तदर्धं वाक्रि
यासाफल्यसिद्धये॥ मिष्टान्नैर्भोजयित्वा यः स्वयं भुंजीत बंधुभिः॥ ये ये रोगाः प्रबाधंते
राजयक्ष्मज्वरादयः॥ तेषां तेषां प्रतिस्पर्द्धा नैरिज्या प्रयत्नतः॥ प्रतिछंदः प्रतिकृति॥
इज्या पूजा॥ ॥अक्षिभ्यामित्येतत्सूक्तेन रोगिणां गात्राणि परिवर्जयेदित्युक्तं तदिदानीं सू
क्तं प्रदर्श्यते॥ अक्षीभ्यामित्यस्य षड्ऋचस्य सूक्तस्य काश्यपो विवृहा ऋषिः यक्ष्म
नाशनी देवता अनुष्टुप् छंदः यक्ष्मनिबर्हणे विनियोगः॥ अक्षीभ्यां ते नासिकाभ्यां कर्णा
भ्यां छुबुकादधि॥ यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते॥१॥ ग्रीवाभ्यस्त उष्णि
हाभ्यः कीकसाभ्यो अनूक्यात्॥ यक्ष्मं दोषण्यमंसाभ्यां बाहुभ्यां विवृहामि ते॥२॥
आंत्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि॥ यक्ष्मं मतस्नाभ्यां यक्नः॥ प्लाशिभ्यो विवृ
हामि ते॥३॥ ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां॥ यक्ष्मं श्रोणिभ्यां भासदाद्भंससो

विवृहामि ते॥ मेहनाद्वनंकरणात् लोमभ्यस्ते नखेभ्यः॥ यक्ष्मं सर्वस्मादात्मनस्तमि
मं विवृहामि ते॥ अंगादंगात् लोम्नो लोम्नो जातं पर्वणि पर्वणि॥ यक्ष्मं सर्वस्मादात्मनस्तमि
मं विवृहामि ते॥ ॥ महार्णवाख्ये महिते प्रबंधे मांधातृनाम्नो मदनात्मजस्य॥ स
त्कर्मरत्नौघनिधिश्चतुर्थस्तुरंगो यमगादगाधः॥ ॥ रोगाश्च त्रिविधाः कर्म
जा दोषजा उभयजाश्चेति॥ तथा चायुर्वेदे॥ कर्मप्रकोपेण कदाचिदेते दोषप्र
कोपेण भवंति चान्ये॥ तथापरे प्राणिषु कर्मदोषप्रकोपजाः काममनो विकारा
दिति॥ एते रोगाः ये च रोगाः कर्मजा उभयजाश्च तत्र प्रथमतः प्रायश्चित्तं विधाय
पश्चात्प्रतिकृतिदानानि कुर्वीत तथा च कर्मविपाकसंग्रहे॥ प्रायश्चित्तमकृत्वा तु
न कुर्यात्कर्म किंचन अनिस्तीर्णं यथा नित्यं वर्द्धते द्विगुणं पुनः॥ दानैर्दयादिभि
रपि द्विजदेवतागोवेदार्चनाप्रणतिनिश्चजपैस्तपोभिः॥ इत्युक्तपुण्यनिचयैरप

नीममानाप्राक्तापज्ञातमभ्युत्तं प्रज्ञामंनमंति वेदार्चनावेदविन्नब्राह्मणपूजा॥ वे
दपुस्तकार्चनाच॥ प्रणतिभिर्देवतानमस्कारैः विशेषतः सूर्यनमस्कारैः आरोग्यं
भास्करादिच्छेदिति॥ नमस्कारप्रियः सूर्य इत्यपिस्मरणात्॥ तथाच प्रणतिशाष्टेना
स्वल्पप्रदक्षिणाक्रियापिलक्ष्यते॥ जपैः वेदपारायणमहासौरसूक्तरुद्रपुरुषसूक्त
सहस्रनामअपामार्जनविष्णुरुद्रमादिजपैः॥ अभ्युत्ते रोगे॥ तथा दृष्टापचारजः कु
ष्ठिवसूर्वापचारजः॥ तत्रशंकराद्भवस्तत्वोव्याधिरेवंविधो मतः॥ कर्मजः संकरजउ
त्तमः॥ एतेषांतेदृष्टानोपायमाह॥ यथानिदानं दोषोत्थं कर्मजो हेतुभिर्विना॥ म
हारंभोऽल्पके हेतावंतकोदोषकर्मजः॥ यथानिदानेनिदानमनतिक्रम्यसममं ६२
तरदृश्यमानमहारोगवैषम्यादिनिदानमतिक्रम्यमज्ञामतेतद्दोषोत्थं॥ हेतुभि
र्विनाऽस्यमनंतरदृश्यमान॥ हेतुर्भिर्विनायदादोषस्यमहारंभः सकर्मजोदोषः॥

अल्पके हेतावंतकः॥ स्वल्पनिमित्ते अधिकव्याधौ अंतकः अंतिमस्तीयः प्रत्ते
त्तवेत्तमेवाहदोषकर्मजइति॥ तथानिष्कृसादोषजन्मादोषजस्यौषधेनहि॥ उ
त्तमपमानस्तुनिष्कृसोऽपधसेवया॥ अपराच्छेदिसर्पः॥ अथदोषजन्माकर्मोद्भवद
सर्पः॥ यत्रापिकर्मजत्वदोषत्वातिश्चयः तत्रप्रायश्चित्तान्यौषधंचकर्त्तव्यं॥ प्र
णतिशाष्टेनास्वल्पप्रदक्षिणाक्रियालक्ष्यतइत्युक्तं॥ तत्रापस्थ्यादिमंत्रेणमंत्रः॥
आरात्तइत्यस्याग्निकांडांतःपतित्वेनअग्निर्ऋषिः॥ वनस्पतिर्देवता॥ अनुष्टुप्छं
दः॥ वनस्पतिप्रीत्यर्थंमंत्रेणविनियोगः॥ आरात्तेअग्निरस्त्वाराल्परशुरस्तुते॥ निवाते
त्वाभिवर्षतुस्वस्तितेस्तुवनस्पतेस्वस्तिमेस्तुवनस्पते॥ तथापौराणिकश्लोके
पिस्मर्यते॥ अश्वत्थस्यंदनुजस्यरुद्रः स्यपुंडुविंचितितं॥ ब्राह्मणंचसमुत्सन्नम
श्वत्थरामयस्वमे॥ ब्राह्मणसंबंधित्वेनपंचरामस्सेसर्पः॥ ब्राह्मणाञ्चसनु

मह०
६६

त्यानमित्यपि पाठ इत्यश्वत्थानुमंत्रणप्रकारः॥ अथ पारायणे कलशस्थापनादिविधिप्र
कारः॥ तीर्थे देवालये गेहे प्रशस्तेस्तु परिष्कृते॥ कलशं सुदृढं तत्र सुनिर्मिक्तं विनष्टवि
तं॥ पुष्पपत्रवमालाभिश्चंदनैः कुंकुमादिभिः॥ मृत्तिकायवसंमिश्रवेदिमध्येन्यसे
त्ततः॥ पंचाशद्भिः कुशैः कार्यो ब्रह्मा पश्चान्मुखः स्थितः॥ स्नापितः॥ स्थापितः॥ कुंभेच
तुर्बाहुश्चतुर्मुखः॥ वस्त्रजान्वाहतिं वेदमुत्तराग्रैः कृतं॥ ब्रह्मोपधाने दत्वा ततः स्वस्तय
नं पठेत्॥ प्रतिष्ठां कारयेत्पश्चान्पूजा च क्रमशोच्यते॥ यज्ञोपवीतनैवेद्यवस्त्रचंदन
कुंकुमैः॥ सगंधधूपदीपतांबूलैरक्षतैश्च पितामहं॥ ब्रह्मजज्ञानमिति वा गायत्र्या वा प्रपू
जयेत्॥ उपाध्यायं च संपूज्य पाठं पठेत्ततः॥ इति वेदपारायणे कलशप्रतिष्ठादि ६२
प्रकारः॥ अथ वेदपारायणविधिः॥ ॥ स्थंडिलं कल्पयित्वाग्निमुपसमाधाय संपरि
स्तीर्याज्येनैताभ्यो देवताभ्यो जुहोति अग्नये सोमायेंद्राय विश्वेभ्यो देवेभ्य ऋषिभ्य ऋ

ग्भ्यः यजुर्भ्यः सामभ्यः श्रद्धायै प्रज्ञायै मेधायै धारणायै श्रियै सावित्र्यै सवित्रे प्रजापत
ये कांडऋषये अग्नये कांडऋषये विश्वेभ्यो देवेभ्यः कांडऋषिभ्यः संहितीयाभ्यो देव
ताभ्य उपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणीभ्यो देवताभ्य उपनिषद्भ्यो
हव्यवाहाय विश्वेभ्यो वारुणीभ्योनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा
व्याहृतिभिश्चतुनः परिषिंचति॥ समाप्ते चैतायजुषान्तर्पयाति एवमृग्वेदस्य कांडऋ
ष्यादि वर्जमास्विष्टकृतस्तेषां स्थाने शतर्चिभ्यो गृत्समदाय विश्वामित्राय वामदेवा
यात्रये भरद्वाजाय जामदग्न्याय गौतमाय वसिष्ठाय प्रगाथेभ्यः क्षुद्रसूक्तेभ्यो महासू
क्तेभ्यो महानाम्नीभ्य इति ततो वेदादिमारभ्य संततमधीयीत तथाह भगवान् बौधायनः
॥ ॥ इति वेदपारायणोपक्रमविधिः॥ ॥ अथानध्यायपारायणविधिः॥ अथातोनध्यायपा
रायणविधिं व्याख्यास्यामः॥ आसमाप्तेर्नाश्नीयाद्यद्यशक्तिश्चापः पयः फलान्योदनं

महा.
६५

वाहविष्यमात्रमल्पंतुलब्ध्वातदग्रेरुपधीयीतयामात्प्राचीमुदीचींवैदिशमुपक्रम्याग्नि
मुपसमाधायपरिस्तीर्यधर्मंप्रज्वाल्यैताभ्योदेवताभ्योजुहोति॥ अग्नयेसोमायेंद्रायप्र
जापतयेबृहस्पतयेविश्वेभ्योदेवेभ्योब्रह्मणेऋषिभ्योऋग्भ्योयजुर्भ्यः॥ सामभ्यःश्रद्धा
यैमेधायैप्रज्ञायैधारणायैसदसस्पतयेअनुमतयेश्रियैह्रियैसावित्र्यैसवित्रेप्रजा
पतयेकांडऋषयेसोमायकांडऋषयेअग्नयेकांडऋषयेविश्वेभ्योदेवेभ्यःकांडऋषिभ्यः
सांहितीभ्योदेवताभ्यउपनिषद्भ्योयाज्ञिकीभ्योदेवताभ्यउपनिषद्भ्योवारुणीभ्योदेव
ताभ्यउपनिषद्भ्योहव्यवाहायविश्वेभ्योदेवेभ्योऽनुमत्यैस्विष्टकृतेचएषकृत्स्वाहाका
रेणकृत्वाव्याहृतिभिश्चपुनःपरिषिंचति॥ समाप्तेचैतामनुषातर्पयतिएवंऋग्वेदि ६५
नाकांडऋष्यादिवर्जमास्विष्टकृतस्तथांस्थानेशतर्चिभ्योमध्यमेभ्योगृत्समदायवि
श्वामित्रायवामदेवायात्रयेभरद्वाजायजामदग्न्यायगौतमायवसिष्ठायप्रगाथेभ्यः॥

पवमानीभ्यः॥ पवमानीभ्यःक्षुद्रसूक्तेभ्योमहासूक्तेभ्योमहानाम्नीभ्यःइतिततोवेदा
दिमारभ्यसंततमधीयीतनास्यांतरानध्यायोनास्यांतराजननमरणेअशुचीनोतरा
व्याहरेन्नांतराविरमेत्यावदंतमधीयीत॥ यदंतराविरमेत्त्रीन्प्राणायामानाचम्य
प्रणवेनाप्रविधायपावत्कालमधीयीततत:सर्वाणिऋणानिऋणंतरंसंग्रामारणसलिलंलो
ष्यपरिदध्यात्आरायतेचब्राह्मणभोजनंदक्षिणादानंचदद्यात्॥ एतेनविधिनावे
दमधीयीतसततःपूतोवेदोभवति॥ मनःशुद्धिश्चभवति॥ द्वाभ्यांपारायणाभ्यांकृ
च्छ्रैश्चभोजनद्रहाधीतेअनंतेभ्यःप्रमुच्यतेत्रिभिर्बद्धक्ष्यःपातकोपपातकेभ्यःप्र
जायांचरेतःसिक्त्वागंगायांनिमज्जंश्चभवति॥ चतुर्भिश्च।सुराद्भोजनात्सेवनात्
स्त्रीसेवनाच्चपंचभिरयाज्ययाजनात्पूतोभवति॥ अयाज्ययाजनात्अमहणात्आसत्योपास
नाच्चषड्भिर्ब्राह्मणस्यगोहितकरणात्पशुनोहनात्सुवर्णस्तेयात्पतितसंप्रयोगाच्चस

म॰हा॰
६५

घ्नि: प्रजापत्यानां हानाचरणात् तप्तज्ञोपवेधनाच्च अष्टभिश्चान्द्रायणस्यानाचरणात् गुरुतल्प
गमनाद्रजस्वलागमनाच्च नवभिः सुरापानाद्द्वादशभिः स्त्रीत्रिमपाजनात्सोमपानादन्याय
तस्वग्रकाद्दश निर्बालस्य हननाद्भ्रूणहननात्षोडशभिः पूर्वजन्मे हरुते सर्वैः पापैः प्रमुच्यते॥
स्वर्गलोकं गच्छति इन्द्र स्वर्गलोकगमायति॥ अग्निष्टोमादीन्क्रतून्लभति तैः क्रतुभिरिष्टं भवति
॥ वेदाध्यायी सदेवस्याद्दशमासस्य वाक्यसुचिः॥ यं यं कामयते कामं तं तं वेदेन साधयेत्॥ अ
साध्यं नास्ति यत्किंचिद्ब्रह्मणो हि फलं महत्॥ ब्रह्मणो हि फलं महदिति॥ ॥ समाप्ते चैषाम
जुषात तर्प्ययतीति॥ समाप्ते वेदपारायणे। समाप्ते एता देवताः पूर्वोक्ता अग्निसोमाद्याः य
जुषात तर्पयति यजुर्वेदेन सह तर्पयतीति यजुर्वेदपारायणे तस्य देवस्य साधान्यमुच्यते॥ अ ६५
यवान्तरादि व्याहृदि चतुष्टयात्मकं यजुरष्टे नगस्ते॥ तेनैतदुक्तं भवति॥ नद्देवस्तर्प्य
यामीत्यनेन प्रकारेण तर्प्पयित्वा अग्निसोमादीस्तर्पयेदिति॥ जननमरणे अशुचीद

ति॥ नाशुचे होतुक्रूते इत्यर्थः॥ नोत्तरां व्याहरेदिति॥ उपक्रान्तवेदपारायणमध्ये नव्या
हरेत्स्वाध्यापयेत्॥ तथा लौकिकवचनमपि न ब्रूयात्॥ विहितनित्यनैमित्तिककर्मा
नुपयुक्तामुक्तिं न कुर्यादित्यर्थः॥ निद्रा निद्रान्तरं संग्रामारण्यसलिलं लोप्य परिह
र्यादिति लोप्यस्थितापरिहार्यं वर्जयित्वेति यावत्॥ परिहृत्य तत्समापयेत्॥ निद्रा
तरं निद्रा च संधं वा सलिलं रक्षिरुदकसमीपान्त्यनिकावा॥ निद्रादिकालोँदे तं ग्रंथ
वर्जयित्वा समापयेदित्यर्थः॥ स ततः पूतो वेदो भवतीति॥ वेदाः भवति वेदात्मको भव
तिउक्तपुण्यवान् भवेदित्यर्थः॥ द्वादशपारायणान्यांकृत्वश्चेति॥ कृत्वाः पावमानी
भिः पारायणद्वयं पावमान्यश्च मिलित्वोक्तफलायकल्पंत इत्यर्थः॥ एवमुत्तरत्रापि
पारायणत्रयं गंगास्नानं च मिलिता साधनं॥ निमर्क्तं भवति॥ पूतो भवतीत्यर्थः॥ प्राजा
पत्यहान्याचरणं प्रक्रान्तप्राजापत्यानामनुष्ठानं॥ एवं चान्द्रायणस्यानाचरणं यज्ञो

महा० ६६ प्रवेधनं॥ यत्तविनाशः॥ ॥इत्यनष्टसायणविधिं॥ ॥अथमहासौरमंत्राणामृष्याद्यमि
धीयते॥ अथसौर्याणांमंत्राणांपृथक्संख्यामपीन्द्रदेवतांछंदांसिचवक्ष्यामः पूर्वाचार्य
क्रमेणोदुत्यंजातवेदसमितित्रयोदशर्चस्य सूक्तस्य कण्वेनऋषिणा दृष्टं गायत्रमंत्रा
अन्त ४ स्तस्योत्रुष्टुभौ त्रयोदशश्चारोगघ्ना उपनिषदस्त्वा द्विपञ्चाशतानीचित्रं देवानामुदगा सौम्यं
ल ५ दितिषड्चंस्य सूक्तस्यांगिरसेनकुत्सेनऋषिणैत्रेष्टुभमिंद्रमित्रंवरुणमितिदेवचतुर्थ्यंतत्र
~~हार्यतमसारष्ट्रैष्टुभमिंद्रमित्रंवरुणमितिदेवचतुर्थ्यं~~ तरार्यतमसारष्टैर्ष्टुभोत्र
हंसः शुचिषदित्येषा गौतमपुत्रेण वामदेवेनऋष्याजगती यस्या सूर्योस्यैषा त्रिपुत्रे
णात्रिणा दृष्टानुष्टुप्॥ यदद्य सूर्यन्नोकाउदूसूर्य इतिनिस्त उदेनीतिचतस्रोऽद्य उदु ६६
स्यदर्शतमितितिस्त्रणां तामैत्रावरुणेन वसिष्ठेनऋषिणा त्रिष्टुभउदुत्यदर्शतमिति हह ३
हर्षः शार्ङ्ग ती त्रीं इतिसतोबृहती तच्चक्षुरिति पुरउष्णिग्बणमहां असीति द्वे चोत्तगुपुत्रेणजम

दग्निना दृष्टंपूर्वं बृहत्कं त्वरास्सतोबृहती नमो मित्रस्येस्येतंदशर्चं सूक्तं सूर्यपुत्रे
णाभितपसादृष्टं जागतं त्राणोऽनवेति त्रिष्टुप् सूर्यो नो दिवस्पातितिपंचर्चं सूक्तं सूर्य
पुत्रेणचक्षुषादृष्टं गायत्रं विभ्राड्बृहदितिचतुर्ऋचं सूक्तं सूर्यपुत्रेण विभ्राजा दृष्टं जाग
ति तं विभ्राजं ज्योतिषेत्यास्तारपंक्तिरायंगौरितृचं सूक्तं सार्पराज्ञ्या दृष्टं गायत्रं सर्वत्र सू सै
र्यो देवतास्य सूक्तस्य केचित्सत्तमस्तवंमन्यंते यः ऋषिः सोहमिति ध्यात्वा यतेऽतेन
यं सूर्यमहरहरुपतिष्ठेत तस्यायुष्यं वंतस्यारोग्यं वंतो नवंति॥ सर्वकाम वंतोन वंत्स
ते सूर्यसायुज्यं गच्छंति॥ ॥इति महासौरमंत्राणामृष्यादिविधानं॥ ॥अथमहासौर
मंत्राः॥ उदुत्यंजातवेदसं देवं वहंति केतवः दृशे विश्वाय सूर्यं॥१॥ अपत्ये तायवो यथान
क्षत्रायंत्यक्तुभिः सूराय विश्वचक्षसे॥२॥ अदृश्रमस्य केतवो विरश्मयो जनां अनु॥
भ्राजंतो अग्नयो यथा॥३॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि

रोचनं॥४॥प्रत्यङ्देवानांविशःप्रत्यङ्ङुदेषिमानुषान्॥प्रत्यङ्विश्वंस्वर्दृशे॥५॥येनापाव
कचक्षसाभुरण्यंतंजनाँअनु॥त्वंवरुणपश्यसि॥६॥विद्यामेषिरजःपृथ्वहामिमा
नोअक्तुभिः॥पश्यंजन्मानिसूर्य॥७॥सप्तत्वाहरितोरथेवहंतिदेवसूर्य॥शोचिष्केशंवि
चक्षण॥८॥अयुक्तसप्तशुंध्युवःसूरोरथस्यनप्त्यः॥ताभिर्यातिस्वयुक्तिभिः॥९॥उद्वयंतम
सस्परिस्वःपश्यंतउत्तरं॥देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं॥१०॥उद्यन्नद्यमित्रमह
आरोहन्नुत्तरांदिवं॥हृद्रोगंममसूर्यहरिमाणंचनाशय॥११॥शुकेषुमेहरिमाणंरोप
णाकासुदध्मसि॥अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि॥१२॥उदगादयमादित्योवि
श्वेनसहसासह॥द्विषंतंमह्यंरंधयन्मोअहंद्विषतेरधं॥१३॥इदमेकंत्रयोदशर्चंसूक्तं
॥॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥आप्राद्यावापृथिवीअंतरिक्षं
सूर्यआत्माजगतस्तस्थुषश्च॥सूर्योदेवीमुषसंरोचमानांमर्योनायोषामभ्येतिपश्चा

त्॥यत्रानरोदेवयंतोयुगानिवितन्वतेप्रतिभद्रायभद्रं॥२॥भद्राअश्वाहरितःसूर्यस्यचि
त्राएतग्वाअनुमाद्यासः॥नमस्यंतोदिवआपृष्ठमस्थुःपरिद्यावापृथिवीयंतिसद्यः॥
॥३॥तत्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्तोर्विततंसंजभार॥यदेदयुक्तहरितःसधस्था
दाद्रात्रीवासस्तनुतेसिमस्मै॥४॥तन्मित्रस्यवरुणस्याभिचक्षेसूर्योरूपंकृणुतेद्यो
रुपस्थे॥अनंतमन्यद्रुशदस्यपाजःकृष्णमन्यद्धरितःसंभरंति॥५॥अद्यादेवाउदि
तासूर्यस्यनिरंहसःपिपृतानिरवद्यात्॥तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुः
पृथिवीउतद्यौः॥६॥इदमपपरमंदृचंसूक्तं॥॥इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःस
सुपर्णोगरुत्मान्॥एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुः॥१॥कृष्णंनिया
नंहरयःसुपर्णाअपोवसानादिवमुत्पतंति॥तआववृत्रन्सदनादृतस्यादिद्घृतेनपृथि
वीकद्यते॥१२॥हंसःशुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥नृष

महा॰ ६८ हरसस्तसद्योमसरद्भागेजाकनजाअग्निनाहतं॥१॥ इममेकाऋक्॥ ॥यत्वास्सूर्यस्वर्भानुस्तम
साविध्यदासुरः॥ अक्षेत्रविद्यथामुग्धोभुवनान्यदीधयुः॥१॥ इममप्येकाऋक्॥ यदद्यसूर्य
ब्रवोनागाउद्यन्मित्रायवरुणायसत्यं॥ वयंदेवत्रादितेस्यामतवप्रियासोअर्यमन्गृणं
तः॥१॥ इममप्येकाऋक्॥ ॥उत्सूर्योबृहदर्चींष्यश्रेत्पुरुविश्वाजनिममानुषाणां॥ स
मोदिवाददृशेरोचमानः क्रत्वाकृतः सुकृतः कर्तृभिर्भूत्॥१॥ ससूर्यप्रतिपुरोनउद्गाए
भिःस्तोमेभिरेतसेभिरेवैः॥ प्रनोमित्रायवरुणायवोचोनागसोअर्यम्णेअग्नयेच
॥२॥ विनःसहस्रंशुरुधोरदंत्वृतावानोवरुणोमित्रोअग्निः॥ यच्छंतुचंद्राउपमंनोअर्क
मानःकामंपूपुरंतुस्तवानाः॥३॥ अयंतृचः॥ ॥उद्वेतिसुभगोविश्वचक्षाःसाधारणः ६८
सूर्योमानुषाणां॥१॥ चक्षुर्मित्रस्यवरुणस्यदेवश्चर्मेवयःसमविव्यक्तमांसि॥१॥
उद्वेतिप्रसवीताजनानांमहान्केतुरर्णवःसूर्यस्य।समानंचक्रंपर्याविवृत्सन्य

देतशोवहतिधूर्षुयुक्तः॥२॥ विभ्राजमानउषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः॥
एषमेदेवःसविताचच्छंदयःसमानंनप्रमिनातिधाम॥३॥ दिवोरुक्मउरुचक्षाउदेति
दूरेअर्थस्तरणिर्भ्राजमानः॥ नूनंजनाःसूर्येणप्रसूताअयन्नर्थानिकृणवन्नपांसि॥४
॥यत्राचक्रुरमृतागातुमस्मैश्येनोदीयन्नन्वेतिपाथः॥ ऋक्चतुष्टयमेकोर्द्धर्चश्च॥ ॥
उदुत्यद्दर्शनंवपुर्दिवएतिप्रतिह्वरे॥ यदीमाशुर्वहतिदेवएतशोविश्वस्मैचक्ष
सेअरं॥१॥ शीर्ष्णःशीर्ष्णोजगतस्तस्थुषस्पतिंसमयाविश्वमारजः॥ सप्तस्वसारःसु
वितायसूर्यंवहंतिहरितोरथे॥२॥ तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत्॥ पश्येमशर
दःशतंजीवेमशरदःशतं॥३॥ अयंतृचः॥ ॥बण्महाँअसिसूर्यबडादित्यमहाँअ
सि।महस्तेसतोमहिमापनस्यतेद्धादेवमहाँअसि॥१॥ बट्सूर्यश्रवसामहाँअसि
सत्रादेवमहाँअसि॥ मह्नादेवानामसुर्यःपुरोहितोविभुज्योतिरदाभ्यं॥२॥ अयं

महा० ६७

यच॥ ॥नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत॥ दूरेदृशे देवजा
ताय केतवे दिवस्पुत्राय सूर्याय शंसत॥१॥ सा मा सत्योक्तिः परि पातु विश्वतो द्यावा
च यत्र ततनन्नहानि च॥ विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्य
ः॥ न ते अदेवः प्रदिवो नि वासते यदेतशेभिः पतरै रथर्यसि॥ प्राचीनमन्यदनुव
र्त्तते रज उदन्येन ज्योतिषा यासि सूर्य॥३॥ येन सूर्य ज्योतिषा बाधसे तमो जगच्च
विश्वमुदियर्षि भानुना॥ तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुःष्व
प्न्यं सुव॥४॥ विश्वस्य हि प्रेषितो रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु यदद्य त्वा सूर्यो
पब्रवामहै तं नो देवा अनु मंसीरत क्रतुं॥५॥ तं नो द्यावापृथिवी तन्न आप इंद्रः शृण्वंतु ६७
मरुतो हवं वचः॥ मा शूने भूम सूर्यस्य संदृशि भद्रं जीवंतो जरणामशीमहि॥६॥ विश्वाहा त्वा
सुमनसः सुचक्षसः प्रजावंतो अनमीवा अनागसः॥ उद्यंतं त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्र

ति पश्येम सूर्य॥७॥ महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वंतं चक्षुषे मयः॥ आरोहंतं
बृहतः पाजसः स्परि वयं जीवाः प्रति पश्येम सूर्य॥ यस्य ते विश्वा भुवनानि केतुना प्र
चेरते नि च विशंते अक्तुभिः॥ अनागास्त्वेन हरिकेश सूर्याह्नाह्ना नो वस्यसावस्यसो
दिहि॥९॥ शं नो भव चक्षसा शं नो अह्ना शं भानुना शं हिमा शं घृणेन यथा शमध्व
ञ्छमसद्दुरोणे तत्सूर्य द्रविणं धेहि चित्रं॥१०॥ अस्माकं देवा उभयाय जन्मने शर्म य
च्छत द्विपदे चतुष्पदे अदत्पिबदूर्जयमानमाशितं तदस्मे शं योररपो दधातन॥
॥११॥ यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेळनं॥ अरावा यो नो अभि
दुच्छुनायते तस्मिन्तदेनो वसवो नि धेतन॥१२॥ ॥इति द्वादशर्चं सूक्तं॥ ॥सूर्यो नो
दिवस्पातु वातो अंतरिक्षात्॥ अग्निर्नः पार्थिवेभ्यः॥१॥ जोषा सवितर्यस्य ते हरः श
तं सवाँ अर्हति॥ पाहि नो दिद्युतः पतंत्याः॥२॥ चक्षुर्नो देवः सविता चक्षुर्न उत पर्व

महा० तः॥ चक्षुर्द्धाता दधातु नः॥ ३॥ चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः॥ संचेदं वि च प
१० श्येम॥ ४॥ सुसंदृशं त्वा वयं प्रति पश्येम सूर्य। विपश्येम नृचक्षसः॥ ५॥ इदं पंचर्चं सू
क्तं॥ ॥ विभ्राड् बृहत् पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतं॥ वातजूतो यो अभिरक्ष
ति त्मना प्रजाः पुपोष पुरुधा विराजति॥ १॥ विभ्राड् बृहत्सुभृतं वाजसातमं धर्मं वरुणे स
त्यमर्पितं॥ अमित्रहा वृत्रहा दस्युहंतमं ज्योतिर्जज्ञे असुरहा सपत्नहा॥ २॥ इदं श्रेष्ठं
ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत्॥ विश्वभ्राड् भ्राजो महि सूर्यो दृश उ
रु पप्रथे सह ओजो अच्युतं॥ ३॥ विभ्राजं ज्योतिषा स्वरगच्छो रोचनं दिवः॥ येनेमा वि
श्वा भुवनान्याभृता विश्वकर्मणा विश्वदेव्यावता॥ ४॥ इदं चतुर्ऋचं सूक्तं॥ ॥ आयं गौः पृश्नि १०
रक्रमीदसदन्मातरं पुरः॥ पितरं च प्रयंत्स्वः॥ १॥ अंतश्चरति रोचनास्य प्राणादपानती
॥ व्यख्यन्महिषो दिवं॥ २॥ त्रिंशद्धाम विराजति वाक् पतंगाय धीयते॥ प्रति वस्तोरह द्यु

भिः॥ ३॥ इदं तृचं सूक्तं॥ ॥ इति श्रीमहार्णवाख्ये महिते प्रबंधे मांधातृनाम्नो मदना
त्मजस्य॥ सत्कर्मरत्नप्रकरेण पूर्णे पूर्णस्तरंगः खलु पंचमोयं॥ ॥ इति महासौरमंत्रा
॥ ॥ अथ श्रीरुद्रविधिः तत्र तावदुपयुक्तत्वेन विनियोगादिकं चिंत्यते॥ विनियोगाना
मसंबंधः॥ सर्वांगांगित्वावरूपः॥ एकस्यैव मंत्रस्य विधिवशादनेकेषु सजातीयेषु
च कर्मस्वंगत्वमस्ति॥ अतो यस्मिन्कर्मणि यदंगत्वं नावगम्यते तदा तस्मिन्कर्मणि विनि
योगाभावः॥ एवं च यद्यपि चरमायामिष्टकायां शतरुद्रियं जुहोतीत्यादिना ब्राह्मण
वाक्ये ऽग्निचयने चरमेष्टकायामेकादशानीरुद्रानुवाकैर्होमो विहितः इति होमाख्ये
कर्मण्यंगत्वं रुद्रानुवाकानां तथापि जाबालश्रुतौ किं जप्येनामृतत्वं ब्रूहि शतरु
द्रियेणेति तथा रुद्राध्यायी मुच्यते सर्वपापैरिति तथा सौरेण जपहोमार्चनविधिः
व्याख्यास्याम इत्यादि श्रुतिस्मृतिपुराणवाक्यैर्जपहोमाभिषेकेषु विनियोगः॥ होमे

मह॰
७१

मेसाध्येहोमस्त्वनिषेकेसाध्येत्वनिषेकेविनियोगोज्ञेयः॥ इतिविनियोगः॥ अथमंत्रवि
भागः॥ तत्रमंत्रांतेकर्मादौसंनिपातमेदिति॥ आपस्तंब॥ मंत्रांतैर्मंत्रसमाप्तिर्कर्मा
दीन्कर्मोपक्रमात्संनिपातमेत्रभ्योजयेत्॥ समग्रेमंत्रेपठित्वाकर्मकुर्यादित्यर्थः॥ त
द्यथानमस्तेरुद्रमन्यवउतोतइषवेनमः॥ नमस्तेअस्तुधन्वनेबाहुभ्यामुततेनमः॥ स्वा
हेतिस्वाहाकारांतेहविरग्नौप्रक्षिप्यरुद्रायेत्युद्देशत्यागःकार्यइति॥ मंत्रविभागश्चरु
द्रानुवाकेषुनानाविधः॥ तत्रश्रौतेकर्मणिचरमायामिष्टकायांजुहोतीत्युक्त्वात्रेधा
विभक्तंजुहोतित्रयइमेलोकाइतित्रेधारुद्रानुवाकानामेकादशानांविभागउक्तः॥ त
थातित्तरउत्तराहुतीर्जुहोतिषट्पदंपदंतेषड्वाऋतवइतिषोढाविभागोपिदर्शितः॥ नमस्ते ७१
रुद्रमन्यवइत्येतानुवाकांस्त्रैधंविभज्यापिवोभ्रयमाउपक्रम्यनमस्तस्त्वम्यइतिजानुद
घ्नेधारयमाणोरण्यकारेस्त्वष्ठवइत्युपक्रम्यनमःस्वाभुधायेतिनाभिदघ्नेरोषेणआग

वतानेस्त्वआसदघ्नेकृत्वासहस्राणिसहस्रशइतिदशावतानांकृत्वान्वारोहंजुहोति
नमोरुद्रेभ्योयेपृथिव्यामितिजानुदघ्नेधारयमाणोनमोरुद्रेभ्योयेंतरिक्षइतिनाभिदघ्ने
नमोरुद्रेभ्योयेदिवीत्यासदघ्नेकृत्वेतित्रेधाषोडशधाचविभागोदर्शितोबौधायनेन॥
अपरःप्रकारःतत्रप्रथमेनुवाकेपंचदशर्चेपंचदशमंत्राः॥ द्वितीयेत्रयोदशयजूं
षित्रयोदश॥ तृतीयचतुर्थयोःप्रत्येकंसप्तदशयजूंषि॥ एषुत्रिषुनुवाकेषूत्तमतो
नमस्कारमंत्राः॥ पंचमषष्ठानुवाकयोःप्रत्येकंपंचदशयजूंषि॥ सप्तमेषोडश॥ अ
ष्टमेसप्तदश॥ नवमेएकोनविंशतिः॥ एषुपंचस्वनुवाकेष्वेकतरतोनमस्कारमंत्राःतत्रा
पिपुरस्तान्नमस्काराः॥ नवमानुवाकेनमोवःकिरिकेभ्योदेवानांहृदयेभ्यइत्यतोदेवानां
हृदयेभ्यइत्येतदुत्तरमंत्रचतुष्टयेप्यनुषजति॥ तद्यथा॥ नमोविक्षीणकेभ्योदेवानांहृ
दयेभ्योनमोविचिन्वत्केभ्योदेवानांहृदयेभ्योनमआनिर्हतेभ्योदेवानांहृदयेभ्यो

महा० १२

नम आमीवत्केभ्यो देवानां हृदयेभ्य इति॥ अयं चानुषंगो यत्र होमादिषु तेषां मंत्राणां पृथ
क्पृथग्विनियोगस्तत्रैव यत्र तु जपादावपृथक्करणं न तत्र अपितु यथाध्ययनमेव पा
ठः एवं सर्वत्राप्यनुषंगस्य ज्ञेयमुक्तेयं॥ अत्र च द्वितीयादि नवमांतेष्वनुवाकेषु नमस्कारादि
नमस्कारांतमेकं यजुरिति शाकपूणिः॥ नमस्काराद्येकं यजुरिति या
स्काः अष्टावनुवाका अष्टौ यजूंषीति काशकृत्स्नः॥ तत्र शाकपूणिपक्ष उभयतो
नमस्कारेषु सुकरो मंत्रविभागः॥ अन्यतरतो नमस्कारपक्षे व्यवस्थः॥ तद्यथा॥ नमो भ
वाय च रुद्राय च नमः शर्वाय च पशुपतये चेत्यत्र द्वितीयो योऽयं नमः शब्दः स पूर्वमंत्रसं
तत्वेनोत्तरमंत्रस्य चादित्वेनेत्थं नमस्कारमाम्नातकादिवदुभयत्र संबध्यते॥ तथा च १२
नमो भवाय रुद्राय च नम इत्येको मंत्रः॥ एवमुत्तरत्रापि विज्ञेयं॥ अथवा नमो भवाय रु
द्रः पुनरपि नमेव नमः शब्दमुपादाय नमः शर्वाय पशुपतये च नम इत्यपरो मंत्रः॥ १२

द्राय चेत्येवमादिषु च शब्देन प्रथमो नमः शब्दः अनुकृष्यते॥ एवमुभयतो नमस्काराम्
नातं भवति॥ यास्कपक्षे तु अन्यतरतो नमस्कारेषु स्फुटो मंत्रविभागः॥ उभयतो नमस्का
रेषु त्वसः॥ तद्यथा॥ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिके
शेभ्यः पशूनां पतये नम इत्यत्र नमो हिरण्यबाहवे सेनान्ये दिशां च पतय इत्येको मंत्र
॥ पुरस्तादेवैक नमस्कारयुक्तः॥ नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतय इति
प्रथमत एव द्विनमस्कारको द्वितीयो मंत्रः॥ एवमुत्तरत्रापि चतुर्थानुवाके चरममंत्र
वर्जं॥ चरमस्त्वादौ द्विनमस्कारकः अंत एकतरनस्कारक इत्युभयतो नमस्कारः का
र्यः॥ एवं विधाश्च विभागा बहुभिर्नाप्यकारैरनुपात्ता इति बहुसंमतः पूर्वोक्त एव
विभागो ग्राह्यः॥ तथा च शाकपूण्यादिभिरपि न विरोधः॥ तथा हि द्वितीयतृतीयचतु
र्थानुवाकाभिप्रायेण नमस्कारादि नमस्कारांतमेकं यजुरिति यास्कः॥ काशकृत्स्नस्तु

महा.
७३ षावनुवाकावस्यैव जपेदित्यवांतरमहावाक्याभिप्रायेणाह॥ अन्यान्यप्यवांतरमहा
वाक्यानि वेदव्याख्यानदक्षैर्भास्करेण प्रदर्शितानि॥ तान्यग्रे प्रदर्श्यंते॥ तस्मात्सर्वोक्त्याभिप्रायेणादि
तस्तास्त्वनवस्वनुवाकेषु चतुश्चत्वारिंशदधिकशतं मंत्राः॥ दशमेनुवाके षोडशर्चे
षोडशमंत्राः एकादशेनुवाके अंते त्रिष्टुभौ द्वे अत्रयो दश मंत्राः॥ एवमेकादशस्व
प्यनुवाकेषु मंत्रा एकोनसप्तत्युत्तरशतं भवंति॥ इति रुद्रानुवाकेषु मंत्रविभागः॥ अ
थ चमकानुवाकेवलेषु तथा चमकनमकयोर्विशिष्टप्रयोगे च मंत्रविभागः॥ ॥ तत्र
अग्नाविष्णू सजोषसेति चतुर्गृहीतं कृत्वेत्युपक्रम्य वाजश्च मे प्रसवश्च मे इति संततं
वसोर्धारां जुहोत्यामंत्रसमापनादिति बौधायनेन प्रथमामृचमपास्यावशिष्टस्य च
मकस्यैकमंत्रत्वं वसोर्धारायामभिहितं॥ तेनैव न्यायेन यदा एकवारं नमकानुवाका
वृत्त्याज्येन प्रतिमंत्रं यत्र होमः क्रियते॥ तदा तत्र चमके प्रथमामृचं पठित्वा चतुर्ग ७३

हीतेन कृत्वावशिष्टेन चक्रमेण संततां धारां जुहुयात्॥ यदा तु तिलादिभिर्नमकहोम
के न तदा तिलादिभिरेव द्रव्यैः संततधाराया अनिष्पत्तेर्यज्ञसंयुक्ते कर्मणि जप
दावनुवाकन्नेदस्य एष अत्र तेनानुष्ठानात् प्रथमा ऋगेका मंत्राः॥ वाजश्च म इत्याद
स्यानुवाकांतमपरो मंत्रः॥ अवशिष्टदशानुवाका दश मंत्रा इत्येवं द्वादशभिर्मंत्रै
र्जुहुयात्॥ अन्येव सुधारामपि कुर्वंत वसोर्धाराया अभिलषितार्थप्राप्तिहेतुत्वात्
॥ यत्रापि रुद्रानुवाकानामेकादशावृत्त्या प्रतिमंत्रं होमः॥ तत्रापि नमस्ते रुद्र मन्य
व इत्येकादशानामनुवाकानामेकमेकं जपेदिति बौधायनेन एकवारमेकादशा
नुवाकपाठं ते एकं प्रथमे चमकानुवाकं पठेत्॥ पुनरपि समग्रनमकानुवाकाव
त्तिं कृत्वा द्वितीयं चमकानुवाकमावर्त्तयेत्॥ एवमेव समग्रनमकानां प्रत्यावृत्ति
चमकानुवाकानां वाकेषु क्रमेणैकैकानुवाकस्यावर्त्तनीयः इत्थं त्रिभिर्नरुद्रानुवाक

भानात्॥ प्रतिमंत्रं रुद्रानुवाकहोमांते एकं प्रथमं चमकानुवाकमेकमंत्रात्मकं पठित्वा
कृत्वा पुनरपि पूर्वोक्तन्यायेन रुद्रानुवाकैः कृत्वा द्वितीयेन चमकानुवाकेनानुजुहुयादिमे
वमेकादशरुद्रानुवाकानामेकादशावृत्त्या वृत्तिचमकानामेकमनुवाकं क्रमेणाजु
त्वांते वसोर्धारां जुहुयात्॥ अयं च होमप्रकारो द्रव्यद्रव्यसाधारणः सर्वत्र वसुधारा
त्वाज्येन॥ एवमेव रुद्रैकादशिन्यां महारुद्रेऽतिरुद्रे च एव॥ एवं तल्लक्षणानि चा
ह लक्षणात्तपः षडंगो काद्दशी रुद्रो रुद्रैकादशावृत्तिरेताभिर्महारुद्रस्य कथ्यते॥ एका
दशमहारुद्रैरतिरुद्र इतीरित इति तथा विधितो नमकावृत्ती रुद्र एकादशात्मिका
॥ रुद्रस्यैकादशावृत्त्या रुद्रैकादशिनी स्मृता॥ एकादशावृत्तिरेताभिर्महारुद्रस्तु कथ्य
ते॥ एकादशमहारुद्रैरतिरुद्र इतिष्यते इति॥ अनयोरर्थः वक्ष्यमाणषडंगन्यासादिपू
र्वकमेकादशानां नमकानां जपानंतरमेकं चमकप्रथमानुवाकं जपेत्॥ पुनः पूर्ववन्न

मकजपानंतरं द्वितीयं चमकानुवाकं पठेत्॥ एवमेकादशवारान्॥ नमकान्तरन्
क्रमेणैकमेकं चमकानुवाकमुच्चारयेत्॥ अनेन प्रकारेण नमकैकादशानुवाका
नामेकादशधा आवृत्तिः॥ षडंगैकादशी कथ्यते॥ एष एव रुद्र इति संज्ञां लभते॥ ए
कादशरुद्रतः॥ पूर्वोक्तस्य रुद्रस्यैकादशावृत्त्या लघुरुद्रः॥ एकादशरुद्रतो रुद्रो ल्लघुरय
॥ इयं च रुद्रस्यैकादशावृत्तिरेव रुद्रीति रुद्रैकादशिनी चेति व्यपदेशमाप्नो
वति॥ एकादशावृत्तिरेताभिः॥ एताभिः रुद्री रुद्रैकादशिनीति पर्यायनाम्नीभिरेका
दशसंख्याभिर्महारुद्रः कथ्यते॥ महारुद्रस्यैकादशावृत्तिरतिरुद्र इति॥ ॥ इति
चमकनमकयोर्मंत्रविभागः॥ ॥ अथ मंत्रविभागप्रकारा गमने केषां दर्शितत्वा
त्॥ कस्मिन्विभागे कति मंत्रा इति मंत्रसंख्या तथा कुत्र मंत्रविच्छेद इत्येतत्प्रद
र्श्यते तथा दशांगाहोमादिषु कस्या कृतयुत्पत्तेरप्यभिधास्यते॥ तत्र स्कंदात्रेधा

षोडशाच विभागो दर्शितः॥ अथ तत्रैव विभागमनसि निधाय बौधायनो प्याह॥ नमस्ते
रुद्रमन्यव इद्रमन्यव इत्येतानुवाकास्त्रेधा विभज्येति अत्र चाविच्छिन्नानामनुवाका
नां त्रेधाकरणप्रदेशः आद्यास्त्वारोनुवाकाः एकोदशानन्तरस्त्वारोनुवाकागताः अवशि
ष्टानुवाकत्रयं तृतीयांशः॥ एवं चानुवाकमध्ये विच्छेदमन्तरेणैव विभागो घटते॥ यथा
गवांशतदक्षिणोलत्रषोडशर्त्विजां दक्षिणाविभागः॥ तद्यथा प्रधानस्य तत्रत्विक्चतु
ष्टयस्याप्यर्धिन इति संज्ञा॥ तदनन्तरं ऋत्विक्चतुष्टयस्याप्यर्धिन इत्येव संज्ञा॥
तदनन्तराणां चतुर्णां ऋत्विजां तृतीयिन इति॥ ततोवशिष्टचतुर्णां पादिन इति॥ एषां
शतं गावो विभज्य दातव्याः॥ तत्राप्ययं नियमः॥ अर्धिनामर्धं तृतीयिनां तृतीयांशः॥ १५
पादिनां चतुर्थांशः इति॥ अर्धिनां च द्वौ समुदायौ तत्र प्रथमार्धिनां गोशतार्धं पंचा
शद्गावो भवंति॥ एवं च क्रियमाणे द्वितीयार्धिनां पंचाशतोर्धं पंचविंशतिः॥ तृती

यिनां पंचाशतस्तृतीयांशे क्रियमाणे षोडश षोडश भवंति॥ गोद्वयमवशिष्य
ते॥ तच्च त्रिषु स्थलेषु विभज्य स्यादिति मन्तव्यं॥ इत्थं द्वाराच विभागो निषिद्धः॥ त
स्मादर्धिनामष्टाचत्वारिंशत् द्वितीयार्धिनां चतुर्विंशतिः॥२४॥ तृतीयांशिनां षोड
श॥१६॥ पादिनां द्वादश॥१२॥ इति गवां स्वरूप॥ विच्छेदाय शतं गावो विभक्ताः॥ अ
नेन न्यायेन अत्रैतेष्वेकादशानामनुवाकानामनुवाकस्वरूपाविच्छेदाय पूर्वोक्त
रीत्या चरमानुवाकत्रयस्यैकमंत्रत्वमंगीकार्यं॥ एवं च नमकानुवाकानामेकाद
शजपान्ते यदि होमं कर्तुं चिकीर्षति॥ होममात्रमेव वा तदास्मिन्पक्षे त्रयो मंत्राः इ
ति तिस्र आहुतयो भवंति॥ एवं च नमकानुवाकानामेव जपान्ते होमं चिकीर्षायां केवल
होममात्रे छायां वाश्चमकेषु प्रथमाक्रमेको मंत्रः॥ त्रिंशदेकादशानुवाका एकाद
शमंत्रा इति द्वादशानिमं त्रैस्तावत्य आहुतयः॥ वसुधारा पूर्वोक्तरीत्यैव॥ इत्येकं

प्रकारः॥ अथापरस्त्रेधाविभागो नमकेषु॥ अत्र च मूलं त्रेधाविभक्तं जुहोति स एत
द्देवश्रुतिवाक्यं तत्र च नमस्ते रुद्र मन्यव इत्यारभ्य सभापतिभ्यश्च वो नम इत्यंत एको भा
गः॥ नमो अश्वेभ्य इत्यारभ्य सभापतिभ्यश्च वो नम इत्यंत एको भागः॥ नमो अश्वेभ्य इत्या
रभ्यावार्याय चेत्यंतो द्वितीयः॥ नमः प्रतरणाय चेत्यारभ्यासमाप्तेस्तृतीयः॥ एवं त्रयो
मंत्रा इति जपांगहोमे अनंगजप्तस्वतंत्रहोमे वा तिस्र आहुतयः॥ ॥इति द्वितीयः प्रका
रः॥ ॥अथान्यः प्रकारः षोढाविभागात्मकः॥ तत्र समनंतरपूर्वोक्तविभागप्रकारे ए
व प्रथमद्वितीयौ यास्यौ॥ तृतीये विभागे तु नमः॥ प्रतरणाय चेत्यारभ्य एतावंत इ
त्यत्रासहित एको मंत्रः॥ एवं त्रयो मंत्राः॥ नमो रुद्रेभ्यो ये पृथिव्यामित्यारभ्य त्रीणि

यजूंषि॥ अत्र च नमो रुद्रेभ्य इति च येषामिमेतत्पदं च इषवस्तेभ्य इत्यारभ्यासमा
प्तेर्मावाक्यत्रयः सर्वेष्वेतत्त्रितयं त्रिष्वपि यजुःष्वनुषजति॥ तथा नमो रुद्रेभ्यो ये पृ

थिव्यां येषामन्नमिषवस्तेभ्य इत्येकपद्यस्य समाप्तिपर्यंतमेको मंत्रः॥ नमो रुद्रेभ्यो ये
येषां वात इषवस्तेभ्य इत्यादि द्वितीयः॥ नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्य इ
त्यादि तृतीयो मंत्रः॥ एवं पूर्वोक्तैस्त्रिभिर्मंत्रैः सह षण्मंत्राः॥ अस्मिंश्च विभागे त्रेधावि
भक्तं जुहोतीत्येकपक्षस्य षट् संपद्यंत इत्यंता श्रुतिः प्रमाणत्वेन पूर्वं प्रदर्शिता॥ अधु
नाविनियोगसंग्रहवाक्यं प्रमाणीयते॥ प्रश्ने तु पंचमे प्रोक्तः॥ शतरुद्रियहोमकः॥ स
भापतिभ्य इत्यंतः एको मंत्रः प्रकीर्तितः॥ वार्याय चेत्यंतत एकस्तन्मसीमं उत्तरः॥ नमो
रुद्रेभ्य इत्येव पृथिव्यादिविकृते दृतः॥ त्रेधा निवृत्तस्ततो होमे षण्मंत्रा इह कीर्तिताः॥ इति
॥ अस्मिन्विभागे षडाहुतयोऽनंगेति जपांगहोमे स्वतंत्रहोमे वा॥ ॥इति तृतीयः प्रकार
ः॥ ॥अथ षोडशधा विभागवानन्यतरः प्रकारः॥ तत्र नमस्ते रुद्र इत्यारभ्य नमस्तक्ष
भ्य इत्यंतः प्रथमो विभागः॥ रथकारेभ्यश्च व इत्येकपक्षस्य नमः स्वायुधायेत्यंतो द्विती

महा॰
११

योविन्यासः॥ सुधन्वनेचेत्यारभ्यसहस्राणिसहस्रशः इत्येतदृक्पर्यंतंचतीमोविन्यासः॥ इति
त्रयोमंत्राः॥ सहस्राणिसहस्रश इत्यारभ्यदशर्चोदशमंत्राः॥ एवंपूर्वोक्तैःसहषोडश
॥ अत्रविन्यासेबोधायनवृत्तेनप्रमाणंतथापिवाप्रथमादुपक्रम्यनमस्तेरुद्रस्यइत्या
दिप्रथममेवदर्शितं॥ इत्येवंजपांगहोमेस्वतंत्रहोमेवाषोडशाकृतयोभवंति॥ ॥
इतिचतुर्थःप्रकारः॥ अथाष्टचत्वारिंशन्मंत्रविन्यासात्मकः॥ प्रकारः॥ तत्रप्रथ
मानुवाकेपंचदशमंत्राः॥ ततोष्टमानुवाकाद्यैयजूंषिकाशकृत्स्नमतेनेत्यादितआ
रभ्यनवस्वनुवाकेषुत्रयोविंशतिः॥ दशमेनुवाकेद्वादशएतेचपूर्वैःसहपंचत्रिंश
त्॥ एकादशेनुवाकेऋचोदशत्रीणियजूंषीतित्रयोदश॥ एवंपूर्वैःसहत्रयोदशान ११
मोरुद्रेभ्योयेपृथिव्यामिति॥ अवशिष्टंवाक्यंपूर्वोक्तरीत्यात्रीणियजूंषित्रयोमंत्राः
॥ सहाष्टचत्वारिंशत्॥ अतोजपांगहोमेस्वतंत्रहोमेचतावत्यएवाकृतयः॥ ॥ इति

पंचमःप्रकारः॥ ॥ अथैकोनसप्तत्युत्तरशतमंत्रविन्यासयुक्तोऽन्यतमःप्रकारः॥
सचविनियोगप्रकरणानंतरमेवतत्रप्रथमकरणानंतरमेवतत्रप्रथमानुवाकेपंच
दशर्च इत्यादिनाग्रंथेनदर्शितः॥ अतस्तत्रजपांगहोमेस्वतंत्रहोमेप्येकोनसप्त
त्युत्तरशतमंत्रविन्यासयुक्तोऽन्यतमयुक्तोऽयमःप्रकारः॥ सचविनियोगप्रकरणा
नंतरमेवतत्रप्रथमानुवाकेपंचदशर्च इत्यादिनाग्रंथेनदर्शितः॥ अतस्तत्रजपांग
होमेस्वतंत्रहोमेप्येकोनसप्तत्युत्तरशतमाकृतयः॥ ॥ इतिषष्ठःप्रकारः॥ इ
तिरुद्रकारंनमस्कारहत्योमंत्रविन्यासभेदेनषट्प्रकाराःप्रदर्शिताः॥ अथरुद्रैकाद
शिन्यादिषुपूर्वोक्तपक्षसंख्यानामावृत्तिभेदात्संख्याभेदःप्रदर्श्यते॥ नमकाना
मेकवारमावृत्तौरुद्रशाहोमप्राप्तिरेवनास्ति॥ एकादशधावृत्त्यात्मकेरुद्राख्ये
विषयेतत्रदशांशहोमेकर्तव्येत्रेधाविन्यासपक्षद्वयाश्रयेणेनतिसंख्याकृतयः॥

महा० १८ ततो वसोर्धारा॥ संपूर्णहोमपक्षे प्रतिरूपकं तिस्रस्तिस्र आहुतयः इति त्र्यस्त्रिंश
१८ त्॥ रूपकांते रूपकांते च मकानुवाकेनैकैका आहुतिरिसेताएकादश्यां पूर्णाग्निः स
ह चतुश्चत्वारिंशत्॥ अंते च वसोर्धारा षोडशविभागपक्षाश्रयणे तु दशांशहोमे षडा
हुतयः ततो वसोर्धारा॥ समग्रहोमे तु प्रतिरूपकं षट् षडिति षडुत्तरा षष्टिः॥ पूर्णा
करीला च मकानुवाकाहुतय एकादशेति सप्तसप्ततिराहुतयः॥ अंते च वसुधा
रा षोडशधा विभागपक्षांगीकारे दशांशहोमे षोडशाहुतयो वसोर्धारा च संपूर्ण
होमे तु प्रतिवारं षोडशेति षट्सप्तत्युत्तरं शतमाहुतयः॥ पूर्ववच्चमकस्यैकादशे
ति पूर्णाग्निः सहस्रषाशीत्युत्तरं शतं॥ ततो वसुधारा॥ अष्टचत्वारिंशत्खंडविभाग १८
पक्षांगीकारे दशांशहोमे अष्टचत्वारिंशदेव॥ तदनंतरं वसुधारा॥ समग्रहोमे प्रति
रूपकमष्टाचत्वारिंशद्दशाष्टाचत्वारिंशादिन्यष्टाविंशत्युत्तरापंचशती नव साहुती

नां॥ पूर्ववच्चमकानुवाकानामेकादशेति मिलित्वैकोनचत्वारिंशदुत्तराणि च
त्वारिंशत्शतानि ततो वसुधारा॥ एकोनसप्तत्युत्तरविभागपक्षाश्रयणे तु दशांशहो
मे एकोनसप्तत्युत्तरं शतमाहुतयः॥ समग्रहोमे तु प्रतिरूपकमेकोनसप्तत्यु
त्तरं शतमेकोनसप्तत्युत्तरं शतमिसेकसहस्रमष्टौ शतान्येकोनषष्टिश्चेत्याहुत
यो भवंति पूर्ववच्चमकानुवाकानामेकादशेति मिलित्वा एकसहस्रमष्टौ शतान्ये
कोनषष्टिश्चेत्याहुतयो भवंति॥ पूर्ववच्चमकानुवाकानामेकादशेति मिलिता एक
सहस्रमष्टौ शतानि सप्ततिश्च॥ ततो वसोर्धारा॥ ॥ इति रुद्रे आहुतिसंख्या॥ ॥
अथ रुद्रैकादशिन्यामाहुतिसंख्या॥ अत्रैकविंशत्युत्तरं शतं रूपकाणि भवंति॥
अतः शतांशहोमो प्यत्रावतिष्ठते॥ अवकाशसंभवात्॥ यदा च शतांशहोम
स्तदा शतरूपकाणामेकरूपकावृत्त्या होमः तत्रापि त्रेधा पोदेत्यादिमंत्रवि

नागश्चेदेनानेकेपत्न्याः संनवेयुः॥ तत्रत्रेधाविभागेशतरूपकाणामेकरूपकावृ
त्त्यातिसृभ्याऽऽवृत्तयः॥ रूपकाणामेकविंशतिरवशिष्यते॥ तदर्धं नमस्तेरुद्रमन्य
व इत्यनया प्रथममर्धार्धकावृत्तिः॥ नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्य इ
त्यादिनोन्त्ययजुषाऽपरार्धावृत्तिः॥ चमकानुवाके रेकादशेतिषोडशावृत्तयः॥
अतेवसोर्धाराच॥ शतांशहोमपक्षे एवं षोडशविभागान्प्रथमेशतरूपकाणामे
करूपकावृत्त्याषोडशावृत्तयः॥ अवशिष्टैकविंशतिरूपकाणां कृते नमस्तेरुद्र इ
त्यादिभिस्तिसृभिर्ऋग्भिः प्रत्येकमेकैकावृत्तिरितितिसृः॥ नमो रुद्रेभ्यो ये पृथि
व्यामित्यादिभिः पूर्वोक्तप्रकारमुक्तैस्त्रिभिर्यजुर्भिस्तिस्रऽऽवृत्तयइति पूर्वोक्ताभिः १८
सहपञ्चदश॥ चमकानुवाके रेकादशेतिमिलित्वात्रयोविंशतिः॥ अतेवसोर्धारा
च॥ शतांशहोमपक्षे एवं षोडशधाविभागे गौकारे रूपकशतस्यैकरूपकावृ

त्त्या षोडशावृत्तयः॥ अवशिष्टाया रूपकाणामेकविंशतेः कृते प्रथमचैकावृ
त्तिः पूर्वोक्तरीत्याऽन्त्ययजुषा चैकावृत्तिः॥ पुनः प्रथमाभिस्तिसृभिस्तिसृभिऋग्भिः प्र
त्येकमेकैकेतितिसृः॥ अन्त्यैस्त्रिभिः पूर्वोक्तप्रकारमुक्तैर्यजुर्भिः प्रत्येकमेकै
केतितिसृः॥ इति मिलित्वा चतुर्विंशतिः॥ चमकानुवाके रेकादशेति पूर्वोक्ताभिः
सह पंचविंशतिः॥ ततो वसुधारा शतांशहोमपक्षे रावाणचत्वारिंशद्रूपमंत्रवि
भागप्रथमेशतस्यरूपकाणामेकरूपकावृत्त्याष्टचत्वारिंशदावृत्तयः॥ त्रे
धाविभागमाश्रित्यपुनरेकरूपकावृत्त्यातिसृभ्याऽऽवृत्तयः॥ अवशिष्टरूपाणां कृ
ते प्रथमचैकावृत्तिः॥ अन्त्ययजुषा पूर्वोक्तप्रकारमुक्ते नचैकावृत्तिरित्येवं
त्रिपञ्चाशत्॥ चमकानुवाके रेकादशेति मिलित्वा चतुःषष्टिः॥ अतेवसुधाराच॥
शतांशहोमपक्षे एवैकोनसप्तत्युत्तरशतमंत्रविभागान्प्रथमेशतरूपकाणा

मेकरूपकारत्साणकोनसप्तसप्तत्युत्तरंशतमाकृतयः॥ त्रेधाविभागमाश्रित्यपुनरेकरू
पकारत्सातिस्रआकृतयस्त्रिवृद्धिरूपकाणांकृतेप्रथमानित्तिस्रस्त्रिर्द्वित्रिः प्रत्येक
मेकैकेतितिस्रः॥ त्रयस्त्रैः पूर्वोक्तप्रकारयुक्तैस्त्रिभिर्यजुर्भिः प्रत्येकमेकैकेतितिस्रः॥
णवपूर्वोक्ताभिः सहाष्टाधिकसप्तत्युत्तरंशतमाकृतयः॥ चमकानुवाकैरेकादशो
तिमिलित्वैकोननवत्युत्तरंशतमाकृतयः॥ अथरुद्रैकादशिन्यामेवदशांशहो
मपक्षाश्रयणेतत्रापित्रेधामंत्रविभागांगीकारेणकविंशत्युत्तरशतरूपकाणां
द्वादशरूपकादशांशोनाम॥ द्वादशस्यापित्रयेकंतिस्रस्तिस्रइतिषड्विंशदाकृ
तयः॥ प्रथमचैकादश्यस्ययजुषाचैकेतिमिलित्वाष्टाविंशत् चमकानुवाकैरेकाद ८०
शेतिपूर्वाभिः सहैकोनपंचाशत्॥ अंतेवसोर्धाराच॥ दशांशहोमएकपक्षोदामंत्र
विभागेदशांशोद्वादशरूपका॥ तेषुप्रत्याहतिमिषट्षष्टितिवासप्ततिराकृतयः॥

प्रथमचैकादश्यस्ययजुषाचैकेतिचतुःसप्ततिचमकानुवाकैरेकादशेतिमिलित्वा
पंचाशीतिः॥ ततोवसोर्धाराच॥ दशांशहोमएवषोडशधामंत्रविभागेद्वादश
रूपकाणांप्रत्याहृत्तिषोडशषोडशेतिषधिकनवत्युत्तरशतमाकृतयः॥ प्र
थमेचैकादश्यस्ययजुषाचापराचमकानुवाकैरेकादशेतिमिलित्वापंचोत्तर
शतद्वयमाकृतयः॥ अंतेवसोर्धाराच॥ दशांशहोमएवाष्टचत्वारिंशन्मंत्र
विभागेद्वादशरूपकाणांप्रत्याहृत्तिश्चाष्टचत्वारिंशदिति॥ षट्सप्ततुत्तरा
पंचशतीत्वत्साकृतीनां॥ प्रथमचैकादश्यस्ययजुषाचापराचमकानुवाकैरे
कादशैतेमिलित्वाएकोननवत्युत्तरापंचाशती॥ अंतेवसोर्धाराच॥ दशांश
होमएवैकोनसप्तत्युत्तरशतमंत्रविभागेद्वादशरूपकाणांप्रत्याहृत्तिरेको
नसप्तत्युत्तरंशतमितिद्वेसहस्रेअष्टाविंशतिश्चाकृतयः॥ प्रथमचैकादश्यं

स्य यजुषा चापरा च मकानुवाकैरेकादशैस्ते मिलित्वा एकोनत्रिंशत्युत्तराणां पंचाशती
॥ अंते च सोर्धराच ॥ दशांशहोमे एवैकोनसप्तत्युत्तरशतमंत्रविभागेन दशरूपका
णां प्रत्याहृत्यैकोनसप्तत्युत्तरं शतमिति द्वे सहस्रेऽत्र एकविंशतिश्चावृत्तयः ॥ प्रथम
र्वैकांतस्य यजुषा चापरा च मकानुवाकैरेकादशोक्तिपूर्वाभिः सह द्वे सहस्रे एकचत्वा
रिंशच्च ॥ अथ रुद्रैकादशिन्यामेव समग्रहोमपक्षे तत्रापि त्रेधा मंत्रविभागे एकविंश
त्युत्तरशतरूपकाणां प्रतिरूपकं षडिति सप्तशतानि षड्विंशतिश्चावृत्तयः ॥ संपू
र्णहोमपक्षे एवं तिस्रस्तिस्र इति त्रीणि शतानि त्रिषष्टिश्चावृत्तयो भवंति ॥ समग्रहो
मपक्षे एव षोढा मंत्रविभागे एकविंशत्युत्तरशतरूपकाणां प्रतिरूपकं षट् षडिति
सप्तशतानि षड्विंशतिश्चावृत्तयः ॥ संपूर्णहोमपक्षे एव षोडशधा मंत्रविभागे एक
विंशत्युत्तरशतरूपकाणां प्रतिरूपकं षोडश षोडशेति एकसहस्रं नव शतानि ष

ट्त्रिंशच्चावृत्तयः ॥ संपूर्णहोमपक्षे एवाष्टचत्वारिंशन्मंत्रविभागे विंशत्युत्तर
शतरूपकाणां प्रतिरूपकमष्टचत्वारिंशदिति पंचसहस्राण्यष्टौ शतान्य
ष्टावावृत्तयः ॥ समग्रहोमपक्षे एकैकोनसप्तत्युत्तरशतमंत्रविभागे एकविंश
त्युत्तररूपकशतानां प्रतिरूपकमेकोनसप्तत्युत्तरं शतं मंत्रा इति विंशतिसह
स्राणि चत्वारि शतान्येकोनपंचाशदावृत्तयः ॥ समग्रहोमपक्षेषु सर्वेष्वेका
दशरूपकात्मकत्वं भवति तत्र प्रतिरूपकमेकानुवाकैरेकादशैरेकादशानुवा
कैरेकादशैकादशावृत्तय इति चमकावृत्तय एकविंशत्युत्तरं शतं भवंति ॥ स
र्वत्र चांते च सोर्धराच ॥ ॥ इति रुद्रैकादशिन्यामावृत्तिसंख्या ॥ ॥ अथ महारुद्रा
वृत्तिसंख्या ॥ ॥ तत्र चैकविंशत्युत्तरस्यैकशतस्यैकादशभिर्गुणने एकसहस्रं त्री
णि शतान्येकत्रिंशच्च रूपकाणि भवंति ॥ अत्र च शतांशस्त्रयोदशरूपकाः ॥ रूपका

महा०
८२

नवतिः॥ अत्र च शतांशस्त्रयोदश रूपकाः॥ रूपकाणामेकत्रिंशद्वर्ज्यते॥ एवं श
तांशहोमपक्षांगीकारे तत्रापि त्रेधा मंत्रविभागे शतांशस्त्रयोदश रूपकाणां
प्रतिरूपकं तिस्र इति एकोनचत्वारिंशदाहुतयः॥ अवशिष्टानामेकत्रिंशतो रू
पकाणां कृते आद्यानि त्रीणि सन्ति रुद्रैः प्रत्येकमेकैकेति तिस्रः॥ अन्यैः पूर्वोक्तप्र
कारयुक्तैस्त्रिभिर्यजुर्भिः प्रत्येकमेकैकेति तिस्रः॥ इति मिलित्वा पंचचत्वारिं
शदाहुतयः। चमकानुवाके रेकादशभिः प्रत्यनुवाकमेकैकेत्येकादश इति पू
र्वोक्ताभिः सह षट्पंचाशत्। अंते वसोर्धारा च॥ शतांशहोमपक्षे षोडशमंत्र
विभागे त्रयोदश रूपकाणां प्रतिरूपकं षट् षडिति अष्टसप्ततिराहुतयः॥ अ ८२
वशिष्टैकत्रिंशद्रूपकाणां कृते आद्यानि त्रीणि सन्ति रुद्रैः प्रत्येकमेकैकेति तिस्रः॥
अन्यैस्त्रिभिर्यजुर्भिः प्रत्येकमेकैकेति तिस्रः॥ एवं मिलित्वा चतुरशीति पूर्ववच्च

पूर्ववच्चमकानुवाके रेकादशेति पूर्वोक्ताभिः सह पंचनवतिः॥ ततो वसोर्धारा
च॥ शतांशहोमपक्षे एव षोडशधा मंत्रविभागे त्रयोदश रूपकाणां प्रतिरूप
कं षोडश षोडशेति तिस्र इति षट्। अवशिष्टैकत्रिंशतो रूपकाणां कृते पूर्वव
त्प्रथमैस्त्रिभिस्तिस्रः अंत्यैर्यजुर्भिस्त्रिभिस्तिस्र इति षट्॥ पूर्ववदेव चमकानुवाके रेका
दशेति मिलित्वा द्विशते पंचविंशतिश्च॥ अंते वसोर्धारा च॥ शतांशहोमपक्षे ए
वाष्टाचत्वारिंशधा मंत्रविभागे त्रयोदश रूपकाणां प्रतिरूपकमष्टाचत्वारिंश
दिति षट्शतानि चतुर्विंशतिश्चाहुतयो भवंति॥ अवशिष्टैकत्रिंशद्रूपकाणां कृ
ते प्रथमानि त्रीणि सन्ति रुद्रैः प्रत्येकमेकैकेति तिस्रः॥ पूर्वोक्तप्रकारयुक्तैरंत्यैर्यजु
र्भिस्त्रिभिस्तिस्रः॥ पूर्ववच्चमकानुवाके रेकादशेति पूर्वोक्ताभिः सहैकचत्वारिं
शदुत्तरषट्शत्याहुतीनां॥ ततो वसोर्धारा च॥ शतांशहोमपक्षे एवैकोनसप्त

स्तुत्तरं शतं मंत्रविज्ञागेत्र योदशरूपकाणां प्रतिरूपकमेकोनसप्तत्युत्तरं शतमिति
द्वेसहस्रे एकशतं सप्तनवतिश्चाहुतयः॥ अवशिष्टैकत्रिंशद्रूपकाणां हुते पूर्ववत्प्र
थमानिर्दिष्टानि स्युः॥ अंत्यमनुर्लिखितिभिः पूर्ववत्तिस्रः॥ पूर्ववद्देवचमकानुवाकैरेकै
कशोत्तिमिलित्वा द्वे सहस्रे द्वे च शते चतुर्दश च॥ अथ महारुद्रएवं दशांशहोमपक्षे
एकसहस्रं त्रीणि च॥ तानि एकविंशत्यैतिरूपाणां दशांशाः एकशतं त्रयस्त्रिंशच्चेति
भवति॥ एकरूपोवशिष्यते॥ अत्र त्रेधा मंत्रविज्ञागेत्र यस्त्रिंशदधिकसैकशतस्य
रूपकाणां प्रतिरूपकं तिस्रस्तिस्रश्चाहुतयस्तत्सेकोनचतुःशताहुतीनां॥ अथ च
मकानां दशांशेद्वादशरूपकानि भवंति॥ तत्र प्रतिरूपकमेकादशानुवाकैरेकादशै
कादशेति मिलित्वा द्वात्रिंशदुत्तरमेकशतमाहुतयः॥ एताः पूर्वोक्ताभिः सह पंचाश
तानि एकत्रिंशच्च॥ अंते वसोर्धारा च॥ दशांशहोमपक्षे एवं पोडश मंत्रविज्ञागेत्र

यस्त्रिंशदुत्तरशतरूपकाणां पूर्ववत्प्रतिरूपकमेकादशेति द्वात्रिंशदुत्तरमे
कशतं॥ एताः पूर्वोक्ताभिः सह नवशतानि त्रिंशच्चाहुतयः॥ ततो वसोर्धारा॥ ॥ दशां
शहोमपक्षे एवं षोडशधा मंत्रविज्ञागे त्रयस्त्रिंशदुत्तरशतरूपकाणां प्रतिरूप
कं षोडश षोडशेति द्वे सहस्रे एकशतमष्टाविंशतिश्चाहुतयः॥ पूर्ववच्चमक
द्वादशरूपकाणां प्रतिरूपकाणां प्रतिरूपकमेकादशैकादशेति एकशतं द्वा
त्रिंशच्च पूर्वोक्ताभिः सह ते द्वे सहस्रे द्वे च शते षष्टिश्चाहुतयः अंते वसोर्धारा च॥
दशांशहोमपक्षे वाणचत्वारिंशान्मंत्रविज्ञागे त्रयस्त्रिंशदुत्तररूपकाणां प्र
तिरूपकमष्टचत्वारिंशद् दश चत्वारिंशदिति षट्सहस्राणि त्रीणि च शता
नि चतुरशीतिश्चाहुतयः॥ पूर्ववच्चमक द्वादशरूपकाणां प्रतिरूपमेकाद
शैकादशेति द्वात्रिंशदधिकमेकशतं॥ एवं पूर्वोक्ताभिः षट्सहस्राणि पंच

शतानिषोडशाश्चनवतिं॥ अंतेवसोर्धाराश्च॥ दशांशहोमपक्षेवैकोनसप्तकंशत
शतमंत्रविभागेत्रयस्त्रिंशदुत्तरशतरूपकाणांप्रतिरूपकंशतमेकोनसप्ततिश्चे
तिमिलित्वाषड्विंशतिः॥ सहस्राणिचत्वारिंशतानिसप्ततिश्चावृत्तयः॥ पूर्ववच्च
मकवारशतरूपकाणांप्रतिरूपकमेकादशैकादशेतिएकशतंवारशताश्च॥ प्र
र्वाभिः सहैताव्हाविंशतिसहस्राणिषट्शतानिनवचनवंति॥ अंतेवसोर्धाराच॥ अथपू
महारुद्रेचसमग्रहोमपक्षेतत्रापित्रेधामंत्रविभागेएकसहस्रंत्रीणिशतान्येकत्रिं
शच्चेतिरूपकाणांप्रतिरूपकंतिस्रस्तिस्रआवृत्तयइतित्रीणिसहस्राणिनवश
तानिद्विनवतिश्चावृत्तयोभवंति॥ चमकस्यैकत्रिंशत्कृत्तरैकशतरूपकाणांप्र
तिरूपकमेकादशेतिमिलित्वैकसहस्रंत्रीणिशतान्येकत्रिंशच्चावृत्तयः॥ एता
अपूर्वाभिः सहपंचसहस्राणिशतानिषडशीतिश्चावृत्तयोभवंति॥ चमकस्यैक

त्रिंशच्छत्तरैकशतरूपकाणांप्रतिरूपकमेकादशैकादशेतिमिलित्वैकसहस्रं
त्रीणिशतान्येकत्रिंशच्चावृत्तयः॥ एताअपूर्वाभिः सहपंचसहस्राणित्रीणिशतानि
षडशीतिश्चावृत्तयोभवंति॥ चमकस्यैकविंशत्युत्तरैकशतरूपकाणांप्रतिरूप
कमेकादशेतिएकसहस्रंत्रीणिशतानिएकत्रिंशच्चइतिपूर्वाभिः सहनवसहस्रा
णित्रीणिशतानिसप्तदशचावृत्तयः॥ ततोवसोर्धाराच॥ अत्रैवसमग्रहोमपक्षेत
त्रापिषोढामंत्रविभागेएकसहस्रंत्रीणिशतानिएकत्रिंशच्चेतिरूपकाणांप्रतिरूप
कंषट्षडावृत्तयः॥ इति॥ सप्तसहस्राणिनवचशतानिषडशीतिश्चावृत्तयोभवं
ति॥ चमकस्यैकत्रिंशतरूपकाणांप्रतिरूपकमेकादशेतिसहस्रंत्रीणिशता
निएकविंशच्च॥ इतिपूर्वाभिः सहनवचसहस्राणित्रीणिशतानिसप्तदशचावृ
त्तयः॥ अंतेवसोर्धाराच॥ अत्रैवसमग्रहोमपक्षेषोडशधामंत्रविभागेएकसहस्रं

त्रीणि शतान्येकत्रिंशच्चेति रूपकाणां प्रतिरूपकं षोडशषोडशेति ॥ एवं विंशतिसाह
स्री द्वे च शते पञ्चनवतिश्चाहुतयः ॥ चमकस्यैकविंशत्युत्तरशतरूपकाणां प्रति
रूपकमेकादशैकादशेति मिलित्वैकसहस्रं त्रीणि शतानि एकत्रिंशच्च ॥ पूर्वोक्ता-
तिः सहैवाष्टाविंशतिसहस्राणि षट्शतानि सप्तविंशतिश्चाहुतयः ॥ ततो वसोर्धा
रायाश्चैव समग्रहोमपक्षे तत्राप्यष्टाचत्वारिंशन्मंत्रविनियोगे एकसहस्रं त्रीणि शता
नि द्वात्रिंशच्चेति रूपकाणां प्रतिरूपकमष्टाचत्वारिंशदिति षष्टिसहस्राण्यष्टौ
शतान्यष्टाशीतिश्चाहुतयः ॥ चमकस्यैकविंशत्युत्तरशतरूपकाणां प्रतिरूपक
मेकादशेति एकसहस्रं त्रीणि शतानि एकत्रिंशदाहुतयः ॥ एताश्च पूर्वोक्ताभिर्मि
लित्वा पंचषष्टिसहस्राणि द्वे शते एकोनविंशतिश्चाहुतयः ॥ अंते वसोर्धारायाश्च ॥ अ
त्रैव समग्रहोमपक्षे एकोनसप्तत्युत्तरशतमंत्रविनियोगे एकसहस्रं त्रीणि शतानि

एकत्रिंशच्चेति रूपकाणां प्रतिरूपकमेकोनसप्तत्युत्तरंशतमेकोनसप्तत्युत्तरंश
तमिति द्वे लक्षे चतुर्विंशतिसहस्राणि नवशतानि एकोनचत्वारिंशच्चाहुतयः ॥ च
मकस्यैकविंशत्युत्तरशतरूपकाणां प्रतिरूपकमेकादशैकादशेति पूर्वोक्ताभिः
सहैता द्वे लक्षे षड्विंशतिसहस्राणि द्वे शते सप्ततिश्चाहुतयः ॥ अंते वसोर्धारायाश्च ॥ ॥
इति महारुद्राहुतिसंख्या ॥ ॥ अथातिरुद्राहुतिसंख्या ॥ ॥ तत्र चतुर्दशसह
स्राणि षट्शतानि एकचत्वारिंशच्च रूपकाणि भवंति अत्र शतं त्वेकशतं षट्चत्वा
रिंशतानि एकविंशच्च रूपकाण्यवशिष्यंते ॥ एवं स्थिते शतं शतपक्षे त्रेधा च मंत्र
विनियोगे षट्चत्वारिंशदुत्तरशतरूपकाणां प्रतिरूपकं तिस्रस्तिस्र आहुतयः इति
॥ अष्टत्रिंशदुत्तरा चतुःशता आहुतीनां ॥ अवशिष्टैकचत्वारिंशद्रूपकाणां कृते आ
पातित्रिसंनिर्दिष्ट प्रत्येकमेकैकेति तिस्रः ॥ अंत्यमनुभिः पूर्वोक्तप्रकारमुक्ते

महा.
९६

स्विनिः॥ प्रत्येकमेकैकेतितिसः॥ चमकस्य त्रयोदशानुवाकानां प्रतिरूपकमेकादशौ
कादशेति त्रिचत्वारिंशदुत्तरशतमावृत्तम्॥ अवशिष्टैकत्रिंशद्रूपकाणां कृते अया
विल्लसजोषसेत्यनयर्चैकावृत्तिः॥ इत्येवं मिलित्वा अष्टाशीत्युत्तरपंचशतावृत्तीनां॥
अंते वसोर्धाराच॥ शतांशपक्षएव षोडशमंत्रविनियोगे षट्चत्वारिंशदधिकैकशतरू
पकं षड्षडिति त्र्यैशाता निषट्सप्ततिश्चावृत्तम्॥ अवशिष्टैकचत्वारिंशद्रूपका
णां कृते पूर्ववदशघ्या न्निस्त्विस्त्रिर्ह्रस्त्विस्त्विसः॥ पूर्ववदेवां समजुर्निस्त्विस्त्विस्त्विसइति
ज्ञाकृतम्॥ चमकस्य त्रयोदशानुवाकानां प्रतिरूपकमेकादशैकादशेति त्रिचत्वा
रिंशादुत्तरमेकशतं॥ अवशिष्टैकत्रिंशद्रूपकाणां कृते अया विल्लसजोषसेत्यन ९६
चैकावृत्तिरिति॥ पूर्णाग्निः सहेताएकसहस्रं षड्विंशतिश्चावृत्तम्॥ अंतेवसोर्धा
राच॥ शतांशहोमपक्षएवषोडशधामंत्रविनियोगे षट्चत्वारिंशदुत्तरैकशतरूपका

णां प्रतिरूपकं षोडशषोडशषोडशेति द्वेसहस्रे त्रीणि शतानि षट्त्रिंशच्चावृत
म्॥ अवशिष्टैकचत्वारिंशद्रूपकाणां कृते पूर्ववत्॥ षट् चमकस्य त्रयोदशानुवाकरूप
काणां कृते प्रतिरूपकमेकादशैकादशेति एकशतं त्रिचत्वारिंशच्चावृत्तम्॥ अ
वशिष्टैकत्रिंशद्रूपकाणां कृते अयाविल्लसनमचैंकावृत्तिरिति मिलित्वा द्वे सहस्रे
चत्वारिंशताता निषडशीतिश्चावृत्तम्॥ अंतेवसोर्धारा॥ शतांशहोमपक्षएवाष्ट
चत्वारिंशन्मंत्रविनियोगे षट्चत्वारिंशदुत्तरैकशततरूपकाणां प्रतिरूपकमष्ट
चत्वारिंशदष्टचत्वारिंशदिति सप्तसहस्राण्यष्टौ चावृत्तम्॥ अवशिष्टैकचत्वा
रिंशद्रूपकाणां कृते पूर्ववत् प्रथमा न्निस्त्विस्त्रिर्ह्रस्त्विस्त्विसः॥ पूर्वोक्तगुणवशिष्टै
स्त्विन्निरस्य जुर्निस्त्विस्त्विस इति षट्॥ चमकस्य त्रयोदशानुवाकरूपकाणां पूर्ववत्प्रतिरूप
कमेकादशैकादशेति त्रिचत्वारिंशदुत्तरमेकशतमावृत्तम्॥ अवशिष्टैकत्रिंशद्र

पकाणांकृतेऽस्याविस्तुसजोषसेत्यनयर्चैकाकृतिरितिमिलित्वासप्तसहस्राण्येक
त्रिंशतमष्टपंचाशच्चाकृतयः॥ ततोवसोर्धाराच॥ त्र्यंशांशाहोमपक्ष एवैकोनसप्तत्युत्तर
शतमंत्रविभागेषट्चत्वारिंशदुत्तरैकशतरूपकाणांप्रतिरूपकमेकोनसप्तत्युत्तर
शतमेकोनसप्तत्युत्तरंशतमितिचतुर्विंशतिसहस्राणिषट्शतानिचतुःसप्ततिश्चा
कृतयः॥ अवशिष्टैकचत्वारिंशद्रूपकाणांकृतेऽध्यमाभिः स्तिसृत्तिभिः प्रत्यृचमेकै
केतितिस्रः॥ पूर्वोक्तगुणयुक्तैरंत्यचतुर्भिस्त्रिभिः प्रत्येकमेकैकेतितिस्रः॥ चमकस्य
नमोहशरूपकाणांप्रतिरूपकमेकादशैकादशेतिएकशतंचत्वारिंशच्चाकृतयः॥
अवशिष्टैकत्रिंशद्रूपकाणांकृतेऽस्याविस्तुसजोषसेत्यनयैकाकृतिरितिमिलिता ७
चतुर्विंशतिसहस्राण्यष्टौशतानिचतुर्विंशतिश्चाकृतयः॥ अंतेवसोर्धारा॥ अथातिरु
द्रदशांशहोमपक्षेचतुर्दशसहस्राणिषट्शतान्येकचत्वारिंशच्चेतिरूपकाणांदशां

शाएकसहस्रंचत्वारिंशतानिचतुःषष्टिश्चनवतिः॥ एकएवरूपकोवशिष्यते॥ तथा
चमकस्यैकसहस्रंत्रीणिशतान्येकत्रिंशच्चेतिरूपकाणांदशांशाः एकएवरूपकोऽत्र
पत्रिंशच्चरूपकाणांनवतिः॥ एकएवरूपकोवशिष्यते॥ अत्रचमकेत्रेधामंत्रवि
भागेएकसहस्रंचत्वारिंशतानिचतुःषष्टिश्चेतिरूपकाणांप्रतिरूपकंतिस्रस्ति
स्रश्चाकृतयइतिमिलित्वा चत्वारिसहस्राणित्रीणिचशतानिद्विनवतिश्चाकृतयः
॥ चमकस्यत्रयस्त्रिंशदुत्तरैकशतरूपकाणांप्रतिरूपकमेकादशैकादशेति
मिलित्वाएकसहस्रंचत्वारिंशतानित्रिषष्टिश्चाकृतयः॥ एताश्चपूर्वाभिः सहपं
चसहस्राण्यष्टौशतानिपंचपंचाशतश्चाकृतयः ततोवसोर्धाराच॥ दशांशहोमप
क्षएवषोडशमंत्रविभागेएकसहस्रंचत्वारिंशतानिचतुःषष्टिश्चेतिरूपकाणां
प्रतिरूपकंषट्षडितिमिलित्वाऽष्टौसहस्राणिसप्तशतानिचतुरशीतिश्चाकृ

तयः चमकसैकशतस्त्रयस्त्रिंशद्रूपकाणां च प्रतिरूपकमेकादशैकादशेति
मिलित्वैकसहस्रांणि चत्वारिंशच्छतानि त्रिषष्टिश्चाहुतयः॥ एताश्च पूर्वोक्ताभि
:सह दशसहस्राणि द्वेशते सप्तचत्वारिंशच्चाहुतयः॥ अंते वसोर्धाराच॥ दशां
शहोमपक्षे एवं षोडशधा मंत्रविभागे एकसहस्रं चत्वारिंशतानि चतुःषष्टिः प्र
तिरूपकाणां प्रतिरूपकं षोडशषोडशेति मिलित्वा त्रयोविंशति सहस्राणि चत्वा
रिंशतानि चतुर्विंशतिश्चाहुतयः॥ चमकस्त्रयः स्त्रिंशदुत्तरैकशतरूपका
णां प्रतिरूपकमेकादशैकादशेति मिलित्वैकसहस्रं चत्वारिंशतानि त्रिषष्टिश्चा
हुतयः॥ एताश्च पूर्वोक्ताभिः सह चतुर्विंशति सहस्राण्यष्टौ शतानि सप्ताशीतिश्चा ८८
हुतयः॥ ततो वसोर्धाराच॥ दशांशहोमपक्षे एवं चत्वारिंशन्मंत्रविभागे एकस
हस्रं चत्वारिंशतानि चतुःषष्टिः प्रतिरूपकाणां प्रतिरूपकमष्टाचत्वारिंशद्दश

चत्वारिंशदिति मिलित्वा सप्ततिसहस्राणि द्वेशते द्विसप्ततिश्चाहुतयः॥ चमक
स्त्रयस्त्रिंशदुत्तरैकशतरूपकाणां प्रतिरूपकमेकादशैकादशेति मिलित्वै
कसहस्रं चत्वारिंशतानि त्रिषष्टिश्चाहुतयः॥ पूर्वोक्ताभिः सहैता एकसप्ततिस
हस्राणि सप्तशतानि पंचत्रिंशच्चाहुतयः॥ ततो वसोर्धाराच॥ दशांशहोमपक्ष
एवं कोनसप्तत्युत्तरशतमंत्रविभागे प्रतिरूपकमेकोनसप्तत्युत्तरशतमेकोन
सप्तत्युत्तरशतमेकोनसप्तत्युत्तरशतमिति मिलित्वा द्वेलक्षे सप्तचत्वारिंशत्स
हस्राणि चत्वारिशतानि षोडशचाहुतयः॥ चमकस्त्रयस्त्रिंशदुत्तरशतरूप
काणां प्रतिरूपकमेकादशैकादशेति मिलित्वैकसहस्रं चत्वारिशतानि त्रिषष्टि
श्चाहुतयः॥ पूर्वोक्ताभिः सहैता द्वेलक्षे॥ अष्टचत्वारिंशत्सहस्राणि षट्शतान्ये
काशीतिश्चाहुतयः॥ अंते वसोर्धाराच॥ अथातिरुद्र एवं समग्रहोमपक्षे चतु

द्दशसहस्राणिषड्शतानिएकचत्वारिंशच्चेतिति॥रूपकाणांत्रेधामंत्रविभागेप्र
तिरूपकंतिस्रस्तिस्रश्चाकृतयइतिमिलिताचत्वारिंशच्चेति॥रूपकाणांत्रेधामंत्र
विभागेप्रतिरूपकंतिस्रस्तिस्रश्चाकृतयइतिमिलिताचत्वारिंशत्सहस्राणिनव
शतानित्रयोविंशतिश्चाकृतयइतिमिलिताचतुर्दशसहस्राणिषट्शतानिएक
च॥चमकस्यैकसहस्रंत्रीणिशतानिएकत्रिशतानिएकत्रिंशच्चेतिरूपकाणां
प्रतिरूपकमेकादशानिरनुवाकैरेकादशाकृतयइतिमिलिताचतुर्दशसहस्रा
णिषड्शतानिएकचत्वारिंशच्चाकृतयः॥पूर्वोक्ताभिःसहैताअष्टपंचाशत्सह
स्राणिपंचशतानिचतुःषष्टिश्चाकृतयः॥अतेवसोर्धाराच॥समग्रहोमपक्षेए
वषोडशमंत्रविभागेचतुर्दशसहस्राणिषट्शतान्येकचत्वारिंशच्चेतिरूपका
णांप्रतिरूपकंषट्षडितिमिलित्वासप्तशतीतिसहस्राणिअष्टौशतानिषट्चत्वा

रिंशच्चाकृतयः॥चमकस्यैकसहस्रंत्रीणिशतान्येकत्रिंशच्चेतिरूपकाणांप्रति
रूपकमेकादशैकादशेतिमिलिताचतुर्दशसहस्राणिषट्शतान्येकचत्वारिंश
च्चाकृतयः॥एताश्चपूर्वोक्ताभिः॥सहैकजत्वदेसहस्रेचत्वारिंशतानिसप्तशी
तिश्चाकृतयः॥अतेवसोर्धाराचसमग्रहोमपक्षेएवषोडशेतिमिलितादेजत्वे
चतुस्त्रिंशत्सहस्राणिद्वेशतेषट्पंचाशच्चाकृतयः॥चमकस्यैकसहस्रंत्रीणिश
तानिएकविंशच्चेतिरूपकाणांप्रतिरूपकमेकादशैकादशेतिमिलिताचतुर्दश
सहस्राणिषड्शतानिएकचत्वारिंशच्चाकृतयः॥पूर्वोक्ताभिःसहैतादेजत्वेअष्ट
चत्वारिंशन्मंत्रविभागेचतुर्दशसहस्राणिषट्शतान्येकचत्वारिंशच्चेतिरूपका
णांप्रतिरूपकमष्टाचत्वारिंशदष्टाचत्वारिंशदितिमिलितासप्तजत्वानिद्वेसहस्रे
सप्तशतान्यष्टषष्टिश्चाकृतयः॥चमकस्यैकसहस्रंत्रीणिशतानिएकविंशच्चेति

रूपकाणां प्रतिरूपमेकोद्दशैकादशेति मिलित्वा चतुर्दश सहस्राणि षट्शतान्येकच
त्वारिंशत्साकृतयः॥ पूर्वोक्ताभिः सहैताः सप्तलक्षाणि सप्तदशसहस्राणि चत्वारि
शतानि नवचाकृतयः॥ अंते वसोर्धारा च॥ समग्र होमपक्षे वैकोनसप्तलक्षत्तर
शतमंत्रविभागे चतुर्दशसहस्राणि षट्शतान्येकचत्वारिंशच्च तिरूपकाणां प्रति
रूपकमेकोनसप्तलक्षत्तरंशतमेकोनसप्तत्तरंशतमिति मिलित्वा चतुर्विंशतिल
क्षाणि चतुःसप्ततिसहस्राणि त्रीणि शतान्येकोनत्रिंशच्चाकृतयः॥ चमकस्यैकस
हस्रं त्रीणि शतान्येकोनत्रिंशच्चाकृतयः॥ चमकस्यैकसहस्रं त्रीणि शतान्येकविं
शच्चेतिरूपकाणां प्रतिरूपकमेकादशैकादशेति मिलित्वा चतुर्दशसहस्राणि
षट्शतान्येकचत्वारिंशच्चाकृतयः॥ पूर्वोक्ताभिः सहैताश्चतुर्वशतिलक्षाणि पंचा
शीतिसहस्राणि नवशतानि सप्ततिश्चाकृतयः॥ पूर्वोक्ताभिः सहैताश्चतुर्दश निलक्षा

णि पंचाशीतिसहस्राणि नवशतानि सप्ततिश्चाकृतयः॥ ततश्च वसोर्धारा च॥ ॥ इत्य
तिरुद्राकृतिसंख्या॥ ॥ नमकादि विनियोगेन जपहोमविधौ विधिः॥ गुरुर्लघुश्च दृष्टो य
योऽन्यः शाखाद्यपेक्षया॥ इति चमक रुद्र रुद्री रुद्रैकादशिनी महारुद्रातिरुद्रेषु मं
त्रविच्छेद प्रकारश्चाकृति संख्याविशेषश्च॥ ॥ अथ होमे स्थंडिलकुंडलनिर्माणादि
विधिः॥ तत्र स्वल्पसंख्याकहोमे स्थंडिलसमंतात् हस्तमात्रं द्विहस्तपरिमितं वा
होमानुसारेण कल्पयेत्॥ अधिकसंख्याकहोमे तु कुंडं प्रकल्पयेत्॥ तच्च नवग्रहम
खोक्तप्रकारेण स्कंदपुराणे॥ नवग्रहमखे कुंडं हस्तमात्रं समंततः भवेत्॥ चतुरस्रमधो
हस्तं योनिवक्त्रं समेखलं चतुरंगुलविस्तारा मेखला तस्य वद्धिता हस्तमात्रं समं चत
स्रम्यपि द्विहस्तप्रमाणं चतुरस्रं॥ चतुःकोणं अधोहस्तेऽधः खातमपि हस्तपरि
मितं यस्मात्तत्प्रोक्तं॥ योनिवक्त्रं वस्त्रमाणलक्षणलक्षिता योनिर्वक्त्रं यस्य तत्ताद्दृक्मे

महा.
९१

खलाप्रमाणमिह चतुरंगुलविस्तारेखादिना॥ तद्वदुच्छ्रिता॥ चतुरंगुलोन्नता॥ एतत्रं कुंड
मयुतहोमानुसारि॥ योनिलक्षणंतु चिंतामणौ वितस्तिमात्रा योनिः स्यात्षट्सप्तांगुलवि
विस्तृता कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांगुलोच्छ्रिता॥ गजोष्ठसदृशी तद्वदायता छि
द्रसंयुता॥ एतत्सर्वेषु कुंडेषु योनिलक्षणमुच्यते॥ मेखलोपरि सर्वत्र अश्वत्थदलसं
निभा॥ वितस्तिमात्रमिति॥ एतच्च योनेर्दैर्घ्यं षट्सप्तांगुलविस्तृतेति॥ षडंगुलविस्तृ
ता सप्तांगुलविस्तृता वेति व्यायामे विकल्पः॥ तद्वदायतेति॥ अनेन दैर्घ्यप्रमाणं तदस्मा
त्॥ उक्तलक्षणलक्षिता गजोष्ठसदृशी अश्वत्थपत्रसदृशी च योनिर्भवतीत्यर्थः॥ ए
वंच योनिः कुंडस्य पश्चिमदिशा मेखलोपरि कार्या॥ मंडपलक्षणं स्कंदपुराणे॥ गृहसा ९१
न्तरपूर्वेण मंडपं कारयेद्बुधः॥ रुद्रायतनतो वापि चतुरस्रमुदक्प्लवं॥ दशहस्तमथा
ष्टौ वा हस्तान्कुर्याद्विधानतः तस्य द्वाराणि चत्वारि कर्त्तव्यानि विचक्षणैः॥ प्रागुदक्प्रव

णं तस्मिं कारयेद्यत्नतो नरः॥ प्रागुत्तरसमासाद्य प्रदेशं मंडपस्य तु॥ त्रोत्तनं कारये
त् कुंडं यथावल्लक्षणान्वितं॥ अथ प्रकारांतरेण कुंडनिर्माणविधिर्लिख्यते॥ द्विहस्त
विस्तृतं चैव चतुरस्रायतं पुनः॥ लक्षहोमे भवेत्कुंडं योनिवक्त्रं त्रिमेखलं॥ पूर्वपश्चि
मयोर्हस्तद्वयविस्तृतं॥ दक्षिणोत्तरयोश्चतुर्हस्तायतं चतुर्हस्तख्यातं चतुरस्रं कुंडंवि
धेयमिति सर्पः॥ योनिलक्षणंतु प्रागुक्तं॥ द्व्यंगुलोच्छ्रिता कार्या प्रथमा मेखला बुधैः
॥ त्र्यंगुलोन्नता तद्वत् द्वितीया समुदाहृता॥ उच्छ्रायविस्ताराभ्यां च तृतीया चतुरंगु
ला॥ द्व्यंगुलस्तत्र विस्तारः पूर्वयोरपि शस्यते॥ पूर्वयोः द्वितीयतृतीययोर्मेखलयोः॥
चतुर्हस्तकुंडे मंडपप्रमाणमाह॥ तथा षोडश हस्तास्यान्मंडपश्च चतुर्मुखः॥ मत्स्ये
॥ नदीनां संगमे चैव सुराणामग्रतस्तथा॥ सुसमेत्वग्निनागे च देवताधिष्टिते नृप॥ ऋ
त्विग्भिर्गुरुणा चैव सार्द्धं त्वग्निं परीक्षयेत् खनेद्वै तत्र कुंडं चतुस्समं हस्तमात्रकं॥ द्वि

गुणं लक्षहोमे तु कोटिहोमे चतुर्गुणं ॥ युग्मशो ऋत्विजः प्रोक्ता अशेषे ते वेदपारगाः ॥ कुंडमल
फलाहारा दधिक्षीराशनो पि वा ॥ अथ ऋत्विज इत्युपलक्षणं ॥ ततो मंत्रशांतिकर्मादिवे
गेन निर्वाह्यं न भवति तत्र यावद्भिरृत्विग्भिः कर्म वेगेन निर्वहति तावंतो ऋत्विजो वरणीयाः ॥
यद्यपि स्वत्यागो यजमानेनैव कार्यस्तथापि बहुकर्तृके होमे त्यागस्य नित्यकालत्वे
न त्यागकालस्य ज्ञातुमशक्यत्वाद्धोमोपक्रमणात्पूर्वमेव देवतास्मरणं यजनीयद्रव्यं च
मनसि निधाय इदं यथादेवतमस्त्विति स्वत्यागः कार्यो यजमानेन ॥ अथ वसुधाराप्र
कारः ॥ चिंतामणौ ॥ घृतकुंभं वसोर्धारां पातयेदनलोपरि ॥ औदुंबरीं यथार्द्रां च ऋज्वीं को
टरवर्जितां ॥ बाहुमात्रं स्रुचं कृत्वा ततः स्तंभद्वयोरपि ॥ घृतधारां तथा सम्यगग्नेरुपरि
पातयेत् ॥ अत्र वसुधारायां मंत्रः सप्तमकानुवाकाः ॥ मंत्रांतराण्यपि स्मर्यंते ॥ आवपेत्स
क्रमाग्नेयं वैष्णवं रुद्रमैंद्रं ॥ महावैश्वानरं सम्यग्ज्येष्ठसामत्रयं पठेत् ॥ इति स्थं

डिलकुंडनिर्माणादिविधिः ॥ ॥ अथ बौधायनप्रोक्तपंचांगरुद्रन्यासविधिः ॥ पंचांगरु
द्रस्य चायमर्थः ॥ पंचप्रकारन्यासगृहीतः पंचांगरुद्रः ॥ एवं षडंगरुद्रोपि ॥ तत्र
पंचांगन्यासेषु शिखाद्यस्त्रांतमेकत्रिंशदंगन्यासः ॥ प्रथमः ॥ मूर्धादिपादांतं दशांगन्या
सो द्वितीयः ॥ पादादिमूर्धांतं पंचांगन्यासस्तृतीयः ॥ गुह्यादिमस्तकांतं पंचांगन्यासश्चतु
र्थः ॥ हृदयाद्यस्त्रांतं पंचांगन्यासः ॥ प्रथमः ॥ मूर्धादिपादांतं दशांगन्यासो द्वितीयः ॥ पा
दादिमूर्धांतं पंचांगन्यासस्तृतीयः ॥ गुह्यादिमस्तकांतं पंचांगन्यासश्चतुर्थः ॥ हृदयाद्य
स्त्रांतं पंचांगन्यासः पंचमः ॥ एवं पंचांगन्यासः ॥ प्रजननादि सर्वांगव्याप्तं षोडशांगन्यास
श्चापरः ॥ अयं च षष्ठो न्यासः ॥ पूर्वोक्तप्रकारसहितः पंचांगरुद्रः ॥ षट्प्रकारन्याससम
हितः षडंगरुद्रः ॥ अथातः पंचांगरुद्राणां न्यासः पूर्वं जपहोमार्चनविधिं व्याख्यास्या
मो य एते रुद्रा इति ह्रियवायामस्मिन्मह इति शिरसि ॥ असंख्याताजनाटे हृद॰ सः पुश्चिषद्

महा०
८३

तिस्तुवोर्मध्ये॥ त्र्यंबकंयजामह इति नेत्रयोर्नमः स्रुक्त्यायेति कर्णयोः मानस्तोक इति ना
सिकायामवतत्येति मुखे नीलग्रीवौकंठे नमस्त आयुधायेति बाह्वोर्याते हेतिरूपबाह्वो
र्यंतीर्थानीति हस्तयोः सद्योजात इति पंचानुवाका न्यसेच्च अंगुलीषु नमो वः किरिकेभ्यः
हृदये॥ नमो गणेभ्य इति पृष्ठे नमो हिरण्यबाहव इति पार्श्वयोर्हिरण्यगर्भ इति नाभौ मी
ढुष्टमसिति कट्यां ये भूतानामधिपतय इति गुह्ये॥ सद्योजातवेदा इस पाने॥ मानो मह
तमित्यूर्वोरे पत इति जान्वोर्मध्ये यामि ति पादयोरध्यवोचदिति कवचं॥ नमोस्तु बिल्मिने
इत्युपकवचं॥ नमोस्तु नीलग्रीवायेति तृतीयं नेत्रं प्रमुंच धन्वमित्यस्त्रं एतावंतस्येति
दिग्बंधः॥ ॐ नमो भगवते रुद्रायेति नमस्कारं न्यसेत्॥ ॐकारं मूर्ध्नि विन्यस्य नकारं ना ८३
सिकाग्रतः॥ मोकारं च ललाटे वै नकारं मुखमध्यतः॥ गकारं कंठदेशे तु वकारं हृदि
विन्यसेत्॥ तेकारं वामतो न्यसेत्॥ रुकारं नाभिदेशे तु यकारं पादयोर्न्यसेत्संधं च

पादयोर्न्यसवामं न्यसेत्तु मध्यतः॥ अघोरं हृदि विन्यस्य मुखे तत्पुरुषं न्यसेत्॥ ईशा
नं मूर्ध्नि विन्यस्य हंसो नाम सदाशिवः॥ हंस हंसेति यो ब्रूयात् हंसो नाम सदाशिवः
॥ ईशानं मूर्ध्नि विन्यसेत्तत्सामसमर्पः॥ ईशानं मूर्ध्नि विन्यस्य हंसेति ब्रूयात्॥ एवं ह
तेसति हंसो नाम हंस इति प्रसिधः सदाशिवो भवेत्॥ अस्तु मे वा यमनुव इति हंस
हंसेति यो ब्रूयात् हंसो नाम सदाशिव इति॥ एवं न्यासविधिं कृत्वा ततः संपुटमाच
रेत्॥ त्रातारमिंद्र त्वं नो अग्ने सुगन्त्रः पंथा मसुन्वं तत्त्वा यामि मानो निषुद्धिर्वयं सो
मतमीशानमस्मे रुद्रा स्योना पृथिवी लेत संपुटमिंद्रादीन् दिक्षु विन्यसेद्वमात्म
नि रोहीकरणं कृत्वा त्वगस्थिगतैः पापैः प्रमुच्यते सर्वभूतेष्वपराजितो भवति य
क्षगंधर्वभूतप्रेतपिशाचब्रह्मराक्षसयमदूतडाकिनीशाकिनीसर्पश्वापदतस्क
॥ राष्ट्रपद्रवाः सर्वे ज्वलंतमग्निं पश्यंति॥ मारक्षंति मनोजूतिरवो ध्यग्निर्मूर्धानं मर्मा॥

महा.
९४

तेजातवेदाइतिद्युस्थादिहृदयाद्यभिमंत्र्यात्मरक्षाकर्त्तव्या॥शिवसंकल्पंहृदयंपुरुष
सूक्तंशिरउत्तरनारायणंशिखाअप्रतिरथंकवचंशतरुद्रीयमस्त्रंपंचांगंसकृ
क्रमेदष्टांगमग्न्याद्यात्मानंरुद्ररूपंध्यायेत्शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचव
क्त्रकं॥गंगाधरंदशभुजंसर्वाभरणभूषितं॥नीलग्रीवंशशांकांकंनागयज्ञोपवी
तिनं॥व्याघ्रचर्मोत्तरीयंचवरेण्यमभयप्रदं॥कमंडल्वक्षसूत्राभ्यामन्वितंशूलपा
णिनं॥ज्वलंतंपिंगलजटाशिखमुद्योतकारिणं॥अमृतेनप्लुतंहृष्टमुमादेहार्धधा
रिणं॥दिव्यसिंहासनासीनंदिव्यभोगसमन्वितं॥दिग्देवतासमायुक्तंसुरासुरनम
स्कृतं॥नित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययं॥सर्वव्यापिनमीशानंरुद्रंवैविश्वरू ९४
पिणं॥एवंध्यात्वाद्विजःसम्यक्ततोयजनमारभेत्॥ ॥इतिपंचांगन्यासविधिः॥ ॥
अथरुद्राभिषेकविधिः॥अभिषेकेपूर्वोक्तन्यासाअपिसमुच्चीयंते॥अथातोरुद्र

स्नानार्चनविधिंव्याख्यास्यामः॥आदितएवतीर्थेस्नात्वोदेत्यशुचिःप्रयतोब्रह्मचारी
शुक्लवासासदक्षिणाप्रत्यग्देशेतन्मुखःस्थित्वाएवतीर्थेस्नात्वोदेत्यशुचिःप्रय
तोब्रह्मचारीशुक्लवासासदक्षिणाप्रत्यग्देशेतन्मुखःस्थित्वात्मनिदेवताःस्था
पयेत्॥प्रजननेब्रह्मातिष्ठतु॥पादयोर्विष्णुस्तिष्ठतु॥हस्तयोर्हरस्तिष्ठतु॥बाह्वोरि
न्द्रस्तिष्ठतु॥जठरेग्निस्तिष्ठतु॥हृदयेशिवस्तिष्ठतु॥कंठेवसवस्तिष्ठंतुवक्त्रेसरस्व
तीतिष्ठतु॥नासिकयोर्वायुस्तिष्ठतु॥नयनयोःसूर्याचंद्रमसौतिष्ठेतां॥कर्णयोरश्वि
नौतिष्ठेतां॥ललाटेरुद्रास्तिष्ठंतु॥मूर्ध्न्यादित्यास्तिष्ठंतु॥पृष्ठेपिनाकीतिष्ठतु॥परतः॥
शूलीतिष्ठतु॥पार्श्वयोःशिवशंकरौतिष्ठेतां॥सर्वतोवायुस्तिष्ठतु॥ततोबहिःसर्व
तोज्वालामालापरिवृतस्तिष्ठेत्॥सर्वेष्वंगेषुसर्वादेवतास्तिष्ठंतु॥मांरक्षंतुअग्नि
र्मेवाचिश्रितइति॥यथालिंगमंगानिसंमृज्याथैनंगंधपुष्पाक्षतधूपदीपैरात्मानं

प्सलाराधयेत॥ स्वाराधितो मनुष्यैस्त्वं सिद्धैर्देवैः सुरादिभिः॥ आवाहयामि त्वं भक्त्या
त्वामां गृहाण महेश्वर॥ त्र्यंबकं यजामहे इत्यनेन माराधयेत॥ अग्निर्मे वाचि श्रित
इत्यादेरयमर्थः॥ अग्निर्मे इत्यादिभिर्वृहमामनंत्रैर्यथालिंगमंगानि संस्पृशेत॥ त
त्रमंत्राः॥ अग्निर्मे वाचि श्रितः॥ वाग्हृदये॥ हृदयं मयि॥ अहममृते॥ अमृतं ब्रह्मणि
इति वाचस्पृशेत॥ वायुर्मे प्राणे श्रितः प्राणो हृदये॥ हृदयं मयि॥ अहममृते॥ अमृतं ब्र
ह्मणि इति प्राणस्थानं हृदयं॥ सूर्यो मे चक्षुषि श्रितः॥ चक्षुर्हृदये॥ हृदयं मयि॥ अहम
मृते॥ अमृतं ब्रह्मणि इति चक्षुषी॥ चंद्रमा मे मनसि श्रितः॥ मनो हृदये॥ हृदयं मयि
अहममृते॥ अमृतं ब्रह्मणि॥ इति मनस्थानं चक्षुः॥ दिशो मे श्रोत्रे श्रिताः॥ श्रोत्रं हृ ८५
दये॥ हृदयं मयि॥ अहममृते॥ अमृतं ब्रह्मणि॥ इति श्रोत्रे॥ आपो मे रेतसि श्रिताः
॥ रेतो हृदये॥ हृदयं मयि॥ अहममृते॥ अमृतं ब्रह्मणि॥ इति गुह्यस्थाने॥ पृथिवी

मे शरीरे श्रिता शरीरं हृदये॥ हृदयं मयि॥ अहममृते॥ अमृतं ब्रह्मणि॥ इति शरीरं॥ ओषधि
वनस्पतयो मे लोमसु श्रिताः॥ लोमानि हृदये॥ हृदयं मयि॥ अमृतं ब्रह्मणि॥ इति रो
मकूपान्॥ इंद्रो मे बले श्रितः॥ बलं हृदये॥ हृदयं मयि॥ अहममृते॥ अमृतं ब्रह्मणि
॥ इति सर्वांगं पर्जन्यो मे मूर्ध्नि श्रितः॥ मूर्धा हृदये॥ हृदयं मयि॥ अहममृते॥ अमृतं
ब्रह्मणि॥ इति मस्तकं॥ ईशानो मे मन्यौ श्रितः॥ मन्युर्हृदये हृदयं मयि॥ अहमम
ते॥ अमृतं ब्रह्मणि॥ इति मस्तकं॥ ईशानो मे मन्यौ श्रितः॥ मन्युर्हृदये हृदयं मयि॥ अ
हममृते॥ अमृतं ब्रह्मणि॥ इति क्रोधादिस्थानं हृदयं आत्मा न आत्मनि श्रितः॥ आत्मा
हृदये॥ हृदयं मयि॥ अहममृते॥ अमृतं ब्रह्मणि॥ इति चित्तस्थानं वक्षः॥ पुनर्म आत्मा
पुनरायुरागात॥ पुनः प्राणः पुनराकूतमागात॥ वैश्वानरो रश्मिभिर्वावृधान
ः अंतस्तिष्ठत्वमृतस्य गोपा॥ इति सर्वशरीरं स्पृशेत॥ एवमंगानि संमृज्याथैनं गंधा

दिजिरात्मानंप्रत्याराधयेत्॥एवंरुद्रमात्मानंप्रत्याराधयेत्॥रुद्ररूपिणंजीवात्मानं
स्वशरीरेपूजयेदित्यर्थः॥तत्रावाहनमंत्रः॥आराधितइत्यर्थः॥आवाहनव्यतिरि
क्तोपचारेषुपंचदशसुषडंगवाक्यंबकंयजामहइत्ययंमंत्रः॥अत्रनैवेद्य
मपिमानसंपरिकल्पयेत्॥एवमात्मपूजानंतरंशिवपूजाप्रकारमाह॥आत्वाव
हंतुहरयःसचेतसःश्वेतैरश्वैसहांतुश्यः॥वाताजवैर्बलवद्भिर्मनोजवैरायाहि
शीघ्रंममहव्यायसर्वोमित्यावाहयामीत्यावाह्यसंस्थाप्यसंस्थापितेत्यावाहनंसद्यो
जातंप्रपद्यामीत्यावाहनंददाति॥सद्योजातायवैनमोनमइत्यासनंददाति॥भ
वेभवेनातिभवेभजस्वमामितिपाद्यंददाति॥भवोद्भवायनमइत्यर्घ्यंगाचिम्यला
नंददाति॥अभिणाआपोहिष्ठेत्याद्याः॥अथाद्भिस्तर्पयतिभवंदेवंतर्पयामिसर्वं
देवंतर्पयामि॥पशुपतिंदेवंतर्पयामि॥उग्रंदेवंतर्पयामि॥भीमंदेवंतर्पयामि॥महां

न्तंदेवंतर्पयामिइतितर्पयित्वा॥ज्येष्ठायनमइत्याचमनीयंददाति॥श्रेष्ठायनमइ
तस्यस्याग्नौ वामपितानले॥ अश्वत्थसमिधामाज्यभक्तानामेकविंशतिः॥ सहस्रा
णि पत्र जुहुयात्तथा दूर्वांकुरानपि एकादशसहस्राणि हुतश्चैष महीपतिः॥॥ चिरायु

विजयी च स्याद्देवदेवप्रसादतः ॥ अथापं विजयार्थी चेन्मासि मासि जपं नृपः ॥ कारये
त्तत्संख्याकमनयोरनुवाकयोः ॥ प्रत्यासन्ने च संग्रामे महानसगतानलैः ॥ महा
नसाग्निपक्वेन सोपदंशेन चांधसा ॥ मध्यान्हकाले जुहुयात्तत्र प्रतिनमस्कृतिः ॥ विद्वे
षो मंत्रविच्छेदश्चावृत्तिस्त्वनुवाकयोः ॥ एकादशगुणात्मिकास्ते याः कुर्वन्नेवं कृतहोमतः ॥ नि
दध्यात बलिं तन्मौ बुध्यश्चाश्रितदेवताः ॥ तमादाय बलिं सर्वं होमशेषेतामेलये
त् ॥ तच्छेषं परसेनायामध्ये सुपरितः क्षिपेत् ॥ अचिरादेव मासेन भवेत्स्थानसंक्रा
मः ॥ अथवा तंडुलैः शुक्लैरश्वा कृत्वानुपूर्ववत् ॥ तत्र नक्षिपेच्छेषं नन्द्येयुः शात्रवो
चिरात् ॥ राज्ञः सर्वाण्यायुधानि स्पृष्ट्वा स्वामभिमंत्रयेत् ॥ तानि सुर्द्धते जासिराज्ञ
स्तैर्विजयो भवेत् ॥ अथारिसेनासंस्तंभनउच्यते ऽर्कमण्डलात्मकं ॥ समुद्दिश्यार्कं समि
धो जुहुयाद्दशसहस्रतु ॥ अनुवाकद्वयावृत्तिरुक्ताधारद्वासंख्यया ॥ तत्र प्रतिनम

स्कारं मंत्रान्ते त्वेवमुच्चरेत् ॥ परसेनास्तंभनं करोमि स्वाहेति जुहुयाद्विः ॥ एवं कृते श
त्रुसेना भवति स्तंभिता चिरात् ॥ एतामनुवाकास्यां राज्ञः सेनाभिमंत्रणं ॥ कुर्वीत स
र्ववस्तूनामेवमेवाभिमंत्रणं ॥ इत्थं कृते तत्र भावात्सर्ववस्तुजयी भवेत् ॥ अथ राज्ञो परि
च्छास्यात्परसेनाविशेषणे हरिणस्य वराहस्य च छागस्य च राज्ञस्य च ॥ मांसैः क
पिंजलस्यापि कृत्वा विक्रमसपत्तिणः ॥ तथान्येषां मृगाणां च पिशितैर्लक्षसंख्यया ॥ जु
हुयाच्च प्रतिद्रव्यमन्यगेहाहृतानले ॥ तथा कृते क्रमाणेनापूर्वैर्जलकृते भवेत् ॥ अ
त्र प्रतिनमस्कारं मंत्रान्ते त्वेवमुच्चरेत् ॥ परराष्ट्रप्रजाकर्षणं करोमि स्वाहेति मुख्येरन्ति
त्यमाचीर्णे परराष्ट्रगतप्रजाः ॥ सुवर्णरजतं गावो भूमिर्वस्त्रादिकं तथा दक्षिणात्र
भवेदेतत्साध्यं कर्म महीक्षितः ॥ अथातिधीमते स्यापां यस्य स्यात्पुत्रकामना स्वाहो
प्रतिनमस्कारमेतास्यां समिधस्त्वसौ ॥ उदुंबरीः प्रजुहुयाद्दशसाहस्रकर्षतेन च ॥

म.रु. रुद्राश्च मधुना वापि होमे संख्या विधीयते॥ एकविंशति साहस्री किंवा त्रैवानुवाकयो
१३१ ः॥ भावेत॥ स्तुर्नमस्कारास्तन्संख्याकजशान्मुजान्॥ तंतुनिष्ठवनवैर्वस्त्रैर्वेष्टिता
न्जलपूरितान्॥ स्थापयित्वानुवाकाभ्यामभिमंत्र्य पृथक्पृथक् ततः॥ प्रतिनमस्का
रमंत्रि षिंचेच्चरं पता प्रतिकुंभस्य सलिलैरनुवाकहं मे ततः॥ जपेच्चाष्ट सहस्राणि
महेशं चाभिषेचयेत्॥ आभ्यामेवानुवाकाभ्यामेतावेव जपेत्पुनः॥ सप्तदंडावधौ
कालेततः कुर्यात्प्रदक्षिणं॥ सहस्राष्टकमीशस्य ततः पिष्टविनिर्मितं॥ मंडंच प्रा
शयेदेतदनुवाकाभिमंत्रितः॥ नरोमवाहे स्थितैवानुवाकौ सुचिर्जपन्॥ वाराने
कादशोशानंतत्र प्रतिनमस्कृतिः॥ प्रजपेच्च शमीपत्रैः कर्मेदं पुत्रकामदं॥ विंशि १३१
एकमेणा रुद्रसहस्रेण जायते सुतः॥ अष्टविंशत्वर्षवयोधिकस्त्रीपुंसयोरपि॥ प्र
योगेनानुनापुत्रो जायते नात्र संशयः॥ सतुवंशाकुरः पुत्रः प्रजाकस्तस्य हस्तयोः॥

अन्नैरपिगुणैर्युक्तः शिववत्कृष्णजायते॥ अभिमंत्र्यानुनं सूत्रं गर्भिणीनां करद्वये
॥ निबध्नीयात्ततो गर्भनाशो नैव भवेत्कचित्॥ अभिमंत्रिनमेतासां नस्सधूपं च नि
र्दिशेत॥ कुमारादिग्रहग्रस्तबालरक्षाख्यकर्मणि॥ राक्षो शिरवो चवध्नीयाद्दास्याम
त्रैवकर्मणि॥ गौरीकरांबुजंन्यस्तस्वर्णचौलत्रशासनं॥ इषुहस्तंनराहूढं नरनारीत
नुस्मरेत॥ ॥ इतिनमकेषु पंचमषष्ठानुवाकयोः प्रयोगः॥ ॥ अथ सप्तमानुवाकस्य प्र
योगः॥ ॥ एकोपवासं कुर्वीत ततश्चाष्टशतं जपेत्पुनश्चरणमेवं स्यात्प्रयोगाहस्ततो
भवेत्॥ चातुर्वर्ण्यस्य वश्यं यः कामयेतात्मनो नरः॥ उदुंबरचजस्मन्न्यग्रोधोप्लक्षतन्
रुहं॥ समिधोरधिमध्वाज्यसंपृक्ता जुहुयादसौ॥ अयुतं होमसंख्यास्याद्वश्यमेवंस
मश्नुते॥ मेधाकामस्तु जुहुयाच्च सहस्राणि तु चरूं पं॥ कापिलाज्यं हविः प्रोक्तमेवं मेधां
समश्नुते पुष्टिकामस्तु कुर्वीत होममाहुतिमात्रकैः॥ अपूपैर्नवसाहस्री संख्यास

धोमकर्मणि ॥ यस्त्वारोग्यंकाममते सहस्रं होममाचरेत् ॥ दधिमध्वाज्यसंयुक्ताः खादि
र्यः समिधोत्ततु ॥ हविष्यितिविनिर्दिष्टाः पंचसाहस्रिकाहुतिः ॥ रूपकामस्तु जुहुयाद्दधु
तेच्तपत्त्रवान् ॥ दधिमध्वाज्यसंयुक्तान् रूपमाप्नोत्यनुत्तमं ॥ मृष्टाकामः सकांतारे
स्वकीमाकारसंमितं ॥ अग्निकुंडं खनेत्तत्र स्थापयन्कपितानलं ॥ ततः पंचसहस्राणि
म्येतानंगोरुहाणि तु ॥ जुहुयाद्दध्यसात्ताच्छ्रीर्निरंतरमुपतिष्ठते ॥ अन्वयो यावदस्सा
त्त्वावृद्धेष्याविवर्धते ॥ कार्पासपरकामस्तु विजैः कार्पाससंभवैः ॥ मधुक्षीरयुतं होममा
चरेत्काममवाप्नुयात् ॥ अनुवाकजपंत्रेन धेनुकामो गवां व्रजे प्रदत्तिा ॥ क्रियांकुर्याद्युते १३२
नैव संशयः ॥ पुत्रकामः पालाशस्य समिधो मधुसर्पिषा ॥ सम्यगुक्ताः प्रजुहुयार
सुतेनैव संशयः ॥ सतु वंशकरं पुत्रं जनते नात्र संशयः ॥ आयुष्कामस्तु दूर्वाणां घृ
ताक्तानां तथा युतं प्रतिवर्षं तु जुहुयाच्छताद्युः स हि जायते ॥ विद्याकामो घृताक्तभा

मश्वत्थसमिधां शतं ॥ सहस्राणि प्रजुहुयाच्छतायुः स हि जायते ॥ विद्याकामो घृता
क्तानामश्वत्थसमिधां शतं ॥ सहस्राणि प्रजुहुयात्सर्वविद्यातिगो भवेत् ॥ राज्यका
मस्तु जुहुयात्लचजप्ताणि संयतः ॥ सहस्राणि प्रजुहुयात्सर्वविद्यातिगो भवेत् ॥ प्र
ज्ञकामस्तु जुहुयात्लचजप्ताणि सौगंधिकानि मधुक्ताान्येव सम्राट् प्रजायते ॥ अ
पवर्गकामश्चेद्दारैश्चाद्रायणं चरेत् ॥ अनुवाकं जपेत्सम्यक्सहस्राणेकविंश
तिं । ततः पंचसहस्रांतं मनुवाकमुदीरयन् ॥ प्रदत्तिा ॥ क्रियांकुर्यान्महरणायतनेत
तः ॥ कुर्याल्लचसहस्रांतं प्राणायामं क्रियां नरः ॥ पंचसत्त्वामौमहेशस्य समीपे होममा
चरेत् ॥ पालाशाश्वत्थसमिधाघृताक्तानां कृतिर्भवेत् ॥ नत्तत्रमेततो मुक्तो भवेद्दे
वप्रसादतः ॥ अन्ये च तत्कुलोत्पन्नाः रौरवादिषु ये स्थिताः ॥ ते रमंते शिवपुरे यावद्दशा
रपंचकं ॥ यावत्पृथिवी तावद्वर्धते तत्कुलोद्भवाः ॥ जरान्त्रिर्जबमाना निर्जलंतम

तमप्रदं॥ देवंमुचिस्मितंध्यायेद्व्याघ्रचर्मपरिस्कृतं॥ इतिनवमकेपुसप्तमोनुवाकः॥ ॥
अथोपरितनमंत्रप्रयोगः॥ तत्राष्टमानुवाकमारभ्यनवमानुवाके यावत्समाप्तः किरि
केभ्यइत्येकोमंत्रः॥ कृच्छ्रद्वयंचरित्वादावयुतपंचसहस्रतीजपेत्॥ पुरश्चरणमेवंस्यात्सो
गार्हस्ततोभवेत्॥ राज्ञःसाम्राज्यकामस्यकर्मेदमभिधीयते॥ कालेवसंतेदेशेतुगंगा
रायतनेपिवा॥ कांतारेवापिदेवस्यसन्निधौसर्वमाचरेत्॥ तत्रदेशेकार्यसिद्धिंवाचयि
त्वाद्विजैस्ततान्॥ संपूज्योपक्रमेदर्चामार्यांवायथारुचि॥ वरणंचाथकुर्वीतमं
त्रसिधामजन्मनां॥ वासोलंकारपुष्पाद्यैस्तत्राप्याचार्यपूर्वकं॥ मंत्रसिधद्विजा
नावत्राचार्योमंत्रकल्पवित्॥ सध्यःसिधान्द्विजानत्कुर्यात्तद्विधानमथोच्यते॥ अ १३३
चार्यान्मंत्रसंसिधान्मंत्रमाराधयेद्विजाः॥ निरंतरंतथाकुर्युर्वासरान्॥ दशपं
चच॥ सध्यःसिधस्ततःकर्मयोग्यास्युर्द्विजपुंगवाः॥ एकादशाभ्यवेयुस्तेरुत्विजोहो

मकर्मणि॥ उदयादस्तपर्यंतंहोमानुपरतोभवेत्॥ दिनानित्रिंशदेवंस्याधोमद्रव्य
मथोच्यते॥ तिलव्रीहियवासाज्यामंत्रप्रतिनमस्कृतिः॥ होमाग्नेरुपरिष्टाच्चसर्पि
ःपात्रंसदावहेत्॥ अणुधारासमायुक्तंहोमकालेविनिक्षिपेत्॥ यावत्कर्मसमाप्ये
ततावद्देवस्यनित्यशः॥ अभ्रजन्माज्यसर्हस्त्रीचुक्तिपर्याप्तमोदनं॥ नैवेद्यंस्यात्प्र
तिदिनंतावतोभोजयेत्द्विजान्॥ तथांतिमदिनेनित्यद्विगुणंभोजनादिकं॥ प्रजा
यांतुमहेशस्यगंधःकर्पूरईरितः॥ पुष्पाणिपंकजानिस्युर्धूपःकर्पूरमिश्रितः॥
तथागवाज्यसुसंयुक्तोगुग्गुलःपरिकीर्तितः॥ शतेशांतंदक्षिणास्यादृत्विजामर्थमे
वचा॥ आचार्येद्विगुणास्यात्तत्तरप्यस्माधिकाभवेत्प्रतिसंवत्सरंरुद्रप्रजाभित्यं
प्रकारयेत्॥ एवमाराधनात्संम्राड्भवेत्राजानसंशयः॥ राजानोमेघ्रिमध्यस्यारुद्रहूतैस्तु
तेद्विजाः॥ हन्यमानाहोमकर्तुर्विशोतिष्टंतिकिंकराः॥ एवमाराधनाद्राजासर्वांतुत्काव

महा०
१३५

वसुंधरां॥ रुद्रमूर्तेः समानत्वमेते॥ करं द्विवपुरं व्रजेत्॥ रुद्ररूपी शिवपुरे स्तुत्वा ज्या
मुत सुखं॥ सप्तद्वीपावतीराज्याद्विधृतकस्त्वजायते॥ करस्त्वयो स्त्वसरश्चेपतपिना
कांक सुरशोत्तन॥ अथोच्यते प्रयोगो न्योराज्ञो द्विगात्राकामिनः॥ मंत्रप्रभावमुक्तेनस
द्विप्रेणैव कारयेत्॥ खादिरं तु मृह रूपं कृत्वा वैरिमहीक्षितेः॥ विविक्ते रत्नौ कुत्वा पिजल्ल
पूर्णं घटेमृउ॥ आवासं संनिधौ तस्य विधिना नीमृपावकं॥ जुहुयात्तत्र मंत्रः स्यान्मंत्र
विनिनमस्कृतिः॥ शमीतरुसमुद्भूताः समिधः कटकैर्युताः॥ रक्ताक्तारुधिरं शास्त्रैवे
उद्गमिह कर्मणि॥ ततस्तत्र खादिरं रूपं प्रत्यंगेजोहरं कुरु॥ सम्यकृप्रतिनम १३५
स्काररवादयित्वा तु खादिरे॥ रूपके विन्यसेत्तादृत्मासकालेगुरुर्जपेत्॥ ततोविप्रा
न्वशान्तेराजानोजयेदिस्मातते॥ संवत्सरत्रमात्रेण परराजो नवे ध्रुवं॥ अन्यच्च
कृप्यते कर्म पूर्ववत् खादिराकृतिं॥ कृत्वा संप्रखलापश्चात् पूर्ववत् होममाचरेत्॥ त

तः प्रंखलितः शत्रुराजः शीघ्रं प्रजायते॥ अथापरः प्रयोगोत्र शत्रुन्मिपतेः पु
रमे॥ मंत्रसिद्धाद्विजास्तत्र राजपूरुषसंयुताः॥ विकृताकृतिसंनिवासे ध्वेलेपुवच
तुष्यये॥ देवतायतनेराजद्वारेचैव सत्वासुच॥ मंत्राणि मंत्रितानूपुन्यसेयुर्जोह
शंकुकान्॥ ततो निमंत्रितं तस्मात्त्रिपेयुः सर्वतः पुरे॥ रावृकृतेरिपुपुरंनत्रपे हर्षत्र
यादृश्य॥ खदिरव्यापरोहंति महारणं चर्जयते॥ अत्रच ध्यानगम्यो का रूपयौवनसं
पन्नेसेवमाद्यसन्नूतीयानुवाकप्रयोगोक्ताद्रष्टव्याः॥ इसष्टमानुवाकेरमनमोवः
किरिकेभ्यइत्येतत्मर्यंतस्यप्रयोगः॥ ॥अथनमोवः किरिकेभ्य इत्यमाइतश्चारभ्या
नुवाकांतमेकोमंत्रः॥ पराक्प्रथमंकृत्वा जपेत्सम्यगावसुंमतुं॥ चत्वारिंशत्सहस्रा
णिपुरश्चरणसिद्धये॥ मंत्रसंख्याधनार्थं तु ततः परिसरेगुरोः॥ जपेद्वै वाष्टसाह
स्त्रप्रयोगार्हस्ततो नवेत्॥ मंत्रेणानेनदुःसाध्यंनकिंचरपिविद्यते॥ देवस्यदक्षिणा

मन्त्रैः सन्निधौ स्वकृताग्राने ॥ जुहुयान्मथिताग्नौ वा लजहुतं लाजाज्ञातिजैः पृथक् ॥ एवमुनघ
ते तस्य सुवर्णं तदनुग्रहात् ॥ अथान्यदुच्यते कर्म तत्र स्यादद्भुतं कृतिः ॥ अपामार्गणि
बीजानि वैणवानि तथा यवाः ॥ दधिमध्वाज्यसंयुक्ता हविरत्रकृतौ नवेत् ॥ सुवर्णानां
सहस्रं तु होमेनोत्पद्यते ध्रुवं ॥ कन्याकामो गुग्गुलेन स्वेष्टकन्यासमाकृतिं कृत्वा तामु
पलस्यैव जपेत्संच सहस्रकं ॥ छित्वा मत्तां सहस्राणि पंचैव जुहुयाच्छुचिः ॥ जनेतक
न्यकामिणां सर्वान्तरणात्पिता ॥ राज्यश्रीकामना यस्य तस्य लक्षाहुतिर्भवेत् होम
द्रव्यं तु पत्राणि कुसुमान्फलजानि च ॥ एवंकृते राज्यलक्ष्मीः प्रसन्ना जायते चिरात् ॥ व
रूपमिच्छन्विद्गाचारैः पत्नीत्वं नाम्नुतां कुरेः ॥ लक्षमेकं प्रजुहुयात्त्रिशनाचायमन्त्रा १३५
न्तस्याः ॥ दद्यावृत्यापत्ना यं ते देवदेवप्रसादतः ॥ अथापरः प्रयोगोयं महाकान्तारन्न
तले ॥ आत्मप्रमाणं शुष्कं कुण्डे संस्थाप्य मथितानलं ॥ अयुतं जुहुयाद्बिल्वैस्ततः पंचसह

स्रकं ॥ मुष्टिमात्रैर्बिल्वपत्रैर्होमकर्म समाचरेत् ॥ तत्र बिल्वफलाकारं सुवर्णमु
पजायते ॥ स्पर्शवेधी च वेधेमपिंडे बिल्वफलाकृतिः ॥ सार्वभौमसुतार्थी तु राजेत
त्कर्म कारयेत् ॥ देवस्योपरि मुक्तानि गव्येनक्तानि सर्पिषा ॥ कमलानि प्रजुहुया
च्छतसाहस्रसंख्यया ॥ उत्पद्यते सार्वभौमः सुतो देवप्रसादतः ॥ अथान्यत्कर्म तत्
त्रस्यादद्भुतं हवनक्रिया ॥ शमीसमिद्भिरक्ताभिर्दधिक्षौद्रघृतैः स्रुचैः ॥ एवंकृते सुत
स्तस्य शिवभक्तो निजायते जायते ॥ कवित्वमरोग्यपात्रे स्वेतवर्णवचोद्भवं ॥ चूर्णम
र्धपलं शिष्याक पिलाज्येन लोडयन् ॥ ततस्तद्घृताहन्याच्चूर्णं कृत्वाभिमन्त्रितं ॥ स
वेतस्वयमित्यं तु कुरुते संजायते कविः ॥ लोगकामस्तु जुहुयादुदुम्बरतरुद्भवाः ॥ स
मिधो दधिमध्वाज्यरक्ताः संख्या पिचायुतं ॥ देवदेवप्रसादेन महाभोगप्रजायते
भोमनोजवकामः स्याद्दत्तमार्गं समाचरेत् ॥ पुरश्चरणमत्र स्याद्विशेषेण तदुच्य

महा॰ १३६ ते॥ हृष्टं से वत्सरं कृत्वा ततस्त्वां ग्रासमाचरेत्॥ इत्थं संशोध्य चात्मानमयाऽष्टादशवा
सरान्॥ चरुशाकफलैर्मूलैराचरन्देहधारणं॥ निरंतरं जपेद्बुद्धिपूर्वं निशान्तवेल
तु॥ अबुद्धिपूर्वके स्वप्ने स्नात्वा पश्चाज्जपेन्मनुं॥ जपांते गुरवे दद्यान्निष्कपंचककां
चनं॥ ततो गुरोर्वा देवस्य सन्निधौ जपमाचरेत्॥ संख्या चात्र समुद्दिष्टा लक्षसार्धं
ततः पुनः॥ साक्षादुमापती रुद्रः प्रसन्नस्तस्य जायते॥ तस्मै सा ह्यात्मनो वेगमुक्तो नव
तिमानवः॥ यं यं देवं कामयते तं तं देवं गुरुस्तथा॥ स्मृतो मंत्रं जपेद्दृष्ट्वा ततदेवा
प्नवेत्॥ अथाद्यात्करणमंत्रपूर्ववदाचरेत्॥ पुरश्चरणकामार्थकाले यस्मि
न्नदर्शनं॥ अपेक्षते राज्ञ तस्मिन्नलोहितं चंदनं स्मृतं॥ कपिलापयसा सत्थं संस्तु
घाम्घत्य पात्रके। स्तोरनिधामत स्थाप्य सहस्राष्टं सं जपेत्॥ तेनोपलिप्य चात्मानं स्व
ष्ठा स्मृत्वा चतुरां कुरं॥ ग्रासमात्रं प्रकुर्वीत ततो दर्शनवेश्वरः॥ अथान्यदुच्यते कर्म

राजा वश्यकरं परं॥ होमं कृत्वा लोहितस्य चंदनस्याप्यतं पुनः॥ अभिमंत्र्यायु
तादृक्षापुत्तलिकां तेन कारयेत्॥ ललाटे धारयन्नित्यं समतिगच्छेन्महीपतिं॥ एवं व
श्यान्नवेमुस्ते राजानो राजपूरुषाः॥ देवस्य दक्षिणामूर्तेः संनिधौ नित्यवन्मनुं
॥ जपेद्दृष्ट्वा ते राजपूरुषेभ्यो न यं नरि॥ यस्य छेत्ता समस्या सो नाम महः॥ एवं कं
॥ मंत्रं जपेदृक्पादैरलं त्वेवायुतसंख्यया॥ देवस्य सन्निधा चैव॥ वस्त्राराप्युनरप
ति। विश्वतः पाणिपादान्त्वं विश्वतोक्षिशिरोमुखं॥ ज्वलंतं विश्वमावृत्य तेजोराशि
त्रिवं स्मरेत्॥ ॥ इति नमके पुनमो वः किरिकेभ्य इत्यस्य मंत्रस्य प्रयोगः॥ ॥ अथ म
मा पेक्षंधसस्पत इत्यस्य प्रयोगः कृतोपवासमेकाहं जपेन्मंत्रमर्ष्ययुतं॥ पुरश्च
रणमेवं स्यादथ द्रापे अंधसस्पत इत्यस्य प्रयोग हृतोपवासमेकाहं जपेन्मंत्र
मर्ष्ययुतं॥ पुरश्चरणमेवं स्यादथ चेद्धनकामना॥ अर्धमांजु कुमाराज्जं कापिलं

महा॰ १३१ प्रमतो मतं॥ धनं बहुतरं वेत्तस्य महेशस्य प्रसादतः॥ ज्वरे जाते स्वरूपं तस्यैव त्रिरस्तोनु
विरोगिणं॥ जुहुयात्तच्च साहस्री दूर्वाणां ज्वरनृणां तये॥ अभिचारस्वरूपं तस्यैव विकंक
तनरूपवा॥ समिधो जुहुयाधो मसंख्यात्तथा युतं भवेत्॥ महाजनकृतमोहस्वरूपं तस्य
होममाचरेत्॥ तुषमाज्येन संसिक्तं हविः संख्यापि वा युतं॥ सर्वत्र तस मुख्यत्वत्त यत्नं
त्त्पूर्वमाचरेत्॥ होमं तत्रायुतं संख्या होमद्रव्यमथोच्यते॥ ईडुं बर्बस्य समिधस्तिला
श्चैव तथा यवाः॥ अनेन सर्वतन्ते त्योनयमसाम्युविन्नृपति॥ अथापरः प्रयोगो नयाम
स्मनगरस्य वा॥ मध्ये वह्निसमाधाय घृतपिष्टं तिलांस्तथा॥ अयुतं जुहुयाद्वेष्टव
लिमस्य स्य पत्रके॥ निक्षिपेच्च पुनर्होमः सहस्राष्टकसंख्यया॥ एवं कृते नैरवालास १३१
ष्टोत्तरैस्व संयुतः॥ दद्वेषो जायते तस्याथ महासिद्धिः प्रजायते॥ तद्रूपं संस्मरेदाप
र्यपद्भिः स्व प्रमुच्यते॥ आयुत्कंसितकंचुको डमरुकी स्निग्धोल्लसत्कुंडलः स्मूर्जी

कुंडलितस्रवाः सतिलको मंजुक्वणन्नूपुरः॥ श्रीमन्निर्मलदंतपंक्तिकिरणाः श्वेताम
मानाननो देवो नैरवन्नपि वेपिनतत्तुर्थे योमडानीपति॥ ॥इति नमकेषुत्रपेक्षंध
सस्तदन्यस्य प्रयोगः॥ ॥अथयमातेरुद्रेस्य सप्रयोगः॥ अशेराणानि कुर्वीत प्राणा
यामास्ततः परं॥ सहस्राणि जपेत्तं च पुरश्चरणसिधये॥ कन्यार्थी जपते कन्या कुत्वा
लाजान्घृतकृतान्॥ अपामार्गसमिधो मैरजस्त्रीनाशमेहुधः॥ सर्वकल्मषनाशाय
जुहुयाच्च तिलाहुती॥ ब्राह्मणादीन्वशे कुर्याद्भुत्वा खदिरसंभवान्॥ सितरक्तनील
पीतैः सूत्रैः संवेष्टितान्क्रमात्॥ जलहुत्वा घृतसर्वान्कामानाप्नोति साधकः॥ जुहु
या वृक्षकामस्तु कुसुमैः कुमुदादिभिः॥ यद्वर्णं जुहुयात्तुष्यं तद्वर्णं वस्त्रमाप्नुयात्
॥वृष्टिकामस्तु चादेशगोमयेनोपलिप्यते॥ रक्तद्रव्येण तत्रैव मंडलं परिलेखयेत्॥
मंडलस्य पुरस्तात्तु नवकुंभं निधापयेत्॥ सूत्रेणावेष्टितं सम्यक्पूरितं गंधवारि

महा.
१३८

॥८॥ आवाहयेत्ततः कुंभे सर्पमेकाग्रमानसः॥ तत्रस्थमर्चयेद्देवं संयतः साधकोत्तम
॥९॥ पायसं जुहुयात्तत्र शतमष्टोत्तरं बुधः॥ ध्यायन्नेकाग्रधीः सर्पं जपेन्मंत्रं सहस्रकं
॥१०॥ एवं कुर्वीत सप्ताहं दशाहं वाप्यथापि वा॥ ततः प्रसन्नो भगवान्महाविषं प्रमुंचति॥ अ
होरात्रमुपोष्यैव पुत्रकामः शुचिव्रतः॥ पायसं जुहुयाद्दोग्ध्राष्टोत्तरशताहुतीः॥ ऋ
तुस्नातां ततो नारीं शुचिर्वस्त्रामलंकृतां॥ भोजयेद्धुतशेषं तु जपन्नष्टशतं बुधः॥ ब्रा
ह्मणान्भोजयित्वैव कारयेत्स्वस्तिवाचनं॥ ततः पुत्रमवाप्नोति तेजस्विनमनामयं॥ अ
निष्टदर्शने चैव तथा दुःस्वप्नदर्शने॥ अभिचारकृतैर्दोषैरलक्ष्म्याच समाहिते॥ वि
ग्रहोपसर्गे च भये च समुपस्थिते॥ तथा च ग्रहपीडायां नृतावेशाकुलेषु च॥ एवमा
हिषु चान्येषु दोषेषूपहितेषु बुधैः॥ पूर्वोक्तं मंडलं कृत्वा नवकुंभेन पैव च॥ गंधोदकेन
संपूर्णं सर्वमंगलसंयुतं॥ तालवृंगकर्पूरनिंबुजातीफलैर्युतं देवमावाह्य कलशे त्वर्च १३८

येत्तत्र होमयेत् मंत्रेण॥ नेनं देवमष्टोत्तरसहस्रकं॥ अभिमंत्र्य ततस्तेन स्नात्मनो वा
परस्य वा॥ अभिषेकं प्रकुर्वीत सर्वदोषैर्विमुच्यते॥ यस्तु मंत्रं जपेन्नित्यं प्रातस्नात्वा
सहस्रकं॥ श्रीरारोग्यं च तेजश्च वर्धते तस्य सर्वदा॥ संवत्सरं जपेद्यस्तु क्षीराहारो
जितेंद्रियः॥ अर्चनं च यथाशक्ति कुर्वन्युतमन्वहं॥ संसिद्धिमतुलां गच्छेदणिमादि
गुणैर्युतां॥ किं तस्य मानुषैर्योगैः प्रसन्ने वै जगत्पतौ॥ बहुनात्र किमिहोक्तेन तत्त्वितस्त
त्परायणः॥ तत्रावनाभितो मंत्री जपेन्मुक्तो भवेन्मुनिः॥ द्रुतचामीकरप्रख्यं शक्तिपाणिषु
डाननं॥ मयूरवाहनारूढं स्कंदरूपं शिवं स्मरेत्॥ इति नमकेषु यातेरुद्रस्य प्रयो
गः॥ अथ यद्मारुद्राय मरुतानो रुद्रेस्तनयोः प्रयोगः॥ अस्य हृत्वरको मंत्रः॥ आरोके छ
दयित्वैकं जपेन्नव सहस्रकं॥ पुरश्चरणमेवं स्यादयदर्शे चतुष्पथे॥ अग्निमाधाय
जुहुयाद्धि सारमिहाप्युतं॥ गवादीनां भवेच्छांतिरथान्यत्कर्म चोच्यते॥ राजवाहन

महा.
१३८

शांत्यर्थं जलं संस्पृष्ट्वायुतं जपेत्॥ अन्वहं पयसा तेन वाहन्नानाम हीत्वितः शालां संप्रोक्ष
येत् पुष्पाक्षतकलैन विनिक्षिप्तं॥ कृत्वोपयोज्यमक्तिं विधाहनेस्य: प्रदापयेत्॥ एवं वाह
न शांतिः स्यात्तिरश्चां शांतमेषुन॥ आज्यमिश्रतिलानां तु जुहुयादयुतां कृती॥ अनेन
पां शांतये होमो दूर्वाणामयुतं जवेत्॥ दिव्यसिंहासनासीनं त्वमयमानं महर्षिभिः॥ प्रस
न्नवदनं ध्यायेच्छ्रोमं सोमार्धधारिणं॥ ॥इतिइमारुज्ञामनज्ञानो रुद्रेत्यनयोः प्रयोगः॥
॥अथ मानोमहांतमित्यस्य प्रयोगः॥ उपवासत्रयं कृत्वा जपेल्लक्षसहस्रकं॥ पुरश्च
रणसिद्धिः स्यात्प्रयुंजीतार्थकर्मणि॥ स्त्रीयस्त्रीबालवधानां शांतिनिष्कृतिं द्विचरेत्
प्रतिसंवत्सरं त्वाशांनत्वेस्याद्युपक्रमः॥ यवानां तिलमिश्राणां तु जुहुयादयुतां कृती १३८
॥अश्वत्थसमिधां होमश्चायुतं सर्पिषायुतं॥ एवं कृते स्वदारादिजनरक्षा प्रजायते
किंचान्यत्रापि शांत्यादावयुतं जपमाचरेत्॥ राजा तु सर्वशांत्यर्थं कार्येयामयुतां कु

ती:॥ होममेवं त्वतिमासं तु कुरुतद्यस्य महीपतेः॥ अन्तःपुराद्भयः सम्यग्वर्धते नात्र संश
यः॥ बालेंदुमुकुटं देवं तरुणादित्यविग्रहं॥ ध्यायेत्त्रिदीप्त्वराकारं गणेश्वरसमावृतं॥ ॥
इति नमके पुमहांतमित्यस्य प्रयोगः॥ ॥अथ मा नस्तोक इत्यस्य प्रयोगः॥ ॥कृष्णमेकं
चरित्वा ताम्रपात्रे तु उदुंबरे घृतं॥ निधाय कापिलं तस्य कुर्याद्वै वातिमन्त्रणं॥ सहस्रसंख्य
या तेस्यां सौवामयिते पिबेत्॥ स कुमार स्सहस्रीं महाव्याहृतिभिः शतं कृत्वा दोषमवि
त्वाच त्रिरात्रं तु व्रती नवेत्॥ ततश्च चरुमुत्पंचाशत्सहस्राणि वै जपेत्॥ गुरवे पंचनि
:ष्काणि दद्यादेवं कृते पुनः॥ पुरश्चरणसिद्धिस्यात्प्रयोगार्हस्ततो भवेत्॥ आयुष्कामो मही
पालो नित्यं स्वोपपावके॥ मथितेवानले होमं कुर्याद्युतसंख्यया॥ होमद्रव्यं तिलाः सि
क्ताः सर्पिषैवात्र कर्मणि॥ स्वरक्षेच्छुर्महीपालो ब्राह्मणैः कर्मकारयेत्॥ अष्टशाला
त्मकां शालां तस्य कृत्वाग्निमंत्रिणं॥ तदा दामाष्टकाष्ठासु राजानमभितस्थितैः ब्राह्म

तो र्निस्यवकार्यं रक्षाकर्म महीपते: किरणं चात्र रक्षास्मादिक्तस्य स्वपितृस्मन:॥ राज्यप्रा
वृधिकामस्तु मंत्रसिद्धैर्द्विजैर्नृप:। कारयेद्दमवाकर्म सम्यक्: सिधिर्द्विजैर्नवेत्॥ सप्त:
सिधिप्रकारस्तु लध्माचार्याद मुंमतुं। एकरात्रमुपोष्याथ त्रिरात्रं सततं जपेत्॥ सप्त
:सिधिप्रकारस्तु लध्माचार्याद मुंमतुं॥ एकरात्रमुपोष्याथ त्रिरात्रं सततं जपेत्॥ स
प्त: सिधोन वेदेवं कर्मा होमप्रजायते॥ एकादशद्विजन्मानो रुद्रं ध्यात्वा सुताकृती:।
दधिमध्वाज्यसंपृक्तैर्जुहुयात्क्रमतै: सितै:॥ एवंकृते राज्यलक्ष्मीर्वर्धते नात्र संशय:।
आयु:कामो महीपाल: कारयेद्दयुतं कृतिं दूर्वाणामाज्यपृक्तानामेवं जीवेच्चिरं नृप:।
अथ राज्ञो जन्मदिने राजा तान्कलशान्प्रयुज्यान्॥ ताम्रेण निर्मितान्वापि सहस्राष्टकसं
म्मितान्कल्पयेद्राता निवाप्याम्भ: परिपूर्णान्विनिक्षिपेत्॥ मंगलानि च वस्तूनि कलशेषु
विनिक्षिपेत्॥ नववस्त्रेण तान्सर्वान्वेष्टयेच्च पृथक्पृथक् एवं ते सुसमाराध्य रात क

त्वो त्रिमंत्रयन्न॥ आचार्य स्नापयेन्नृपं कुंभतोयैस्तोपि: पृथक्पृथक्॥ एवं कृते महीपालो मु
च्यते सर्वकिल्विषै:॥ अथ राज्ञो निहृदधर्मसहस्राष्टकसंख्यया॥ कारयेज्जपमेकेन
विप्रवर्येण निस्यशा:॥ अग्निदधिर्नवेदेवमनेन जपकर्मणा॥ इति सिद्धन्महीपालो
रत्नागारादिमध्यत:॥ वाहनायुधवस्त्राणां सौम्यत्वे मासि मासि च॥ इत्यर्थमयुतावृत्ति
जपं होमं च कारयेत्॥ आयु:कामो महीपालश्चायुतं होमम् आचरेत्॥ अमृत्यस्यश्रिधृस
त्रस्य पामार्गेश्च वा अपि। दधिर्मध्वाज्यसंपृक्ता होमद्रव्यमिहस्मृतं॥ गत्वा मुपोष्य तेन
सुवर्धते होमकर्मणा॥ पुत्रे च व्यवहारे च मंत्रमेतं जपेन्नर:॥ एवंकृते प्रजामेतकर्मण्य
त्रापराजित:॥ सुवर्णकामनाम्नस्य सत्रिरात्रमुपावसन्॥ निरंतरं जपं कृत्वा चरुतोजीत
तो मुत्तं॥ जुहुयात्मधुपृक्तानि बिल्वान्येवं कृते तत:॥ सुवर्णानां सहस्रं तु लभते नात्र सं
शय:॥ कन्याकामस्तु जुहुयाद्युतं कुसुमस्य सौ॥ दधिमध्वाज्यपृक्तानि विंदते कन्यकामु

नो॥ अथान्यदुच्यते कर्म चरुतो जीतुवत्सरं॥ निलमण्ड सहस्राणि॥ जुहुयात्स्त्रीयपावके
॥ अश्वैत्थानातिवाङ्वं कापिलंघृतमुच्यते॥ एवंकृते प्रमुच्येत महतः पातकादपि॥ वत्रपका
मोमलयजमत्रिमंत्रजलाटके धारयेद्यं हनत्तो दं सर्वैवश्या नवतिहि॥ प्रतिस्वजन्मनेहो
मं कुर्याद्दशसहस्रकं॥ होमद्रव्यंत्वपामार्गसमिधोनेन कर्मणा॥ अपमत्कं नविंदेत देवदेव
प्रसादतः॥ वृष्टिकामः सूर्यवारे मंत्रेणानेन चास्कृतं॥ आराधयेत्कपापुष्पैरमुतैरत्र क
र्मणि रक्तोष्णीषी रक्तवासा रक्तगंधानुलेपनः॥ त्रताखयं कृतेस्तर्यो महावृष्टिं प्रमुंचति
॥ मोहरमार्गणामीसगरहात्वा दत्वाचाकुराः॥ अथ सा दत्तिका हत्वा त्वत्रिमंत्र चतापु
नः विन्यसद्दित्तुदशसु गच्छेत्तोमी ततो भवेत्॥ सत्कर्मणां समारंभे सर्वविघ्नजिघत्त १४१
या॥ अयुतं तु जपेल्लिंगमंते गच्छेन्सकर्मणः॥ पुत्रकामस्तु जुहुयाद्दत्तमाज्येन संय
तः॥ ततो वंचाकुरंपुत्रं गुणिनं लभते ध्रुवं॥ मंयंजनं जेतुमिच्छेन्तं तैवैसिकता कृतिं॥ वि

धायतत्प्रतिकृते मूर्ध्नि स्थित्वा युतं जपेत्॥ अवश्यं कर्मणानेन सर्वत्र विजयी भवेत्
॥ ध्यानमेकादशाधाविजक्कं देहे विशुद्धस्फटिकप्रकाशं तेजोनिधिं मूलिनमिंदुमौ
लिं विचिंतये दत्र नसदैवरुद्रं॥ इति नमके मुमानस्तोकइस्प्रयोगः॥ ॥ अथा रात्र
इत्यस्य प्रयोगः॥ ॥ दिनत्रयमुपोष्याथ त्रिरात्रं संततं जपेत् पुरश्चरणमेवं स्यात्
संजीताय कर्मसु॥ आयुःकामः स्वकीयायौ निलवकं जुहुयाद्दतं अश्वैत्थसहस्राणि पिवा
तयैवाप्यनातानि वा रधिमध्याज्य एका नो दूर्वाणामपि चाकृती॥ पूर्वोक्तरीत्या जुहु
याद्दवमायुः प्रवर्धते॥ अथापरः प्रयोगो मे प्रतिजन्मर्क्षमासनः॥ प्रत्याईन्नं चकु
र्वीत जपमष्टसहस्रकं॥ प्रत्याईन्नं प्रति द्रव्यं जुहुयाद्युताकृती॥ होमद्रव्याणि दूर्वाम्र
तपापापार्गसंज्ञवाः॥ चामीतरुसमुद्भूताः समिधश्चतिजास्तथा॥ एतान्युक्तानि दध्या
ज्यमधुभिः स्फुरयो निविड्यावसंच सहस्राणि जपेन्तावन्नरश्चितं॥ कुर्यादेवं कृते

दीर्घमायुः प्राप्नोति न संशयः ॥ चिरंजीवनकामस्तु राजा जन्मदिने सुतं ॥ जुहुयाद्दूस्मा
लास्तु दूर्वैः प्रत्येकमाहरात् ॥ दधिमध्वाज्यसंयुक्तामपामार्गशमीतिलाः ॥ दूर्वा अपि च
होमात्पूर्वं द्व्यात्प्रयोदितानि वै ॥ अनेन कर्मणा राजा दीर्घमायुरवाप्नुयात् ॥ वह्नि होमे त्व
न्नादीनां होमस्तोतसि जायते ॥ होममात्रेण शङ्कानां जपेणैव च साधनं ॥ लक्ष्मीं सुधा
मनामस्तु कुमारो ऽसुताकृतीः मध्वक्तैस्तंडुलैर्मुक्तैर्वर्धते तस्य चायुषी ॥ श्री
कामो ऽर्कस्य कुसुमैरयुतैः पूजयेच्छिवं ॥ उच्चारयन्नमुं मंत्रमेकैकं कुसमंत्रमसे
त ॥ अनेन कर्मणा लक्ष्मीर्वर्धते नात्र संशयः ॥ आजन्मेपश्चिमद्वारि देवस्या काञ्ज
मे पिवा ॥ प्रत्याईनं ब्रह्मचारिन्नण लक्ष्मीर्वर्धते नात्र संशयः ॥ आजन्मेपश्चिमद्वारि १४२
देवस्या काञ्जमे पिवा ॥ प्रत्याईनं ब्रह्मचारिन्नरण मासमतंद्रियः ॥ विगतत्वारत्नव
णचरुनो जीजपेन्मनुं ॥ मन्त्रितस्तु महेशानमेकमेकं सहस्रकं ॥ एवं कृते विरायु

स्तु नवेन्नप्रसुजन्मस्तु पूर्वोक्ताहारनियमेष्वशक्तौ नैत्तमाहरेत् ॥ कुर्वाणस्सं
न्निधौ रेव्या देवमानंदतांडवं ॥ कृताञ्जनधरं ध्यायेत्प्रमकांचनसंन्निभं ॥ ॥ इति न
मके षुआरात्र इत्यस्य प्रयोगः ॥ अथ स्तु हिसुतमित्यस्य प्रयोगः ॥ एकरात्रमुपोष्य
पत्रिरात्रं संततं जपेत् ॥ पुरश्चरणमेवं स्यात्प्रयोगार्हस्ततो भवेत् ॥ विद्विड्विनाश
कामस्तु जुहुयात्त्रसमाकृतीः विषतैलसमंयुक्तावैकंकततरूद्भवाः ॥ समि
धोद्भवमत्रस्यातत्प्रमशानाग्नौ कृतिर्भवेत् ॥ शत्रवो नाशमायांति वेगेनानेन क
र्मणा ॥ अथ या स्युच्यते कर्म तत्र देवस्य सन्निधौ ॥ जप्स्यपाणिः सपत्नस्य नामग्रहण
पूर्वकं ॥ शुचिर्जपेद्दनुं मंत्रं संख्यातन्त्रायुतं भवेत् ॥ एवं कृते रिपोर्देहे ज्वरो जाये
त वै महान् ॥ श्वेतसिद्धार्थकैः ॥ सुधो जुहुयादयुताकृतीः ॥ मसूरिकारव्यो जायेत
रोगः शत्रुवणात्मके ॥ शत्रोर्गेहे प्रवातस्य स्तेत्रादिषु पिरवा तमेत ॥ रवातयित्वात्र

महा०
१४३ निखनेद्वसुं मंत्रमुदीरयन्॥ शार्कराश्मतथा कल्परोमास्थ्यादिचकुत्सितं॥ एवं
कृते सपत्नस्य नाशो वेगेन जायते॥ उद्यद्भास्करकोटिप्रकाशमाकाशनिलयम
तिनीमं। नीतिहरमनन्यवरदं ध्यायेत्तुनं सुरौघततं॥ शारत्नाल्पामन्त्रा नोध्यातव्य
इति केचन॥ ॥इति स्तुहिक्षतमित्रस्य प्रयोगः॥ ॥अथपरिमाणरुद्रस्यैतस्य प्र
योगः॥ रुद्रछ्रमेकं चरित्वाथ जपेच्च नववासरान्॥ तत्र प्रतिदिनं पंचसहस्राणि ज
पोन्नवेत॥ पुरश्चरणमेवं स्यादथ चेत्तुत्रकामना॥ दावानलसमालीढपलाशस्व
दिरोद्भवा॥ समिधोरधिमध्वाक्ता एका वैश्वानरे हुतं॥ जुहुयात्सर्पिमद्वारेमहे
शास्याज्जयेत्सुते॥ एतत्कर्म सुगुप्तं स्यात्कर्मणानेन वैध्रुवं। जायते रुद्रसदृशं पु १४३
त्रं वंशाकरं परं॥ अथापरः प्रयोगोत्र प्रारंत्नस्मारमादिने कृत्वाष्टमासुनासौ
स्याद्दर्शयामपि वा पुनः॥ नवतारं पतीत्तत्र पूर्वे घुम्नरुनो जिनो स्वगृहे वायगे

ऐन्द्र्यां छायायां पिप्पलस्य वा॥ कर्मैतदाचरेत्तस्य भक्तिर्येषा प्रकीर्तिता॥ मंत्रात्त
राणि यावंति तावतः कलशान् सुधान्॥ तंतुर्निवेष्टितान्तीर्थपाथसापरिपूरिता
न्॥ वर्तुलं स्थापयेत्तन्न ध्येतेष्वेकंच महद्व्रतं॥ उच्चैस्तरं निधामात्र सोममावाहये
त्तउं॥ आयातु भगवान्देवः कैलासात्कलशोपुनः॥ मंत्रादितो विंदुयुतं न्यसेदेके
कमन्तरं॥ ततो नवसहस्राणि जपेन्मंत्रं समाहितः॥ ततो मधुघृताक्तानां त्रपा
साकानां तथा पुनः॥ जातानां च सहस्राणि जुहुयाद्दशसंख्यया॥ ततएकास
ने जायापती संस्थाप्य संयतौ॥ मध्यादिक्रमतः कुंभांस्त्वानादायपृथक्पृ
थक्॥ तत्र दक्षिणरूपेण संस्मरन्पार्वतीपतिं स्नापयेत्तौ घरांभोभिर्ब्राह्मणा
न्भोजयेत्॥ अष्टौ सहस्राण्यथवा तावंत्येव शतानि च॥ एकादशांगनम्यथ
वा भोजयेच्छक्तितो द्विजान्॥ तत्कुंभवस्त्रश्रीस्यादिआचार्याय समर्पयेत्॥ किंतु त

तोजपित्वास्मैदक्षिणांनिष्कपेचकं॥दद्यान्निष्कत्रयंवाप्यनुज्ञीयातांतुदंपती॥एवंतमाम
वेत्पुत्रोदीर्घायुःसुगुणान्वयः॥पूर्वोक्तकर्माशक्तश्चेत्पश्चिमद्वारसंयुते॥महेशस्या
लयेमंत्रंजपेदयुतसंख्यया॥ततोजपन्मंत्रमयुगहोरात्रंप्रदक्षिणं॥कुर्यात्ततोदशा
दत्तमयादर्शंदद्योदद्यात्॥तत्रविघ्नाःप्रजायंतेतस्माद्विघ्नेशमर्चयेत्॥पुरश्चरण
सिद्ध्यस्यकर्मैतत्सुत्रकामदं॥अन्यथाविपरीतस्याद्गुरुंयत्नेनपूजयेत्॥अथापर
:प्रकारोत्ररात्रायादिवसानितु॥अष्टाशत्तानिवाचैकचत्वारिंशद्दिनानिवा॥किंचै
कविंशतिंतत्रपश्चिमद्वारसंयुते॥देवालयेप्रतिदिनंचरुभोजीतपेन्मनुं॥अशी
त्यानितावत्यःप्रदक्षिणवरक्रियाः॥अश्वत्थमूलानिदृष्टिगम्यानियानिवै॥तेषु १४४
मूर्वोत्तरान्मूलाद्दारभ्याष्टसहस्रकं॥जपेत्प्रावंतिमूलानितत्रतत्रपृथक्॥अथा
श्वत्थचतुर्दिक्षुसहस्राष्टकसंख्यया॥दिनेदिनेजपेन्मंत्रमेवंकर्मसमापयेत्॥दक्षि

तान्ब्राह्मणांस्तानैभोजयेत्तर्पयेत्॥दपि॥एवंकृतेवंशकरंधर्मिष्ठंलभतेसुतं॥गजचर्मा
वृततनुस्फुरच्चहरणोज्ज्वलं॥सर्वपापहरंध्यायेद्देवंकुंजराननं॥॥इतिनमकेशुप
रिणोरुद्रस्येत्यस्यप्रयोगः॥ ॥अथमीढुष्टमेत्यस्यप्रयोगः॥एकरात्रंजपेल्लेचस
हस्राणितुसंयुतः॥पुरश्चरणसिद्धिस्यात्त्रयोगार्हस्ततोभवेत्॥अर्धनाशात्तयेग्रा
मेतथैवग्रामसंकटे॥तस्करादिभयेचैवजनुरुमास्वर्पिषाजुनी॥पंचैवतुसहस्रा
णिजपेन्मोमुच्यतेत्तत्रं॥मंगलायतनंदेवंमुद्यानमतिसुंदरं॥ध्यायेदनचुराका
रमागच्छंतमिनाकिनं॥ ॥इतिनमकेषुमेत्यस्यप्रयोगः॥ ॥अथपविकिरिडेत्यस्यप्र
योगः॥ ॥त्रिरात्रंचरुभोजीसन्सहस्राणिदशैवतु॥प्रदक्षिणमसुमंत्रंजपेच्चवशि
वालये॥पुरश्चरणसिद्धिःस्यात्त्रयुंजीतायकर्मसु॥महाजनविरोधेतुविरोधस्याप
नुत्तये॥दधिमध्वाज्यसंपृक्तायज्ञार्हसमिधोद्विजाः॥अयुतंजुहुयाद्देवंत्वयंतेस्मो

न्नजायते॥ जेतुकामस्तु सर्वान्वाऽपामार्गसमिधुंतिं॥ ज्ञातसाहस्त्रिकां कुर्यात्समिधस्ता
स्तु सर्पिषा॥ कापिलेन समाक्ताः स्फुरेवं सर्वजयो भवेत्॥ नीरक्तो जेतुकामस्तु समिधां
बिल्ववृक्षरुहः॥ दधिमध्वाज्यरक्तानां जुहुयाल्लक्षमाहुती॥ एवं कृते वराहार्दे वनरूपमा
मोक्षसंग्रामं॥ सलिलं जेतुकामस्तु जलमध्ये स्वपावकं॥ स्थापयित्वा कापिलेन सर्पि
षा लक्षमाहुती॥ जुहुयात्कर्मणानेन जयमप्तो न जायते॥ यष्ठ्यर्के तु समपिस्तत्र
मगहतापर्वकं॥ कापिलाज्येन जुहुयाल्लक्षमेकसमंत्रियः॥ यदुदित्रयन्तवे धौमन्न
मंत्रस्मात्रविरति॥ प्रसन्नवदनं सौम्यं रविलोकाहमंडनं॥ ध्वबयासहितं ध्यायेत्तु
रसंघैरच्छिष्टुतं॥ इति नमके पुविकिरिते लस्य प्रयोगः॥ ॥अथ सहस्त्राणि सहस्रोत्त
स्य प्रयोगः॥ कृच्छ्रमेकं चरित्वा हैजपेसं च सहस्त्रकं॥ पुरश्चरणमेवं स्यात्प्रयुंजीत ता
र्यकर्मसु॥ सविवादिप्रधानानां पुरुषाणामुपद्रवे॥ तच्छांतये महीपालः कारयेद्युतं

हुतिं॥ समिधस्त्वयुताज्यस्या विकंकतत्तवास्तथा॥ व्रीहयश्च यवाश्चापि होमद्र
व्याणि ताऽपि॥ सर्वमेतद्धुतात्कं स्यात्तद्रूपं सेवमुपद्रवाः॥ अथ मारणकामश्चे
त्प्रधानपुरुषस्य तु॥ समीपे दक्षिणामूर्तेर्जपेच्छतसहस्रकं॥ ततो वल्मीकसंभू
तमृदा लिंगं प्रकल्प्य च॥ मंत्रेणानेनाभिषिंचेद्यावच्छोषं न वेधितत्॥ एवं कृते न वै
नश्यः प्रधानपुरुषस्य वै॥ यदि चेन्मरणादेनं रक्षितुं कांक्षते तदा॥ आहृत्य तां मृद
ग्रंगर्णमापगायां विनिक्षिपेत्॥ तक्षीरे यस्तुकीयायां जुहुयादयुताहुतीः॥ होम
द्रव्यं तु वेदन्नघृताक्ताः सुकृतं दुलाः॥ मरणोपद्रवस्तस्य जायते तेन कर्मणा॥ म
हाकांतारगामी तु कृत्वा तस्मात्रिमंत्रणं॥ अष्टसाहस्त्रिकावृत्त्या तेन गात्रानुलेपनं
॥ कृत्वा गच्छेत्ततस्तस्य चातिः कापि न जायते॥ रक्तोऽयो न यकामस्तु कामवैडालमा
मिषं॥ बलिं हरेच्चतुर्दश्यां कृष्णायां निशि संयतः॥ बलिरेवं वृत्तस्य शानं स्याद्विं रक्षो

मह. त्र्यंबकं हि उग्रग्रासकत्पालको पोपहतिशांतये॥ सौवर्णग्रासकं कृत्वा जुहुयात्तस्य
१४६ सन्निधौ च अष्टसहस्राणि पाठ्येन कुष्टस्याभिषेण तु॥ वह्निहरेकृते चैतं ग्रासकाधिप
मुच्यते॥ दक्षिणा समुद्दिश्य न देया सा दत्तकर्मणि॥ कृत्विग्भिः सावित्राज्यास्मा स्वकर्मानु
सारतः निष्कृत्य समुत्तंकं वाभिषेकहेमं तु दक्षिणा वसनाद्यपि देयं स्याद्दक्षिणात्वेन चान्वि
तः॥ अथ दैवोपनवाविष्टो जुहुयात्तस्य शांतये॥ सर्पिषाष्टसहस्राणि नरोपयुक्तस
पद्वाः॥ सर्वपापहरं देवं सर्वान्तरात्मरूपिणं॥ सर्वासुधधनं ध्यामे सर्वलोकमहे
श्वर॥ ॥इति सहस्राणि सहस्रशा इत्यस्य प्रयोगः॥ ॥इति नमकानुवाकेषु द्रामोऽनु
वाकः॥ ॥अथ सहस्राणि सहस्रशा इत्यारभ्य चतस्रणां प्रयोगः॥ ॥अत्रक्रतुष्टयम १४६
प्येकक्रमं साधनं॥ चांद्रायणं चरित्वा हो जपेत्सचसहस्रकं॥ पुरश्चरणसिद्धिः स्यात्त्व
भुंजीत यज्ञकर्मसु॥ आभिचारिककामस्तु राजाहोमं प्रकारमेत्॥ सरेराजानैर्विप्राश्चो

र्वह्नि संख्याकृतिर्नवेत्॥ ग्राज्यक्षीराजवेणुनां वेत्रसच्चरसमिधस्त्वर्कतत्तेन
वेष्टिताः शाकस्य रक्तेणकाइह्या सा होमद्रव्यंतमापुनं॥ किंचितस्निग्धेन सत्त्वे
न पिष्टेन द्विषद्दाकृतिं॥ कृत्वा क्रमेणतां छित्वा सहस्राष्टकसंख्यया॥ जुहुयाद्दिव्यम
चार्तेर्शत्रवो नाम यान्तु सुं॥ अभिचारदिनेष्वेतैर्मंत्रैः कृत्वादिनेदिने॥ जुहुयात्र्यंबसा
हस्रीहोमद्रव्यमथोच्यते॥ दधिमध्वाज्यसंपृक्ता दूर्वा इत्यं कृते सति राज्ञः कारयि
तुस्तस्य रोपास्युर्नाभिचारिकाः दंष्ट्राकरालवदनं ज्वलज्ज्वलनमूर्धजं॥ त्रिशाणं त्रि
शिखं दीप्तं ध्यायेद्भुजंगभूषणं॥ ॥इति नमकेषु सहस्राणा इत्यारभ्य कतुष्टयस्य
प्रयोगः॥ ॥अथ यैवहेषि त्यारभ्य मितिचतस्रणां प्रयोगः॥ अस्य मे पृष्ठामितिद्वयोः
प्रयोगः॥ कृच्छ्रमेकं चरित्वा तु जपेल्लक्षं सहस्रकम्॥ पुरश्चरणमेवं स्यात्प्रयोगे पा
त्रिधीमते॥ पुत्रकामः स्वदाराणामृतौ गमनं सरे॥ स्वाम्याव ष्टसहस्राणि जुहुयाद्

म॰हा॰
१४१

व्यमंत्रतु॥ कापिलाज्यविमिश्रं तु कापिलं पय उच्यते॥ कृत्वैवमनुगामी स्यात्सुत्रोवं शक
रो भवेत्॥ महातीर्थफले प्सुः स्नेहताक्तैस्तिलजं तु लैः॥ कुलाच्चाष्टसहस्राणि गच्छेत्तीर्थ
मनालयन्॥ तीर्थे स्नात्वा गृहानेत्य स्वाग्निमाराधयेत्ततः॥ ब्राह्मणं विसृजेत्तीर्थफलमिष्टं
यथार्थतः॥ ध्यानं तु सहस्राणि सहस्र इत्यत्रोक्तं विजानीयः॥ ॥इति येपृथामित्यनयोः
प्रयोगः॥ ॥अथ यमराजावंतश्चेतस्य प्रयोगः॥ अस्य पुरश्चरणादिकं येपृथामित्यत्रो
क्तमंतु संधेयं॥ इति नमकेष्ठुमराजावंतश्चेतस्य प्रयोगः॥ अथ नमोस्तु रुद्रेभ्य इत्यास
मार्श्नेयो याजुषो मंत्रस्य प्रयोगः॥ ॥गृहीत्वा स्वयं नोदीक्षादिवसेष्वेकविंशतौ॥ अथ
मे पंचके दुग्धं द्वितीये मूत्रमेव च जं॥ अथोपवासः पश्चाच्च पूर्ववत्पंचकं स्मृतं॥ एवं कृ
त्वा ततः पश्चाद्विधिवच्छ्रीसरोजपेत्॥ तावंति दिवसान्येव ततः पंचदिनानि तु॥ गजरप्र
जले स्थित्वा जपित्वा ह्येकवासरं॥ अघमर्षणकं प्रोक्तं विधिना संततो जपेत्॥ दद्या

त्सुवर्णनिष्कानि दक्षिणाचार्यस्य दक्षिणां॥ सुमर्षणं कापिलं कुर्वीत द्व्याध्यावेतु तन्मना॥
एवं कृते भवेत्सिद्धिः पुरश्चरणकर्मणः॥ अन्नकामः स्वकीयान्नौ नित्यं वजुहुयात् हुतं॥
संख्यातमष्टसहस्राणि भवेदष्टौ स्त्रातानि वा॥ यावज्जीवं भवेत्तेधान्यवकुधानेन कर्मणा॥
अथापरः प्रयोगोत्र दद्गेस्या यो जुतिर्भवेत्॥ द्रव्यं तु कापिलं संख्यातमष्टसहस्रकं॥ अथ
र्वशिरसि प्रोक्तविधानेनार्चनं भवेत्॥ ततउत्पद्यते कुमारकः गौरकागौरकमृद्धजा॥
रक्तनेत्राततया सर्वं साधयेस्यात्म संमते॥ कुर्मणा स्वसमारं भञ्जजारुधिरपूरितान्॥
चतुरः कलशांस्तत्र स्थापयित्वा तिसंयुतः॥ तर्पयेदन्ययात्मानं नाचाय ये वैश्वसंज्ञायः॥
भवेद्यस्य कुलाशान्न कामना सौम्युताकृतीः॥ जुहुयात्सर्पिषा वह्नौ कल्याणानततो
भवेत्॥ जातिस्मरणकामस्तु जुहुयान्मधुताकृती॥ पयसा कापिलेनैव कृमाक्राति
स्मरोभवेत्॥ ध्यानप्रकारस्तु सहस्राणि सहस्रदा इत्यत्रोक्तो विज्ञेयः॥ ॥इति नम

नमके पुनमोरुद्रेभ्यइत्यस्य प्रयोगः॥ ॥इति नमकप्रयोगएकादशोऽनुवाकः॥ ॥अथ पू
र्वोक्तेषु प्रयोगेषु दक्षिणामाह मन्त्रानिरूपणे॥ दक्षिणास्युत्तमा मध्या चाधमेति त्रिधा म
ता॥ तत्र सौवर्णनिष्काणां दशसाहस्रिकोत्तमा॥ तदर्धं मध्यमा प्रोक्ता रतामात्रिसहस्रि
का॥ उत्तमा त्रिशती वा स्याद्विशती मध्यमा मता॥ शतमात्राधमा ज्ञेया प्रकारः कीर्त्यते
ऽपरः॥ उत्तमा तु चतुःषष्टिस्तदर्धं मध्यमा स्मृता॥ चतुर्विंशतिरन्या स्याद्यान्यो विधिरुच्य
ते॥ सहस्रदक्षिणा देया दशप्ररूपकर्षके॥ शतानि पंच देयानि रूत्विक्रूपंच ककर्षके
देयं शतं तत्रममिति स्थितिः॥ सर्वत्र द्विगुणं दद्यादाचार्याय तु दक्षिणां॥ बहुपुरुषनिष्पा
द्य उत्तम प्रति पूरुषं॥ अथैककर्तृके कर्तुरेकस्यैवोत्तमा मता॥ राज्ञां तत्र दशानां च द
क्षिणा कथितोत्तमा॥ अन्येषां मध्यमादीनि दक्षिणादाननिर्णयः॥ अनुक्तदक्षिणाकेषु प्र
योगेष्विममीरिताः॥ वित्ते सति यो मोहात्तन्न कुर्याद्विधिविस्तरं॥ नैव तत्फलमाप्नोति १४८

तिमनोत्क्रांतमानसः॥ ॥इति दक्षिणोयुक्ता॥ ॥अत्र तन्त्रान्तरोक्तिः प्रत्यवायमजिह्
र्षया॥ स्तोमि स्तंबेरमाधीशचर्मनिर्मितवाससं डिंजमजयमहाभैरवमहातीम
न्दूतनन्दितमल्लकुंडलिकुंडलालंकृतनातिघनघनविलसिततडिदुपमितचलदु
रुतरकरवालनिखिलनिगमोपमीयमानसुरवरनिकरपरिचयविरचितचतुरच
रणाम्बुजारकरकमलकलितकपालसरसिजासनविस्फारितसमस्तव्यस्तसमस्त
जगद्विस्तारसंहारसंचारसन्नधनिर्गुणनिरवधिकपरिमाणानीहारदयरीचारमरी
चिविरंचिव्यापारपात्रीजनजनितजपजरदाज्ञिरामहरदुरितहर अपरदिगंगनासं
योगसरागपतंगचंग्याञ्जिगितात्तमांगचन्द्रमधनयमनेमदनमदमनमत्तमधुकर
डरेंकारसंकाशनिजभृंगसंरावकिंकिणीक्वणितजलितपादाहतिक्षिंनमहीमं
डलाधारांडजपतिप्रस्तूयमानतांडवाडंबरफूत्कारोत्कर्षध्वस्तदैत्यदानवसंघात

महा॰ १४८ निरंतरांतरितरंगतोत्तः करणमनवरतधाराधरध्वानगंभीरघर्घरगर्जज्जय
फूत्कारसंनिभन्नणकरगुहाराजी विराजमानधरधराधीशकन्यकांतिसंक्रांतनि
जकलेवरैकदेशाखिलजगदधीश महेशान मस्तेनमस्तेनमस्ते॥ ॥आरौ कर्म
वृक्षाङ्कुरचरखिलत्रैलोक्यमूलांकुरः॥ पश्चात्संवितोत्तरंगविनवओशीसमुन्मेष
क॥ अंतेलोचनमुद्रणाविघटनानंगिप्रगल्भमहेशानेलोचनमाविरस्तुपुरतः संसा
रसंमोहनं॥१॥ आधारंचतुराननस्यकरकासंवद्धपाथः स्मरांधोमंगिरिकन्यका
कुचतटाभोगस्यलाग्यादृते॥ आशापालकमाजपालमखिलब्रह्मांडभांडस्थितेराश्रा १४८
पात्रविमो—नामरूपाधास्यंतर्मनस्तन्महः॥२॥ इतिनमकमंत्राणांप्रयोगविधिः॥ ॥स
मांससकलंश्रीरुद्रविधानं॥ ॥इतिश्री॥ ॥महार्णवाख्येमहतिप्रबंधेमांधारनाम्नोम
हनात्मजस्यसलकमंरलोघनिधिन्निषष्टिस्तुगस्तरंगोयममगादगाधः॥ ॥अथषोडशर्च

पुरुषसूक्तस्यविधिः ऋकविधाने॥ वक्ष्येपुरुषसूक्तस्यविधानंत्वर्चनंप्रति॥ अग्निका
र्यजपविधिं स्तोत्रंचैवतदात्मकं॥ कुर्यात्पूर्योक्तविधिना आङ्गुरवः स्तुधमानः॥ प्र
थमांविन्यसेद्वामेद्वितीयांदक्षिणेकरे॥ तृतीयांवामपादेतुचतुर्थीदक्षिणेतथा॥ पं
चमींवामजानौतुषष्ठींवैदक्षिणेतथा॥ सप्तमींवामकट्यांतुअष्टमींदक्षिणेतथा नव
मींनाभिमध्येतुदशमींहृदयेतथा॥ एकादशींकंठदेशेद्वादशींवामबाहुके॥ त्रयोद
शींदक्षिणेच आस्यदेशेचतुर्दशीं॥ अक्ष्णोः पंचदशींचैवषोडशींमूर्ध्निविन्यसेत्॥ रा
वन्यासविधिंकृत्वापश्चाद्धोमंसमाचरेत्॥ होमंसमारभेदिद्भपलक्षणंतस्याक्रपेपू
जामाहोमेचायमेवन्यासप्रकारः॥ एवंन्यासविधिंकृत्वापंचांगानिसमाचरेत्॥ ब्राह्मणो
स्येत्यादिकान्निर्दृष्टिः॥ पंचांगकल्पना॥ ब्राह्मणोस्यमुखमासीदित्याद्याः पंचऋचः॥ पं
चांगन्यसेत्क्रमात्॥ ताभ्यामप्युजायमनसारवापावकममुक्ता॥ हृदयंशिरःशिखाकवच

मस्त्रौं चेति पंचांगानि न्यस्य ततो ऽस्य सुखमित्यृचं पठित्वा हृदयाय नमः इति हृदये॥ चंद्रमान
स इति पठित्वा शिरसे स्वाहेति शिरसि॥ नाभ्या आसीदिति पठित्वा शिखायै वषडिति शि
खायां॥ सप्तास्यासन्निति पठित्वा कवचाय हुमिति कवचं॥ यज्ञेन यज्ञमिति पठित्वा अस्त्रा
य फडित्यस्त्रं॥ एतन्न्यासद्वयं संकल्पानंतरं कर्त्तव्यं तद्यथा॥ अमुकदेवो ऽमुकका
ले ऽमुककामनया पुरुषसूक्तस्य जपं सूक्तेन होमं विस्तारेण वा करिष्य इति सं
कल्प्य पूर्वोक्तं न्यासद्वयं विधाय ऋषिदेवतछंदांस्यपि विदित्वा जपादिकर्म समारभेत
॥ तत्र च यदा जपो होमो क्रियते तदापि परमेश्वरं समाराध्य जपो द्वितीयमासनं दद्या
त्पाद्यं चैव तृतीयया॥ चतुर्थ्यार्घ्यं प्रदातव्यं पंचम्याचमनं तथा॥ षष्ठ्या स्नानं प्रकुर्वीत स १५०
प्तम्या वस्त्रमेव च॥ यज्ञोपवीतमष्टम्या नवम्या चंदनं तथा॥ दशम्यां गंधदानं स्यादेका
दश्या च माल्यकं॥ द्वादश्या धूपदानं स्यात्त्रयोदश्या च दीपकं॥ चतुर्दश्या निवेद्यं तु पंच

दश्या नमस्क्रिया॥ उद्वासनं तु षोडश्या उपचारास्तु षोडश॥ स्नाने वस्त्रे च नैवेद्ये दद्याच
मनीयकं॥ दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव च॥ अर्चितं तेन वै सर्वं त्रैलोक्यं सच
राचरं॥ दक्षिणां तु यथाशक्त्या षोडशेन प्रदापयेत्॥ पूजादि समुत्पार्थं दक्षिणां दीय
ते तां षोडशेन यज्ञेन यज्ञमयजंत इत्यनेन मंत्रेण दद्यादित्यर्थः॥ ततश्च दक्षिणांकृत्वा
जपं कुर्यात्समाहितः॥ यथाशक्ति जपित्वा च सूक्तं चास्मै निवेदयेत्॥ देवस्य दक्षिणे पा
र्श्वे कुंडं स्थंडिलमेव वा॥ कारयेत्प्रथमर्चा तु प्रोक्षणं तु द्वितीयया॥ तृतीयया ऽग्निमर्द
द्याच्चतुर्थ्या तु समिंधनं॥ पंचम्याताज्यसंस्कारं ब्रह्मप्रणं तथा॥ षष्ठ्यानलस्य मध्ये
तु कल्पयेत्पद्ममासनं॥ चिंतयेत्तत्र देवेशं कालानलसमप्रभं॥ विस्तृतास्यं वाहस्ती
र्घरक्तास्यं रक्तलोचनं॥ वाहोरुहस्तः एवं देवं ध्यात्वा सप्तम्याष्टम्या पंचभिर्दशभिः क्रमे
ण गंधादि नैवेद्यांतं॥ पंचोपचारपूजां देवस्यानुत्तमां कुर्यादित्याह॥ ततो गंधं च पुष्पं

महा॰
१५१

चधूपंदीपंनिवेदयेत्॥अनुज्ञाप्यततःकुर्यान्नमस्कारंयथाक्रमं॥समिधःसप्तचैवपूर्वं
जुहुयादभिघारिताः॥ततोघृतेनजुहुयाच्चरुणाचततःपुनः॥एवंकृत्वाततस्तस्यसमीपे
स्तोत्रमुच्चरेत्॥जितंतेपुंडरीकाक्षनमस्ते॥ॐनमोभगवतेवासुदेवायप्रबुद्धज्ञानस्वभा
विनेदेवानांदानवानांचसामान्यमधिदैवतं॥सर्वदाचरणद्वंद्वंव्रजामिशरणंतव॥ए
कस्त्वमसिलोकस्यस्रष्टासंहारकस्तथा॥अध्यक्षश्चानुमंताचगुणमायासमावृतः॥
संसारसागरंघोरमनंतक्लेशभाजनं॥त्वामेवशरणंप्राप्यनिस्तरंतिमनीषिणः॥
नतेरूपंनचाकारोनायुधानिनचास्पदं॥तथापिपुरुषाकारोभक्तानांत्वंप्रकाशसे १५१
नैवकिंचित्परोक्षंतेप्रत्यक्षोसिनकस्यचित्॥नैवकिंचिदसिद्धंतेनचसिद्धोसिकस्य
चित्॥कार्याणांकारणंपूर्वंवचसांवाच्यमुत्तमं॥योगिनांपरमांसिद्धिंवदंतिपरमंवि
दुः॥अहंभीतोस्मिदेवेशसंसारेस्मिन्भयावहे॥पाहिमांपुंडरीकाक्षनजानेशरणंप

रं॥कालेष्वपिचसर्वेषुदिक्षुसर्वासुचाच्युत॥शरीरेपिगतौचापिवर्ततेमहद्भयं॥
त्वत्पादकमलादन्यन्नमेजन्मांतरेष्वपि॥निमित्तंकुशलस्यास्तियेनगच्छामिसद्गतिं
॥विज्ञानंयदिदंप्राप्तंयदिदंज्ञानमार्जितं॥जन्मांतरेपिमेदेवमाभूदस्यपरिक्षयः॥
दुर्गतावपिजातायांत्वंगतिस्त्वंमतिर्मम॥यदिनाथंनविंदेयंतावतास्मिकृतीसदा॥अ
कामकलुषंचित्तंममतेपादयोःस्थितं॥कामयेवैष्णवत्वंतुसर्वजन्मसुकेवलं॥इत्येवं
मनसास्तुत्वास्तुत्वादेवंदिनेदिने॥किंकरोस्मीतिचात्मानंदेवायैवनिवेदयेत्॥ ॥जितं
तेपुंडरीकाक्षेत्यारभ्यैतावत्पर्यंतंस्तोत्रं॥अथप्रकृतविशेषादितिकर्तव्यताविशेषःप्र
त्रूंसाचपुरुषस्यहरेःस्तुतंस्वर्ग्यंधन्यंयशस्करं॥आत्मज्ञानमिदंपुण्यंयोगज्ञानमि
दंपरं॥फलाहारोजपेन्नित्यंपवित्रोत्मानमात्मनि।फलानिभुक्त्वोपवसेन्मासमद्भिश्च
वर्त्तयेत्॥अरण्येनिवसेन्नित्यंसंजपन्निमम्मर्षिर्मुनिः॥कृच्छ्रत्रिषवणंकालेस्नायादाप्नु

महा॰
१५२

समाहितः॥ ऋषिर्मंत्रः॥ इममर्षिं पुरुषसूक्तात्मकं ऋग्भिस्त्रिष्टुबन्त्यमिति पुरुषसूक्तांत
र्गताभिः समस्ताभिर्ऋग्भिः॥ स्नानकाले तु ताभिर्ऋग्भिर्मार्जनमघमर्षणं च पयसा प्रोक्षि
कुर्यादित्यर्थः॥ आदित्यमुपतिष्ठेत सूक्तेनानेन नित्यशः॥ आज्याहुतीरनेनैव कु
त्वैवं चिंतयेदृषिं॥ अत्र ऋषिः सूक्तद्रष्टा नारायण एव तं चिंतयेत्॥ एवं मासं फला
हारं मासमुदकाहारं च कृत्वा त्रीणि वर्षाणि फलाहारः॥ सन् पौरुषं सूक्तं जपेत्॥ त्रा
कम्मे द्वादशवर्षाणि एवं कृते साक्षाद्देवो दृश्यत इत्याह॥ ऊर्ध्वं मासात्फलाहारस्त्रि
त्रिवर्षं जपेदिदं॥ तत्र कृत्स्नमनामुक्तो द्वादशवर्षाण्यपतन्यचाक॥ साक्षात्पश्यति तं
देवं नारायणमनामयं॥ ज्ञानगम्यं परं सूक्ष्मं व्याप्य सर्वमवस्थितं॥ मासमात्रेण दुः
खेन तस्य रंजगतो व्ययं॥ अल्पेनासाध्यमानोपि जगत्किं न परिहापयेत्॥ तत्कानुकंपी
भगवान्जायते पुरुषोत्तमः॥ येन येन च कामेन जपेत प्रयतः सदा॥ स सकामः स १५२

मृध्यस्याच्छ्रद्धानस्य कुर्वतः॥ होमं वाप्यथवा जप्यमुपहारमथो चरुं॥ कुर्वीत येन
कामेन तत्सिद्धिमुपधारयेत्॥ ज्ञातिश्रैष्ठ्यं महद्वित्तं यशो लोकपरां गतिं॥ पापेभ्यश्च वि
मोक्षं च नवे स्वर्वं न संशयः॥ अथाभिधीयते कर्म पुत्रकामस्य वै स्तवं॥ शुक्ल
पक्षेषु चैत्रादिषु नक्षत्रेषु गोचरे॥ द्वादश्यां पुत्रकामस्तु चरुं कुर्वीत वैष्णवं॥ पयोरु
पवासः स्यादेकादश्यां सुराजये॥ ऋग्भिः षोडशभिः सम्यगर्चयित्वा जनार्दनं॥ चरुं
पुरुषसूक्तेन श्रपयेत्पुत्रकाम्यया॥ प्राश्नुयाद्वै स्मवं पुत्रमचिरात्संततिस्त मचरुं पु
रुषसूक्तेनेति॥ स्वगृह्योक्तविधिना पायसचरुं श्रपयन् पुरुषसूक्तं पठेत्॥ एवं च
रुं श्रपयित्वा पश्चात्पुरुषसूक्तेन श्रपयन्पुरुषसूक्तं पठन् चरुं श्रपयित्वा पश्चात्पु
रुषसूक्तेन चरुं जुहुयात्॥ सूक्तेनेति॥ वचनात्सकलमपि सूक्तमविच्छिन्नं होमसा
धनं न तु प्रत्येकमृचः॥ होमे संख्या च सहस्रं॥ एतद्दशगुणितो जपः॥ अथ मर्षः॥ द्व

कृत्स्नैकादश्यामुपक्रम्यामुत्तंजपित्र्यमृतैकादश्यां दंपतीउपोष्य द्वादश्यां चरुं श्रप
यित्वा सह स्नात्कृतीर्जुहुयादिति॥ अथापरः प्रकारोयमेकादश्यामन्तोजन्नं दंपतोपु
रुषसूक्तं नित्यकर्माविरोधिनि॥ कालेजपेदिदंसूक्तमेकादश्यां निरंतरं॥ द्वादश्यां
प्रयतोन्नत्वापायसानिर्वपेच्चरुं॥ द्वादशाद्वादशीष्वेवं पायसान्निर्वपेच्चरुं॥ एवमिति॥ ए
कादश्यामुपवासादिकं कृत्वेत्यर्थः॥ कृत्वाज्यविधिवच्चात्र कृष्णिः षोडशाग्निर्बुधः॥ कृ
तांजलिपुटोन्नत्वासूक्तं सान्निप्रयोजयेत्॥ साग्निरिति॥ षोडशाग्निकृष्णिरित्यर्थः॥
समिधोभ्यस्य दत्त्वस्य कृत्वाज्यं जुहुयात्पुनः॥ उपस्थानं कृतांजलिस्य ध्यायेच्चमधुसूद
नं॥ उपस्थानं कृतांजलिस्येति॥ कृत्वेति वाक्यशेषः॥ अस्युपस्थानं चाग्नेयैर्मंत्रैः॥ हवि
र्होमंततः कुर्यात्स्वस्त्ययनं तु ततः शुचिः॥ हविःशेषं नमस्कृत्वा नारीनारायणं पतिं॥
नत्वापित्वा हविःशेषं जग्ध्वा संविशेतत्क्षणं॥ हविःशेषं नत्वापिबेत्सनेनैव कृतावशिष्ट

प्रतिपत्तिकर्मणि सिद्धेल्पघात्यनेनैव तद्योतयति॥ द्वादश्यामाहारांतरपरित्यागे
न पत्नी हविःशेषमेव लघु यथा तथा भुंक्त इति॥ संविशेतत्क्षणमिति॥ तत्क्षणं वामस्था
पिनीत्यादित्यर्थः॥ ततः कृत्वात्विदं कर्म कर्तव्यं द्विजतर्पणं॥ दिवा योषा स्त्री निवर्तेत
यावदृत्तं न विरहति॥ यथा ज्ञायेम मासहे तत्कर्म कृतं ततामुक्ता सति संतवे स्वांचा यांनग
केत् किं मंतकाले यावरेषा गर्भो न विरहति॥ अनेककार्याभिः सहकर्तृत्वेन दोषोन्यम
र्यासंगमेपि॥ यद्वात्वस्मिन् कर्मणि पत्नी तु प्रतिष्ठा नार्या कृतुमती स्यात्॥ तदापि कर्मणि
तु प्रविष्टा यावदृत्तं न विरहति तावद्दत्तानोपेयात् संभवतः शुक्रस्यान्यत्र गर्भाधानाहं
मत्वात्॥ ॥ मंत्रसंतनस्य वीर्यस्यान्यत्र निषेकेसह्यधिकारिणां गर्भोत्तु दयाच्च॥ ए
वं च दशहेतुनिमित्तत्वाद्दस्य स्त्रीगमननिषेधस्य॥ कृतौ भार्यामुपेयादिति नियमाति
क्रमदोषोस्येव किंच॥ स्मृतिपुराणादिषु स्मरणेः॥ प्रावस्यादस्त्वेव नियमातिक्रमदो

मह्रा.
१५४

षः॥ तथापिवर्णिनां द्विवधोयत्रतत्रसांस्नतेंवदेदित्यनेनन्यायेनसव्यन्यायपञ्चि
ल्लीत्त्ववतिकृतः॥ पुत्रार्थमेवान्यजातौगमननिषेधात्॥ त्यागमहत्वामतावितित्यागा
हत्वामताहृतावितित्यागहत्याप्रायश्चित्तस्यनिमित्तीश्रपितुर्तियमातिक्रम
मात्रजन्मदुरितयोगात्स्वल्पप्रायश्चित्तनिमित्तीश्रतः॥ अस्त्वेकमेकंप्राजापत्यं
कल्पयेत्॥ अत्राक्तस्त्रिरात्रद्विरात्रादि॥ प्रकृतमनुसरामः॥ ॥ अपुत्रामतपुत्रा
त्रयाचकन्यांप्रसूयते॥ त्रिंप्रंचजनयेत्पुत्रमष्टमंगोययाब्रवीत्॥ इतिकृष्विधा
नप्रोक्तपुरुषस्यविधिः॥ ॥ अथार्चादिष्वोडशार्चस्यपुरुषस्यनारायणऋषिःपुरु
षोदेवः॥ अनुष्टुप्छंदः॥ अंत्यात्रिष्टुप्जपेहोमेऽभिषेकेवाविनियोगः॥ ॥ अथसू १५४
क्तं॥ ॥ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्॥ सभूमिंविश्वतोवृत्वात्यतिष्ठ
द्दशांगुलं॥ पुरुषएवेदंसर्वंयद्भूतंयच्चभाव्यं॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति

॥१॥ एतावानस्यमहिमातोज्यायांश्चपूरुषः॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतं
दिवि॥२॥ त्रिपादूर्ध्वउदैत्पुरुषः॥ पादोस्येहाभवत्पुनः॥ ततोविष्वङ्व्यक्रामत्सा
शनानशनेअभि॥३॥ तस्माद्विराळजायतविराजोअधिपूरुषः सजातोअत्य
रिच्यतपश्चाद्भूमिमथोपुरः॥४॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत॥ वसंतो
स्यासीदाज्यंग्रीष्मइध्मःशरद्धविः॥१॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः॥
तः॥ तेनदेवाअयजंतसाध्याऋषयश्चये॥२॥ तस्माद्यज्ञात्सर्वहुतःसंभृतंपृष
दाज्यंपशूंस्तांश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये॥३॥ तस्माद्यज्ञात्सर्वहुतऋ
चःसामानिजज्ञिरे॥ छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत॥४॥ तस्मादश्वाअ
जायंतयेकेचोभयादतः॥ गावोहजज्ञिरेत॥ स्माद्यजुस्तस्मादजायत॥५॥ यत्पु
रुषंव्यदधुःकतिधाव्यकल्पयन्॥ मुखंकिमस्यकौबाहूकाऊरूपादाउच्येते॥१॥

ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोअजायत
॥२॥ चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजा
यत ॥३॥ नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्त्तत ॥ पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा
लोकं ॥२॥ अकल्पयन् ॥४॥ सप्तास्यासन्परिधयः ॥ त्रिः सप्त समिधः कृताः ॥ देवा
यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुं ॥५॥ यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथ
मान्यासन् ॥ ते ह नाकं महिमानः ॥ संचत यत्र पूर्वे साध्याः संति देवाः ॥ ॥ इत्याश्वला
यन पाठानुसारेण पुरुषसूक्तं ॥ ॥ अथ विष्णुसहस्रनामानि ॥ वैशंपायन उवाच ॥
॥ श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ॥ युधिष्ठिरः शांतनवं पुनरेवाभ्यभा
षत ॥१॥ युधिष्ठिर उवाच ॥ ॥ किमेकं दैवतं लोके किं चाप्येकं परायणं ॥ स्तुवंतः कं
कमर्चंतः प्राप्नुयुर्मानवाः शुभं ॥२॥ को धर्मः सर्वधर्माणां भवतः परमो मतः ॥ किं

जपन्मुच्यते जंतुर्जन्मसंसारबंधनात् ॥ ॥ भीष्म उवाच ॥ ॥ जगत्प्रभुं देवदेवमनं
तं पुरुषोत्तमं ॥ स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥४॥ तमेव चार्चयन्नित्यं भ
क्त्या पुरुषमव्ययं ॥ ध्यायंस्तुवन्नमस्यंश्च यजमानस्तमेव च ॥५॥ अनादिनिधनं वि
ष्णुं सर्वलोकमहेश्वरं ॥ लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥६॥ ब्रह्मण्यं स
र्वधर्मज्ञं लोकानां कीर्तिवर्धनं ॥ लोकनाथं महद्भूतं सर्वभूतभवोद्भवं ॥७॥ एष मे
सर्वधर्माणां धर्मोधिकतमो मतः ॥ यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा ॥८॥
परमं यो महत्तेजः परमं यो महत्तपः ॥ परमं यो महद्ब्रह्म परमं यः परायणं ॥९॥ पवि
त्राणां पवित्रं यो मंगलानां च मंगलं ॥ दैवतं दैवतानां च भूतानां योऽव्ययः पिता ॥१०॥
यतः सर्वाणि भूतानि भवंत्यादियुगागमे ॥ यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये
॥११॥ तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ॥ विष्णोर्नामसहस्रं मे शृणु पापभ

महा· १५६ यापहं॥१२॥यानि नामानि गौणानि विख्यातानि महात्मनः॥ऋषिभिः परिगीतानि तानि व
क्ष्यामि भूतये॥१३॥ॐ श्रीकृष्णस्य दिव्यसहस्रनाम्नामनुष्टुप् छंदः॥श्रीवेदव्यासो भगवान् ऋषि
॥श्रीकृष्णः परमात्मा देवता अमृतांशूद्भवो भानुरिति बीजं।देवकीनंदनः स्रष्टेति श
क्तिः॥उद्भवः॥क्षोभणो देव इति परमो मंत्रः॥शंखभृन्नंदकी चक्रीति कीलकं॥शार्ङ्ग
धन्वा गदाधर इत्यस्त्रं श्रीकृष्णप्रीत्यर्थे समस्तपापक्षयार्थे वा अभिलषितकामना
र्थे वा विनियोगः॥८॥ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः॥भूतकृद्भूतभृद्भा
वो भूतात्मा भूतभावनः॥१४॥पूतात्मा॥१०॥परमात्मा च मुक्तानां परमा गतिः॥अव्य
यः॥पुरुषः साक्षी॥क्षेत्रज्ञोऽक्षर एव च॥१५॥योगो योगविदां नेता प्रधानपुरुषेश्वर
॥२०॥नारसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः॥१६॥सर्वः॥शर्वः॥शिवः स्थाणुर्भू १५६
तादिर्निधिरव्ययः संभवो॥३०॥भावनो भर्ता प्रभवः प्रभुरीश्वरः॥१७॥स्वयंभूः शंभु

रादित्यः पुष्कराक्षो महास्वनः॥४०॥अनादिनिधनो धाता विधाता धातुरुत्तमः॥१८
॥अप्रमेयो॥हृषीकेशः पद्मनाभोऽमरप्रभुः॥विश्वकर्मा मनु॥५०॥स्त्वष्टा स्थवि
ष्ठः॥स्थविरो ध्रुवः॥१९॥अग्राह्यः॥शाश्वत॥कृष्णो॥लोहिताक्षः॥प्रतर्दनः॥प्रभू
तः॥६०॥स्त्रिककुब्धाम।पवित्रं मंगलं परं॥२०॥ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः
प्रजापतिः॥हिरण्यगर्भो भूगर्भो॥७०॥माधवो मधुसूदन॥२१॥ईश्वरो।विक्रमी।ध
न्वी।मेधावी।विक्रमी।धन्वी।मेधावी।विक्रमाक्रमः॥अनुत्तमो॥८०॥दुराधर्षः॥कृ
ति॥आत्मवान्॥२२॥सुरेशः॥शरणं॥शर्म विश्वरेताः॥प्रजाभवः॥अहः॥९०॥संवत्स
रो॥व्यालः॥प्रत्ययः॥सर्वदर्शनः॥२३॥अजः॥सर्वेश्वरः॥सिद्धः॥सिद्धिः॥सर्वादिर
च्युतः॥१००॥वृषाकपिरमेयात्मा॥सर्वयोगविनिसृत॥२४॥वसुर्वसुमनाः॥स
त्यः॥समितः॥समः॥अमोघः॥११०॥पुंडरीकाक्षो॥वृषकर्मा।वृषाकृतिः॥२५॥

रुद्रो॥ बहुशिरा॥ बभ्रुर्विश्वयोनिः॥ शुचिश्रवाः॥ अमृतः॥ शाश्वतः॥ स्थाणु॥ ११२०॥
र्वरारोहो॥ महातपाः॥ २६॥ सर्वगः सर्ववित्॥ भानुर्विष्वक्सेनो जनार्दनः॥ वेदो वेद
विदव्यंगो॥ १३०॥ वेदांगो वेदवित्कविः॥ २७॥ लोकाध्यक्षः॥ सुराध्यक्षो॥ धर्माध्यक्षः
कृताकृतः॥ चतुरात्मा चतुर्व्यूहः॥ चतुर्दंष्ट्र॥ १४०॥ चतुर्भुजः॥ २८॥ भ्राजिष्णु॥ भोज
नं॥ भोक्ता॥ सहिष्णुर्जगदादिजः॥ अनघो विजयो जेता॥ विश्वयोनि॥ पुनर्वसु॥ १५०॥
॥ २९॥ उपेंद्रो वामनः॥ प्रांशु॥ रमोघः॥ शुचि॥ रूर्जितः॥ अतींद्रः॥ संग्रहः॥ सर्गो ध
तात्मा॥ १६०॥ नियमो यमः॥ ३०॥ वेद्यो वैद्यः सदायोगी॥ वीरहा॥ माधवो मधुः॥ अ
तींद्रियो॥ महामायो॥ १७०॥ महोत्साहो॥ महाबलः॥ ३१॥ महाबुधिर्महावीर्यो॥ म
हाशक्तिर्महाद्युतिः॥ अनिर्देश्यवपुः॥ श्रीमानमेयात्मा॥ महाद्रिधृक्॥ ३२॥ महेष्वा
सो॥ महीभर्ता॥ श्रीनिवासः॥ सतांगतिः॥ अनिरुद्धः॥ सुरानंदो गोविदांपतिः॥ ३३

मरीचिर्दमनो॥ १८०॥ हंसः सुपर्णो॥ भुजगोत्तमः॥ हिरण्यनाभः॥ सुतपाः पद्मना
भः॥ प्रजापतिः॥ ३४॥ अमृत्युः॥ सर्वदृक्सिंहः॥ २००॥ संधाता संधिमान्॥ स्थिरः॥ अजो
॥ दुर्मर्षणः शास्ता॥ विश्रुतात्मा॥ सुरारिहा॥ ३५॥ गुरुर्गुरुतमो॥ २००॥ धाम॥ सत्यः॥ स
त्यपराक्रमः॥ निमिषोनिमिषः॥ स्रग्वी॥ वाचस्पतिरुदारधीः॥ ३६॥ अग्रणी॥ ग्रामणी॥
श्रीमा॥ २२०॥ न्यायो॥ नेता समीरणः॥ सहस्रमूर्धा॥ विश्वात्मा॥ सहस्रपात्॥ ३७॥ आव
र्त्तनो॥ निवृत्तात्मा॥ संवृतः॥ २३०॥ संप्रमर्दनः॥ सहसंवर्त्तको वह्निः॥ रनिलो॥ धर
णीधरः॥ ३८॥ सुप्रसादः॥ प्रसन्नात्मा॥ विश्वधृग्विश्वभुग्विभुः॥ २४०॥ सत्कर्त्ता॥ सत्कृ
तिः॥ साधुर्जह्नु॥ नारायणो नरः॥ ३९॥ असंख्येयो प्रमेयात्मा॥ विशिष्टः॥ शिष्टकृत्
॥ २५०॥ शुचिः॥ सिद्धार्थः सिद्धसंकल्पः॥ सिद्धिदः॥ सिद्धिसाधनः॥ ४०॥ वृषाही वृ
षभो॥ विष्णु॥ र्वृषपर्वा॥ वृषोदरः॥ २६०॥ वर्धनो॥ वर्धमानश्च॥ विविक्तः॥ श्रुतिसागर

महा॰
१५८ ॥४१॥ सुभुजो॥ दुर्धरो॥ वाग्मी॥ महेंद्रो॥ वसुदो॥ वसुः॥ २७०॥ नैकरूपो॥ बृहद्रूपः शिपिवि
ष्टः॥ प्रकाशनः॥४२॥ ओजस्तेजो द्युतिधरः॥ प्रकाशात्मा॥ प्रतापनः॥ ऋद्धः॥ स्पष्टाक्षरो
॥ मंत्र॥ २८०॥ श्चंद्रांशु॥ र्भास्करद्युतिः॥४३॥ अमृतांशूद्भवो॥ भानुः॥ शशबिंदुः॥ सुरेश्व
रः॥ औषधं जगतः॥ सेतुः॥ सत्यधर्मपराक्रमः॥४४॥ भूतभव्यभवन्नाथः॥ २९०॥ प
वनः पावनो नलः॥ कामहा॥ कामकृत्कांतः कामः॥ कामप्रदः प्रभुः॥४५॥ युगादिकृ॥
॥३००॥ द्युगावर्त्तो॥ नैकमायो॥ महाशनः॥ अदृश्यो॥ व्यक्तरूपश्च॥ सहस्रजि॥ दनंतजित
॥४६॥ इष्टो॥ विशिष्टः शिष्टेष्टः॥ ३१०॥ शिखंडी॥ नहुषो॥ वृषः क्रोधहा क्रोध॥ कृत्कर्त्ता॥
विश्वबाहु॥ महीधरः॥४७॥ अच्युतः॥ प्रथितः॥ ३२०॥ प्राणः प्राणदो॥ वासवानुजः अपांनि १५८
धिरधिष्ठानमप्रमत्तः॥ प्रतिष्ठितः॥४८॥ स्कंदः॥ स्कंदधरो॥ धुर्यो॥ ३३०॥ वरदो॥ वायु
वाहनः॥ वासुदेवो॥ बृहद्भानु॥ रादिदेवः॥ पुरंदरः॥४९॥ अशोकः॥ स्तारणः स्तारः॥

॥३४०॥ शौरि॥ र्यदुकुलेश्वरः॥ अनुकूलः॥ शतावर्त्तः॥ पद्मी पद्मनिभेक्षणः॥५०॥ प
द्मनाभो॥ रविंदाक्षः॥ पद्मगर्भः॥ शरीरभृत॥ ३५०॥ महर्द्धि॥ ऋद्धो॥ वृद्धात्मा॥ महोक्षो॥ ग
रुडध्वजः॥५१॥ अतुलः॥ शरभो भीमः॥ समयज्ञो॥ हविर्हरिः॥ ३६०॥ सर्वलक्षणल
क्षण्यो॥ लक्ष्मीवान्समितिंजयः॥५२॥ विक्षरो रोहितो मार्गो॥ हेतुर्दामोदरः॥ सहः॥ म
हीधरो॥ ३७०॥ महाभागो॥ वेगवा॥ नमिताशनः॥५३॥ उद्भवः॥ क्षोभणो॥ देवः॥ श्रीगर्भ
॥ परमेश्वरः॥ करणं कारणं॥ ३८०॥ कर्त्ता॥ विकर्त्ता गहनो गुहः॥५४॥ व्यवसायो॥ व्य
वस्थानः॥ संस्थानः॥ स्थानदो॥ ध्रुवः॥ ३९०॥ परर्द्धिः परमस्पष्टः॥ तुष्टः॥ शुभेक्षणः॥
॥५५॥ रामो विरामो॥ विरतो॥ मार्गो नेयो नयः॥ ४००॥ वीरः॥ शक्तिमतां श्रेष्ठो धर्मो धर्म
विदुत्तमः॥५६॥ वैकुंठः॥ पुरुषः प्राणः॥ प्राणदः॥ प्रणवः पृथुः॥ ४१०॥ हिरण्यगर्भः शत्रु
घ्नो॥ व्याप्तो॥ वायु॥ रधोक्षजः॥५७॥ ऋतुः॥ सुदर्शनः॥ कालः॥ परमेष्ठी परिग्रहः॥४२०

महा॰ ॥ उग्रः॥ संवत्सरो॥ दक्षो॥ विश्रामो॥ विश्वदक्षिणः॥ ५८॥ विस्तारः स्थावरः स्थाणुः॥ प्रमाणं
१५८ बीजमव्ययं॥ अर्थो॥ ४४०॥ नर्थो॥ महाकोशो॥ महाभोगो महाधनः॥ ५९॥ अनिर्विण्ण
स्थविष्टो भूर्धर्मयूपो॥ महामखः॥ नक्षत्रनेमि॥ ४४॥ नक्षत्री क्षमः॥ क्षामः॥ समीहनः॥
॥ ६०॥ यज्ञ इज्यो॥ महेज्यश्च॥ क्रतुः॥ सत्रं सतांगतिः॥ ४५०॥ सर्वदर्शी॥ विमुक्तात्मा॥ स
र्वज्ञो॥ ज्ञानमुत्तमं॥ ६१॥ सुव्रतः॥ सुमुखः॥ सूक्ष्मः॥ सुघोषः॥ सुखदः॥ सुहृत्॥ ४६०॥
मनोहरो॥ जितक्रोधो॥ वीरबाहुर्विदारणः॥ ६२॥ स्वापनः॥ स्ववशो व्यापी॥ नैकात्मा नै
ककर्मकृत्॥ वत्सरो॥ ४७०॥ वत्सलो वत्सी रत्नगर्भो धनेश्वरः॥ ६३॥ धर्मगुब्धर्मकृध
र्मी सदसत्क्षरः॥ ४८०॥ मक्षरं॥ अविज्ञाता॥ सहस्रांशुर्विधाता॥ कृतलक्षणः॥ ६४॥ १५८
गभस्तिनेमिः॥ सत्वस्थः॥ सिंहो॥ भूतमहेश्वरः॥ आदिदेवो॥ ४९०॥ महादेवो देवेशो
देवभृद्गुरुः॥ ६५॥ उत्तरो गोपतिर्गोप्ता॥ ज्ञानगम्यः॥ पुरातनः॥ शरीरभूतभृद्भोक्ता॥ ५००॥

कपींद्रो॥ भूरिदक्षिणः॥ ६६॥ सोमपोमृतपः॥ सोमः पुरुजित्पुरुषोत्तमः॥ विनयो जयः॥ स
त्यसंधो॥ ५१०॥ दाशार्हः॥ सात्वतांपतिः॥ ६७॥ जीवो॥ विनयिता॥ साक्षी॥ मुकुंदो॥ मितवि
क्रमः॥ अंभोनिधिरनंतात्मा महोदधिशयों॥ ५२०॥ तकः॥ ६८॥ अजो॥ महार्हः॥ स्वा
भाव्यो॥ जितामित्रः॥ प्रमोदनः॥ आनंदो॥ नंदनो नंदः॥ सत्यधर्मा॥ त्रिविक्रमः॥ ५३०
६९॥ महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः त्रिपदः॥ त्रिदशाध्यक्षो॥ महाशृंगः॥
कृतांतकृत्॥ ७०॥ महावराहो गोविंदः॥ सुषेणः॥ ५४०॥ कनकांगदी॥ गुह्यो॥ गभीरो॥
गहनो गुप्त॥ श्चक्रगदाधरः॥ ७१॥ वेधाः स्वांगो॥ जितः॥ कृष्णो॥ ५५०॥ दृढः॥ संकर्षणोच्यु
तः॥ वरुणो वारुणो वृक्षः पुष्कराक्षो॥ महामनाः॥ ७२॥ भगवान्भगहा नंदी॥ ५६०॥ वनमा
ली हलायुधः॥ आदित्यो॥ ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः॥ सुधन्वा॥ खंडपरशुर्दा
रुणो॥ द्रविणप्रदः॥ ५७०॥ दिवस्पृक्॥ सर्वदृग्व्यासो वाचस्पतिरयोनिजः॥ ७३॥ त्रिसा

मा॥ सामगः॥ साम। निर्वाणं। भेषजं। भिषक्॥ ५८०॥ सन्यासकृच्छमः शांतो। निष्ठा॥ शांति
:परायणः॥ ७५॥ शुभांगः शांतिदः स्रष्टा। कुमुदः॥ ५९०॥ कुवलेशयः॥ गोहितो गोपति
॥ र्गोप्ता॥ वृषभाक्षो। वृषप्रियः॥ ७६॥ अनिवर्ती। निवृत्तात्मा। संक्षेप्ता। क्षेमकृच्छिवः॥ ६००
श्रीवत्सवक्षाः॥ श्रीवासः॥ श्रीपतिः॥ श्रीमतां वरः॥ ७७॥ श्रीदः श्रीशः॥ श्रीनिवासः। श्री
निधिः॥ श्रीविभावनः॥ श्रीधरः॥ श्रीकरः॥ श्रेयः॥ श्रीमान् लोकत्रयाश्रयः॥ स्वक्षः॥ स्वंग
:॥ शतानंदो। नंदिर्ज्योतिर्गणेश्वरः विजितात्मा॥ ६२०॥ विधेयात्मा॥ सत्कीर्ति। छिन्न
संशयः॥ ७९॥ उदीर्णः॥ सर्वतश्चक्षुरनीशः शाश्वतस्थिरः॥ भूशयो। भूषणो भूति। ६३
र्विशोकः॥ शोकनाशनः॥ ८०॥ अर्चिष्मानर्चितः॥ कुंभो विशुद्धात्मा॥ विशोध 	१६०
नः॥ अनिरुद्धोऽप्रतिरथः॥ प्रद्युम्नो ६४०॥ मितविक्रमः॥ ८१॥ कालनेमिनिहा॥ वीरः॥
शूरः॥ शूरजनेश्वरः॥ त्रिलोकात्मा। त्रिलोकेशः केशवः केशिहा॥ हरिः॥ ६५०॥ ८२॥ काम

देवः॥ कामपालः॥ कामी कांतः कृतागमः॥ अनिर्देश्यवपु। र्विष्णु। र्वीरो। नंतो। धनंज
यः॥ ६६०॥ ८३॥ ब्रह्मण्यो॥ ब्रह्मकृद्ब्रह्मा। ब्रह्म ब्रह्मविवर्धनः॥ ब्रह्मवित। ब्राह्मणो ब्रह्मी
॥ ब्रह्मज्ञो ब्राह्मणप्रियः॥ ६७०॥ ८४॥ महाक्रमो॥ महाकर्मा महातेजा महोरगः॥ महा
क्रतु॥ र्महायज्वा॥ महायज्ञो। महाहवि॥ ६८०॥ ८५॥ स्तव्यः स्तवप्रियः स्तोत्रं॥ स्तुतिः।
स्तोता॥ रणप्रियः॥ पूर्णः॥ पूरयिता॥ पुण्यः पुण्यकीर्तिरनामयः॥ ८६॥ सत्कृति॥ ७००
॥ सत्कृतिः सत्ता॥ सद्भूतिः॥ सत्परायणः॥ शूरसेनो॥ यदुश्रेष्ठः॥ संनिवासः। सुया
मुनिः॥ ८८॥ भूतावासो॥ वासुदेवः॥ सर्वासुनिलयो॥ ७१०॥ नलः॥ दर्पहा। दर्पदो। दृप्तो
दुर्धरो। ऽथापराजितः॥ ८९॥ विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्ति रमूर्तिमान्॥
७२०॥ अनेकमूर्तिरव्यक्तः॥ शतमूर्तिः शताननः॥ ९०॥ एको नैकः॥ सवः॥ कः किंयत्।
॥ ७३०॥ तत्पदमनुत्तमं॥ लोकबंधु॥ र्लोकनाथो माधवो॥ भक्तवत्सलः॥ ९१॥ सुव

र्णवर्णो हेमांगो ॥ वरांग ॥ श्चंदनांगदी ॥७४॥ वीरहा विषमः ॥ शून्यो ॥ घृताशीरचलश्च
लः ॥७२॥ अमानी ॥ मानदो मान्यो लोकस्वामी ॥७५॥ त्रिलोकधृक् ॥ सुमेधा मेधजो ॥ धन्य
॥ सत्यमेधा धराधरः ॥७३॥ तेजोवृषो ॥ द्युतिधरः ॥ सर्वशस्त्रभृतां वरः ॥ प्रग्रहो ॥७६॥
निग्रहो व्यग्रनैकशृंगो ॥ गदाग्रजः ॥७४॥ चतुर्मूर्त्ति ॥ श्चतुर्बाहु ॥ श्चतुर्व्यूह ॥ श्चतु
र्गतिः चतुरात्मा ॥ चतुर्भाव ॥७७॥ श्चतुर्वेदवि ॥ देकपात् ॥७५॥ समावर्त्तोनिवृत्तात्मा
॥ दुर्जयो ॥ दुरतिक्रमः ॥ दुर्लभो ॥७७॥ दुर्गमो ॥ दुर्गो ॥ दुरावासो ॥७७॥ दुरारिहा ॥ शु
भांगो लोकसारंगः ॥ सुतंतुस्तंतुवर्धनः ॥ इंद्रकर्मा महाकर्मा ॥ कृतकर्मा कृतागमः ॥
॥७७॥ उद्भवः ॥ सुंदरः ॥ सुंदो ॥ रत्ननाभः ॥ सुंदरः ॥ सुदो ॥ रत्ननाभः ॥ सुलोचनः ॥ अर्को १६१
॥ वाजसनः ॥ शृंगी ॥ जयंतः ॥ सर्वविज्जयी ॥७८॥ सुवर्णबिंदु ॥ रक्षोभ्यः ॥ सर्ववागी
श्वरेश्वरः ॥ महाह्रदो महागर्त्तो महाभूतो महानिधिः ॥७९॥ कुमुदः ॥ कुंदरः ॥ कुंद

पर्जन्यः ॥ ८१० ॥ पवनोनिलः ॥ अमृतांशोमृतवपुः ॥ सर्वज्ञः सर्वतोमुखः ॥ १०० ॥ सु
लभः सुव्रतः सिद्धः ॥ शत्रुजि ॥ ८२० ॥ छत्रुतापनः ॥ न्यग्रोधो ॥ दुंबरो श्वत्थ ॥ श्चाणू
रांध्रनिषूदनः ॥ सहस्रार्चिः सप्तजिह्व ॥ सप्तैधाः सप्तवाहनः ॥ अमूर्त्तिः ॥ ८३० ॥
रनघोचिंत्यो भयकृद्भयनाशनः ॥ १०२ ॥ अणुर्बृह ॥ कृशः ॥ स्थूलो ॥ गुणभृन्निर्गुणो
॥ ८४० ॥ महान् ॥ अधृतः ॥ स्वधृतः ॥ स्वास्यः प्राग्वंशो ॥ वंशवर्धनः ॥ १०३ ॥ भारभृत्क
थितो योगी योगीशः ॥ ८५० ॥ सर्वकामदः ॥ आश्रमः ॥ श्रमणः ॥ क्षामः ॥ सुपर्णो
वायुवाहनः ॥ १०४ ॥ धनुर्धरो धनुर्वेदो ॥ दंडो ॥ दमयिता ॥ ८६० ॥ दमः ॥ अपराजि
तः ॥ सर्वसहो नियंता नियमो यमः ॥ १०५ ॥ सत्ववान् सात्विकः ॥ सत्यः सत्यधर्मप
रायणः ॥ ८७० ॥ अभिप्रायः प्रियार्होर्हः प्रियकृत्प्रीतिवर्धनः ॥ १०६ ॥ विहायसगति
॥ ज्योतिः ॥ सुरुचि ॥ र्हुतभुग्विभुः ॥ ८८० ॥ रविर्विरोचनः ॥ सूर्यः ॥ सविता ॥ रविलोचनः ॥

॥१०७॥ अनंतो हुतभुग्भोक्ता। सुखदो नैकजो ॥९८०॥ अग्रजः॥ अनिर्विण्णः। सदामर्षी। लो
काधिष्ठानमद्भुतः॥१०८॥ सनात्सनातनतमः। कपिलः। कपिरव्ययः॥९००॥ स्वस्तिदः स्व
स्ति। स्वस्तिभुक्स्वस्तिदक्षिणः॥१०९॥ अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः॥११०
॥ शब्दातिगः॥ शब्दसहः॥ शिशिरः॥ शर्वरीकरः॥१०१०॥ अक्रूरः पेशलो दक्षो। दक्षि
णः क्षमिणांवरः॥ विद्वत्तमो॥ ९२०॥ वीतभयः॥ पुण्यः श्रवणकीर्त्तनः॥१११॥ उत्तारणो
दुष्कृतहा॥ पुण्यो दुःस्वप्ननाशनः। वीरहा॥ रक्षणः संतो। जीवनः॥ ९३०॥ पर्यवस्थितः॥११२
॥ अनंतरूपो॥ नंतश्री जितमन्यु॥ भयापहः॥ चतुरस्रो॥ गभीरात्मा॥ विदिशो॥ व्यादि
शो दिशः॥ ९४०॥ ११३॥ अनादिर्भूर्भुवो लक्ष्मीः॥ सुवीरो॥ रुचिरांगदः॥ जननो॥ जन
जन्मादि॥ र्भीमो भीमपराक्रमः॥११४॥ आधारनिलयो॥ ९५०॥ धाता। पुष्पहासः॥ प्र
जागरः॥ ऊर्ध्वगः॥ सत्पथाचारः॥ प्राणदः प्रणवः॥ पणः॥ ११५॥ प्रमाणं॥ प्राणनिलय १६२

ः॥ ९६०॥ प्राणभृत्प्राणजीवनः॥ तत्वं तत्वविदेकात्मा॥ जन्ममृत्युजरातिगः॥११६॥ भू
र्भुवः स्वस्तरु॥ स्तारः॥ सविता॥ प्रपितामहः॥ ९७०॥ यज्ञो। यज्ञपति। र्यज्वा। यज्ञांगो
। यज्ञवाहनः॥११७॥ यज्ञभृद्यज्ञकृत्॥ यज्ञी यज्ञभुग्यज्ञसाधनः॥ ९८०॥ यज्ञांतकृ
द्यज्ञगुह्य। मन्न। मन्नादएव च॥११८॥ आत्मयोनिः॥ स्वयंजातो। वैखानः॥ सामगाय
नः॥ देवकीनंदनस्रष्टा॥ ९९०॥ क्षितीशः॥ पापनाशन॥११९॥ शंखभृत्॥ नंदकी॥ चक्री
शार्ङ्गधन्वा गदाधरः॥ रथांगपाणि॥ रक्षोभ्यः सर्वप्रहरणायुधः॥१०००॥१२०॥ ॐ नमः॥
॥ ॥ इतीदं कीर्त्तनं यस्य केशवस्य महात्मनः॥ नाम्नां सहस्रं दिव्यानामशेषेण प्रकी
र्त्तितं॥१२१॥ य इदं शृणुयान्नित्यं यश्चापि परिकीर्त्तयेत्॥ नाशुभं प्राप्नुयात्किंचित्सो
मुत्रेह च मानवः॥१२२॥ वेदांतगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत्॥ वैश्यो धन
समृद्धः स्यात् शूद्रः सुखमवाप्नुयात्॥१२३॥ धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमा

क्नुयात्॥ कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजां॥१२४॥ भक्तिमान्यः सदोत्थाय शुचि
स्तद्गतमानसः॥ सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्त्तयेत्॥१२५॥ यशः प्राप्नोति विपु
लं ज्ञातिप्राधान्यमेव च॥ अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमं॥१२६॥ न भयं क्व
चिदाप्नोति वीर्यं तेजश्च विंदति॥ भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः॥१२७॥ रोगा
र्त्तो मुच्यते रोगाद्बद्धो मुच्येत बंधनात्॥ भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः॥
१२८॥ दुर्गाण्यतितरत्याशु पुरुषः॥ पुरुषोत्तमं॥ स्तुवन्नामसहस्रेण नित्यं भक्तिसम
न्वितः॥१२९॥ वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः॥ सर्वपापविशुद्धात्मा याति ब्रह्म स
नातनं॥१३०॥ न वासुदेवभक्तानामशुभं विद्यते क्वचित्॥ जन्ममृत्युजराव्याधिभ
यं नैवोपजायते॥१३१॥ इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः॥ युज्येतात्मसुख
क्षांतिः श्रीधृतिस्मृतिकीर्त्तिभिः॥१३२॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः॥

भवंति कृतपुण्यानां भक्तानां पुरुषोत्तमे॥१३३॥ द्यौः सचंद्रार्कनक्षत्रा खं दिशो भूर्म
होदधिः॥ वासुदेवस्य वीर्येण विधृतानि महात्मना॥१३४॥ ससुरासुरगंधर्वं सयक्षो
रगराक्षसं जगद्वशे वर्त्ततेदं कृष्णस्य सचराचरं॥१३५॥ इंद्रियाणि मनो बुद्धिः सत्वं तेजो
बलं धृतिः॥ वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च॥१३६॥ सर्वागमानामाचारः प्रथ
मं परिकल्प्यते॥ आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः॥१३७॥ ऋषयः पितरो देवा
महाभूतानि धातवः॥ जंगमाजंगमं चेदं जगन्नारायणोद्भवं॥१३८॥ योगो ज्ञानं तथा सां
ख्यं विद्याः शिल्पानि कर्म च वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात्॥१३९॥ ए
को विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः॥ त्रींल्लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभु
गव्ययं॥१४०॥ इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्त्तितं॥ पठेद्य इच्छेत्पुरुषः श्रेयः प्रा
प्तुं सुखानि च॥१४१॥ विश्वेश्वरमजं देवं जगतः प्रभवाप्ययं॥ भजंति ये पुष्कराक्षं न ते

यांतिपरांगतिं॥१४२॥ ॥अर्जुनउवाच॥ ॥पद्मपत्रविशालाक्ष पद्मनाभ सुलोचन॥ भ
क्तानामनुरक्तानां त्राता भव जनार्दन॥ ॥श्रीभगवानुवाच॥ ॥यो मां नामसहस्रेण स्तो
तुमिच्छति पांडव॥ सोहमेकेन श्लोकेन स्तुत एव न संशयः॥ नमोस्त्वनंताय सहस्रमूर्त
ये सहस्रपादाक्षिशिरोरुबाहवे॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधा
रिणे॥१॥ ॥इति विष्णुसहस्रनामस्तोत्रं समाप्तं॥ ॥अथापामार्जनस्तोत्रं॥ ॥ॐश्रीदाल्
भ्यउवाच॥ ॥भगवन्प्राणिनः सर्वे विषरोगाद्युपद्रवैः। दुष्टग्रहोपघातैश्च सर्वकाल
मुपद्रुताः॥ आभिचारककृत्याभिः स्पर्शरोगैश्च दारुणैः॥ सदा संपीड्यमानास्तु तिष्ठंति
मुनिसत्तम॥२॥ केन कर्मविपाकेन विषरोगाद्युपद्रवाः॥ न भवंति नृणां तन्मे यथावद्व १६४
क्तुमर्हसि॥३॥ पुलस्त्य उवाच॥ ॥व्रतोपवासैर्यैर्विष्णुर्नान्यजन्मनि तोषितः॥ ते नरा मु
निशार्दूल ग्रहरोगादिभागिनः॥४॥ यैर्न तत्प्रवणं चित्तं सर्वदैव नरैः कृतं विषज्वरग्र

हाणां ते मनुष्या दाल्भ्य भागिनः॥५॥ आरोग्यं परमामृद्धिं मनसा यद्यदिच्छति तत्तदाप्नो
त्यसंदिग्धं परत्राप्यच्युततोषकृत्॥६॥ नाधीन्प्राप्नोति न व्याधीन्न विषग्रहबंधनं
कृत्यास्पर्शभयं वापि तोषिते मधुसूदने॥७॥ सर्वदुःखशमस्तस्य सौम्यास्तस्य सदा ग्र
हाः॥ देवानामप्यधृष्योसौ तुष्टे यस्य जनार्दन॥८॥ यः समः सर्वभूतेषु यथात्मनि तथा
परे॥ उपवासादिदानेन तोषिते मधुसूदने॥९॥ तोषिते तत्र जायंते नराः पूर्णमनोर
थाः॥ अरोगाः सुखिनो भोगान्भोक्तारो मुनिसत्तम॥१०॥ न तेषां शत्रवो नैव स्पर्श
रोगाभिचारकं॥ ग्रहरोगादिकं वापि पापकार्यं न जायते॥११॥ अव्याहतानि कृष्णस्य च
क्राद्यान्यायुधानि तं। रक्षंति सकलापद्भ्यो येन विष्णुरुपासितः॥१२॥ दाल्भ्य उवाच॥ ॥
अनाराधितगोविंदा ये नरा दुःखभागिनः॥ तेषां दुःखाभिभूतानां यत्कर्तव्यं दयालु
भिः॥१३॥ पश्यद्भिः सर्वभूतस्थं वासुदेवं महामुने॥ समदृष्टिभिरीशेशं तन्मम ब्रूह्यशेष

नः॥१४॥पुलस्त्य उवाच॥ ॥गृहीत्वा तु समूलाग्रान् कुशान् शुद्धान् स्वरोगिणः॥ मार्जयेच्च
र्वगात्राणि कुशाग्रैर्हरिकीर्तनं तिकुर्वत॥१५॥रोगग्रहविषार्त्तो कुर्वीयात रंगतिमिमां शुभां॥
विष्णुभक्तो विशेषेण शुचिस्तत्कृतमानसः॥१६॥ध्यात्वा नत्वा सदा विष्णुं नामान्यंगेषु वि
न्यसेत्॥पूर्वे नारायणः॥ पातु वारिजाक्षस्तु दक्षिणे॥१७॥प्रद्युम्नः पश्चिमायां तु॥ वासु
देवस्तथोत्तरे॥ऐशान्यां रक्षको विष्णुराग्नेय्यां तु जनार्दनः॥१८॥नैरृत्यां पद्मनाभस्तु वा
यव्यां मधुसूदनः॥ ऊर्ध्वं गोवर्धनो देवो॥ अधरायां त्रिविक्रमः॥१९॥एताभ्यो दशदिग्भ्यश्च
सर्वतः पातु केशवः॥ अंगुष्ठाग्रे तु गोविंदं तर्जन्यां तु महीधरं॥२०॥मध्यमायां हृषीके
शमनामिकायां त्रिविक्रमम्॥ कनिष्ठायां न्यसेद्विष्णुं करमध्ये तु माधवं॥२१॥शिखायां
केशवं न्यस्य मूर्ध्नि नारायणं न्यसेत्॥माधवं तु ललाटे तु गोविंदं तु भ्रुवोः स्थितम्॥२२॥च
क्षुर्मध्ये न्यसेद्विष्णुं श्रवणे मधुसूदनं॥त्रिविक्रमं कपोलयोर्वामनं कर्णमूलयोः॥२३॥

दामोदरं दंतपंक्तौ वाराहं चिबुके तथा॥जिह्वायां वासुदेवं तु कंठस्थितं गरुडध्वजं
॥२४॥हृषीकं तु त्तरोष्ठे तु पद्मनाभं तथाधरे॥वैकुंठं कंठमध्ये तु अनंतं नासिकापु
टे॥२५॥दक्षिणे तु भुजे विप्रो विन्यसेत्पुरुषोत्तमं॥वामके तु महायोगं॥राघवं हृदि वि
न्यसेत्॥२६॥पीतवाससं सर्वतनौ हरिं नाभ्यां तु विन्यसेत्॥ करे तु दक्षिणे विप्र स्तं त
संकर्षणं न्यसेत्॥२७॥वामे रिपुहरिं विद्यात् करमध्ये जनार्दनं॥पृष्ठे क्षितिधरं वि
द्यात्॥अच्युतं स्कंधमूलयोः॥२८॥वक्षस्थले माधवं तु कंठपार्श्वयोर्गा श्यमिनं॥स्व
यं तु वंमेद्र मध्ये ऊर्वोश्च वगदाधरं॥२९॥चक्रायुधं जानुमध्ये जंघयोरच्युतं तथा॥
गुल्फयोर्नारसिंहं तु॥पादपृष्ठे मिनौजसं॥३०॥अंगुल्यां श्रीधरं न्यस्य पंकजाक्षं
हि संधिषु॥रोमकूपेषु सर्वेषु शंकरं रक्षास्थिमज्जसु॥३१॥नखेषु माधवं न्यस्य न्य
से लाटे तजेच्चकतं॥मनो बुद्धिरहंकारे चैतन्य सजनार्दनं॥एवं न्यासविधिं कृत्वा सा

न्नारायणो भवेत्॥ विष्णुमायतने न्यस्य मां वा किं चिन्तयते॥२३॥ षण्मासविधिं कृत्वा मत्
कार्यं शृणु तद्द्विज॥ वैष्णवेन तु कर्त्तव्यं सर्वसिद्धिप्रदायिना॥२४॥ पूजाकाले तु देवस्य
स्नानकाले तथैव च॥ होमारंभे तु कर्त्तव्यं त्रिसंध्यासु च नित्यशः॥२५॥ अनेन सर्व
न्तेनो विष्णुलोकं स गच्छति॥ विष्णुलोकं स गच्छत्यों नमः॥ ॥ ॐ नमः परमार्थायै स्वाध्या
पामार्जनमंत्रस्य पुलस्त्य ऋषिः श्रीनृसिंहो देवता हरामुकस्य बीजं॥ अच्युतानंद
गोविंदेति शक्तिः॥ तप्तहाटककेशांते तिकीलकः॥ समस्ताभिलषितार्थे विनियोगः
॥ ॥ ॐ नमः परमार्थाय पुरुषाय महात्मने॥ अरूपब्रह्मरूपाय व्यापिने परमात्मने॥१॥
निःकल्मषाय शुद्धाय ध्यानयोगरताय च॥ नमस्कृत्वा प्रवक्ष्यामि यन्मत्सिध्यतिमे १६६
वचः॥२॥ वाराह नरसिंहाय वामनाय महात्मने॥ नमस्कृत्वा प्रवक्ष्यामि यन्मत्सिध्य
तिमे वचः॥३॥ वाराहं नरसिंहं तु॥ वामनं विष्णुमेव च॥ नमस्कृत्वा प्रवक्ष्यामि यत्त

त्सिध्यतिमे वचः॥४॥ त्रिविक्रमाय रामाय वैकुंठाय नराय च॥ नमस्कृत्वा प्रवक्ष्या
मि यत्तत्सिध्यतिमे वचः॥५॥ वाराह नरसिंहेश वामनेश त्रिविक्रम॥ हय
ग्रीवेश सर्वेश हृषीकेश हरामुकं॥६॥ अपराजितचक्राद्यैश्चतुर्भिः परमायुधैः॥
अखंडितानुभावैस्त्वं सर्वदुष्टहरो भव॥७॥ हरामुकस्य दुरितं दुःकृतं दुरुपोषितं॥ मृ
त्युबंधार्तिभयदं दुरिष्टस्य च यत्फलं॥८॥ पराभिध्यानसहितैः प्रयुक्तं चाभिचारकं
॥ गरस्पर्शमहारोगप्रयोगं जरया जर॥९॥ हरये वासुदेवाय नमः कृष्णाय खड्गिने
॥ नमः पुष्करनेत्राय केशवायादिचक्रिणे॥१०॥ नमः कमलकिंजल्कपीतनिर्मलवा
ससे महाहवरिपुस्कंधघृष्टचक्राय चक्रिणे॥११॥ दंष्ट्रोद्धृतक्षितिधृते॥ त्रयीमूर्त्ति
मते नमः॥ महायज्ञवराहाय शेषभोगोरुशायिने॥१२॥ तप्तहाटककेशांत ज्वलत्पा
वकलोचन॥ वज्राधिकनखस्पर्श दिव्यसिंह नमोस्तु ते॥१३॥ काश्यपायातिह्रस्वा

म॥ ऋग्यजुःसाममन्त्रैर्यैस्तुतंवामनरूपायक्रमतेगंनमोनमः॥१४॥ वाराहात्रोषदु
ष्टानिसर्वपापफलानिवै॥ मर्दमर्दमहादंष्ट्र मर्दमर्दचतत्फलं॥१५॥ नरसिंहकरा
लंस्यदंतप्रांतनखोज्वलं॥ नजनजनिनादेनदुष्टान्यस्यार्त्तिनाशन॥१६॥ ऋग्यजुःसा
मगर्जाभिर्वाग्भिःर्वामरूपधृक॥ प्रशामंसर्वदुःखानिनयत्वस्यजनार्दनः॥१७॥ एकाहि
कंद्याहिकंवातथात्रिदिवसज्वरं॥ चातुर्थिकंतथात्युग्रंतथैवसततज्वरं॥ दोषोत्थंस
न्निपातोत्थंतथैवागंतुकंज्वरं॥ शमंनयाशुगोविंदछिंधिछिंध्यस्यवेदनां॥ नेत्र
दुःखंदुःखंचोदरसंभवं॥ अनुच्छासमतिश्वासंपरितापसवेपथुं॥ गुदघ्राण
ग्निरोगांश्च॥ कुष्टरोगंतथाक्षयं॥ शिरोरोगान्मुखजान्रोगान्त्वग्रस्थ्यंतर्बहिःस्थि १६१
तान्॥२१॥ कामलाद्रीस्तुरोगांश्चप्रमेहांश्चातिदारुणान्॥ भगंदरातिसारांश्चमु
खरोगांश्चवल्गुलिं॥२२॥ अश्मरीमूत्रकृछ्रांश्चरोगांनन्यांश्चदारुणान्॥ येवातप्र

भवारोगायेचपित्तसमुद्भवाः॥२३॥ कफोद्भवाश्चयेरोगायेचान्येसान्निपातिकाः॥
आगंतवश्चयेरोगालूताविस्फोटकादयः॥२४॥ तेसर्वेप्रशमंयांतुवासुदेवापमा
र्जिताः॥ विलयंयांतुतेसर्वेविष्णोरुच्चारणेनतु॥२५॥ क्षयंगच्छंतुसाशेषास्तेचक्रामि
ताहरेः॥ अच्युतानंतगोविंदनामोच्चारणभीषिताः॥२६॥ नश्यंतिसकलारोगास
त्यंसत्यंवदाम्यहं॥ सत्यंसत्यंपुनःसत्यं॥ उद्धृत्यभुजमुच्यते॥२७॥ वेदशास्त्रात्पर
नास्तिनदेवःकेशवात्परः॥ स्थावरंजंगमंवापिकृत्रिमंचापियद्विषं॥२८॥ दंतोद्भ
वंनखोद्भूतमाकाशप्रभवंविषं॥ लूतादिप्रभवंयस्यच्चविषमत्यंतदुःखदं॥२९॥
शमंनयतुतत्सर्वंकीर्त्तितोस्यजनार्दनः॥ ग्रहान्प्रेतग्रहांश्चैवतथावैडाकिनीग्रहा
न्॥३०॥ वेतालांश्चपिशाचांश्चगंधर्वान्यक्षराक्षसान्॥ शकुनीपूतनाद्यांश्चतथावै
नायकग्रहाः॥३१॥ मुखमंडिकंस्तथा॥ क्रूरान्रेवतीवृद्धरेवती॥ दृधिकाख्यान्ग्र

महा.
१६८

हान्सर्वान्तथामात्रग्रहानपि ॥३२॥ बालस्य विघ्नो ग्रदितं हंतु बालग्रहानपि ॥ वृद्धानां
ये ग्रहाः केचित् ॥ ये च बालग्रहाः क्वचित् ॥३३॥ नरसिंहस्य ते दृष्ट्या दग्धा ये चापि यौवने
॥ सटाकरालवदनो नरसिंहो महारवः ॥३४॥ ग्रहानशेषान्निःशेषान्करोतु जगतो
हितः ॥ नरसिंहज्वालामालाजाज्वल्याननः ॥३५॥ ग्रहानशेषान्सर्वेशः खादत्वग्निलो
चनः ॥ ये रोगा ये महोत्पाता यद्विषं ये महाग्रहाः ॥३६॥ यानि च क्रूरभूतानि ग्रहपीडा
श्च दारुणाः ॥ शाम्यंतु ते तु ये दोषाज्वालागर्दनकादयः ॥३७॥ तानि सर्वाणि सर्वात्मा पर
मात्मा जनार्दनः ॥ किंचिद्रूपं समास्थाय वासुदेवास्यनाशय ॥३८॥ क्षिप्त्वा सुदर्शनं
चक्रं ज्वालामालातिभीषणं ॥ सर्वदुष्टप्रशमनं कुरु देववराच्युत ॥ सुदर्शन महा १६८
ज्वाल छिंधि छिंधि महारव ॥ सर्वदुष्टानि रक्षांसि क्षयं यांतु विभीषण ॥३९॥ प्राच्यां प्र
तीच्यां दिशि च दक्षिणोत्तरतस्तथा ॥ रक्षां करोतु सर्वात्मा नरसिंहः सुगर्जितैः ॥४०॥

तु व्यंतरिक्षे च तथा ॥ पार्श्वतः पृष्ठतोपि तः ॥ रक्षां करोतु भगवान्बहुरूपी जनार्दनः ॥४१
॥ यथा विष्णुर्जगत्सर्वं सदेवासुरमानुषं ॥ तेन सत्येन मम सकलं दुष्टमस्य प्रशाम्यतु
॥४२॥ परमात्मा यथा विष्णुर्वेदांतेष्वपि गीयते तेन सत्येन सकलं दुष्टमस्य प्रशाम्यतु
॥४३॥ परमात्मा यथा विष्णुर्वेदांतेष्वपि गीयते ॥ तेन सत्येन सकलं यन्मयोक्तं तथास्तु
तत् ॥४४॥ शांतिरस्तु शिवं चास्तु ॥ प्रणाशं गत्सुखं च मत् ॥ वासुदेवशरीरोत्थैः कुशैः
ः संमार्जितं मया ॥४५॥ अपामार्जितगोविंदो नरो नारायणस्तथा ॥ तथास्तु सर्वदुःखा
नां प्रशमो वचनाद्धरे ॥४६॥ शांतिं समस्तरोगास्ते ग्रहाः सर्वे विषाणि च ॥ भूतानि च
प्रयांतीशं संस्तुते मधुसूदने ॥४७॥ एतत्समस्तरोगेषु भूतग्रहभयेषु च ॥ अपामा
र्जनकं शस्तं विष्णुनामाभिमंत्रितं ॥४८॥ एते कुशा विष्णुशरीरसंभवा जनार्दनो हं
स्वयमेव चागतः ॥ हतं मया दुष्टमशेषमस्य स्वस्थो भवत्वेष यथा वचो हरेः ॥४९॥

महा०
१६७

न्नंतिरस्तु शिवं चास्तु दुष्टमस्य प्रशाम्यतु ॥ यदस्य दुरितं किंचित्क्षिप्तं तल्लवणार्णवे ॥
॥५०॥ स्वास्थ्यमस्य शिवं चास्तु हृषीकेशस्य कीर्तनात् ॥ यत्तस्माद्गतं पापं तत्रैव प्रति
गच्छतु एतद्रोगादिपीडासु जंतूनां हितमिच्छता विष्णुभक्तेन कर्त्तव्यमपामार्जनकंप
रं ॥५२॥ एतेन सर्वदुःखानि प्रशामं यांति संशयं ॥ सर्वभूतहितार्थाय कुर्यात्तस्मात्स
दैव हि ॥५३॥ इत्यपामार्जनस्तोत्रं समाप्तं ॥ ॥ अथ विष्णुहृदयस्तोत्रं ॥ अस्य स्तोत्रस्य
संकर्षण ऋषिः अनुष्टुप्त्रिष्टुप् गायत्री च यथायोगं छंदः ॥ श्रीविष्णुः परमात्मा देव
ता अभिलषितार्थे विनियोगः ॥ ॥ संकर्षण उवाच ॥ ममाग्रतः सदा विष्णुः पृष्ठत
श्चापि केशवः गोविंदो दक्षिणे पार्श्वे वामे च मधुसूदनः ॥१॥ उपरिष्टात्तु गोविंदो वाराह १६७
: पृथिवीतले ॥ अवांतरदिशो यास्ताः तासु सर्वासु माधवः ॥२॥ गच्छतस्तिष्ठतो वापि
जाग्रतः स्वपतोपि वा ॥ नरसिंहकृतागुप्तिर्वासुदेवमयोस्म्यहं ॥३॥ अव्यक्तं चैवास्य यो

निं वदंति देहं व्यक्तं दीर्घमायुर्गतिं च ॥ वह्निर्वक्त्रं चंद्रसूर्यौ च नेत्रे दिशः श्रोत्रे घ्राणउ
श्च वायुः ॥४॥ वाचं वेदा हृदयं नन्तमस्य ॥ पृथिवी पादौ तारकाः रोमकूपाः सांगोपांगास्तु वि
देवाश्च विद्यास्तु पस्य हि तथा समुद्राः ॥५॥ तदेव देवं शरणं प्रजानां यत्तात्मकं सर्वलो
कप्रतिष्ठं ॥ अजं वरेण्यं वरदं वरिष्ठं ब्रह्मणामीशं पुरुषं नमस्ते ॥६॥ अव्ययं पुरुष
पुरुषुतं मीशानं पुरुहूतं ॥ कृतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनं ॥७॥ महाभारतमाख्या
नं कुरुक्षेत्रं सरस्वतीं ॥ केशवं गां च गंगां च कीर्तयन्नावसीदति ॥८॥ ॐ भूः पुरुषाय
पुरुषरूपाय वासुदेवाय नमो नमः ॥९॥ ॐ भुवः पुरुषाय पुरुषरूपाय वासुदेवाय
नमो नमः ॥१०॥ ॐ स्वः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ॥११॥ ॐ भूर्भुवः
स्वः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ॥१२॥ ॐ वासुदेवाय पुरुषाय वासु
देवाय नमो नमः ॥१३॥ ॐ संकर्षणाय पुरुषरूपाय वासुदेवाय नमो नमः ॥१४॥ ॐ

महा.
१७०

प्रद्युम्नायपुरुषायपुरुषरूपायवासुदेवायनमोनमः॥१५॥ ॐअनिरुद्धायपुरुषायपु
रुषरूपायवासुदेवायनमोनमः॥१६॥ ॐअधोक्षजायपुरुषायपुरुषरूपायवासुदेवायनमो
नमः॥१७॥ ॐनारायणायपुरुषायपुरुषरूपायवासुदेवायनमोनमः॥१८॥ ॐमाध
वायपुरुषायपुरुषरूपायवासुदेवायनमोनमः॥२०॥ ॐगोविंदायपुरुषायपुरु
षरूपायवासुदेवायनमोनमः॥२१॥ ॐविष्णवेपुरुषायपुरुषरूपायवासुदेवाय
नमोनमः॥२२॥ ॐत्रिविक्रमायपुरुषायपुरुषरूपायवासुदेवायनमः॥२४॥ ॐवाम
नायपुरुषायपुरुषरूपायवासुदेवायनमोनमः॥२५॥ ॐश्रीधरायपुरुषायपुरुष
रूपायवासुदेवायनमोनमः॥२६॥ ॐहृषीकेशायपुरुषायपुरुषरूपायवासुदेवा १७०
यनमोनमः॥२७॥ ॐपद्मनाभायपुरुषायपुरुषरूपायवासुदेवायनमोनमः॥२९॥
ॐसत्यायपुरुषायपुरुषरूपायवासुदेवायनमोनमः॥३०॥ ॐतत्पुरुषायपुरुषायपु

रुषरूपायवासुदेवायनमोनमः॥३१॥ ॐसत्पुषायपुरुषरूपायवासुदेवायनमोन
मः॥३२॥ ॐप्रणवउविष्णुशतसहस्रनेत्रपुरुषायपुरुषरूपायवासुदेवायनमोन
मः॥ इदंविष्णुहृदयमधीते॥ ब्रह्महत्यात्पूतोभवति॥ सुरापानात्पूतोभवति॥ सुवर्णस्ते
यात्पूतोभवति॥ पतितसंभाषणात्पूतोभवति॥ अब्रह्मचारीब्रह्मचारीभवति॥ अनेन
क्रतुशतसहस्रेणेष्टंभवति॥ गायत्र्याःषष्टिशतसहस्राणिजप्तानिभवंति॥ चत्वारो
वेदाश्चा‥धीताभवंति॥ सर्वेषुवेदेषुस्नातोभवति॥ सर्वेषुतीर्थेषुस्नातोभवति॥ यदि
कस्यचिद्ब्र्याछित्रीभवति॥ अष्टौब्राह्मणान्ग्राहयित्वाविष्णुलोकमवाप्नोति॥ मासे
नमस्कृतंविष्यतिनपश्यतिमंत्रः॥ मत्रमत्रेछेत्तत्रतोपजायते॥ स्मरतिचात्मानंभग
वान्महाविष्णुरित्याह॥॥ इतिविष्णुहृदयस्तोत्रंसमाप्तं॥ ॥अथपविनामकशांतिः॥ ज्ञाता
तपीयकर्म्मविपाकपरिभाषायांपूर्वंश्लोकद्वयंप्रदर्शितं॥ तद्यथा॥ रुद्रजपोजहापु

महा० ष्यैः पूजयित्वात्र्यंबकं ॥ एकादशाजपेत्कुष्मान्दशांशं गुग्गुलेनतु कृत्वाक्षिपेच्चतं कुर्या
१७१ न्मंत्रैर्वरुणदैवतैः ॥ शांतिकेगणशांतिश्चग्रहशांतिकपूर्वकमिति ॥ तथारोगशांति
मारणविघ्नांतरमपर ॥ श्लोकः प्रदर्शितः ॥ दानैर्हस्मादिभिरपि च द्विजदेवतागोगु
र्वर्चनप्रणतिभिस्त्रजपैस्तपोभिः ॥ इत्यकृतपुण्यनिचयैरपचीयमानाः प्राकृपापजा
यदिरुजः प्रशमंप्रयांति ॥ ततः श्लोकत्रयव्याख्यानप्रसंगेनवेदपारायणादिद्याद्यो
विष्णुरुद्रसूक्तोत्रपर्यंताः प्रदर्शिताः ॥ अथशांतिकेगणशांतिश्चग्रहशांतिकपूर्वक
मित्युक्तेनविनायकशांतिर्नवग्रहशांतिश्चेत्क्रमसमुपपत्तिप्रततत्रगणपतिशांतिरभिधी
यते ॥ याज्ञवल्क्यः ॥ विनायकः कर्मविघ्नसिध्यर्थंविनियोजितः ॥ गणानामधिपत्येच १७२
रुद्रेणब्रह्मणातथा ॥ एवंविनायकस्याधिकारिकंव्यापारमभिधायतेनगृहीतस्यस्व
प्रदर्शनानिप्रत्यक्षदर्शनानिचाहतेनोपसृष्टोयस्तस्यलक्षणानिनिबोधतास्वप्ने

वगाहतेत्यर्थंजलंमुंडांश्चपश्यति काषायवाससश्चैवक्रव्यादांश्चाधिरोहति ॥
अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते ॥ व्रजन्नपितथात्मानंमन्यतेनुगतंपरैः ॥
विमनाविफलारंभः संसीदत्यनिमित्ततः ॥ तेनोपसृष्टोलभतेनराज्यंराजनंदनः ॥
कुमारीनचभर्त्तारमपत्यंगर्भमंगना ॥ आचार्यत्वंश्रोत्रियश्चनशिष्योध्ययनंतथा ॥
वणिग्लाभंनचाप्नोतिकृषिंचापिकृषीवलः ॥ एवंविनायकगृहीतस्यचिह्नान्यभि
धायविनायकोपसर्गपरिहारकंकर्माह ॥ स्नपनंतस्यकर्त्तव्यंपुण्येह्निविधिपूर्व
कं ॥ गौरसर्षपकल्केनसाज्येनोत्सादितस्यच ॥ सर्वौषधैः सर्वगंधैर्विलिप्तशिर
सस्तथा ॥ भद्रासनोपविष्टस्यस्वस्तिवाच्यद्विजातिभिः ॥ अश्वस्थानाद्गजस्थानाद्व
ल्मीकात्संगमात् ॥ मृत्तिकांरोचनांगंधान्गुग्गुलंचाप्सुनिक्षिपेत् ॥ याआहृताए
कवर्णैश्चतुर्भिः कलशैर्ह्रदात् ॥ चर्मण्यानडुहेरक्तेस्थाप्यंभद्रासनंततः ॥ सहस्रा

महा०
११२ क्षंशतधारमृषिभिःपावनंकृतं॥ तेनत्वामभिषिंचामिपावमान्यःपुनंतुतेभगं
तेवरुणोराजाभगंसूर्योबृहस्पतिः॥ भगमिंद्रश्चवायुश्चभगंसप्तऋषयोददुः॥ य
त्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्धनि॥ ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुतेसदा॥
स्नातस्यसार्षपंतैलंस्रुवेणौदुंबरेणतु॥ जुहुयान्मूर्धनिकुशान्सव्येनपरिगृह्य
तु॥ मितश्चसंमितश्चैवतथाशालकटंकटौ॥ कूष्मांडोराजपुत्रश्चेत्यंतेस्वाहास
मन्वितैः॥ नामभिर्बलिमंत्रैश्चनमस्कारसमन्वितैः॥ अंतेस्वाहासमन्वितैर्मूर्धनि
जुहुयादित्यन्वयः॥ तथाविधैर्बलिमंत्रैर्बलिंदद्यादित्यतआहतस्योपं॥ बहिर्ब
लिप्रकारमाह॥ दद्याच्चतुष्पथेशूर्पेकुशानास्तीर्यसर्वतः॥ कृताकृतांस्तंडुलां ११२
श्चपललौदनमेवच॥ मत्स्यान्पक्वांस्तथैवामांमांसमेतावदेवतु॥ पुष्पंचित्रंसुगं
धंचसुरांचत्रिविधामपि॥ मूलकंपूरिकापूपांस्तथैवोंडेरकस्रजः॥ दध्यन्नंपायसं

चैवगुडपिष्टंसमोदकं॥ एतान्सर्वानुपाहृत्यभूमौकृत्वाततःशिरः॥ विनायकस्य
जननीमुपतिष्ठेत्ततोंबिकां॥ दूर्वासर्षपपुष्पाणांदत्वार्घंपूर्णमंजलिं॥ कृताकृ
ताःसकृदवहताः॥ पललौदनंतिलपिष्टमिश्रउदनः॥ आमाआमपक्वा॥ एताव
देवतु॥ पक्वमपक्वंचमांसमित्यर्थः॥ पुष्पंचित्रंरक्तपीतादि॥ सुगं॥ धंसुगंधिद्रव्यं
॥ त्रिविधासुरा॥ गौडीपैष्टीमाध्वीच॥ मूलककंदाकारोबहुविशिष्टोमूलकंच॥
उंडेरकस्रजः॥ उंडेरकस्रजः॥ उंडेरकापिष्टविकाराःनानाविधाः॥ तेप्रोताःस्रज
उच्यंते॥ गुडपिष्टं॥ गुडमिश्रंशाल्यादिपिष्टं॥ अन्नमन्नसिद्धं॥ उपस्थानमंत्रमा
ह॥ रूपंदेहियशोदेहिभगंभगवतिदेहिमे॥ पुत्रान्देहिधनंदेहिसर्वान्कामांश्च
देहिमे॥ ततःशुक्लांबरधरःशुक्लांबरधरःशुक्लमाल्यानुलेपनः॥ ब्राह्मणान्भो
जयेद्दद्याद्वस्त्रयुग्मंगुरोरपिसमर्पयेद्गुरोराचार्यायवस्त्रयुग्ममात्रमपिद

म.हा.
१२३

क्षिणां दद्यात्॥ समर्थश्चेत्तत्सामर्थ्यानुसारेण वित्तशाठ्यं न कारयेत्॥ ॥ इति स्मरणा
त्॥ ॥इति याज्ञवल्क्यप्रोक्ता विनायकशांतिः॥ ॥ अथास्यैव प्रयोगः॥ अथोच्यंते तत्र सं
भाराः रोचनां पंचमृत्तिकाः॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्॥ चंद
नागुरुकस्तूरिकर्पूराद्याः सुगंधयः॥ गौरसर्षपकल्कश्च गव्याज्येन विमिश्रितः॥ गु
ग्गुलश्चापि संयुक्तः सर्वौषधिगणस्तथा॥ मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयं॥
सठी चंपकमुस्ता च सर्वौषधिगणः स्मृतः॥ चत्वारः कलशाः एकवर्णा अस्फुटिता व्रणा
॥ ह्रदोदकं सुतापि स्यात्त्रिस्रगासंगमोदकं॥ सग्रीवपुच्छमारक्तं चर्म चानडुहं तथा॥
श्रीपर्णीकाश्मरीवं च सहकारस्य पल्लवाः॥ अश्वत्थपल्लवाश्चास्य॥ सुगंधि सुमनांस्य १२३
पि॥ स्रजः शोभनगंधाश्च विचित्रकुसुमानि च॥ कलशावेष्टनार्थं तु नववस्त्रचतुष्टयं॥
पीठस्याच्छादनार्थं तु शुक्लवस्त्रमथापरं॥ गणेशांबिकयोरर्थं वस्त्रयुग्मं सुशोभनं॥ आ

चार्यदक्षिणार्थं तु महार्हं वसनद्वयं॥ पंचवर्णानि पिष्टानि स्वस्तिकस्य विनिर्मितैः नै
जं च सार्षपं तद्वदुंबरविनिर्मितं॥ स्रुवः कुशाश्च रुस्यालीस्थालीपाकार्थं तंडुला
ः किंचिद्दंतिक्रियाक्तास्तंडुलाश्चापरे तथा॥ तिलपिष्टेन संयुक्तं उदनः सर्पमेव च॥
पक्वाश्च मत्स्या आपक्वा मांसं पक्वमपक्वकं॥ गौडी पैष्टी च माध्वी चेत्येवं वै त्रिविधा सुरा
॥ मत्स्यादिकं सुरां ते च निषिद्धं यस्य जातितः मया सं तु विशेषेण द्विजेभ्यस्ताभ्यां सुरा स स॥
यजमानस्तु शूद्रश्चेद्द्विजेस्तान्नियोजयेत्॥ मत्स्यमूलकं वा स्यादुपन्नवित्तस्तदाकृति
॥ अपूपाः पूरिकाश्चैव तथैवोंडेरकस्रजः॥ वल्लुलेश्चतुरस्रैश्च दीर्घैः पिष्टविकारकैः
॥ निर्मिताः स्रजउच्यंते उंडेरकसमाख्यया॥ दध्यन्नपायसं चैव पिष्टं च गुडमिश्रितं॥ ल
डुकाश्च तथा दूर्वाः सर्षपा गौरसंज्ञिताः गणेशप्रतिमा चैव गौर्याः प्रतिमा तथा॥ एवं सं
भृतसंभारः शांतिं कुर्याच्छुभे दिने॥ ॥ विनायकशांतिं कर्तुकामः स्वस्य चंद्रताराबलोपे

महा· तोमुत्रेदिने॥ कृतवास्याभ्यंतरशौचो नित्यकर्मानंतरं अमुकप्रयोजनार्थमेतत्कर्म
१७४ करिष्ये इति संकल्प्य॥ श्रुताध्ययनसंपन्नं ब्राह्मणमस्मिन्कर्मणि त्वमाचार्यकं कुर्विति
गंधपुष्पाक्षतादिभिर्वृणीत॥ तथान्यानृत्विजो वृणीत॥ अथर्त्विग्भिः सहित
आचार्यः कर्मकरोति। गोमयेनोपलिप्ते स्वयंकृते देशे पंचवर्णैः पिष्टैर्ग्रहासनार्थ
मेकं स्वस्तिकं कारयेत्॥ तस्य स्वस्तिकस्य पूर्वादिदिक्षु चतुरः स्वस्तिकान्कारयेत्॥ क
लशस्थापनार्थं तत्र मध्यस्वस्तिकोपरि रक्तमानडुहं चर्मोत्तरलोम प्राचीनग्रीवं सं
स्थाप्य तस्योपरि श्रीपर्णीकाष्ठनिर्मितं पीठं संस्थाप्य तत्पीठं श्वेतवस्त्रेण प्रच्छादयेत्॥
ततश्चतुर्दिक्षु स्वस्तिकेषु अव्रणानस्फुटितानकालकानेकवर्णांश्चतुरश्चंदनचर्चितान् ७८
स्रग्दामवेष्टितकंठानाहतवस्त्राच्छादितान्कलशान्धान्यराशौ निधाय हृदोदकेन
नदीसंगमोदकेन वा कलशानापूरयित्वा ततउद्धृतासि वराहेण कृष्णेन शतबाहुना॥

मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतमित्यनेन मंत्रेण कलशेषु पंचमृदः संस्थाप्य
॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रि
यमिति मंत्रेण चंदनागुरुकर्पूरादीन्गंधान्गोरोचनां गुग्गुलं च विनिक्षिप्य सहका
रादिप्रशस्तपल्लवैस्त्वन्यतमानि पल्लवानि पल्लवानि कलशानां मुखे पुष्पपात्रेण च
विनिक्षिपेत्॥ ततश्चत्वारो ऋत्विजः पूर्वादिदिगवस्थितकलशेषु त्वन्नो अग्ने वरुण
स्य हेडो अव यासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्य
स्मदित्यनेन मंत्रेण वा स्वस्वशाखापरिपठितवरुणमावाह्य षोडशोपचारपूजां पंचो
पचारपूजां वा निर्वर्त्य पूर्वोक्ताज्ञानेनद्याः कृतवो मंतुनिश्रुतदत्तादिकावाश
लोवातः पर्वतामित्यादिकं वा अन्यं वा स्वस्वशाखापरिपठितं वा शांतिपाठं पठेयुः॥
एतस्मिन्नेव समये आचार्यो नवग्रहासनसमान्तराग्नेय्यामैशान्यां वा विनायकं तत्कन्नीमं

महा॰
१३५

बिकाच पीठादिषु प्रतिष्ठाप्य वक्ष्यमाणमंत्रेणावाहनपूजनंतिनिवेद्य प्रार्थनां प्र
णामं कुर्यात्॥ मंत्रौ तु॥ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि॥ तन्नो दंती प्रचोदयात्॥
विनायकमंत्रः सुभगायै विद्महे मालिन्यै धीमहि॥ तन्नो गौरी प्रचोदयात्॥ अंबि
कामंत्रः॥ अथ गृह्योक्तविधिनाग्निं प्रतिष्ठाप्य चरुं श्रपयित्वा ततो ब्राह्मणो जीव
तेन गौरसर्षपकल्केनोद्वर्तितांगं सर्वौषधिचूर्णैस्तथा चंदनागुरुकस्तूरिकादिभि
र्विलिप्तशिरसं यजमानं भद्रासन उपवेश्य गृह्योक्तमार्गेण स्वस्तिवाचनं कुर्वीत
त्विगादिब्राह्मणसहितश्चाचार्यः॥ स्वस्तिवाचनानंतरं च जीवत्पतिपुत्राभिरूपगुणा
न्वितानीभिः सुवेषाभिः स्त्रीभिः कृतमंगलं॥ यजमानमभिषिंचेदाचार्यः॥ तत्र पूर्वदेशा १३५
वस्थितं कलशमादाय सहस्राक्षं शतधारमृषिभिः पावनं कृतं॥ तेन त्वामभिषिंचामि पा
वमान्यः पुनंतु ते इत्यनेन मंत्रेणाभिषिंचेत्॥ ततो दक्षिणदिगवस्थितं कलशमादायम

नि वरुणो राजा भगं सूर्यो बृहस्पतिः भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुरित्य
नेन मंत्रेण तदनंतरं पश्चिमदेशावस्थितं कलशं गृहीत्वा यन्मे केशेषु दौर्भाग्यं सी
मंते यच्च मूर्धनि॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु ते सदा सर्वदेत्यनेनाभिषिंचेत्
॥ तत उत्तरदेशावस्थितं कलशमादाय पूर्वोक्तैः सहस्राक्षमित्यादिभिर्मंत्रैरभि
षिंचेत्॥ एवमभिषिच्य सव्यपाणिना गृहीतकुशाग्रं तैर्यजमानस्य मूर्धनि सार्षपं
तैलमौदुंबरेण स्रुवेणादाय वक्ष्यमाणमंत्रैर्जुहुयात्॥ ॐ मिताय स्वाहा॥ ॐ संमिता
य स्वाहा॥ ॐ शालाय स्वाहा॥ ॐ कटंकटाय स्वाहा॥ ॐ कूष्मांडाय स्वाहा॥ ॐ राजपु
त्राय स्वाहा॥ एवं षड्भिर्मंत्रैर्मूर्ध्नि हुत्वा तदनंतरं स्वगृह्योक्तेन चरुणा पूर्वोक्तैः षड्भि
र्मंत्रैः स्विष्टवाद्याचरुं कृत्वाग्नेरिंद्रादिदिक्षु निषेककरणालायां चेंद्रादिलोकपाले
भ्यस्तत्तन्नाममंत्रैर्बलिं दद्यात्॥ नाममंत्रास्तु॥ इंद्राय नमः॥ अग्नये नमः॥ यमाय नमः

महा.
१२९

निर्ऋतये नमः॥ वरुणाय नमः॥ वायवे नमः॥ सोमाय नमः ईशानाय नमः॥ ब्रह्मणे
नमः॥ अनंताय नमः॥ अथ यजमानस्नानांतमुत्क्रमात्वांबरधरो गुरुणा सहितो
विनायकांबिकायै च रुतां स्तंडुलांश्च पललौदनमेव च स्नादिना निर्दिष्टं कृता
कृतद्रव्यजातमुपहारं दत्वा ततः शिरस्नान्तमिंगत्वा कुसुमसहितेनोदकेन प्रत्ये
कं पूर्वोक्तविनायकांबिकाणामंत्रीन्नामंत्रान्नामर्घं दत्वा तथा दूर्वासर्षपपुष्पां
जलिं च दत्वा विनायकमंबिकयोपतिष्ठेत॥ ॥उपस्थानमंत्रस्तु॥ रूपं देहि यशो दे
हि भगं भगवति देहि मे॥ पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे॥ इति॥ अत्र
मंत्रे भगवन् देहि मे भगवतिमित्यूहं कृत्वा प्रथमतो विनायकमुपस्थाय पश्चाद १२९
थापठितेन मंत्रेणांबिकाविनायकमुपतिष्ठेत॥ ततश्चाचार्यः शूर्पे कृत्वा नास्ती
र्णेपहारशेषं तत्र निधाय च तत्र चतुष्पथं गत्वा तत्र वक्ष्यमाणमंत्रैर्बलिं निरध्या

त्॥ मंत्रास्तु॥ बलिं गृह्णंत्विमे देवा आदित्या वसवस्तथा॥ मरुतोश्विनौ रुद्राः
सुपर्णाः पन्नगा ग्रहाः॥ असुरा यातुधानाश्च पिशाचा मातरो गणाः॥ शाकिन्यो
यक्षवेतालायोगिनः पूतनाः शिवाः॥ जंभकाः सिद्धगंधर्वा नागा विद्याधरा न
गाः॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः॥ जगतां शांतिकर्तारो ब्रह्माद्या
श्च महर्षयः॥ मा विघ्नं मा च मे पापं मा संतु परिपंथिनः॥ सौम्या भवंतु तृप्ताश्च
तप्रेताः सुखावहाः॥ इति चतुष्पथबलिदानमंत्राः॥ अनंतरमाचार्यायोपवस्त्रयु
गसहितां दक्षिणां स्वशक्त्यानुसारेण दत्वा वित्तानुसारेणान्यानपि दक्षिणामपि
दृत्विग्भ्यो ब्राह्मणेभ्यः प्रतिपाद्य ब्राह्मणान् भोजयेत्॥ ॥इति विनायकशां
तिः॥ ॥अथ नवग्रहयज्ञः॥ याज्ञवल्क्यः॥ श्रीकामः शांतिकामो वा ग्रहयज्ञं स
मारभेत्॥ वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्नपि॥ ग्रहानाह॥ सूर्यः सो

महा॰
१११ म महीपुत्रः सोमपुत्रो बृहस्पतिः ॥ शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः ॥ ग्र
ह प्रतिमानिर्माणद्रव्याण्याह । ताम्रकात्स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ । रजताद्य
सः सीसात्कांस्यात्कार्या ग्रहाः क्रमात् ॥ सुवर्णैर्वा पटे लेख्या गंधैर्मंडलकेषु वा ॥ पू
जाविधिमाह । यथावर्णं प्रदेयानि वासांसि कुसुमानि च ॥ गंधाश्च बलयश्चैव धूपो दे
यश्च गुग्गुलुः कर्त्तव्या मंत्रवंतश्च चरवः प्रतिदैवतं ॥ ग्रहमंत्रानाह ॥ ॥ आकृष्णेन इम
देवा अग्निर्मूर्धा दिवः ककुत् । उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्त्तिताः ॥ बृहस्प
तेअतियदर्यस्तथैवान्नात्परिस्रुतः ॥ शन्नोदेवीस्तथा कांडात्केतुं कृण्वन्निमास्तथा ॥ हो
मीयसमिधमाह ॥ अर्कः पलाशः खदिरस्त्वपामार्गोथ पिप्पलः ॥ उदुंबरः शमी दूर्वा १११
कुशाश्च समिधः क्रमात् ॥ होमसंख्यामाह ॥ एकैकस्यत्वष्टशतमष्टाविंशतिरेव
वा ॥ होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युताः ॥ नैवेद्यार्थं ब्राह्मणभोजनार्थं च ॥ द्र

व्याण्याह । गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकं ॥ दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव
च । दद्याद्ग्रहक्रमादेव द्विजेभ्यो भोजनं ततः ॥ शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं
॥ गुडमिश्रओदनो गुडौदनः ॥ हविष्यं मुन्यन्नादि ॥ क्षीरषाष्टिकं क्षीरमिश्रः षाष्टिकौद
नः ॥ हविर्घृतोदनः ॥ चूर्णं तिलचूर्णमिश्रओदनः ॥ मांसेनच्छगमांसमिश्रओदनः ॥ चित्रा
न्नं नानावर्णओदनः ॥ गुडौदनादीनामन्नानामेषां ज्ञात्वा भोजनादिसन्मानपूर्वकं नैवे
द्यार्थं ब्राह्मणभोजनार्थं च दद्यादित्यर्थः ॥ दक्षिणामाह ॥ धेनुः शंखस्तथानड्वान्हे
म वासो हयः क्रमात् ॥ कृष्णा गौरायसं छाग एता वै दक्षिणाः स्मृताः ॥ यश्च यस्य यदा दु
स्थः स तं यत्नेन पूजयेत् ॥ ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ ॥ ग्रहाधीना नरे
न्द्राणामुच्छ्रायाः पतनानि च ॥ भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहा इति ॥ ॥ इति
याज्ञवल्क्योक्तग्रहशांतिः ॥ ॥ अथ नवग्रहमखप्रयोगः ॥ ॥ शुभे दिने नित्यकर्मानंतर

महा॰ १२८

ममुकप्रयोजनार्थं नवग्रहमखेन यक्ष्य इति॥ स्वगृह्योक्तविधिना स्वस्तिवाचनं विधायाचा
र्यवरणानंतरं ब्रह्माणं वृणीत॥ अथवा चतुरो ऋत्विजो वृणीत॥ तथा च स्कंदपुराणे॥ नव
ग्रहमखे कुर्याद् ऋत्विजश्चतुरः सुधीः॥ अथवा चैकमन्यच्चेद्विधिना ब्रह्मणा सहेति एत
च्चोपलक्षणं॥ अतएवायुतहोमलक्षहोमकोटिहोमादि चिकीर्षति तर्हि कर्मणो नि
र्वाहाय ग्रहसंख्याकान् ऋत्विजो वृणीत सर्वत्राचार्यब्रह्माणौ नियतौ॥ अत्र चार्यवरणप्र
योगः॥ वरणकाले एकर्त्विग्देयवस्त्रालंकारादि द्विगुणमुदङ्मुखोपवेशिताय गुणवत्त
मायैकस्मै दत्वा स्वयं पूर्वाभिमुखः सन् अद्य ग्रहयज्ञेन यक्ष्ये। तत्र त्वं चंदनपुष्पतांबूलजहे
मालंकारादितरेभ्यो दत्वास्मिन्कर्मणि ऋत्विक्कृते न त्वामहं वृण इति वृणीत। तत्राचार्यादिभि
: कर्म कुर्युः॥ कुंडादिनिर्माणप्रकारस्तु स्कंदे॥ नवग्रहमखे कुंडं हस्तमात्रं समं भवेत्॥
चतस्र षष्ठिपदिस्तु कुंडस्य हस्तमात्रप्रमाणं भवतीत्यर्थः॥ अधोहस्तं॥ खातमपि हस्त १२८

मात्रं भवेत्॥ भवतीति यावत् योनिर्वक्त्रं॥ कुंडस्य पश्चिमदिग्भागे उपरितनमेखलाया
मध्ये वृत्तमाणाजत्तणोपेता या योनिः सैव वक्त्रं यस्य तादृक् गजोष्ठसंनिभयोनि
वक्त्रं वा पिप्पलपत्राकृतियोनिवक्त्रं वा कुंडं भवति। तद् उच्छ्रिताविस्तारवदेव चतु
रंगुलमुच्छ्रिता अयमेकमेखलापक्षः॥ मेखलात्रितयं वा कुर्वीत। तथा च चिंतामणौ
द्विरंगुलोच्छ्रिताकार्या प्रथमा मेखला बुधैः। द्व्यंगुलस्तत्र विस्तारः पूर्वयोरपि शस्य
ते॥ पूर्वयोः प्रथमद्वितीयमेखलयोर्निलक्षणमपि तत्रैव। वितस्तिमात्रयोनिः स्या
त् षट्सप्ताङ्गुलविस्तृता॥ षड्गुसप्त वेति विकल्पः कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांगु
लोच्छ्रिता गजोष्ठसदृशी तद्वदायता छिद्रसंयुता॥ एतत्सर्वेषु कुंडेषु योनिलक्षणमु
च्यते॥ मेखलोपरि सर्वत्र अश्वत्थदलसंनिभा॥ अश्वत्थदलसदृशा योनिर्भवतीत्य
र्थः॥ लक्षणलक्षितकुंडकरणाशक्तौ स्थंडिलं चतुरस्रपरिमितं प्रकल्पयेत॥ स्थं

महा.
१२८

ण्डिलं वा प्रकल्पयेदिति स्थंडिलं वेदिं वा विरचयीत॥ तथा च स्कंदपुराणे॥ ॥तस्य चोत्तरपू
र्वेण स्थंडिलं हस्तमात्रकं॥ द्विवप्रं चतुरस्रं च वितस्त्युच्छ्रयसंमितं॥ द्विवप्रमित्यनेन वे
दिकानिर्माणमुच्यते॥ अतएव मत्स्यपुराणे॥ गर्त्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृतां
॥वप्रद्वययुतां वेदिं वितस्त्युच्छ्रयसंयुतां॥ स्थापनाय च देवानां चतुरस्रां समुदक्प्ल
वां॥ गर्त्तस्य कुंडस्य उत्तरपूर्वेण ईशानभागे॥ वप्रद्वयं॥ मेखलात्रयं तत्र्यंगुलोच्छ्रायः
प्रथमवप्रः॥ द्व्यंगुलोच्छ्रायो द्वितीयो वप्रः॥ विस्तारस्तु द्वयोरप्यंगुलपरिमितः॥ उद
क्प्लवा उदङ्निम्ना॥ एवं स्थंडिलं वेदिं वा निर्माय फलपुष्पादियुतं वितानं तत्रोप
रि कुर्वीत॥ अथ मखस्योक्तविधानात्स्वधिष्ण्येष्विग्रहाणामध्यपतनेग्रहादीन्देवान्॥ त १२८
था मत्स्यपुराणे॥ ॥अग्निप्रणयनं कृत्वा तस्यामावाहयेत्सुरान्॥ देवतास्तत्र संस्था
प्या विंशतिर्द्वादशाधिका॥ तस्यां वेदिकायां तत्रमुक्त तंडुलैः समं ततः पूरयित्वा ततो

ताम्रवर्णैस्तंडुलैः सूर्यस्य मंडलाकारमधिष्ठानं कुर्वीत॥ अस्मान्मंडलादाग्नेयदिग्भागे
मुक्तमेरक्तैश्चतुरस्रमधिष्ठानं सोमाय सूर्यमंडलाद्दक्षिणतो रक्तचंदनलिप्तैर
क्तैस्त्रिकोणाकारमधिष्ठानं मंगलाय सूर्यमंडलादैशान्यां सुवर्णैरक्तैर्बाणाकृति
मधिष्ठानं बुधाय मध्यमंडलादुत्तरतः सुवर्णवर्णैरेवाक्तैर्दीर्घचतुष्कोणमधिष्ठा
नं गुरवे मध्यमंडलात्पूर्वतः मुक्तमेरेव तंडुलैः॥ पंचकोणमधिष्ठानं भार्गवाय म
ध्यमंडलात्पश्चिमतः॥ कृष्णवर्णैस्तंडुलैः॥ धनुराकृतिमधिष्ठानं शनैश्चराय मध्यमं
डलान्निर्ऋतिकोणे सीसाख्यद्रव्यवर्णैरक्तैः॥ कृष्णवर्णैर्वा शूर्पाकृतिमधिष्ठानं
राहवे॥ मध्यमंडलाद्वायव्यदिग्भागे धूम्रैस्तंडुलैर्धूम्रवर्णैर्वा ध्वजाकारमधि
ष्ठानं केतवे कुर्वीत॥ ततश्च मंडलाद्वायव्यदिग्भागे धूम्रैस्तंडुलैर्धूम्रवर्णैर्वा ध्व
जाकारमधिष्ठानं केतवे कुर्वीत॥ ततश्च मंडलाकारं चतुरस्रं त्रिकोणं वाणाकृ

निर्दीर्घं चतुरस्रं पंचकोणं चापाकृतिम् अर्धाकृति॥ ध्वजाकारेषु ताम्रस्फटिकरक्तचंद
नसुवर्णरजतलोहसीसकांस्यमयेषु मध्यमांगुलिमध्यपर्वप्रमाणेन तेषु स्वर्णादि
प्रतिमानिर्माणद्रव्येषु वक्ष्यमाणप्रकारेण त्रिखिताः स्वर्णादान्मध्याग्निर्दक्षिणेशानोत्त
रपूर्वपश्चिमनिर्ऋतिवायुदिग्भागेषु विरधात॥ तत्रापरो विशेषः॥ स्कंदपुराणोक्तः॥ मुक्त
कैर्माध्यमुखो ज्ञेयो गुरुः सौम्यावुदङ्मुखौ॥ प्रत्यङ्मुखः शनिः सोमः प्रोक्तः दक्षिणानो मुखा
इति अथवा आदित्यादित्रिमुखा नवेतरग्रहादीन्स्थापयेत्॥ तथा च चिंतामणौ॥ आदि
त्यादिमुखाः सर्वे साधिप्रत्यधिदेवताः॥ स्थापनीयामुनिश्रेष्ठ अनंतरेण पराङ्मुखाः॥ अ
धिदेवता प्रत्यधिदेवतासहिताः सोमादिग्रहाः साधिप्रत्यधिदेवताः इत्युच्यंते॥ अनंतरेणे
ति॥ आदित्यस्यान्यस्य च स्थापितग्रहस्य मध्ये अग्न्याग्रहें न स्थापनीयम्॥ इत्यर्थः॥ न
च पराङ्मुखा स्थापनीया॥ ॥ स्कंदपुराणे॥ ॥ जानुतुमंडलाकारं सोमं तु चतुरस्रकं॥

॥ अंगारकं त्रिकोणं तु बुधं बाणाकृतिं तथा॥ दीर्घं गुरुं चतुरस्रं॥ पंचाश्रं भार्गवं तथा॥ ध
नुस्तुल्यं शनिं विंद्यात् अंकुश अर्धाकृतिं तथा॥ ध्वजाकाराः केतवश्चेति॥ जानु तु मंडलाकारमि
त्यादि॥ अत्र जान्वादिशब्दैस्तत्तद्वर्णस्तत्तविरचिता ग्रहायतनानि वर्तुलचतुरस्रादीनि
धिष्ण्यानि लक्ष्यंते॥ तथा सूर्यादिमूर्तेस्तत्तत्खनाधिकरणानि ताम्रादिनिर्मितानि वर्तुल
चतुरस्रादीनि वस्त्राण्यपि दीर्घं गुरुं चतुरस्रमिति॥ गुरुं तदुक्तखनाधिकरणीतरायत
नेन दीर्घचतुष्कोणं च कुर्वीत पंचाश्रं पंचकोणं॥ याज्ञवल्क्यः॥ ताम्रकात्स्फटिकाद्रक्तच
दनात्स्वर्णकादुभौ॥ रजताद् अयसः सीसात्कांस्यात्कार्या ग्रहाः क्रमात्॥ सुवर्णैर्वा पटे ले
ख्या गंधैर्मंडलकेषु वा॥ सुवर्णैर्वर्णकैः ताम्रवर्णं वर्णकाद्यावै रक्तवर्णं वर्णकेन वा स्व
यं मूर्तिं लेख्या॥ गंधैस्तत्तद्ग्रहवर्णैर्मंडले तत्तद्ग्रहस्थापनायतने॥ ॥ मत्स्यपुराणे॥ ॥
मध्ये तु भास्करं विंद्यात् लोहितं दक्षिणेन तु॥ उत्तरेण गुरुं विंद्यात् बुधं पूर्वोत्तरेण तु॥ द

महा·
१८१

वेणचार्गवं विन्यसेत्सोमं दक्षिणपूर्वके। पश्चिमेन शनिं विन्यसेद्राहुं पश्चिमदक्षिणे॥ पश्चि-
मोत्तरतः केतुं स्थापयेच्छुक्लतंडुलैः॥ दक्षिणेनेति रणमन्त्रयः एन प्राद्दिनीमेत्यनेन मन्त्रेण
भास्करमित्यत्र द्वितीया॥ भास्कर दक्षिणेन भास्करस्य दक्षिणभागे लोहितमंगारकं वि-
न्यसेत्कान्तीमात॥ अथ वासश्चम्य पूर्वेन पश्चात्मयः॥ मध्ये भास्करं विन्यसेत्॥ तस्य दक्षिणेन लो-
हितं विन्यसेत् दक्षिणप्रदेश इत्यर्थः॥ एवमुत्तरत्रापि पूर्वोत्तरेण ईशानदिग्भागे दक्षिणपू-
र्वके॥ आग्नेय्यां दिशि॥ दक्षिणपश्चिमेन नैर्ऋत्यप्रदेशे पश्चिमोत्तरतः॥ वायव्ये॥ शुक्ल-
तंडुलैः ग्रहस्थापनाप्रदेशं संडिलं वेदिं वा परिपूर्णं शुक्लतंडुलानामुपरि तत्तद्वर्णतंडुलै-
रुपलक्षिते प्रदेशेषु आदित्यादीन् ग्रहान् स्वस्वामतनानतिक्रमेण स्थापयेदित्यर्थात्॥ १८१
अथवा तत्तद्वर्णतंडुलोपलक्षितेषु प्रदेशेषु ग्रहप्रतिमानि धाम पश्चाच्छुक्लतंडुलैः कृ-
त्वा स्थापयेत्॥ प्रतिष्ठां कुर्यात्॥ ग्रहलक्षणमपि मत्स्यपुराणे॥ पद्मासनः पद्मकरः प-

को पद्मगर्भसमद्युतिः॥ सप्ताश्वरथसंस्थश्च द्विभुजः स्यात्सदा रविः॥ श्वेतः श्वेतांबरध-
रो दशाश्वः श्वेतभूषणः॥ गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी॥ रक्तमाल्यांबरधरः
शक्तिशूलगदाधरः॥ चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः॥ पीतमाल्यांबरधरः क-
र्णिकारसमद्युतिः॥ खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः॥ गुरुशुक्रयोर्लक्षणमाह
॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ॥ दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू॥ इंद्र-
नीलद्युतिः शूली वरदो गृध्रवाहनः॥ बाणबाणासनधरः कर्तव्योर्कसुतः सदा॥ करा-
लवदनः खड्गचर्मशूली वरप्रदः॥ नीलसिंहासनस्थश्च राहुरत्र प्रशस्यते॥ धूम्रा द्वि-
बाहवः सर्वे गदिनो विकृताननाः॥ गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः॥ नवग्रह
साधारणधर्मान्माह त्रयेण चतुर्थचरणेन च केतुसंख्यामाह॥ सर्वे किरीटिनः कार्या
ग्रहा लोकहितावहाः॥ अंगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा॥ शतमिति केतुनामा-

मह.
१८२

नंत्यग्रदक्षिणार्यैर्नतु नियमार्थं॥ पूजामात्रे कैवल्यमेभिः शिष्टाचरात॥ गोनिजीमनवग्रहे॥
कार्द्रत्र्यंगुलं लिखेद्रक्तं सोमं तु द्व्यंगुलं लिखेत॥ त्र्यंगुलं वा गुरुं चैव गुरुं चैव षडंगुलं॥ बुधं
तु मित्रसुतं सौरिं च तु त्रिकोणं गुलं लिखेत सोमार्धगुर्वराकुंकेतुमध्यधर्मं गुलं॥ राव
म्यपि ग्रहाणां नानान्तरं यवेदिकामामुक्तस्थाने षुस्तर्मादित्रतिमानि धायव्यारुद्विनिरा
ग्रहस्थापयेत॥ अथ मंत्राः प्रयोगः॥ प्रणवस्य ब्रह्मा ऋषिः दैवी गायत्री छंदः परमात्माग्नि
र्ग्रहदेवतानां व्याहृतीनां क्रमेण जमदग्निनरद्वाजगौतमकश्यपः अग्निर्वायुः सूर्यो देवताः॥
सूर्यादिग्रहावाहनार्थे विनियोगः॥ ॥ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपसगोत्र सूर्य इ
हागच्छ त्वा वास इह तिष्ठेति रक्तपुष्पाक्षतैः स्थापयेत॥ ॐ भूर्भुवः स्वः अवंतीसमुद्भ
व भरद्वाजसगोत्र भौम इहागच्छ त्वा वासय रक्तपुष्पाक्षतैरिह तिष्ठेति स्थापयेत॥ ॐ
भूर्भुवः स्वः मागधदेशोद्भव आत्रेयसगोत्र बुध इहागच्छ त्वा वासय पीतपुष्पाक्ष १८२

तैरिह तिष्ठेति स्थापयेत॥ ॐ भूर्भुवः स्वः सिंधुदेशोद्भव आंगिरससगोत्र बृहस्पतिमुख
इहागच्छ त्वा वासय श्वेतपुष्पाक्षतैः पीतपुष्पाक्षतैरिह तिष्ठेति स्थापयेत॥ ॐ भूर्भु
वः स्वः भोजकटदेशोद्भव भार्गवसगोत्र शुक्र इहागच्छ त्वा वासय श्वेतपुष्पाक्षतैरिह
तिष्ठेति स्थापयेत॥ ॐ भूर्भुवः स्वः सौराष्ट्रज काश्यपसगोत्र शनैश्चर इहागच्छ त्वा वास
य कृष्णपुष्पाक्षतैरिह तिष्ठेति स्थापयेत॥ ॐ भूर्भुवः स्वः अंतर्वेदिसमुद्भव जैमि
निसगोत्र केतो इहागच्छ त्वा वासय धूम्रपुष्पाक्षतैरिह तिष्ठेति स्थापयेत॥ यथोक्तकु
सुमतंडुलाभावे यथालाभोपपन्नैः कुसुमतंडुलैः स्थापयेत॥ ॥स्कंदपु
राणे॥ ॥जन्मनक्षत्रमेतेषां वर्णस्थानमुखादि च॥ योऽज्ञात्वा कुरुते शांतिं ग्रहास्तेना
वमानिताः॥ उत्पन्नोऽर्कः कलिंगेषु यमुनायां च चंद्रमाः॥ अंगारकस्त्ववंत्यां तु मा
गधायां हिमांशुजः॥ सैंधवेषु गुरुर्जातः शुक्रो भोजकटे तथा॥ शनैश्चरस्तु सौरा

पृष्ठेराऊवैराटिनापुरे॥ अंतर्वेद्यांतथाकेतुरित्येतद्ग्रहमंडलम्॥ आदित्यःकाश्यपो
गोत्रआत्रेयश्चंद्रमाभवेत॥ भारद्वाजोभवेद्भौमस्तथात्रेयश्चसोमजः॥ गुरुःआं
गिरागोत्रः शुक्रोवैभार्गवस्तथा॥ शनिकाश्यपराहुराऊपैठीनसिस्तथा॥ केत
वोजैमिनेयाश्चसदालोकहितावहाः॥ नातुरंगारकौरक्तौशुक्लौशुक्रनिशाकरौ॥
सोमपुत्रोगुरुश्चैवतावुभौपीतकौस्मृतौ॥ कृष्णंशनैश्चरंविंद्याद्राहुंचित्रांश्चकेतव
॥ वर्णरूपगुणैर्युक्तानव्याहृत्यावाहयेत्सुतान॥ एवंसूर्यादीनावाह्यतस्याधिदे
वताः॥ स्थापयेत॥ ॐभूर्भुवःस्वःईश्वरइहागच्छइहतिष्ठेतिश्वेतपुष्पश्वेततंडुलैःई
श्वरं॥ ॐभूर्भुवःस्वःउमेइहागच्छइहतिष्ठेतिसोमस्यदक्षिणपार्श्वेनमर्यस्यदक्षिणेपा १८३
र्श्वेउमां॥ ॐभूर्भुवःस्वःस्कंदइहागच्छइहतिष्ठेतिभौमस्यदक्षिणपार्श्वेस्कंदं॥ ॐभू
र्भुवःस्वःविष्णोःइहागच्छइहतिष्ठेतिबुधस्यदक्षिणपार्श्वेविष्णुं॥ ॐभूर्भुवःस्वःब्रह्मन्नि

हागच्छेहतिष्ठेति॥ गुरोर्दक्षिणपार्श्वेब्रह्माणं॥ ॐभूर्भुवःस्वःइंद्रइहागच्छइहतिष्ठेतिशु
क्रस्यदक्षिणपार्श्वेइंद्रं॥ ॐभूर्भुवःस्वःयमइहागच्छइहतिष्ठेतिशनैश्चरस्यदक्षिण
पार्श्वेयमं॥ ॐभूर्भुवःस्वःकालइहागच्छइहतिष्ठेतिराहोर्दक्षिणपार्श्वेकालं॥ ॐभूर्भु
वःस्वःचित्रगुप्तइहागच्छइहतिष्ठेतिशुक्लपुष्पतंडुलैःकेतोर्दक्षिणपार्श्वेकालं॥ ॐभू
र्भुवःस्वःचित्रगुप्तइहागच्छइहतिष्ठेतिशुक्लपुष्पतंडुलैःकेतोर्दक्षिणपार्श्वेचित्रगु
प्तंस्थापयेत॥ ततश्चप्रत्यधिदेवताःस्थापयेत॥ ॐभूर्भुवःस्वःअग्नेइहागच्छइहति
ष्ठेतिशुक्लपुष्पतंडुलैः॥ सूर्यस्यवामपार्श्वेअग्निं॥ ॐभूर्भुवःस्वःआपइहागच्छइह
तिष्ठेतिसोमस्यवामभागेअपः॥ ॐभूर्भुवःस्वःभूमेइहागच्छइहतिष्ठेतिभौमस्यवाम
पार्श्वेभूमिं॥ ॐभूर्भुवःस्वःविष्णोइहागच्छेहतिष्ठेतिबुधस्यवामपार्श्वेविष्णुं॥ ॐभूर्भुवः
स्वःइंद्रइहागच्छेहतिष्ठेतिगुरोर्वामपार्श्वेइंद्रं॥ ॐभूर्भुवःस्वःइंद्राणिइहागच्छेहतिष्ठेति

गुरोर्वाम पार्श्वे इंद्रं ॥ ॐ भूर्भुवः स्वः इंद्राणि इहागच्छ इह तिष्ठ इति शुक्रस्य वाम पार्श्वे इंद्राणीं ॥
ॐ भूर्भुवः स्वः प्रजापते इहागच्छ इह तिष्ठ इति शनैश्चरस्य वाम भागे प्रजापतिं ॐ भूर्भुवः स्व
ः सर्पा इहागच्छत इह तिष्ठत इति राहोर्वाम भागे सर्पान् ॥ ॐ भूर्भुवः स्वः ब्रह्मन्निहागच्छ इह ति
ष्ठ इति केतोर्वाम भागे ब्रह्माणं श्वेतकुसुमाक्षतैः स्थापयेत् ॥ अधिदेवतानां दक्षिणतो वा
मे प्रत्यधिदेवताः स्थापनीयाः प्रयत्नेन व्याहृतीभिः पृथक् पृथगिति संग्रहकारः ॥ चिंता
मणौ त्वधिदेवताः स्थापनीयाः प्रयत्नेन व्याहृतीभिः पृथक् देवाः प्रकारांतरेण दर्शिताः
सूर्यस्य चोत्तरे शंभुमुमां सोमस्य दक्षिणे ॥ स्कंदमंगारकस्यैव दक्षिणस्यां निवेशयेत् ॥
सोमात्पश्चिमतो विष्णुं ब्रह्माजीवस्य पूर्वतः ॥ इंद्रमैंद्रां सिताद्दिशि मंदाद्याम्यतो यमं ॥ १८८
राहोः पूर्वोत्तरे कालं सर्वभूतभयवहं ॥ केतोर्नैर्ऋत दिग्भागे चित्रगुप्तं निधापयेत् ॥ ए
वं ग्रहाधिदेवताप्रत्यधिदेवतास्थापनानंतरं विनायकादीन्पंचदेवतान् ॥ स्थापयेत् ॥ ॐ

भूर्भुवः स्वः विनायक इहागच्छ इह तिष्ठ इति श्वेतकुसुमतंडुलैः राहोरुत्तर दिक्भागे विना
यकं स्थापयेत् ॥ ॐ भूर्भुवः स्वः दुर्गे इहागच्छ इह तिष्ठ इति शनैश्चरस्योत्तर भागे दुर्गां ॥ ॐ भू
र्भुवः स्वः वायो इहागच्छ इह तिष्ठ इति शनैश्चरस्योत्तर भागे दुर्गां ॥ ॐ भूर्भुवः स्वः वायो इहाग
च्छ इह तिष्ठ इति सूर्यस्योत्तर भागे वायुं ॥ ॐ भूर्भुवः स्वः आकाश इहागच्छ इह तिष्ठ इति राहोर्दक्षि
ण भागे आकाशं ॥ ॐ भूर्भुवः स्वः अश्विनीकुमाराविहागच्छतामिह तिष्ठतमिति । केतो
र्दक्षिण भागे श्वेतकुसुमतंडुलैः अश्विनीकुमारौ स्थापयेत् ॥ मत्स्यपुराणे । विनायकं
तथा दुर्गां वायुराकाशमेव च ॥ आवाहयेद्व्याहृतिभिः तथैवाश्विनीकुमारकौ ॥ सं
ग्रहकारः ॥ राहुमंददिनेशानामुत्तरस्यां यथाक्रमात् ॥ गणेशाद्दुर्गावायुश्च राहुके
तोस्तु दक्षिणे ॥ आकाशमश्विनौ चेति पंचैतान्स्थापयेत्ततः ॥ अथवैतान्पंचग्रहोत्तरतः
स्थापयेत् ॥ एवं शांतिदेवता आवासस्थापयित्वा नाममंत्रैः पूजयेत् ॥ तद्यथा ॥

महा. ॐ सूर्याय नमः इदमासनं॥ ॐ सूर्याय नमः इदं पुनराचमनीयं ॐ सूर्याय नमः इदं वस्त्रं॥ ॐ
१८५ सूर्याय नमः अनुलेपनं॥ ॐ सूर्याय नमः इमानि पुष्पाणि॥ ॐ सूर्याय नमः एष धूप
ः॥ ॐ सूर्याय नमः एष दीपः॥ ॐ सूर्याय नमः एतन्नैवेद्यं॥ एवं सूर्यं प्रपूजयित्वा॥ ॐ सोमाय न
मः॥ इत्यादिग्रहावाहनं नमो तैर्नाममन्त्रैः पूर्वोक्तवह्निरादिदेवता आवाहनक्रमेणैकैकं वैदि
के मंत्रैरासनाद्युपचारान् कुर्वीत॥ तत्राचमनीयदानानंतरं पंचामृतैः स्नानकारयेत्॥
तत्र पूर्वोक्तेनोमनमंत्रैः पूजाकरणेऽपि समानाः अतः सूर्याय नमः सूर्यं पयसा स्नापयामी
त्यनेन प्रकारेण पंचामृतैरभिषेकः कार्यः॥ एवं सोमादीनामपि॥ तत्रायं क्रमः॥ दुग्धं दध्याज्य
मधुशर्करा इति वा॥ आप्यायस्वेत्यस्य गौतम ऋषिः सोमात्मकं पयो देवता गायत्री छंदः॥ १८५
क्षीरस्नाने विनियोगः॥ ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यं भवा वाजस्य संगथे
॥ इति क्षीरेण स्नानं दधिक्राव्ण इत्यस्य मंत्रस्य दधिक्रावा ऋषिः सुरभ्यं दधि देवता

अनुष्टुप् छंदः॥ दधिस्नाने विनियोगः॥ ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिन
॥ सुरभिनो मुखा करत्प्रण आयूंषि तारिषत्॥ इति दधिस्नानं॥ शुक्रमसीत्यस्य प्रजाप
प्रजापतिर्ऋषिः आज्यं देवता आज्यस्नाने विनियोगः॥ ॐ शुक्रमसि ज्योतिरसि ते
जोसि इत्याज्येन स्नानं॥ स्वादुः पवस्वेत्यस्य मंत्रस्य वेन ऋषिः सोमात्मिका शर्करा देव
ता जगती छंदः॥ शर्करास्नाने विनियोगः॥ ॐ स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय
सुहवीतु नाम्ने स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः॥ इति शर्कर
या स्नानं॥ मधुवाता इत्यस्य मंत्रस्य गौतम ऋषिः मधु देवता गायत्री छंदः॥ इति मधुस्ना
ने विनियोगः॥ मधुवाता ऋतायते मधु क्षरंति सिंधवः माध्वीर्नः संत्वोषधीः॥ इति मधु
स्नानं॥ एवं पंचामृतस्नपनानंतरं स्नानं पुनराचमनं वस्त्रदानानंतरं सपर्यां विधायानं
तरमिंद्रादीन् लोकपालान् स्वस्थाने मुखानावास्य पूजयेत्॥ शिष्टसमाचारात्॥

ऋक्रमंत्राः॥ इंद्रं वो विश्वतस्परीत्यस्य मंत्रस्य मधुछंदा ऋषिः इंद्रो देवता गायत्री छंदः इंद्र
पूजायां विनियोगः॥ इंद्रं देवो विश्वतस्परि हवामहे जनेभ्यः॥ अस्माकमस्तु केवलः॥
अग्निं दूतमित्यस्य मंत्रस्य मेधातिथिऋषिः॥ अग्निर्देवता गायत्री छंदः॥ अग्निपू
जायां विनियोगः॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं॥ अस्य यज्ञस्य सुक्रतुं॥ यमा
य सोमम् इत्यस्य मंत्रस्य यमऋषिः॥ यमो देवता अनुष्टुप् छंदः यमपूजायां विनियोगः
॥ यमाय सोमं सुनुत यमाय जुहुया हविः॥ यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः॥
मोषुणः इत्यस्य मंत्रस्य कण्वऋषिः॥ निर्ऋतिर्देवता गायत्री छंदः॥ निर्ऋतिपूजायां विनि
योगः मोषुणः परापरा निर्ऋतिर्दुर्हणा वधीत॥ पदीष्ट तृष्णया सह॥ तत्त्वायामीत्यस्य १८६
मंत्रस्य वामदेवऋषिः॥ वारुणो देवता त्रिष्टुप् छंदः॥ वरुणपूजायां विनियोगः॥ त्व
नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः॥ यजिष्ठो वह्नितमः शोशु

चानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्॥ तववायवृतस्पत इत्यस्य मंत्रस्य व्यश्वऋषि
र्वायुर्देवता गायत्री छंदः॥ वायुपूजायां विनियोगः॥ तववायवृतस्पते त्वष्टुर्जामातर
द्भुत॥ अवां ऽस्या वृणीमहे॥ सोमो धेनुमित्यस्य मंत्रस्य गौतमऋषिः॥ सोमो देवता त्रि
ष्टुप् छंदः॥ सोमपूजायां विनियोगः॥ सोमो धेनुं ऽ सोमो अर्वंतमाशुं ऽ सोमो वीरं क
र्मण्यं ददाति॥ सादन्यं विदथ्यं ऽ सभेयं पितृश्रवणं यो ददाशदस्मै॥ तमीशानमित्य
स्य गौतमऋषिः॥ ईशानो देवता जगती छंदः॥ ईशानपूजायां विनियोगः॥ तमीशा
नं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयं॥ पूषा नो यथा वेदसामसद्वृधे र
क्षिता पायुरदब्धः स्वस्तये॥ एते पंच मंत्रा उपलक्षणार्थाः॥ अत इंद्रादिप्रकारकैर्वैदिकै
र्मंत्रैरिंद्रादिपूजा कार्या॥ अथवा इंद्रायनम इत्यादिभिस्तत्तद्देवतानाममंत्रैर्वा लो
कपालान् पूजयेत्॥ एवं लोकपालान् संपूज्य आदित्यादीनां ग्रहाणां तत्तद्वर्णान् रक्तं च

मह०
१८७

दनमक्षतीगंधान्तनवर्णानिपुष्पाणिचसमभ्यर्च्याधिदेवतादिलोकपालांतानांश्रीचंदनं
यथोपपन्नानिचकुसुमानिसमर्पयेत॥अमपूर्वोक्तचंदनाप्यन्नावेत्रादित्यानांसर्वे
षामपियथालाभोपपन्नंचंदनंपुष्पाणिवसमर्पयेत॥ततोधूपदानंचिंतामणौ॥दिवा
करकुंजास्यांहिदापयेद्रक्तचंदनंचंद्रेचनागवेचैवसितवकुंकुमेनतुसंयुक्तंचंद
नंजीवसौम्ययोः॥अगरुंचंदनंदद्यात्कुंकुमकंभेपुच॥महवर्णानिपुष्पाणिगायत्रा
धूपमाहरेत॥रवेःकुंदरकंधूपंशशिनस्तुघृताक्षताः॥भौमेसर्जरसंचैवअगुरुंचबु
धेसमंतंसिल्हकंगुरवेदद्यात्छुक्रेबिल्वागरुंतथा॥गुग्गुलंमंदवारेतुजातानाराहोस्त्रके
तवे॥कुंदुरकंसमन्क्षीरसः॥सिल्हकःपिंडकःसन्तक्षीरसमत्वर्यः॥बिल्वागरुविल्व १८७
फलमजासहितमगरुः॥मंदवारःशनैश्चरः॥राहोःकेतवेचजातानापूर्वोक्तकुंदुरु
पादिधूपानामेसर्वेषां॥गुग्गुलुरेवधूपः॥तथाचयाज्ञवल्क्यः॥धूपोदेयश्चगुग्गुलुरि

ति॥आदित्यादीनांकुंदुरकादिधूपदानेतत्तद्देवताभ्यस्त्वधिदेवताभ्यःअरपिचसर्वा
वधूपः॥विनायकादीनांतुगुग्गुलुरेवतस्यसर्वसाधारणत्वात॥एवंधूपदानानंतरं
दीपंदत्वानैवेद्यंवस्त्रमाल्यंदद्यात्चिंतामणौ॥गुडोदनंरवेर्दद्यात्सोमायघृतपायसं
॥भौमायहविष्यान्नंबुधायक्षीरषष्टिकं॥दध्योदनंगुरोर्दद्यात्छुक्रायचघृतोदनं
मिश्रितंतिलमाषैश्चनैवेद्यंचशनैश्चरे॥राहोर्मांसोदनंदद्यात्केतोश्चित्रोदनंतथेति
हविष्यान्नंमुन्यन्नंनीवारादिक्षीरषष्टिकंक्षीरमिश्रःषष्टिकौदनःपूर्वोक्तविविधनै
वेद्यानावेयथालाभोपपन्नमोदनादिविनिवेदयेत॥यथाहयाज्ञवल्क्यः॥शक्तितोवा
यथालाभंसत्कृत्यविधिपूर्वकमिति॥एवमधिदेवतादीनांतत्तदूहनैवेद्यंयथाला
भमोदनादिवासमर्पयेत॥विनायकस्यतुमोदकसहितंउदनादिः॥एवंनैवेद्यंदत्वा
तांबूलदानानंतरंग्रहवेदिकायांईशानदिग्भागेअग्रणमकालकंवहिर्धूपस्ततवि

महा.
१८८

न्यसितं च चूतादिपल्लवसंछन्नं चूताश्वत्थवटोदुंबरप्लक्षपल्लवसंयुक्तं फलवस्त्रयुग्मा
न्वितं ततः प्रतिष्ठाप्य पंचरत्नयुक्तं निर्मलजलपरिपूर्णं सप्तमृत्तिकाभिः सर्वौषधिभिश्चो
पेतं दरकुलशमस्तनानासु परिस्थापयेत्॥ तत्र कलशे वरुणमावाहयेत् तथा गंगादीनि
तीर्थानि च तथा समस्तसरित्सुराणयो॥ प्रागुत्तरेण तस्माच्चरस्थ्यतत विन्यसितं॥ चूत
पल्लवसंछन्नं फलवस्त्रयुग्मान्वितं॥ पंचरत्नसमायुक्तं पंचगंगयुतं तथा॥ स्थापयेद्व
रुणं कुंभं वरुणं तत्र विन्यसेत्॥ गंगाद्याः सरितः सर्वास्समुद्राश्च सरांसि च॥ पंचगंगाः
पूर्वोक्ताः पंचपल्लवाः॥ गजाश्वरथ्यावल्मीकसंगमाद्धृदगोकुलात्॥ मृदमानीय विं १८८
न्यस्य सर्वौषधिजलान्वितं॥ स्नानार्थं विन्यसेत्तत्र यजमानस्य शास्त्रवित्॥ मुरामांसी
वचाकुष्ठं शैलेयं रजनीद्वयं॥ सठीचंपकमुस्ताश्च सर्वौषधिगणाः स्मृताः॥ ॥अथ व
रुणावाहनमंत्रः॥ तत्त्वायामीत्यस्य मंत्रस्य शुनःशेफ ऋषिः॥ वरुणो देवता त्रिष्टुप्छं

दः वरुणावाहने मंत्रः॥ तत्त्वायामीत्यस्य मंत्रस्य विनियोगः॥ तत्त्वायामि ब्रह्मणा वं
दमानस्तदाशास्ते यजमानो हविर्भिः॥ अहेडमानो वरुणेह बोध्युरुशंस मान आ
युः प्रमोषीः॥ एतच्च प्रदर्शनार्थं अन्यैरपि वरुणप्रकाशकैर्वैदिकमंत्रैर्वरुणाय
नम इति नाममंत्रेण वा वरुणमावाह्य पूजयेत्॥ अथ गंगाद्यावाहनमंत्रः॥ सर्वे समु
द्राः सरितस्तीर्थानि जलदा नदाः॥ आयांतु यजमानस्य दुरितक्षयकारकाः॥ एवमा
दित्यादिदेवतावाहनादि वरुणस्थापनांतकर्म निर्वर्त्य पूर्वप्रतिष्ठापिताग्नौ वक्ष्यमा
णविधिना होमकर्म समारभेत्॥ अन्वाधानप्रयोगः॥ अस्मिन्कर्मण्यादित्याद्या नव
प्रधानदेवताः॥ रुद्राद्या नवाधिदेवताः॥ अग्न्याद्या नव प्रत्यधिदेवताः॥ विनायकाद्या
इतरा अंगदेवताः॥ समिच्चर्वाज्यव्रीहयो हविः॥ अथवा समिच्चर्वाज्यानि ह
विः चर्वाज्यतिलमिश्रितं तंत्रेसांगेन कर्मणा सद्यो यक्ष्य इति वेसमिधाद्यग्नौ निक्षिपेत्॥ ग

मह० वमंत्वाधानंविधायनिर्वापः कार्यः॥ तत्रायंप्रयोगः॥ देवस्यत्वासवितुः प्रसवेश्विनोर्बाहु
१८५ भ्यांपूष्णोहस्ताभ्यांसूर्यायजुष्टंनिर्वपामीतिचतुरोमुष्टीन्निर्वपेत्॥ यदातुप्रतिग्रहम
ष्टोत्तरशतंसहस्रंवाहोमेकर्त्तुमिच्छतितदामुष्टिचतुष्टयनिर्वापसंपादितस्यद्रव्यहो
मापर्याप्तत्वेनपूर्वोक्तनिर्वापानंतरंहोमपर्याप्तद्रव्यंतूष्णींनिर्वपेत्॥ एवंनिरूप्यदे
वापर्यत्वाग्निःप्रत्नात्यचरुंश्रपयित्वानिधायोदगुद्वास्यप्रत्यग्निधारयेत्॥ याज्ञवल्क
ः॥ कर्त्तव्यामंत्रतंत्रश्चचरवः॥ प्रतिदैवतमिति॥ एवंचरुःश्रपणानंतरंसमार्गसंप
रिस्तरणाघाज्यसंस्कारांतकर्मणानंतरंयजमानोयएष्यदेवतोद्देशेनहोमीयद्रव्य
त्यागंकुर्वीतयजमानिकत्वास्वत्वत्यागस्यायुगपदनेकर्त्विक्साध्येकर्मणिप्रत्याहुति १८५
स्वत्वत्यागस्यकर्त्तुमशक्यत्वात्॥ तत्रायंप्रयोगः॥ सूर्यसोमभौमबुधबृहस्पतिशु
क्रशनैश्चरराहुकेतुभ्योमास्कंरविसुब्रलेंद्रयमकालचित्रगुप्ताग्निजलत्तृवि

ष्णुरुद्रकेश्वरीप्रजापतिसर्पब्रह्मगणपतिदुर्गावायुव्योमाश्विभ्योग्रहसोक्ताघ्यार
दिदेवताभ्यःप्रत्यग्निचाहुतिदेवताभ्यःस्विष्टकृदग्नयेवेदंसंपादितंसमिच्चर्वाज्य
व्रीहितिलयवादिसमस्तकमित्यभिलपेत्॥ केचनग्रहपाकादेरनामुध्यस्यग्रह
दीतुद्दिश्यजुहुति॥ तत्रशिष्टाचारएवप्रमाणं॥ एवमुद्देशत्यागंकृत्वेदमाधाया
ग्न्यागौचक्षुषीचकृत्वासूर्यादिग्रहानुद्दिश्यहोमार्थंसंपादितसमिदादिद्रव्येण प्र
तिग्रहंप्रतिद्रव्यंदशदशाहुतीर्हुत्वाधिदेवतादीनुद्दिश्यप्रत्येकंतिस्रस्तिस्रएकैकां
वाहुतीर्हुत्वाचतस्त्रिव्याहृतिभिस्त्रतस्रआहुतीर्हुत्वापश्चात्प्रतिग्रहमष्टावि
ंशतिरष्टोत्तरंवातमष्टोत्तरसहस्रंवादितत्क्रमेणहोमःकार्यः॥ तत्रापिसमिच्चर्वा
ज्यतिलादयइतिक्रमः॥ समिदाज्यचरुतिलादय इतिवा॥ अधिदेवतादीनामप्रधा
नदेवतात्वाधोमेन्यूनसंख्यास्वीकरणंआसांचसमिधःपालाशपएव॥ मत्स्यपुरा

महा॰
१८०

णे ॥ याज्ञवल्क्यः ॥ अर्कः पलाशः खदिरः अपामार्गोऽथ पिप्पलः ॥ उदुंबरः ॥ शमी दूर्वा कुशा
श्च समिधः क्रमात् ॥ एकैकस्याष्टशतमष्टाविंशतिरेव च ॥ होतव्या मधुसर्पिर्भ्यां दध्ना
चैव समन्विताः ॥ अनेन वचनेन मध्वाज्यदध्नां समिधं रंजने समुच्चयो वगम्यते याज्ञवल्क्य
स्तु विकल्पमाह ॥ होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा पुनरिति ॥ स्मृतिपुराणयोः ॥ स्मृ
तेः प्राबल्यात् ॥ पुराणवाक्यस्याशक्तो वा शक्तविषयत्वात् ॥ तथा च मध्वादीनि समिदं
जने विकल्पितानि चिंतामणौ ॥ समिधश्चात्र कर्त्तव्या अष्टोत्तरसहस्रका अष्टोत्तरश
तं वाथ अष्टाविंशतिरेव वा ॥ समिधां जुह्वतां वक्ष्ये संख्यामासां तथैव च ॥ विशीर्णा विदला
ह्रस्वा वक्राः ससुषिराः कृशाः ॥ अतिस्थूला अतिदीर्घाश्च समिधः कार्यनाशनीः ॥ विशीर्णा १९
युःक्षयं कुर्याद्विदला पुत्रनाशनी ॥ सुषिरा व्याधिजननी ह्रस्वा च रिपुवर्धनी ॥ दीर्घा वि
देशगमनं स्थूला चार्थविनाशनी ॥ अकृशास्तु समास्थूलाः सार्थं च सुफलाशनी ॥ आदेश

न्त्रांध कार्येनाः समिधः ॥ सर्वकर्मणि ॥ अर्को नाशयते व्याधिं पलाशः सर्वकामदः ॥ ख
दिरश्चार्थलाभश्च अपामार्गः सुदर्शनः ॥ अश्वत्थः सर्वकामाय सौभाग्यो दुंबरस्तथा ॥ शमी
शमयते पापं दूर्वायुःसुविवर्धनी ॥ कुशा धर्मार्थकामानां रक्षणं रक्षसां विदुः ॥ अष्टोत्त
रतु सहस्रं शतमष्टाधिकं तथा ॥ अष्टाविंशतिरष्टौ वा एकैकस्य तु होमयेत् ॥ होमांते
दक्षिणां दद्याद्धान्यं धेनुं पुष्टिवर्धनी ॥ मत्स्यपुराणे ॥ देवानामपि सर्वेषां सुपांशुः परमार्थ
वित् ॥ स्वेन स्वेनैव मंत्रेण होतव्याः समिधः पृथक् ॥ होतव्यं च घृताभ्यक्तं चरुभक्ष्यादि
कं पुनः ॥ मंत्रैर्दशाहुतीर्दद्याद्धोमं व्याहृतिभिः पुनः ॥ मंत्रैर्दशाहुतीरित्यादि ॥ होमार्थं
संपादितेन समिदादिनिग्रहेण प्रत्येकं दश दशाहुतीर्दद्यात् ॥ अधिदेवताहीनां प्र
त्येक तिस्रस्तिस्र एकैका वा दद्यादित्यर्थः ॥ होमं व्याहृतिभिः पुनरिति ॥ नः स्वाहेत्याघा
निश्च तस्मिंश्च तत्र आहुतयो देयाः ॥ उदङ्मुखाः प्राङ्मुखा वा कुर्युर्ब्राह्मणपुंगवाः ॥

मा.हा. मंत्रवंनस्य कर्त्तव्यास्य रवः प्रतिदैवतं॥ कृत्वा कृतांश्च रूप्यनुकृत ततो होमं समारभेत
१५१ ॥आकृष्णेनेति सूर्याय होमः कार्यो द्विजन्मना॥ आप्यायस्वेति मंत्रेण सोमाय जुहुयात्पुनः॥
अग्निर्मूर्धा दिव इति मंत्रं भौमाय कीर्त्तयेत॥ उद्बुध्यस्वाग्न इत्येवं मंत्रं सोमसुताय वै॥
बृहस्पते अति यदर्य इति च गुरोर्मतः॥ अन्नात्परिस्रुतो रसः शुक्रस्यापि निगद्यते॥ श
नैश्चराय तु पुनः शन्नो देवीति होममेत॥ कयानश्चित्र आभुवदिति मंत्रेण होरुदारयेत॥
केतुं कृण्वन्निति ब्रूयात्केतनाम प्रशांतये॥ आ वो राजेति रुद्रस्य पश्चात्प्रैहोमं समाचरे
त॥ आपो हि ष्ठेत्युमायाश्च स्योनेति स्वामिनस्तथा॥ विष्णोरिदं विष्णुरिति तत्पिच्छेति स्व
यंभुवः॥ इदमिन्द्रेणात यदिंद्राय जुहुयात्पुनः॥ तथा यमस्य चाग्ने गौरिति होमः प्र १५१
कीर्त्तितः॥ कालस्य ब्रह्मजज्ञानमिति मंत्रः प्रशस्यते॥ चित्रगुप्तस्य वाज्ञातमिति वेद
विदो विदुः॥ अग्निं दूतं वृणीमह इति वह्नेरुदाहृत॥ उदुत्तमं वरुणमित्यपां मंत्रः प्रका

र्त्तितः॥ स्योना पृथिवीत्यंतरिक्षमिति वेदेषु भावतः॥ सहस्रशीर्षा पुरुष इति विष्णोरुदा
हृतः॥ इंद्रायेंद्रो मरुत्वत इति शक्रस्य कथ्यते॥ उत्तानपर्णे सुभग इति देव्याः समार
भेत॥ प्रजापतेः पुनर्होमरुत्वत इति स्मृतः॥ नमोस्तु सर्पेभ्य इति सर्पाणां मंत्र उच्यते॥ ए
ष ब्रह्मा य ऋत्विज इति ब्रह्मणस्तूदाहृतः॥ विनायकस्यानूत इति मंत्रो बुधैः स्मृतः॥ जातवेद
से सुनवाम दुर्गामंत्रो समुच्यते॥ आदित्यत्रस्य रेतस आकाशस्य तु दाहृतः॥ कृणोषि भु
र्मेहनात रक्षायोः प्रकीर्त्तितः॥ राषोउपोऽश्च एवेति चाग्निनो मंत्र उच्यते॥ पूर्णाहुतिं च
मूर्धानं दिव इत्यनिपातयेत॥ ॥अथ होममंत्राः॥ ॥आकृष्णेनेति सूर्यमंत्रस्य हिरं
ण्यस्तूप ऋषिः सविता देवता त्रिष्टुप्छंदः॥ सविताप्रीतये सविताहिं संपादितद्रव्यहो
मे विनियोगः॥ आकृष्णेन रजसा वर्त्तमान इति माध्यंदिनपाठः॥ तैत्तिरीयाणां तु॥ आ
कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च॥ हिरण्ययेन सविता रथेना देवो या

महा.
१८२ तिन्नुवनानिपर्यन् ॥ स्वाहा ॥ ॥ आप्यायस्वेति सोममंत्रस्य गौतमऋषिः सोमो देवता गा
यत्री छंदः ॥ सोमप्रीतये समिदादि संपादितद्रव्यहोमे विनियोगः ॥ ॥ आप्यायस्व स
मेतु ते विश्वतः सोम वृष्ण्यं ॥ भवा वाजस्य संगथे स्वाहा ॥ इमं देवेति मा ध्यंदिनशाखा पठि
तस्य सोममंत्रस्य गौतमऋषिः सोमो देवता त्रिष्टुप् छंदः ॥ अग्निर्मूर्धा इति अंगारकमं
त्रस्य विरूपऋषिः अंगारको देवता गायत्री छंदः ॥ अंगारकप्रीतये समिदादि संपा
दितद्रव्यहोमे विनियोगः ॥ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं । अपां रेतांसि
जिन्वति ॥ स्वाहा ॥ बु० ॥ उद्बुध्यस्वेति बुधमंत्रस्याग्निरृषिः ॥ बुधो देवता त्रिष्टुप् छंदः ॥
बुधप्रीतये समिदादि संपादितद्रव्यहोमे विनियोगः ॥ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमि १८२
ष्टापूर्ते सं सृजेथामयं च ॥ पुनः कृण्वंस्त्वा पितरं युवानमन्वातांसीत्वयि तंतुमेत
स्वाहा ॥ उद्बुध्यध्वमिति बुधमंत्रस्य बुधऋषिर्बुधो देवता त्रिष्टुप् छंदः ॥ अग्ने विवस्वदुष

सः इति बुधमंत्रस्य प्रस्कण्वऋषिः बुधो देवता बृहती छंदः ॥ ॥ बृहस्पते अति यदर्य इ
ति बृहस्पतिमंत्रस्य गृत्समदऋषिः बृहस्पतिर्देवता त्रिष्टुप् छंदः ॥ बृहस्पतिप्रीत
ये समिदादि संपादितद्रव्यहोमे विनियोगः ॥ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति
क्रतुमज्जनेषु ॥ यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रं ॥ स्वाहा ॥ बृहस्प
ते परि दीया इति बृहस्पतिमंत्रस्याप्रतिरथऋषिः बृहस्पतिर्देवता त्रिष्टुप् छंदः ॥ ॥ अन्ना
त्परिस्रुतो रसमिति तैत्तिरीयशाखापरिपठितस्य शुक्रमंत्रस्य विश्वेदेवकांडं तःप
विता विश्वेदेवा ऋषयः शुक्रो देवता षट्पदा जगती ॥ शुक्रप्रीतये समिदादि संपादि
तद्रव्यहोमे विनियोगः ॥ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं ॥ ऋतेन सत्यमि
न्द्रियं विपानं शुक्रमंधसः ॥ इंद्रस्येंद्रियमिदं पयोमृतं मधु ॥ स्वाहा ॥ अयं मंत्रस्तैत्ति
रीयब्राह्मणे द्वितीयकांडे षष्ठप्रपाठके द्वितीयानुवाके समाम्नातः ॥ तस्मिन्ननु

वाक् आद्यंतयोः कृतेन सत्यमिंद्रियमित्यादि वाक्यचतुष्टयं समाम्नातः॥ मध्येपि तत्र तत्र कृ
तेन सत्यमिंद्रियमित्येकं वाक्यं पठितं॥ अयं च मध्यपाठ कृतेन त्यादि वाक्यचतुष्टयं समाम्ना
तः॥ मध्येपि वक्ष्यमाणानुषंगद्योतनार्थः॥ अतएवाद्यंतयोः वाक्यचतुष्टयस्य समाम्नानं॥
अन्नात्परिस्रुत इत्यस्य सैव मध्ये दिनत्रयादित्यानुसारेण॥ भिषक्सरस्वती नाम रूपमंत्र॥ शुक्रो दे
वताऽत्र तिजगती छंदः॥ चिंतामणौ तु प्रजापतिऋषिः जगती छंदः॥ इत्युक्तं॥ तद्व्याख्या
तरास्ति प्रायेण॥ शुक्रं ते अन्यदिति॥ शुक्रमंत्रस्य भरद्वाजऋषिः शुक्रो देवता त्रिष्टुप् छं
दः॥ शन्नो देवीरिति शनैश्चरमंत्रस्य सिंधुद्वीपऋषिः शनैश्चरो देवता गायत्री छंदः शनैश्च
रप्रीतये समिदादिसंपादितद्रव्यहोमे विनियोगः॥ शन्नो देवीरभिष्टय आपो भवंतु पी १८३
तये॥ शंयोरभिस्रवंतु नः॥ स्वाहा॥ शमग्निरिति शनैश्चरमंत्रस्य इरिंबिठिऋ
षिः शनैश्चरो देवता उष्णिक् छंदः॥ कयानश्चित्र इति राहुमंत्रस्य वामदेवऋषिरा

हुर्देवता गायत्री छंदः॥ राहुप्रीतये समिदादिसंपादितद्रव्यहोमे विनियोगः॥ कयान
श्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृता॥ स्वाहा॥ कांडात्कांडात्प्ररो
हंतीति राहुमंत्रस्य प्रजापतिऋषिः राहुर्देवता अनुष्टुप् छंदः॥ केतुं कृण्वन्निति मंत्र
स्य मधुच्छंदा ऋषिः केतवो देवताः गायत्री छंदः केतुप्रीतये समिदादिसंपादितद्रव्य
होमे विनियोगः केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे॥ समुषद्भिरजायथाः॥ स्वाहा
॥ ॥ इति ग्रहमंत्राः॥ ॥ अथाधिदेवताः॥ आ वो राजानमिति सूर्याधिदेवता रुद्र
मंत्रस्य वामदेवऋषिः रुद्रो देवता त्रिष्टुप् छंदः॥ रुद्रप्रीतये संपादितसमिदादिद्रव्यहो
मे विनियोगः॥ आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः॥ अग्निं पुरा तन
यित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वं स्वाहा॥ त्र्यंबकमिति रुद्रमंत्रस्य वसिष्ठऋ
षिः रुद्रो देवता अनुष्टुप् छंदः॥ कद्रुद्रायेति रुद्रमंत्रस्य कण्वऋषिः रुद्रो देवता गा

गायत्री छंदः ॥ ॥ आपो हि ष्ठेति सोमाधिदेवतानंतोग्या मंत्रस्य सिंधुद्वीप ऋषिः उमा देवता गायत्री
छंदः ॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन महे रणाय चक्षसे स्वाहा ॥ गौरीर्मिमायेत्यस्य मं
त्रस्य दीर्घतमा ऋषिः ॥ उमा त्रिका गौरी देवता जगती छंदः ॥ श्रीश्च ते इत्यस्य मंत्रस्य प्रजा
पति ऋषिः ॥ उमा देवता अनुष्टुप् छंदः ॥ श्रीश्च इति तैत्तिरीय पाठः ॥ ॥ स्योना पृथिवीति मं
गलाधिदेवतानंत स्कंद मंत्रस्य मेधातिथि ऋषिः स्कंदो देवता गायत्री छंदः ॥ स्कंद प्रीतये
समिदादि संपादित द्रव्य होमे विनि० ॥ स्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नः श
र्म सप्रथः ॥ स्वाहा ॥ यदक्रंद इति स्कंदमंत्रस्य मेधातिथि ऋषिः ॥ स्कंदो देवता त्रिष्टुप् छंदः वि
तामणोतु ॥ यदक्रंदेति मेधातिथि ऋषिः ॥ स्कंदो देवता गायत्री छंदः इत्युक्तं ॥ तन्मंत्रात
दं ॥ ॥ इदं विष्णुरिति बुधाधिदेवत विष्णुमंत्रस्य मेधातिथि ऋषिः विष्णुर्देवता गायत्री
छंदः ॥ विष्णु प्रीतये समिदादि संपादित द्रव्य होमे विनियोगः ॥ इदं विष्णुर्विचक्रमे त्रेधा

निदधे पदं ॥ समूढमस्य पांसुरे स्वाहा ॥ सहस्रशीर्षेति विष्णुमंत्रस्य नारायण ऋषिः
पुरुषो देवता अनुष्टुप् छंदः ॥ ॥ तमिन्द्र प्रथमा आसीति बृहस्पत्यधिदेवतानंत
ब्रह्ममंत्रस्य गर्ग ऋषिः ॥ ब्रह्मा देवता बृहती छंदः ॥ ब्रह्म ॥ प्रीतये समिदादि संपादि
त द्रव्य होमे विनियोगः ॥ तमिन्द्र प्रथमं अस्य प्रेकृतं ऋतस्क वि ॥ तां विप्रासः समिधानदी
दिवक्षा विवासंति वेधसः ॥ स्वाहा ॥ ब्रह्मणस्पते ब्रह्मयुजेति ब्रह्ममंत्रस्य विश्वामित्र ऋषि
॥ ब्रह्मा देवता त्रिष्टुप् छंदः ॥ इन्द्रमिद्देवतातम इति शुक्राधिदेवतानंत इन्द्रमंत्रस्य मेधा
तिथि ऋषिः ॥ इन्द्रो देवता बृहती छंदः ॥ इन्द्र प्रीतये समिदादि संपादित द्रव्य होमे विनि
योगः ॥ ॥ इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ॥ इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य
सातये स्वाहा ॥ इन्द्रायेन्दो मरुत्वत इतीन्द्रमंत्रस्य कश्यप ऋषिः ॥ इन्द्रं वो विश्वतस्परीदमं
त्रस्य मधुच्छंदा ऋषिः ॥ इन्द्रो देवता गायत्री छंदः ॥ ॥ आयं गौरिति राह्वधिदेव

महा॰ १८५ तागायत्रीछंदः॥यमप्रीतये॥ऽनेनयममंत्रस्यसर्पराज्ञाऋषिः॥यमोदेवतागायत्रीछं
दः॥यमप्रीतयेसमिदादिसंपादितद्रव्यहोमेविनियोगः॥आयंगौःपृश्निरक्रमीदसद
न्मातरंपुरः॥पितरंचप्रयन्त्स्वः॥स्वाहा॥इमंयमेतिमयममंत्रस्ययमऋषिः॥यमोदेवता
त्रिष्टुप्छंदः॥॥ब्रह्मजज्ञानमितिशिराकाधिदेवतान्तकालमंत्रस्यविश्वामित्रऋषिः॥का
लोदेवतात्रिष्टुप्छंदः॥कालप्रीतयेसमिदादिसंपादितद्रव्यहोमेविनियोगः॥॥ब्रह्मज
ज्ञानंप्रथमंपुरस्ताद्विसीमतः॥सुरुचोवेनआवः॥सबुध्न्याउपमाअस्यविष्ठाः॥सत
श्चयोनिमसतश्चविवः॥स्वाहा॥कार्षिरसीतिकालमंत्रस्ययजुषःसोमऋषिः॥का
लोदेवताअथर्वाषिरसीत्यस्यमघवाऋषिःकालोदेवतात्रिष्टुप्छंदः॥यमायसो १८५
ममितिकालमंत्रस्ययमऋषिःकालोदेवताअनुष्टुप्छंदः॥॥आज्ञातमितिकेत
धिदेवतान्तचित्रगुप्तमंत्रस्यवैश्वदेवकाण्डेसमाम्नातात्विश्वेदेवाऋषयः॥चित्रगु

प्तोदेवताअनुष्टुप्छंदः॥चित्रगुप्तप्रीतयेसमिदादिसंपादितद्रव्यहोमेविनियो
गः॥आज्ञातमनाज्ञातमनंतसतत्वमत्॥जातवेदःसंधेहित्वंवेत्थयथायथंस्वा
हा॥चिंतामणौतु॥आज्ञातमितिसोमऋषिः॥चित्रगुप्तोदेवताजगतीछंदः॥इत्यकं
॥तत्रैवमन्त्रिभाम्॥सौम्यकाण्डेपिसमाम्नातात्सोमस्यऋषित्वंचागस्त्यातराशिप्रायेण
चित्रावसोःस्वस्तितइतिचित्रगुप्तमंत्रस्ययजुषआग्नेयकाण्डांतःपतितादग्निऋषि
॥चित्रगुप्तोदेवतात्रिष्टुप्छंदः॥॥इत्यधिदेवतामंत्राः॥॥अथप्रत्यधिदेवतामंत्राः
॥॥अग्निंदूतमितिसप्तग्रहस्याधिदेवतान्ताग्निमंत्रस्यातिथिऋषिः॥अग्निर्देवता
गायत्रीछंदः॥अग्निप्रीतयेसमिदादिसंपादितद्रव्यहोमेविनियोगः॥अग्निंदू
तंवृणीमहेहोतारंविश्ववेदसं॥अस्ययज्ञस्यसुक्रतुं॥स्वाहा॥॥उदुत्तममिति
सोमग्रहस्याधिदेवतान्तानामपांमंत्रस्यशुनःशेपऋषिआपोदेवतात्रिष्टुप्छंदः॥

अग्निप्रीतये समिदादि संपादित द्रव्य होमे विनियोगः॥ उदुत्तमं वरुण पाशमस्मद
वाधमं विमध्यमं श्रथाय॥ अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वा
हा॥ पृथिव्यंतरिक्षमिति मंगलमस्याधिदेवतानृतस्य पृथ्वी मंत्रस्य प्रजापतिर्ऋ
षिः पृथिवी देवता॥ उष्णिक् छंदः॥ अनुष्टुवा पृथिवी प्रीतये समिदादि संपादित द्रव्य
होमे विनियोगः॥ पृथिव्यंतरिक्षं द्यौरापः कनिकं राक्षि धुक्ष्मापो मरुतो मारमतीघ
र्मा ज्योतिः स्वाहा॥ सहस्रशीर्षा पुरुष इति बुधमस्याधिदेवतानृत विष्णु मंत्रस्य ना
रायण ऋषिः विष्णुर्देवता अनुष्टुप् छंदः॥ विष्णु प्रीतये समिदादि संपादित द्रव्य होमे
विनियोगः॥ ॥सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ स भूमिं सर्वतस्पृत्वा १९६
त्यतिष्ठद्दशांगुलं॥ स्वाहा॥ इंद्रायेंद्रो मरुत्वत इति बृहस्पतिमस्याधिदेवतानृतेंद्र मं
त्रस्य कश्यप ऋषिः॥ इंद्रो देवता गायत्री छंदः॥ इंद्र प्रीतये समिदादि संपादित द्र

व्य होमे विनियोगः॥ इंद्रायेंद्रो मरुत्वते पवस्व मधुमत्तमः॥ ऋतस्य योनिमासदन् स्वाहा
॥ उत्तानपर्णे सुभगे इति शुक्रमस्याधिदेवतानृत शची मंत्रस्य इंद्राणी ऋषिः॥ शची
इंद्राणी देवता अनुष्टुप् छंदः॥ इंद्राणी प्रीतये समिदादि संपादित द्रव्य होमे विनियोगः उ
त्तानपर्णे सुभगे देवजूते सहस्वति सपत्नीमे पराधम पतिं मे केवलं कुरु स्वाहा॥ चिं
तामणौ तु प्रजापति ऋषिरिष्टकं तच्छाखांतर पाठानुसारेण॥ प्रजापते न त्वदिति त्र
स्याधिदेवतानृत प्रजापति मंत्रस्य हिरण्यगर्भ ऋषिः प्रजापतिर्देवता त्रिष्टुप् छंदः॥ प्र
जापति प्रीतये समिदादि संपादित द्रव्य होमे विनियोगः॥ ॥प्रजापते न त्वदेतान्यन्यो
विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयी
णां स्वाहा॥ ॥नमोस्तु सर्पेभ्य इति राहुमस्याधिदेवतानृत सर्प मंत्रस्य सर्पराज्ञी ऋषि
॥ सर्पा देवता अनुष्टुप् छंदः॥ सर्प प्रीतये समिदादि संपादित द्रव्य होमे वियोगः॥ न

म.हा. मोस्तुसर्पेभ्यो येकेच पृथिवीमनु। येअंतरिक्षेयेदिवितेभ्यः सर्पेभ्योनमः स्वाहा॥ ॥एष
१८७ ब्रह्मेतिकेतुमत्स्यधिदेवतामंत्रस्यवैश्वदेवकांतःपातित्वेनविश्वेदेवाऋषयः
॥ब्रह्मादेवताद्विपदागायत्रीब्रह्मप्रीतयेसमिदादिसंपादितद्रव्यहोमेविनियोगः॥ए
षब्रह्मायऋत्विजऋत्विग्यइंद्रोनामश्रुतोगणेस्वाहा॥चिंतामणौतुकश्यपऋषिरिन्द्र
क्कं॥तत्रत्र्यस्वांतरपाठोहेतुः॥इतिप्रत्यधिदेवतामंत्राः॥ ॥अथविनायकादिपंच
देवतामंत्राः॥ ॥आनूनइतिविनायकमंत्रस्यकुसीदीऋषिःविनायकदेवतागाय
त्रीछंदः॥विनायकप्रीतयेसमिदादिसंपादितद्रव्यहोमेविनियोगः॥आनूनइंद्रवृत्र १८७
मंत्रंचित्रंयात्वसंगत्वायमहाहस्तीदक्षिणेनस्वाहा॥ ॥जातवेदसइतिदुर्गामंत्रस्यक
श्यपऋषिः॥दुर्गादेवतात्रिष्टुप्छंदः॥दुर्गाप्रीतयेसमिदादिसंपादितद्रव्यहोमेविनि
योगः॥जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः॥सनःपर्षदतिदुर्गाणि

विश्वानावेवसिंधुंदुरितात्यग्निः॥स्वाहा॥ ॥क्राणाशिशुरितिवायुमंत्रस्यत्रितऋषिः॥
वायुर्देवताउष्णिक्छंदः॥वायुप्रीतयेसमिदादिसंपादितद्रव्यहोमेविनियोगः॥ ॥
क्राणाशिशुर्महीनांहिन्वन्नृतस्यदीधितिं॥विश्वापरिप्रियाभुवदधद्विता स्वाहा॥ ॥आ
दित्प्रत्नस्येत्याकाशमंत्रस्यवत्सऋषिःआकाशोदेवतागायत्रीछंदः॥आकाशप्रीतये
समिदादिसंपादितद्रव्यहोमेविनियोगः॥आदित्प्रत्नस्यरेतसोज्योतिःपश्यंतिवासरं
॥परोयदिध्यतेदिवास्वाहा॥ ॥एषोउषेत्यश्विमंत्रस्यप्रस्कण्वऋषिःअश्विनौदेवता
गायत्रीछंदः॥अश्विप्रीतयेसमिदादिसंपादितद्रव्यहोमेविनियोगः॥एषोउषाअपू
र्व्याव्युच्छतिप्रियादिवः॥स्तुषेवामश्विनाबृहत्स्वाहा॥ ॥एभिर्मंत्रैःसूर्याद्यावाहितदेव
तानांपूर्वोक्तप्रकारेणहोमंकृत्वाज्यादिहोमकरणपक्षेजपादीन्कृत्वाप्रायश्चित्ता
हुतीर्हुत्वामूर्धानंदिवइत्यनेनपूर्णाहुतिंजुहुयात्॥ ॥मूर्धानंदिवइत्यस्यपूर्णाहुतिमं

महा. त्रस्यत्तरद्वाजऋषिः॥ वैश्वानरो देवता॥ त्रिष्टुप्छंदः॥ पूर्णाहुतिहोमे विनियोगः॥ मूर्धानं दि
१५८ वो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं॥ कविं सम्राजमतिथिं जनानामासन्ना
पात्रं जनयंत देवाः॥ स्वाहा॥ इयं च पूर्णाहुतिः फलसहिता भवति॥ केचन स्विष्टकृद्धो
ममिच्छंति॥ अतः स्विष्टकृद्धोमपक्षे प्रायश्चित्ताहुतिभ्यः पूर्वं जयादिहोमानंतरं स्विष्ट
कृद्धोमः॥ जयादिहोमाकरणपक्षे प्रायश्चित्ताहुतिभ्यः पूर्वमेव स्विष्टकृत्॥ यथाह
गार्ग्निजः॥ प्राक्स्विष्टकृत आवापइति॥ अस्यार्थः॥ आवापः प्रक्षेपः॥ ग्रहयज्ञे च समिद
दिहोमविहिताः जयादयो हि कर्मसमृद्धिकामेन कृ यंते॥ अतः समृद्धिकामेनात्र प्रक्षिप्यं
तइत्यावापो जयादयः॥ एवमन्यत्राप्यावापत्रयादिस्यार्थो ज्ञेयः॥ आवापः स्विष्टकृतः स्वि १५८
ष्टकृद्धोमात्प्राग्भवतीत्यर्थः॥ अग्नये स्विष्टकृते स्वाहेति स्विष्टकृद्धोममंत्रः॥ अथवा कूष्मांडहो
मप्रकरणोक्तं बोध्यम्॥ अतः स्विष्टकृद्धोमात्प्राक् सप्तर्षिरेखोक्तप्रकारेण जयादिहोम

प्रभृतीनुपहोमान्कृत्वा ततः स्विष्टकृतं च कृत्वाथ बर्हिर्हवनपरिधिप्रहरणादि प्राय
श्चित्तहोमांतकर्म निर्वर्त्य पूर्णाहुतिं कृत्वा फलं च समस्तकामो वसोर्धारां जुहोति॥ तत्प्रका
रस्तु चिंतामणौ घृतकुंभं वसोर्धारां पातयेदनलोपरि॥ घृतधारां ततः सम्यगग्नेस्तु प
रिपातयेत्॥ आवर्तयेत्सूक्तमाग्नेयं वैश्वानरं रौद्रमैंद्रं॥ महावैश्वानरं साम ज्येष्ठसामं
च पाठयेत्॥ अन्यो प्रकारः॥ वृक्षे रूपरिस्तंभद्वयं विधृत्तौ मौदुंबरी स्रुक्प्रमाणस्रुचं
विधायतदुपरि स्रुवं खल्वाविधृतेन निर्मलघृतपूरितेन कुंभेन निधायमवमात्रछिद्रेण ज्यं
मुंचताग्नेरुपरि वसोर्धारां पातयेत्॥ तस्यां च घृतधारायां स्रक्स्रवनालितमाग्नौ पत
त्यामाग्नेयादीनि सूक्तानि श्रावयेत्॥ तत्राग्नेयं अग्निमीळे पुरोहितमित्यादि मधुच्छं
दसआर्षं गायत्रीछंदस्कं॥ वैश्वानरं तु विश्वोर्तु कमित्यादि षड्ऋचं दीर्घतमसआर्षं त्रि
ष्टुप्छंदस्कं रौद्रं च॥ आ ते पितर्मरुतामिति पंचदशर्चं गृत्समदार्षं त्रैष्टुभं॥ रौद्रं॥ स्वारि

महा. १८८ एवेति दृशर्चं गायत्रं॥ महावैश्वानरं॥ महावैश्वानराख्ये आरण्यकेष एव प्रपाठके साम
द्वयं॥ एतद्वैश्वानरार्षं नरदैवतं जगतीपथ्याबृहतीछंदस्कं॥ ज्येष्ठमासस्तु मूर्धानं दिव
इत्यस्याम् ऋचि गीतं ततश्च भरद्वाजार्षं वैश्वानरदैवतं त्रिष्टुप्छंदः सुधारायां विहितासु मन्
काश्च वाकारुद्रविधानप्रकरणे दर्शिताः॥ एते षामाग्नेयादिसूक्तानाम् अनेकत्वात्॥ गी
तात्मकस्य सर्वस्य लिखितुम् अशक्यत्वात्॥ एतान्याग्नेयादिसूक्तानि यावन्तोन प्रदर्शिता
ति यानि चाग्निमीळे विशोनु कांश्चाते पितः स्वादिष्ठयेति भूतीकृतः सूक्तानि प्रदर्शिता
नि तानि प्रदर्शनार्थानि अन्यतश्चान्यपि अग्न्यादिदैवत्यानि स्वस्वशाखाप्रसिद्धानि
यथाम्नासं पठेत्॥ ये च सूर्यसोमादिप्रकारा आहुलेनते लेवमाद्यो मंत्राः पूर्वं प्रदर्शि १८८
ताः॥ ते षु पञ्चलक्षणार्थाः॥ तस्माच्चरणस्वाध्यायपरिपठिताः सूर्यसोमादिप्रकाराः काम्य
न्यासे होमादिकर्म सुष्ठु स्यात्॥ तथा तत्र दर्शाद्यपि विज्ञेयं॥ अथ प्रकृतोपयुक्तामी

मांसा स्मर्यते॥ तद्यथा॥ चतुर्धा विधिः विनियोगविधिः॥ प्रयोगविधिरधिकारविधिरिति॥
अज्ञातज्ञापनस्तु उत्पत्तिविधिः॥ एतच्च मीमांसाया द्वितीयाध्यायप्रमेयं॥ शेषत्वज्ञाप
कविनियोगविधिः॥ एतच्च तृतीयाध्यायप्रतिपाद्यं॥ प्रयोगविधिरिति कर्तव्यताविधि
॥ अंगानां क्रमादिविधिरित्यर्थः॥ एतत्तु चतुर्थपंचमाध्याययोः प्रमेयं॥ अंगानां क्र
मादिविधिरित्यर्थः॥ एतत्तु चतुर्थपंचमाध्याययोः प्रमेयं॥ अधिकारविधिः॥ कर्मफ
लसंबंधबोधनः॥ कर्तृविशेषविधिरिति यावत्॥ अयं च विधिः षष्ठाध्यायप्रमेयं॥ ए
वं स्थिते मंत्रब्राह्मणवाक्यानि उत्पत्तिविनियोगादिविधायकानि विद्यन्ते॥ तत्र च तावद्वि
विधमन्त्रस्तु निर्वाहो संपद्यते॥ यत्र त्रीण्येव वाक्यानि तत्र यथायोगं त्रिभिरेव वाक्यै
र्विधिचतुष्टयनिर्वाहः॥ यत्तु द्वे तत्र द्वाभ्यां विधिचतुष्टयं निष्पद्यते॥ यत्र चैकं तत्रैक
मेव वाक्यं विध्यवस्था चतुष्टयमनुतनवतीत्येवं मीमांसानिर्णयः॥ एवमेव प्रकृतेप्या

आवाहनाद्यं न भवन्ति विसर्जनान्तेषूपचारेषु मन्त्रमन्त्रं एव उक्ता विहितास्तत्र तत्र तैस्तैर्मं
त्रैस्ते उपचाराः कर्त्तव्याः येषूपचारेषु विशेषेण विनियुक्ता मन्त्रास्तेषूपचारेषु तन्त्रे देव
ताप्रकाशकाः ॥ आवाहनहोमादिषु विनियुक्ता एवं मन्त्राः कस्मिंश्चिदंशे यतान्तजते यथ
अग्निर्मूर्धा दिव इत्यादयो मन्त्रा अग्न्यादि प्रकाशकत्वेनाग्न्यादिदेवतानां साक्षात् सौमादिप्र
काशकास्तथाप्येत आगार्हपत्यमनुपतिष्ठत इति प्रकाशिका माकृत्य गार्हपत्यो
पस्थाने द्वेषत्ववचनाद्यथा कथंचिदिन्द्रादिपराणामपि परमेश्वर्यमित्याद्यर्थचित
त्तिनयोगत्वमागार्हपत्येव तिरिवाग्निर्मूर्धा दिव इति मंत्र सौमादीप्रकाशनमेदित्यादि
तिः एवं प्रदर्शितवाक्यैरग्निर्मूर्धेत्यादिमन्त्राणां सौमादिद्योपत्वबोधनादग्न्यादिपराणां
सौमादिषु यथा कथंचिद्वृत्तिरवगतव्या सा च वृत्तिरेवं गसमारोपिता तोरग्निशब्द उत्त
रत्रैमोपि गमनशीलः ॥ अथवा ग्निवत्सौमस्याग्निशब्दवाच्यत्व उद्बुध्यस्वाग्न इत्यत्रा

प्यग्निशब्दः एवं बहुधे वर्त्तते ॥ तेजो न्यथिष्वाहा ॥ उद्बुध्यस्वेत्यस्मिन्पदे बुध वर्ण
श्रुतेर्वा अप्यत्तरसाम्यात् विद्यादितिश्रुते ॥ यथा पद्मपकः कमपो नवतीनिरुक्तिः ॥
अन्यान्यरिक्त तदुस्तस्मिन्मंत्रे विपानंमुक्त मधस्य इति युक्तपरं नाम सामाद्युक्तेव
र्त्तते तदन्यो देवी रिति मंत्रेशानि नामस्मारकस्यशान्त इति वर्ण द्वयस्य विद्यमानत्वान्त
मंत्रशानिद्योतकः ॥ कथानग्नि तन्त्रा तुवहित्यत्र चित्रपदं अयमते चित्रस्य राज्ञः यतः
त्रिरसा न हते ॥ अन्नमेव हि शान्तत्राप्यहनी यं राव तत्र देवताप्रकाशकत्वमवगत
व्यं ॥ यातेनोच्यते सा देवतेति सर्वानुक्रमणिकापरिभाषायामभिधानात् ॥ अन्य
थान्या पूज्या अन्या मंत्राभिधेयेति विरोधः स्यात् ॥ ॥ अथ प्रकृतमनुसरामः ॥ एवं पू
जां कृत्वानन्तरं वसुधामयस्याङ्कप्रकारेण पूजापात्रविमोकादिकर्म कृत्वा पूर्वस्यां दि
तवारुणक ज्ञशमाशमवक्ष्यमाणमंत्रैर्वक्ष्यमाणलक्षणोपेतैर्द्विजैः पञ्चाग्नुत्वारि

परिहृतस्य यजमानस्याभिषेकः कार्यः॥ तथा च मत्स्यपुराणे॥ ॥ अथाभिषेकमंत्रे
ण वाद्यमंगलगीतकैः॥ पूर्णकुंभेन तेनैव होमांते प्रागुदङ्मुखैः॥ अव्यंगावयवैर्ब्रह्म
न् हंसस्वरग्रामसमन्वितैः॥ यजमानस्य कर्त्तव्यश्चतुर्भिः स्नपनं द्विजैः॥ अभिषेकमंत्रे
णाभिषेकवचनं मंत्रघोषाद्यभिप्रायेण वाद्यमंगलगीतकैरिति सहार्थे तृतीया॥ कुं
भेन तेनैवेति तेन पूर्वमीशानदिग्भागस्थापितेन एवं स्थापितेन एवं स्थापितेन एवं
स्थापितेन पूर्वमीशानदिग्भागस्थापितेन एवं स्थापितेन एवंकारेण कलशान्तरे ण
तदुदकं नीत्वाभिषेकोऽभिषिच्यते प्रागुदङ्मुखैरिति स्नपनकर्तृद्विजविशेषणं अय
मभिप्रायः॥ यदि यजमानः पूर्वाभिमुखः स्यात्तर्हि ऋत्विज उत्तराभिमुखा ईशानदि २०१
ङ्मुखा वा॥ अथ यजमान उत्तराभिमुखः॥ तदा ऋत्विजः पूर्वाभिमुखा ईशानाभि
मुखा वेति॥ कुतः दिक्क्रमस्याभिमांगल्यत्वात्॥ चतुर्भिरिति॥ एतच्च बहुर्त्विगुपल

क्षणार्थं॥ अथाभिषेकमंत्राः॥ तत्र वैदिकाः॥ स्वशाखोक्ता ग्राह्याः॥ स्मार्त्तमंत्रा
स्तु॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः॥ वासुदेवो जगन्नाथस्तथा संकर्ष
णो विभुः॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते॥ आखंडलोऽग्निर्भगवान्यमो वै
निर्ऋतिस्तथा॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः॥ ब्रह्मणा सहिताः सर्वे
दिक्पालाः पांतु वः सदा॥ कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥ बुद्धिर्ल
ज्जा वपुः शांतिस्तुष्टिः कांतिश्च मातरः॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः॥
आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः॥ ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च तर्पि
ताः॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः॥ ऋषयो मुनयो गावो देवमातर एव च॥ दे
वपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहना
नि च॥ औषधानि च रत्नानि कालस्यावयवाश्च ये॥ सरितः सागराः शैलास्तीर्थानि

महा॰
२०२

जलशानदः ॥ एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये ॥ एवं स्नापयित्वा पूर्वोपकल्पि
तैः सर्वौषधगंधादिभिः सपत्नीकं यजमानं स्नापयेत् ॥ सर्वौषधादिभिः स्नानं नाम
तैर्मस्तकप्रभृति गात्राणि अनुलिप्य पश्चान्निर्मलोदकेन स्नानं ततः शुक्लांबरधरः
स्यात् ॥ अग्नेः पश्चादवस्थितो ऋत्विग्भ्यो दक्षिणां दद्यात् ॥ मत्स्यपुराणे ॥ ततः शुक्लांबर
धरः शुक्लमाल्यानुलेपनः ॥ सर्वौषधैः सर्वगंधैः स्नापितो द्विजपुंगवैः यजमानः सपत्नी
क ऋत्विजश्च समाहितः दक्षिणाभिः प्रयत्नेन पूजयेद्गतविस्मयः ॥ अथ नामं दक्षिणा
दानप्रकारः ॥ ॥ वरणक्रमेणोदङ्मुखोपविष्टानृत्विजः प्राङ्मुखोपविष्टो यजमानः कुश
यवजलपाणिः सन्नवग्रहमाणतत्तद्देवतामंत्रं पठित्वा ऋतस्मै तस्य कर्मणः ॥ साद्गुण्या
र्थममुकसगोत्रायामुकशर्मणेऽमुकवेदाध्यायिनेऽमुकद्रव्यं दक्षिणात्वेन संप्रददे
इति दक्षिणात्वेन दातुमुत्सृजामीति वा वदेत् ॥ दक्षिणा अपि मत्स्यपुराणे ॥ सूर्याय क २०२

पिलां धेनुं दद्याच्छंखं तथेंदवे ॥ रक्तं धुरंधरं दद्याद्भौमाय ककुदाधिकं ॥ बुधाय जा
तरूपं तु गुरवे पीतवाससी ॥ श्वेताश्वं दैत्यगुरवे ॥ कृष्णां गामर्कसूनवे ॥ आयसं रा
हवे दद्यात्केतवे छागमुत्तमं ॥ सुवर्णेन समाः कार्या यजमानेन दक्षिणाः ॥ धुरंधरोन
ड्वान् जातरूपं रूपवर्णं सुवर्णेन समा इति ॥ सूर्यस्य दक्षिणा धेनुर्यावता मूल्येन यथा
दक्षिणा स्युर्न भवति तावता वर्धमानस्य सुवर्णं तस्यास्तस्याः पूरणाय तत्समकाञ्चनमे
व दातव्यं ॥ न चात्र सुवर्णमंत्रः पृथक्पाठनीयः सुवर्णमप्यवादद्यात्कुरु वा ये न तुष्य
ति ॥ स्वमंत्रेण प्रदातव्याः सर्वाः सर्वत्र दक्षिणा इति चिंतामणौ दर्शनात् ॥ एतच्चाल्पध
नविषयं ॥ प्रभूतधनेन तु अल्पमूल्यसमं स्वर्णं दातव्यं ॥ गवाद्यभावे तु तत्तन्मूल्यं सुव
र्णं दातव्यं ॥ तत्राप्यल्पधनेन प्रथमो पायो मूल्यं ॥ तत्राप्यशक्तश्चेद्गवामत्राद्वेनि
घस्मात्तदर्धपादमेव वेति दिशा सर्वत्र परिकल्पनीयं ॥ तत्र क्रमेणामंत्रा अपि मत्स्य

महा.
२०३

पुराणे॥ कपिलादानमंत्रः॥ कपिले सर्वदेवानां पूजनीयासि रोहिणि॥ तीर्थदेवमयी
यस्मादतः शांतिं प्रयच्छ मे॥ ॥शंखदानमंत्रः॥ पुण्यस्त्वं शंख पुण्यानां मंगलानां च
मंगलं॥ विष्णुना विधृतो नित्यमतः शांतिं प्रयच्छ मे॥ ॥वृषभदानमंत्रः॥ ॥धर्मस्त्वं वृषरू
पेण जगदानंदकारकः॥ अष्टमूर्तेरधिष्ठानमतः शांतिं प्रयच्छ मे॥ ॥हिरण्यदानमंत्रः॥
हिरण्यगर्भगर्भस्त्वं हेमबीजं विभावसोः॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे॥ ॥
पीतवस्त्रदानमंत्रः॥ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं॥ प्रदानात्तस्य मे विष्णु
रतः शांतिं प्रयच्छ मे॥ ॥अश्वदानमंत्रः॥ विष्णुरश्वस्य रूपेण यस्मादमृतसंभवः॥
चंद्रार्कवाहनं नित्यमतः शांतिं प्रयच्छ मे॥ ॥धेनुदानमंत्रः॥ धेनुस्त्वं पृथिवी सर्वा यस्मा २०३
त्केशवसंस्थिता॥ सर्वपापहरा नित्यमतः शांतिं प्रयच्छ मे॥ ॥लोहदानमंत्रः॥ यस्मा
दायसकर्माणि त्वदाधाराणि सर्वदा॥ हलोहलांगलादीनि तस्माच्छांतिं प्रयच्छ मे॥ ॥छा

गदानमंत्रः॥ यस्मात्त्वं छागयज्ञानामाकृतिर्व्यवस्थितः॥ यानं विभावसोर्नित्यमतः
शांतिं प्रयच्छ मे॥ ॥तत्र कृष्णोक्तं सुरभ्यदक्षिणात्वावेसवस्योऽरिष्टादिष्टो मयाञ्चाक्तलं
कृतामेकैकां गां दद्यात्॥ तत्र गोदानमंत्रः॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश॥ य
स्मात्तस्मात् शिवं मे स्यादिह लोके परत्र च॥ सर्वेषामपि दक्षिणापक्षेषु पूर्वोक्तदक्षिणाव्यतिरेके
णाशक्या रत्नानि त्रिमिश्रित्य विप्रेभ्यो ब्राह्मणेभ्यो दक्षिणा देयाः॥ एतद्ब्रह्मसतिविन्वे॥ ॥त
त्रशय्यादानमंत्रः॥ ॥यस्मादशून्यं शयनं केशवस्य शिवस्य च॥ शय्या ममाप्यशून्या
स्तु तस्माज्जन्मनि जन्मनि॥ ॥रत्नदानमंत्रः॥ ॥यस्माच्च रत्नमिदानस्य कलां नार्हंति षोडशीं
॥दानान्यन्यानि मे शांतिर्रत्नमिदानाद्भवत्विह॥ एवं ग्रहादीन्संपूज्य दक्षिणादानांतं कर्म कृ
त्वा विसर्जयेत्॥ अथ विसर्जनमंत्रः॥ यांतु देवगणाः सर्वे पूजामादाय पार्थिवात्॥ इष्टका
म्यो विसर्ग्यं॥ अनेन विधिना यस्तु ग्रहपूजां समाचरेत्॥ सर्वान् कामानवाप्नोति प्रेत्य स

यते॥ यस्तु पीडाकरो नित्यमल्पवित्तस्य वा ग्रहः॥ तं तु यत्नेन संपूज्य शेषानप्यर्चयेद्बुध
॥ तं तु यत्नेनेति॥ तं पीडाकरं ग्रहं॥ यत्नेन पूर्वोक्तरीत्या अधिदेवताप्रत्यधिदेवतासहि
तं पूजयित्वा शेषानपि ग्रहान् पुष्पांजल्यादिनियमं यथाशक्ति संपूजयेत्॥ इयं च प्रतिकू
लग्रहपूजा तत्तद्वासरे कर्त्तव्या॥ राहुकेत्वोः एकवाराभावान्मंदवारो ग्राह्यः॥ त्रा
न्यादीन्मंदवारे तत्प्रयतो नरः॥ इति बौधायनकारिकातः॥ ग्रहगणो नरैः शास्त्रमाल
णाच्च विशेषतः॥ पूजिताः पूजयंत्येते निर्दहंत्यपमानिताः॥ तस्मात्तद्दक्षिणाहीनं
कर्त्तव्यं नतिमिच्छता॥ विवाहोत्सवयज्ञेषु प्रतिष्ठादिकर्मसु॥ निर्विघ्नार्थं मुनिश्रेष्ठ
तथोद्वेगे—तेषु चेति॥ ॥ इति नवग्रहमखः॥ ॥ अथ कर्मविपाकप्रकरणोपयुक्तनिष्क
दिप्रमाणं॥ याज्ञवल्क्यः॥ जालसूर्यमरीचिस्थं त्रसरेणु रजः स्मृतं॥ तेष्टौ लिक्षा तु तास्ति
स्रो राजसर्षप उच्यते॥ गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः॥ कृष्णलः पंच ते माष

स्ते सुवर्णस्तु षोडश॥ पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तितं॥ तेत्र मः कृष्णल इत्यादि
॥ ते मध्यमयवास्त्रयः कृष्णलः कृष्णलो गुंजा॥ ते कृष्णलाः पंच माषाः षोडश सुवर्णः॥ चत्वा
रः सुवर्णाः पलं पंच वा सुवर्णाः पलं॥ अगस्तिप्रोक्तेपि॥ यवः स्यात्सर्षपैः षड्भिर्गुंजा च
यस्यात्त्रिभिर्यवैः॥ गुंजाभिः पंचभिश्चैको माषकः परिकीर्तितः॥ तैर्वै षोडशभिर्माषैः सु
वर्णस्तैः पुनः स्मृतः॥ चतुर्भिः पलमेतस्य दशार्द्धो धरणं विदुः॥ एकस्य पलस्य दशार्द्धो ध
रणं विदुः॥ दशार्द्धपलानि धरणमित्यर्थः॥ तथा च मनुः॥ पलं सुवर्णाश्चत्वारः पलानि धर
णं दशेति॥ इति सुवर्णप्रमाणं॥ अथ रूप्यपरिमाणं॥ याज्ञवल्क्यः॥ द्वे कृष्णले रूप्यमा
षो धरणं षोडशैव ते॥ शतमाणं॥ अथ रूप्यपरिमाणं॥ याज्ञवल्क्यः॥ द्वे कृष्णले रूप्य
माषो धरणं षोडशैव ते॥ शतमानं तु दशभिर्धरणैः पलमेव च॥ निष्कं सुवर्णाश्चत्वा
र इति॥ द्वे कृष्णले द्वे गुंजे पूर्वोक्ते रूप्यमाषो भवति। मध्यमयव षट्परिमितरक्तको रूप्य

माषो नवनीत्यर्थ॥ ते के माषाः षोडश धरणं दशभिर्धरणैः शतमानमित्युच्यते॥ तदे
व पलं त्वभिधीयते॥ चत्वारस्तु वर्णा निष्कः॥ अत्र रजतप्रकरणे हेमप्रकरणोक्तसुवर्णद्वाषष्टिपा
दान्तं हेमप्रकरणोक्तमाषः प्राप्यर्थं॥ अतः पंचकृष्णलिको माषः न कृष्णलद्वयपरिमितः॥
तैः षोडशभिर्माषैरेकस्तु वर्णः॥ ते च सुवर्णाश्चत्वारो निष्कः॥ हेमप्रमाणं तत्र चतुः सुवर्ण
मानोन्मितं रजतः धरणानि दशाज्ञेयः शतमानस्तु राजतः॥ चतुः सौवर्णिको विज्ञेयस्तु
प्रमाणतः॥ समधृत इति॥ मध्यमस्य च प्रमाणं धृते इत्यर्थः॥ यत्र सौवर्णो निष्क इत्यभि
धीयते॥ सौवर्णं निष्कं दद्यादित्यादिषु तत्र हेमप्रमाणं तत्सुवर्णचतुष्टयोन्मितं हे
मद्रव्यमेव निष्कशब्दवाच्यं न रजतद्रव्यं॥ अथ धान्यपरिमाणं॥ स्कंदपुराणे॥ य
वगोधूमधान्यानि तिलाः कंगुकुलत्थकाः॥ माषामुद्गा मसूराश्च निष्पावाः श्यामसर्षपाः॥
गवेधुकाश्च नीवारा आढक्योऽथ सतीनकाः॥ चणकाश्चीनकाश्चीनकाश्चैव धान्याष्ट

दशैव तु॥ ॥मार्कंडेयपुराणे॥ ॥ जज्ञिरे तानि बीजानि ग्राम्यारण्यानि धानि च॥ ओष
ध्यः फलपाकान्ताः शाणसप्तदशास्मृता॥ व्रीहयश्च यवाश्चैव गोधूमाः कंगुका का
स्तिलाः॥ प्रियंगवः कोविदारा कोरदूषसचीनकाः माषा मुद्गा मसूराश्च निष्पावाः स
कुलत्थकाः॥ आढक्यश्चणकाश्चैव शणाः सप्तदशस्मृताः॥ इत्येता ओषधीनां तु ग्राम्या
णां जातयः स्मृताः॥ व्रीहयश्च यवाश्चैव गोधूमाः कंगुसर्षपाः॥ माषा मुद्गाः सप्तमाश्च
अणमाश्च कुलत्थकाः॥ श्यामाकाश्चैव नीवारा जर्तिलाः सगवेधुकाः॥ कोविदारस्य मात्रुका
स्तथा वेणुयवाश्च ये॥ ग्राम्यारण्याः स्मृता ह्येता ओषध्यश्च चतुर्दश॥ ॥वाराहपुराणे
॥ ॥पलद्वयं तु प्रसृतं मुष्टिरेकं पलं स्मृतं॥ अष्टमुष्टिर्भवेत्किंचित् किंचिदष्टौ तु पुष्कलं॥
पुष्कलानि च चत्वारि आढकः परिकीर्तितः॥ चतुराढको भवेद्द्रोण इत्येतन्मानलक्ष
णं॥ भविष्यत्पुराणे॥ पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतं॥ चतुर्भिः कुडवैः प्रस्थः प्रस्थ

महा.
२०६

ञ्चत्वार आढकः॥ आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः॥ कुंभो द्रोणद्वयं सूर्पः
खारी द्रोणास्तु षोडश॥ पलं च कुडवः प्रस्थ आढको द्रोण एव च॥ धान्यमाने बुधैः ध
र्याः क्रमशोमी चतुर्गुणाः॥ द्रोणैः षोडशभिः खारी द्रोणास्तु षोडश॥ पलं च कुडवः प्र
स्थ आढ विंशत्या कुंभ उच्यते॥ कुंभैस्तु दशभिर्वाहो धान्यसंख्याः प्रकीर्तिताः॥ विं
शत्या द्रोणैरित्यर्थः॥ अत्र धान्यसंख्ये क्रम पलत्वं॥ अत एव द्रव्य विषयेपि॥ स्कं
द पुराणे॥ पल द्वयेन प्रसृतं द्विगुणं कुडवं मतं॥ चतुर्भिः कुडवैः प्रस्थ आढकस्तैश्चतुर्गु
णैः चतुर्गुणो नवै द्रोण इत्येतद्द्रव्यमानकमिति॥ द्रोणद्वयं कुंभ इत्येकः पक्षः॥ कुंभस्य व
सूर्प इति संज्ञांतरं॥ विंशत्या द्रोणैः कुंभ इत्यपरः पक्षः पलसहस्रपरिमाणः कुंभ इ २०६
ति दानविवेके॥ दशहस्र पलाधिकपंचशतपलपरिमाणः॥ कुंभ इत्यपरे॥ एते च पक्षा
देशकालत्रात्साध्य पेक्षया योज्याः॥ त्रिकांड्यामपि घटे च॥ मानं तुलांगुलि प्रस्थैर्गुंजाः पं

चाद्यमाषकः॥ ते षोडशाक्षः कर्षोस्त्री पलं कर्षचतुष्टयं॥ सुवर्णबिस्तो हेम्नोक्षे कु
रुविस्तु तत्पले॥ तुलास्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः॥ आचितो दशभाराः
स्युः शाकटो भार आचितः॥ इति धान्यादिमानं॥ अथ भूमिमानं॥ ॥मार्कंडेयपुराणे
॥ परमाणुः परं सूक्ष्मं त्रसरेणुर्महीरजः॥ बालाग्रं चाथ लिक्षा च यूका चाथ यवोंगुलं
॥ क्रमादष्टगुणान्याहुर्यवाष्टौ तु तांगुलं॥ षडंगुलं पदं प्रोक्तं वितस्ति द्विगुणः स्मृतः॥ द्वौ
वितस्ती ततो हस्तो ब्रह्मतीर्थादिवेष्टनात्॥ चतुर्हस्तो धनुर्दंडो नाडिकानगमेन तु॥
क्रोशो धनुः सहस्रे द्वे गव्यूतिस्तच्चतुर्गुणा द्विगुणं योजनं तस्मात् कोकसंख्यानं॥ काचि
द्॥ वसिष्ठः॥ दशहस्तेन वंशेन दशवंशान्समंततः॥ पंच चाभ्यधिकान्दद्यादेतद्गोचर्म
चोच्यते॥ बृहस्पतिः॥ दशहस्तेन दंडेन त्रिंशद्दंडा निवर्तनं॥ दशतान्येव गोचर्म ब्रा
ह्मणेभ्यो ददाति यः॥ मत्स्यपुराणे॥ दंडेन सप्तहस्तेन त्रिंशद्दंडा निवर्तनं॥ त्रिनागह

महा. नं॥ त्रिंशो चर्ममानमप्रजापतिं॥ ॥इति त्रसरेणुमानं॥ ॥इति परिमाणं॥ ॥अथ कर्मविपाकप्र
२०१ करणोपयुक्तकृच्छ्रादिलक्षणानि॥ तत्र पादकृच्छ्रस्वरूपापरिज्ञाने प्राजापत्यस्वरू
पस्य ज्ञातुमशक्यत्वात्॥ प्रथमं पादकृच्छ्रलक्षणमभिधीयते॥ याज्ञवल्क्यः॥ ॥एकभक्ते
न नक्तेन तथैवायाचितेन च॥ उपवासेन चैवायं पादकृच्छ्रः प्रकीर्तितः॥ एकभक्तं नाम दि
वा चोदितमध्याह्नकाल उक्तनियमैरेककालकृतभोजनं नक्तं तु सूर्यास्तमयानंत
रमुक्तकाले सकृत्कृतभोजनं॥ दिवा वा रात्रौ वा प्रार्थितोपनतस्य सकृद्भोजनमया
चितं॥ दिवा रात्रावप्यभोजनमुपवासः॥ एवं चतुरहः॥ साध्यः पादकृच्छ्रः॥ एकभ
क्तादौ च ग्राससंख्यानियमः॥ पाराशरेणोक्तं॥ सायं तु द्वादश ग्रासाः प्रातः पंचदश स्मृ २०१
ताः॥ चतुर्विंशतिरयाच्यास्तु परं निरशनं स्मृतमिति॥ सायं नक्ते॥ प्रातरेकभक्ते
॥ आपस्तंबस्तु प्रकारांतरेणाह॥ सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः॥ च

तुर्विंशतिरयाच्यास्तु परं निरशनं त्रयः॥ कुक्कुटांडप्रमाणास्तु यथैवास्यं विशेत्सु
खमिति॥ अनयोश्च पक्षयोः शक्त्यपेक्षया विकल्पः॥ आपस्तंबस्तु चतुर्धा प्राजाप
त्यकृच्छ्रं विभज्य वर्णानुक्रमेण पादकृच्छ्रव्यवस्थामाह॥ अहं निरशनं पादः पादश्चा
याचितं त्र्यहं॥ सायं त्र्यहं तथा त्र्यहं॥ प्रातः पादं चरेच्छूद्रः सायं वैश्यस्य दापयेत्॥ अया
चितं तु राजन्ये त्रिरात्रं ब्राह्मणे स्मृतम्॥ प्रातःपाद एकभक्तत्र्यं सायंपादो नक्तत्र्यं॥
अयाचितमयाचितत्र्यं त्रिरात्रमुपवासत्र्यं॥ अयाचितपाद उपवासपादश्चेति
पादद्वयं मिलित्वा अर्धकृच्छ्रः॥ नक्तपादरहितमवशिष्टपादत्रयं पादोनकृच्छ्रः॥ अत ए
वाहापस्तंबः॥ सायं प्रातर्विनार्धं स्यात्पादोनं नक्तवर्जितमिति॥ अर्धकृच्छ्रस्य प्रकारांत
रमप्याह स एव॥ सायं प्रातस्तथैकैकं दिनद्वयमयाचितं॥ दिनद्वयं च नाश्नीयात्कृच्छ्रा
र्धलक्षणं॥ ॥अथ प्राजापत्यकृच्छ्रलक्षणं॥ ॥याज्ञवल्क्यः॥ यथाकथंचित्त्रिगुणं॥ प्रा

जापत्योयमुच्यते॥ अत्रायमभिप्रायोनेनसर्वेनाप्येकभक्तेन नक्तेन तथैवायाचितेन च॥उ
पवासेनचैकेनायंपादकृच्छ्रःप्रकीर्त्तितइतिस्मोक्तःपादकृच्छ्रःपरामृश्यते॥ यथाकथंचि
दित्यनेन चत्वारः पक्षा उपात्ताः॥ एकभक्तादीनामानुलोम्येन स्वस्थानविवृद्धिरित्येक
:पक्षः॥ तथा एकभक्तत्र्यं नक्तत्र्यमयाचितत्र्यमुपवासत्र्यं चेति॥ क्रमेणैक
भक्तादीनां त्र्याणां त्र्याणां करणमानुलोम्येन स्वस्थानविवृद्धिरित्युच्यते॥ यथाह म
नुः॥ त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं॥ त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्द्वि
जः॥ प्रातिलोम्येन स्वस्थानविवृद्धिरिति द्वितीयः पक्षः॥ उपवासत्र्यमयाचितत्र्यं
नक्तत्र्यमेकभक्तत्र्यमिति लोम्येन स्वस्थानवृद्धिः॥ अमुं पक्षमाह वृद्धविष्णुः॥ प्रा २०८
तिलोम्यं चरेद्युरिति॥ दंडकलितवदावृत्तिरिति तृतीयः पक्षः॥ एकभक्तनक्तायाचितो
पवासानां क्रमेणैकैकं कृत्वा पुनरेकभक्तादीन्क्रमेणावर्तयेत्॥ इयमावृत्तिर्दंड

कलितवदावृत्तिरित्युच्यते॥ एवं त्रिरावृत्तौ प्राजापत्यं कृच्छ्रं भवति॥ अमुमपि पक्षं
वृद्धविष्णुराह॥ त्र्यहः प्रातरहर्नक्तमहरेकमयाचितं॥ अहः पराकं तत्रैकमेवं चतु
रहौ परौ पराकृत्य उपवासपरः तथा॥ अनुग्रहार्थं विप्राणां मनुर्धर्मभृतां वरः॥
बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुवाच हेति॥ पूर्वोक्तपक्षत्र्यमध्येऽन्यतमपक्षप
स्तोकारेणावस्समाजपहोमविवर्जनेनाचरणं॥ चतुर्थः पक्षः॥ एवं पक्षमहांगि
राः॥ तस्माच्छूद्रे समासाद्य सदा धर्मपथे स्थितं॥ प्रायश्चित्तं प्रदातव्यं जपहोमविव
र्जितमिति॥ ॥इति प्राजापत्यलक्षणं॥ ॥अथातिकृच्छ्रलक्षणं॥ मनुः॥ एकैकं ग्रासमश्नी
यात्त्र्यहाणि त्रीणि पूर्ववत्॥ त्र्यहं चोपवसेदंत्यमतिकृच्छ्रं चरन्द्विजः॥ त्रीणि त्र्यहाणि
त्रिदिनानि पूर्ववत्॥ एकभक्तादिकोक्तनियममुक्तः सन्नित्यर्थः॥ याज्ञवल्क्यः॥
अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः॥ अयमेव पूर्वोक्तप्राजापत्यधर्म एक

महा. २०९

एव॥ अयं तु विशेषः॥ एकनक्तनक्तायाचितदिनेषु पाणिपूरणमात्रं प्रसृतिपूरणमा
त्रमन्नं तु ज्ञातं न तु पूर्वोक्ता द्विग्रासादिग्रासा नि ति॥ अत्र च पाणिपूरणान्नमात्र
मेव विधेयं॥ न तु भोजनं॥ अतो येषु दिनेषु प्राजापत्ये भोजनं प्राप्तं तद्दिनेषु वादेन पाणि
पूरणान्नता विधेया॥ इति नोपवासदिनेषु पाणिपूरणान्नभोजनप्राप्तिः॥ मनुयाज्ञ
वल्क्योक्तपाणिपूरणान्नयोग्यभोजनयोः शक्त्यपेक्षया विकल्पः॥ पापापेक्षया वा॥
अतिकृच्छ्रपादादिव्यवस्था प्राजापत्यवदेव ज्ञेया॥ ॥इत्यतिकृच्छ्रलक्षणं॥ ॥अ
थ कृच्छ्रातिकृच्छ्रः॥ तत्र गौतमः॥ अब्भक्षस्तृतीयः स कृच्छ्रातिकृच्छ्र इति॥ द्वादशरा
त्रमिति तु वर्त्तते॥ अतो द्वादशरात्रमुदकेनैव वर्त्तनं॥ नान्येनेत्युक्तं भवति॥ यमः॥ २०९
एकैकं पिंडमश्नीयात् त्र्यहं कल्ये त्र्यहं निशि॥ अयाचितं त्र्यहं पिंडं वायुभक्षस्त्र्यहं परं॥
अतिकृच्छ्रं चरेदेतत्पवित्रं कायशोधनं॥ चतुर्विंशतिसंत्रं तु नियतात्मा जितेंद्रियः॥ कृ

च्छ्रं तु तिकृच्छ्रं कुर्वीत एकस्मान्नेह्निजोत्तमः॥ कल्ये प्रातः॥ एकनक्तकाल इति याव
त् एकस्मान्न इति॥ एकमन्नेन पूर्वोक्तद्वादशाहसाध्यतिकृच्छ्रवमेनैकः कृच्छ्राति
कृच्छ्रो भवतीत्यर्थः॥ याज्ञवल्क्यः॥ कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिमे
न॥ चतुर्विंशतिरात्रसाध्ये कृच्छ्रातिकृच्छ्रे भोजनदिनेष्वेकैकग्रासमात्रविधानादु
ग्ध भोजनेपि पत्रपुटिकादिनिर्ग्रासपरिमाणं कृत्वैकग्रासपर्याप्तं दुग्धमश्नीयात्
एवं कर्त्तुमशक्तश्चेत् कृच्छ्रं प्रकृतिभूतप्राजापत्योक्तरीत्या सायंतुद्वाद्ग्रासा इत्या
दिग्राससंख्यया तावद्दुग्धं पातव्यं भोजनदिनेषु गौतमाद्युक्तकृच्छ्रातिकृच्छ्रपक्षे
तु शक्त्यपेक्षया विकल्पः॥ ॥इति कृच्छ्रातिकृच्छ्रलक्षणं॥ अथ तप्तकृच्छ्रं॥ याज्ञव
ल्क्यः॥ तप्तक्षीरघृतांबूनामेकैकं प्रत्यहं पिबेत्॥ एकरात्रोपवासश्च तप्तकृच्छ्र उदा
हृतः॥ अयं च दिनचतुष्टयसाध्यः कृच्छ्रः॥ मिताक्षरायां तु अयं तु महातप्तकृच्छ्र इ

त्मकं ॥ तप्तकृच्छ्रस्तु द्विरात्रसाध्य इत्याह हारितः ॥ तप्तक्षीरघृतांबुभिः समस्तैरेकदिनं
वर्जयेत् ॥ एकाह उपवास इति ॥ त्र्यहसाध्यत्वं तप्तकृच्छ्रस्येति ॥ मनुः ॥ तप्तकृच्छ्रं चरन्
विप्रो जलक्षीरघृतानिलान् प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः ॥ प्रतित्र्यहं
पिबेदिति ॥ जलादीनेकैकं त्र्यहं पिबेदित्यर्थः ॥ अयमप्यहाद्वादशरात्रसाध्यः कृ
च्छ्रः ॥ जलादिपरिमाणमाह पराशरः ॥ अपां पिबेत्तु त्रिपलं द्विपलं तु पयः ॥ पिबेत् ॥ प
लमेकं पिबेत्सर्पिः त्रिरात्रं चोष्णमारुतमिति ॥ त्रिरात्रमुष्णोदकं सर्वाण्यपि पिबेदित्यर्थः ॥
त्रिरात्रमिति पूर्वत्राप्यन्वेति ॥ अतः अपां त्रिपलं त्रिरात्रं चेत्येवं योज्यं प्रकारांतरेण
प्याह तप्तकृच्छ्रं पराशरः ॥ षट्पलं तु पिबेदंभस्त्रिपलं तु पयः पिबेत् ॥ पलमेकं २१०
पिबेत्सर्पिस्तप्तकृच्छ्रं विधीयते ॥ अत्र जलादिकमुष्णमेव ग्राह्यं ॥ ॥ इति तप्तकृ
च्छ्रलक्षणं ॥ ॥ अथ सांतपनं ॥ ॥ याज्ञवल्क्यः ॥ कुशोदकं तु गोक्षीरं दधि मूत्रं शकृत्

तं ॥ जग्ध्वा परेऽह्न्युपवसेत्कृच्छ्रं सांतपनं चरेदित्यपरार्कपाठः ॥ मिताक्षरापाठः गोमूत्रं गो
मयं क्षीरं दधि सर्पिः कुशोदकमिति ॥ गोमूत्रादीनि षडप्येकीकृत्य पीत्वाहोरात्रमुप
हितः संतिष्ठेत् ॥ परेद्युरुपवसेदिति दिनद्वयसाध्यः कृच्छ्रः ॥ याज्ञवल्क्येनोक्तस्यो
क्तेगोमयादीनां प्रमाणं ॥ षट्सु दिनेषु प्राशनविधानादत्र एतेषामेकदिनप्राश
नगम्यं ॥ गोमूत्रं ताम्रवर्णायाः श्वेतायाश्चापि गोमयं ॥ पयः कांचनवर्णाया नीला
याश्च तथा दधि ॥ घृतं च कृष्णवर्णायाः सर्वं कापिलमेव वा ॥ अलाभे सर्ववर्णानां पंच
गव्येष्वयं विधिः ॥ गोमूत्रं माषकास्त्वष्टौ गोमयस्य तु षोडश ॥ क्षीरस्य द्वादश प्रो
क्ता दध्नस्तु दश कीर्तिताः ॥ गोमूत्रवद्घृतस्येष्टा तदर्धं तु कुशोदकं ॥ गायत्र्याऽऽदाय
गोमूत्रं गंधद्वारेति गोमयं ॥ आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥ तेजोसि शु
क्रमित्याज्यं देवस्य त्वा कुशोदकं ॥ पंचगव्यमृचा पूतं होमयेदग्निसन्निधौ ॥ सप्तपत्रास्तु

येऽर्ल्पाश्च छिन्नाग्राः शुक्लविषः॥ एतैरुद्धृत्य होतव्यं पंचगव्यं यथाविधि॥ इरावती इदं
विष्णुर्मानस्तोके च शंवती॥ एताभिश्चैव होतव्यं हुतशेषं पिबेद्द्विजः॥ प्रणवेन समालो
ड्य प्रणवेनाभिमंत्र्य च॥ प्रणवेन समुद्धृत्य पिबेत्तत्प्रणवेन तु॥ मध्यमेन पलाशस्य
पद्मपत्रेण वा पिबेत्॥ स्वर्णपात्रेण ताम्रेण ब्रह्मतीर्थेन वा पुनः॥ त्वगस्थिगतं तु यत्॥ पा
पं देहे तिष्ठति मानवे॥ ब्रह्मकूर्चोपवासस्तु दहत्यग्निरिवेंधनमिति॥ याज्ञवल्क्योक्त
दिनद्वयसाध्यं सांतपनमेव ब्रह्मकूर्च इति ब्रह्मकूर्चोपवास इति चाभिधीयते॥ विज्ञा
नेश्वरस्तु पूर्वेद्युरुपोष्यापरेद्युः कुशोदकाः पंचगव्यप्राशने ब्रह्मकूर्च इति मन्यते॥ मरी
चिः॥ देवताः संप्रवक्ष्यामि क्रमात्तु पूर्वेण या वरुणो देवता मूत्रे गोमये हव्यवाहनः॥ सो
मः क्षीरे दधिवायुः घृते रविः कुशोदकाः॥ गोमूत्रं ताम्रवर्णायाः श्वेतायाश्चैव गोमयं॥ प
यः कांचनवर्णाया नीलाया सत्वयं तथा दधि॥ घृतं वै कृष्णवर्णाया विन्नकं वर्णागोचरं॥ उद

कं सर्ववर्णानां तु तस्य वर्णो न गृह्यते गोमूत्रस्य पलं ग्राह्यं मंगुष्ठार्धं तु गोमयं॥ क्षीरस्य त्रिप
लं ग्राह्यं पलमेकं कुशोदकं॥ आपोहिष्ठेति वा जोऽघमर्षण प्रणवेन तु॥ अग्नये स्वाहा
॥ सोमाय स्वाहा इदं विष्णुर्मानस्तोके गायत्र्या प्रजापते न त्वदेता जुहुयात्॥ नरोत्तम
वरोतीरे रहस्येनिकृतिस्तथा॥ शुक्लवासाः पवित्रात्मा अहोरात्रोषितः पिबेत्॥ पा
लाशे न च पत्रेण बिल्वपात्रेण वा पिबेत्॥ रतीमं ताम्रपात्रं वा ब्रह्मपात्राणि तानि वै॥ अ
तिमासं पौर्णमास्यां ममावास्यां च वा पिबेत्॥ ब्रह्महा परदारी च ये चान्ये स्थिमतामलाः॥
ब्रह्मकूर्चो दहत्सर्वं यथाग्निस्त्वणमेव तु॥ जाबालः॥ गोमूत्रं गोमयं क्षीरं दधिसर्पिः
कुशोदकं॥ एकैकं प्रत्यहं पीत्वा त्वहोरात्रमभोजनं॥ कृच्छ्रः सांतपनो नाम सर्वपाप
प्रनाशन इति॥ एतत्काबाजो कृत्स्नाह साध्यं सांतपनं॥ ॥ इति सांतपनलक्षणं॥ ॥
ग्न्यमिति सांतपनं॥ चान्द्रेव हे व्यहाभ्यस्तं यति सांतपनं स्मृतं॥ एतद्वेवत्मने नमि॥ अ

मह॰ तं पंचगव्यं परमत्र प्रपतेत त्संगव्यं दिनत्रयमाहारांतरनिरपेक्षेण पिबेदित्यर्थः॥ ॥इति
२१२ यतिसांतपनलक्षणं॥ ॥अथ महासांतपनं॥ याज्ञवल्क्यः॥ पृथक्सांतपनद्रव्यैः षड
हः॥ सोपवासकः॥ सप्ताहेन तु कृच्छ्रोयं महासांतपनः स्मृतः॥ गोमूत्रं गोमयं क्षीरं द
धि घृतं कुशोदकानि सांतपनद्रव्याणि॥ एकैकस्मिन्दिने एकैकं पिबेत्॥ सप्तमदिने
उपवासः॥ एतानि कुशोदकादि प्राशनादीनि आहारांतरनिवर्त्तकानि एवमन्यत्रापि
यम॥ त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् त्र्यहं दधि त्र्यहं सर्पिस्त्र्यहं क्षीरं ततः शु
चिः॥ महासांतपनं ह्येतत्सर्वपापप्रणाशनं॥ एतच्च पंचदशाहसाध्यं॥ जाबालः॥ षण्णामे
कैकमेतेषां त्रिरात्रमुपयोजयेत्॥ त्र्यहं चोपवसेदंत्यं महासांतपनं विदुरिति॥ षण्णां पू २१२
र्वोक्तगोमूत्रादीनां॥ अयमेकविंशतिरात्रसाध्यो महासांतपनकृच्छ्रः॥ ॥इति महासांत
पनलक्षणं॥ ॥अथ पराकः॥ याज्ञवल्क्यः॥ द्वादशाहोपवासेन पराकः॥ परिकीर्तितः॥

॥इति पराकलक्षणं॥ ॥अथ यावकव्रतं॥ शंखः॥ गोपुरीषाद्यवानद्यान्मासं नित्यं समा
हितः॥ व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये॥ गोभक्षणार्थं यवान्दत्वा तदनंतरं
गोमयमध्यनिःसृतान्यवान् गृहीत्वा तैर्यवैश्चरुं पक्त्वा तेनान्नेनैकभक्तं नक्तं वा
निकुर्वन्मासं नयेत्॥ तद्यावकव्रतमित्युच्यते॥ अत एवाह॥ योगयाज्ञवल्क्यः॥ आ
चम्याचारयित्वा गां गोधूमान्यवमिश्रितान्॥ गोमयोत्थांश्च संगृह्य पचेद्गोमूत्रयाव
कमिति॥ ॥इति यावकव्रतं॥ गोमूत्रयावकव्रतलक्षणं च॥ ॥अथ पयोव्रतं॥ ॥तत्र कृ
च्छ्रातिकृच्छ्रः॥ पयसा दिवसानेकविंशतिमिति याज्ञवल्क्योक्तप्रकारेण मासमेकं
मासमात्रं परिपूर्णं पयसा वर्त्तनं पयोव्रतमित्युच्यते॥ यस्मिन्व्रते येन द्रव्येण श
रीरवर्त्तनं क्रियते तद्व्रतं तेन व्यपदिश्यते अत एव मार्कंडेयः॥ पत्रैर्मतः॥ पत्रकृच्छ्रः पुष्पै
स्तु कृच्छ्र उच्यते॥ मूलैः कृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन त्विति॥ ॥इति पयोव्रतं॥ अ

मह०
२१३

चांद्रायणं॥ गौतमः॥ अथातश्चांद्रायणं तस्योक्तो विधिः॥ कृच्छ्र इति॥ कृच्छ्रप्राजापत्य
कृच्छ्रे विधिरुक्त इत्यर्थः॥ तत्स्वरूपं॥ तिष्ठेदहनि रात्रावासीत क्षिप्रकामः सत्यं वदेदनार्यैर्न
संभाषेत रौरवयौधाजये नित्यं प्रयुंजीत अनुसवनमुदकोपस्पर्शनमापो हि ष्ठेति च ति
सृभिः पवित्रवतीभिर्मार्जयेत॥ हिरण्यवर्णाः शुचयः पावका इति॥ अघोरकतर्पणं॥ न
मो हमाय मंहमाय धुन्वते तापसाय पुनर्वसवे नमो मौंज्यायोर्म्याय वसुविंदाय नमः॥ पा
राय सुपराय महापाराय पारयिष्णवे नमो रुद्राय पशुपतये महते देवाय त्र्यंबकायै
कचरायाधिपतये हराय शर्वायेशानायोग्राय वज्रिणे घृणिने कपर्दिने नमः सूर्याया
दित्याय नमो नीलग्रीवाय शितिकंठाय नमः कृष्णाय पिंगलाय नमो ज्येष्ठाय नमो श्रेष्ठा
य वृद्धायेंद्राय हरिकेशायोर्ध्वरेतसे नमः सत्याय पावकाय पावकवर्णाय कामाय का
मरूपिणे नमो दीप्ताय दीप्तरूपिणे नमस्तीक्ष्णाय तीक्ष्णरूपिणे नमः सौम्याय सुपुरुषा २१३

य महापुरुषाय मध्यपुरुषायोत्तमपुरुषाय ब्रह्मचारिणे नमश्चंद्रललाटाय कृत्ति
वाससे नमः इत्येतदेवादित्योपस्थानमेतदेवाज्याहुतय इति॥ अस्यार्थः॥ तिष्ठेद
हनि रात्रावासीत क्षिप्रकाम इति॥ यस्तु प्राजापत्यादिकृच्छ्रं यानो द्यापत्तिक्षमे कैनै
व कृच्छ्रेण विशुद्धोऽन्विष्यामि सर्वकामयेत अयमहत्यावरपककर्माविरुद्धे पुका
ले कृच्छ्रं प्रयुंजीत पवंतपुनानः सोमधारयेत्यस्याम् विदुहानं तु धरित्यस्यामृचि च
त्वत्वेन गेयमाने सामनी रौरवयौधाजये अभिधीयेते॥ अनुसवनमुदकोपस्पर्शनं
॥ संध्यात्रये स्नानं त्रिषवणस्नानमित्यर्थः॥ हिरण्यवर्णा इत्येताभिरपि मार्जनमेव॥
एतच्च मार्जनं स्नानानंतरं॥ अघोरकतर्पणं॥ उदकतर्पणमित्यनेनात्र जलेनाव त
र्पणं न स्यात् तेनैवेति गम्यते॥ तत्र मंत्राः॥ नमो महायेऽसेवमादमः कृत्तिवाससे नमइ
त्येतदंताः॥ अत्र मंत्रसंदर्भस्यादावंते च नमः शब्दश्रवणान्मंत्रादौ मंत्रांते च नमः श

ष्टेन व्रति॥ तथाचैवं मंत्रप्रयोगः॥ नमोहमायमंहमायधून्वतेतापसायपुनर्वसवेन
मइति॥ एवं नमो मौंज्याय मेखलाय रत्य सर्वविंशायन नमइत्येको मंत्रः॥ एवमुत्तरत्रापि द्रष्टव्यं॥
एते स्तमोदशाभिर्मंत्रैस्तर्पणं कुर्यात्॥ ततस्तदेवादित्योपस्थानमिति॥ एतदेव मंत्रजा
तमादित्योपस्थानसाधनं॥ कार्यकारणयोरनेहोपचारः॥ तर्पणानंतरमेतैरेव मंत्रैरा
दित्योपस्थानं कुर्यादित्यर्थः॥ एतावताव्याकृतमइति॥ एतैरेव मंत्रैराज्यहोमः कर्त्त
व्य इत्यर्थः॥ अयं च होमो लौकिकाग्निं प्रतिष्ठाप्य कार्यः॥ एवं मध्यात्तस्त्रांद्रायणं तस्यो
क्तो विधिः॥ कृच्छ्रइत्यनेन साधारणधर्मानतिदिश्य चांद्रायणे विशेषधर्मानाह॥ तप
नं हृतं चरेत् श्वोन्नतां पौर्णमासीमुपवसेदाप्यायस्व संते पयांसि नवो नव इत्येताभि
स्तर्पणमाज्यहोमो हविषश्चानुमंत्रणमुपस्थानं चंद्रमसो यदेवा देवहेडनमिति चत
सृभिर्जुहुयादेवकृतस्येति चांते समिद्भिरों भूर्भुवः स्वः स्तपः सत्यं यशः श्रीरूर्गिडोज

ः पुरुषो धर्मः शिव इत्येतैर्ग्रासानुमंत्रणं प्रतिमंत्रं नमः स्वाहेति वा सर्वान् ग्रासप्रमा
णमास्याविकारेण चैक्षसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानि
हवींष्युत्तरोत्तरं प्रशस्तानि पौर्णमास्यापंचदशग्रासान्भुक्त्वैकापचयेनापरपक्षमश्नी
यात्॥ अमावास्यायामुपोष्यैकोपचयेन पूर्वपक्षं विपरीतमेकेषामेषचांद्रायणो मा
सः पवित्रा विपापो विपाप्मा सर्वमेनो हंति द्वितीयमाप्त्वा दशपूर्वान् दशावरानात्मानंच
पंक्तिं पुनाति संवत्सरं चाप्त्वा चंद्रमसः सलोकतामाप्नोतीत्यर्थः॥ तपनं हृतं चरेत्॥
तापयति पापमिति॥ तपनं॥ तपनं व्रतं चरेत्॥ इतिपाठे व्रतं चांद्रायणं वपनं वपनपूर्वं
तेनमिति॥ अयमर्थः॥ यदा प्रायश्चित्तत्वेन चांद्रायणमाचरणं तदा वपनपूर्वकं च
रेदिति॥ एतेन निमित्तमंतरेण सुकृतार्थं चांद्रायणाचरणे वपनं नास्तीत्युक्तं भव
ति॥ श्वोन्नतां पौर्णमासीमुपवसेत्॥ पौर्णमासीं ग्रासोपक्रमतिथिं श्वोन्नतां निरी

ह्य पूर्वतिथौ चतुर्दश्यामुपवसेदित्यर्थः॥ आप्यायस्वेत्यादिभिर्नवोनवइत्येतैर्मंत्रैस्त्वंसम
सउपस्थानंकुर्वीत तन्नोमद्देवादेवहेडनमितिचतस्मिन्देवकृतस्येतिचेत्यनयाचसमिद्धि
र्मंत्रिकाष्टोत्तरवाभिर्जुहुयात्॥ पूर्वोक्तोपस्थानांते॥ अथतत्रतिथिसंख्याकग्रासान्गृहीत्वा
तान्॥ ॐ भूर्भुवःस्वरित्यादिमंत्रैरभिमंत्रयीत॥ ॐ भूः॥ ॐ भूर्भुवः॥ ॐ स्वः॥ महः॥ जनः
तपःसत्यं॥ यशः॥ श्रीः॥ ऊर्ज इट्॥ ॐ जः॥ पुरुषः॥ धर्मः॥ शिवः॥ इति मंत्रविभागः॥ अ
भिमंत्रितमंत्रांतेनमःस्वाहेतिवाग्रसमुंजीतप्राणवोदिस्थःपर्मंतानामन्यमंत्रेन नमःस्वा
हायोगेभिन्नचतुर्थीविभक्तिमत्वं॥ महः॥ इत्यादिषुचतुर्थ्यवणन्नवतिःमह
सेनमःसहसेस्वाहेतिवागवमन्यत्रापि॥ जनायतपसेसत्याय॥ यशसे॥ श्रियोऊर्जे २१५
॥ ॐ जसे॥ पुरुषाय॥ धर्मायशिवायेति॥ ग्रासप्रमाणमाह्याविकारेण आस्यव्या
दाने——यावदन्नमुखंप्रविशतितावदन्नप्रमाणंभवतीत्यर्थः॥ चतुर्दश्यामुपोषि

तस्य॥ पौर्णमास्यादितिथिषु——ससंख्यानियमम्मा पौर्णमास्यां पंचदशग्रासानित्या
दिनाप्रत्यहमित्येतेन॥ एतच्चपिपीलिकामध्यंचांद्रायणं॥ अथयवमध्यमाह॥ विप
रीतमेकेषामिति॥ अस्मिन्यवमध्यचांद्रायणे॥ अमावास्यामामुपवासः प्रतिप
दादितिथिषु एकैकग्रासोपचयः पौर्णमासीमभिव्याप्य पुनः कृष्णपक्षादितिथिषुमावा
स्यावधिकास्वेकैकग्रासापचयः॥ अमावास्यायामुपवासइतिक्रमः॥ अत्रग्रासग्र
हणकालमंत्रहोमेष्वभिमंत्रणमंत्रविकल्पादयम्पूर्वोक्ताएवसाधारणेतिकर्तव्य
ताकयन्नस्मेनिरूपयिष्यंते॥ याज्ञवल्क्यः॥ तिथिवृध्याचरेत्पिंडान्शुक्लेशिख्यंड
संमितान्॥ एकैकंह्रासयेत्कृष्णेपिंडंचांद्रायणंचरेत्॥ इदुत्तमेनभुंजीतएषचांद्रा
यणेविधिः॥ तिथिवृध्या॥ प्रथमद्वितीयादिचंद्रकलायुक्तप्रतिपद्द्वितीयादितिथिवृ
ध्यांचंद्रस्यायनंचरणमिवचरणंआचरेत्॥ नक्तमेत्॥ शुक्लेशुक्लपक्षे॥ शिख्यंडसं

मितान्॥ मयूराण्डप्रमाणान्वा॥ चांद्रायणं॥ ग्रासवृद्धिह्रासौ चंद्रस्यायनेन चरणमिव चरत्य
स्मिन् कर्मणि॥ तच्चांद्रायणं॥ संज्ञायां दीर्घः॥ इति पिपीलिकामध्यं यवमध्यं चांद्रा
यणमुक्तं॥ ॥अथ यतिचांद्रायणादीनि॥ याज्ञवल्क्यः॥ यथाकथंचित्पिंडानां चत्वा
रिंशच्छतद्वयं॥ मासेनैवोपभुंजीत चांद्रायणमथापरं॥ पिंडानां चत्वारिंशदधिकं श
तद्वयं मासेनोपभुंजीत॥ कथं यथाकथंचित्॥ अत्रायं क्रमः॥ दिने दिनेऽष्टौ ग्रासान् भुंजी
त॥ अथवा नक्तं चतुरो दिवा च चतुर इति॥ अथवैकस्मिन् दिने चतुरोऽपरस्मिन् द्वादश
॥ उतैकरात्रमुपोष्यापरस्मिन् षोडश॥ यद्वा दिनद्वयमुपोष्य तृतीयदिने द्वात्रिंशदि
त्यादिप्रकाराणां मध्ये यत्कल्पेच्छया भुंजीतेति॥ अत्र तिथ्यपेक्षायाः स नियमो नास्ति॥ उ
पक्रमस्तु शुक्लकृष्णप्रतिपदोरन्यत्र॥ यस्तु नैरंतर्येणैवंविधचांद्रायणानुष्ठानं करोति
तस्य तिथिवृद्धिक्षयवशेन करणविधिस्ता मासादिप्रारंभोऽपि तत्र न दोषः॥ चांद्रगत्य २१६

नुसारमंतरेण त्रिंशद्दिनात्मकसावनमासानुष्ठेयत्वात्॥ अत्र चांद्रायणत्राष्टो गौ
णधर्मप्राप्त्यर्थं॥ ॐ उपयामनोमयनेमासमग्निहोत्रं जुहोतीत्यवत्॥ अस्मिंश्चांद्रा
यणे॥ पूर्वप्रक्रांतरमेकादश्युपवासादि न लुप्यते॥ तिथिनियमेन ग्रासनियमाभा
वात्॥ यत्र तु तिथिनियमेन ग्रासनियमस्तत्र पूर्वप्रक्रांतमुपवासादिकमन्ये॥ न
कारयेत्॥ एषु च प्रकारेषु कुत्रचन मनुना विशेषसंज्ञा दर्शिता॥ अष्टावष्टौ समश्नी
यात्पिंडान्मध्यंदिने स्थिते॥ नियतात्मा हविष्यस्य यतिचांद्रायणं चरेत्॥ चतुरः प्रातर
श्नीयात्पिंडान्विप्रः समाहितः॥ चतुरोऽस्तमिते सूर्ये शिशुचांद्रायणं चरेत्॥ यथाक
थंचित्पिंडानां तिस्रोऽशीतीः समाहितः॥ चतुरोऽस्तमिते सूर्ये मासेनाश्नन्हविष्यस्य चं
द्रस्यैति सलोकतामिति यमः॥ त्रीन्स्त्रीन्पिंडान्समश्नीयान्नियतात्मा दृढव्रतः॥ हविष्या
न्नस्य वै मासमृषिचांद्रायणं स्मृतमिति॥ ॥इति यतिचांद्रायणादीनि॥ ॥अथ गोवध

महा॰ व्रतं॥ ॥याज्ञवल्क्यः॥ ॥पंचगव्यं पिबेद्गोघ्नो मासमासीत संयतः॥ गोष्ठेशयो गोनुगामी
२१७ गोप्रदानेन शुध्यति॥ कृच्छ्रं चैवातिकृच्छ्रं च चरेद्वापि समाहितः॥ दद्यात्त्रिरात्रं चोपोष्य वृष
भैकादशास्तु गाः॥ अत्र एतच्चतुष्टयं विहितं॥ आहारांतरनिरपेक्षेण पंचगव्यं पिबन्ग्रा
मो गोचारी गोशायी मासमात्रं गा अनुगच्छंतीरनुगच्छन् शुध्यतीत्येकं व्रतं। पंचगव्याहा
रव्यतिरेकेण पूर्वोक्तधर्मयुक्तो मासं प्राजापत्यकृच्छ्रं चरेदिति॥ द्वितीयं॥ तथैव प्राजाप
त्यस्थाने अतिकृच्छ्रं मासं चरेदिति तृतीयं। त्रिरात्रोपवासं कृत्वा॥ वृषभैकादशगाश्च द
द्यादिति चतुर्थं॥ अत्र व्यवस्था॥ अज्ञानतो जातिमात्रब्राह्मणसंबंधिगोमात्र
वधे दद्यात्त्रिरात्रं चोपोष्य वृषभैकादशास्तु गा इत्येतत्॥ अज्ञानतः क्षत्रियसंबं २१७
धिगोमात्रव्यापादने प्राजापत्यव्रतं कुर्यात्॥ अज्ञानतः पंचगव्यं पिबेत्॥ गोघ्नो मा
मासमासीत संयतः॥ गोष्ठेशयो गोनुगामी गोप्रदानेन शुध्यतीत्येतत्॥ अमत्या वैश्य

संबंधिगोमात्रव्यापादने मासमतिकृच्छ्रं कुर्यात्॥ अज्ञानतः॥ शूद्रस्वामिकगोमात्रव्या
पादने मासं प्राजापत्यव्रतं कुर्यात्॥ कामतस्तु तत्तद्द्वैगुण्यं कल्प्यं॥ अथवा मत्वा युक्ता
नि व्रतानि पूर्वोक्तेषु विषयेषु विषमांतरे च देशकालजरावस्थाद्यपेक्षया योज्यानि तानि
व्रतानि मदनपारिजाते स्मार्त्तैः सम्यक् प्रदर्शितानि कर्मविपाकपरिच्छेदे स्मिन्नुते
षामनन्तोपयोगत्वावात्नात्र प्रदर्शितानि॥ ॥इति गोवधव्रतं॥ ॥अथ मासोपवास
व्रतं॥ ॥चिंतामणौ॥ ॥नारद उवाच॥ ॥भगवन्श्रोतुमिच्छामि व्रतानामुत्तमस्य च॥ विधि
मासोपवासस्य फलं चास्य यथोदितं॥ यथाविधानैः कार्यं व्रतचर्या यथा भवेत्॥
आरंभते यथा पूर्वं समाप्यं हि यथाविधि॥ यावत्कालं तु कर्तव्यं तावद्ब्रूहि पितामह॥ व्र
तमेतत्सुरश्रेष्ठ विस्तरेण ममानघ॥ ब्रह्मोवाच॥ साधु नारद मैवैतं त्वया पृष्टं व्रतं तपो
धन॥ मासमति मतां श्रेष्ठ तच्छृणुष्व ब्रवीमि ते सुराणां च मया विष्णुस्तपता च मया रवि:

॥ मेरुः शिखरिणां यद्वद्वैनतेयश्च पक्षिणां तीर्थानां तु यथा गंगा प्रजानां तु यथा वणिक्॥
श्रेष्ठः सर्वव्रतानां तु तद्वन्मासोपवासनं सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषु तेन तु सर्वदानो
त्थं चापि लभेन्मासोपवासकृत तच्चाग्निष्टोमादिभिर्यज्ञैर्विधैर्भूरिदक्षिणैः॥ न तत्पुण्य
मवाप्नोति यन्मासपरिलंघनात्॥ तेन जप्तं हुतं तेन तपस्तप्तं कृतं सदा॥ यः करोति
विधानेन नरो मासमुपोषणं॥ प्रविश्य वैष्णवं यज्ञं तेनाभ्यर्च्य जनार्दनं॥ गुरोराज्ञां ततो
लब्ध्वा कुर्यान्मासोपवासनं॥ वैष्णवानि यथोक्तानि कृत्वा सर्वव्रतानि च॥ द्वादश्यादी
नि पुण्यानि ततो मासमुपाचरेत्॥ अतिकृच्छ्रं पराकं च कृत्वा चांद्रायणं ततः॥ मासोप
वासं कुर्वीत ज्ञात्वा देहबलाबलं॥ वानप्रस्थो यतिर्वापि नारी वा विधवा मुने॥ मासोप २१८
वासं कुर्वीत गुरुविप्राज्ञया ततः॥ आश्विनस्यामले पक्षे एकादश्यामुपोषितः॥ व्रत
मेतत्तु गृह्णीयाद्यावत्त्रिंशद्दिनानि च॥ वासुदेवं समभ्यर्च्य कार्तिके सकलं नरः॥

मासं चोपवसेद्यस्तु स मुक्तिफलभाग्भवेत्॥ अर्चकतस्मा जमेत्स्नात्रिकालं कु
सुमैः शुभैः॥ मालतीलीवरैः पद्मैः कमलैस्तु सुगंधिभिः॥ कुंकुमोशीरकर्पूरैर्विलिप्य
वरचंदनैः॥ नैवेद्यधूपदीपाद्यैरर्चयेत जनार्दनं॥ मनसा कर्मणा वाचा पूजयेद्गरुडध्व
जं॥ कुर्यान्नरस्त्रिषवणं हृहज्ज क्रिर्जितेंद्रियः॥ नाम्नामेव तथा लापं विष्णोः॥ कुर्याद
हर्निशं॥ जप्त्वा विष्णोस्तुतिं वापि मृषावादं विवर्जयेत्॥ सर्वसत्त्वदयायुक्तः शांतश्चाति
रहिंसकः॥ सुप्तोवासन संस्पर्शो वासुदेवं प्रकीर्तयेत्॥ स्पर्शालोकनगंधादिस्वादनेप
रिकीर्तनं॥ अन्नस्य वर्जयेत्सर्वं ग्रासानामभिकारणं॥ गात्राभ्यंगं शिरोभ्यंगं तांबुलं
सविलेपनं॥ व्रतस्थो वर्जयेत्सर्वं यच्चान्यत्र निराकृतं॥ न व्रतस्थः स्पृशेत्किंचिद्वि
कर्मस्थान्न चालपेत्॥ देवतायतने विष्णोर्गृहस्थश्चरेद्व्रतं॥ कृत्वा मासोपवासं तु यथो
क्तविधिना नरः नारी वा विधवा साध्वी वासुदेवं समर्चयेत् अन्यूनाधिकमेवं तु व्रतं

मह॰ त्रिंशद्दिनैरिदं॥ कृत्वा मासोपवासं तु संयतात्मा जितेंद्रियः॥ ततोर्च्चयेत वै पुण्यं द्वादश्यां गरु-
१९८ डध्वजं॥ पूजयेत्पुष्पमालाभिर्गंधधूपविलेपनैः॥ वस्त्रालंकारवाद्यैश्च तोषयेद्भक्तितो नरः॥
स्नापयेत हरिं भक्त्या तीर्थचंदनवारिणा॥ चंदनेनानुलिप्तांगं धूपपुष्पैरलंकृतं॥ वस्त्रदाना-
दिभिश्चैव भोजयेत हरिं भक्त्या तीर्थचंदनवारिणा॥ चंदनेनानुलिप्तांगं धूपपुष्पैरलंकृ-
तं॥ वस्त्रदानादिभिश्चैव भोजयेत द्विजोत्तमान्॥ दद्याच्च दक्षिणां तेभ्यः प्रणिपत्य क्ष-
मापयेत्॥ विप्रान् क्षमापयित्वा तु विसर्ज्यास्यर्च्य पूज्य च॥ यथावित्तानुसारेण भक्तियु-
क्तेन शक्तितः॥ एवं मासोपवासं तु कृत्वाभ्यर्च्य जनार्दनं॥ भोजयित्वा द्विजांश्चैव विष्णु-
लोके महीयते॥ एवं मासोपवासान् हि सम्यक् कृत्वा नयोदश॥ निर्वापयेत्ततस्तान्वै वि- १९८
धिनानेन तच्छृणु॥ कारयेद्धैमवं यत्तमेकादश्यामुपोषितः॥ पूजयित्वा तु देवेशमाचा-
र्यं तु तत्र याहरि॥ अर्चयित्वा हरिं भक्त्या अनिवाद्यगुरुं तथा॥ ततो तु भोजयेद्विप्रान् भो-

जयीत तथा विधि॥ विशुद्धकुलचारित्रान् विष्णुपूजनतत्परान्॥ पूजयित्वा द्विजान् सम्य-
क् भोजयित्वा त्रयोदश॥ तावंति वस्त्रयुग्मानि भोजनाच्छादनानि च॥ योगपदानि युग्मा-
त्ति नैवद्दिद्या द्वैव द्विजाग्रेभ्यः पूजयित्वा प्रणम्य च॥ ततस्तु कल्पयेच्छय्यां शास्त्रास्त-
रणसंस्कृतां॥ साछादनां सुसंश्लिष्टां सोपधानामलंकृतां॥ कारयित्वात्मनो मूर्त्तिं कां-
चनीं तु स्वशक्तितः॥ न्यसेत्तस्यां तु शय्यायामर्चयित्वा स्रगादिभिः॥ आसनं पादुके
छत्रं वस्त्रयुग्ममुपानहौ॥ पवित्राणि च पुष्पाणि शय्यायामुपकल्पयेत्॥ एवं शय्यां तु
संकृत्या प्रणिपत्य च तान् द्विजान्॥ प्रार्थयेत्त्वा तु मोदार्थं विष्णुलोकं व्रजाम्यहं॥ एव-
मभ्यर्चिता विप्रा वदेयुस्तं तिनं सदा॥ व्रज व्रज नरश्रेष्ठ विष्णोः स्थानमनामयं॥ विमान-
वैष्णवं दिव्यं सत्प्रधापरिकल्पितं॥ तेन विष्णुपदं याति सदानंदमनामयं॥ ततो विसर्ज-
येद्विप्रान् प्रणिपत्यानुगम्य च॥ ततस्तु पूजयेद्भक्त्या गुरुं ज्ञानप्रदायकं॥ शय्यां तां क-

महा॰ २२०

ल्पितां सम्यक् कर्तुं ज्ञानप्रद्रामकं॥ प्राणस्य त्रिरस्ता रूंगतो गुरवे प्रतिपादयेत्॥ कृत्वा मासो
पवासांश्च नरो विष्णुतनुं विशेत्॥ कृतमासोपवासांश्च नरो विष्णुतनुं विशेत्॥ कृतमासो
पवासस्य विष्णुपूजनतत्परः॥ नयेच्छांतमनाः कालं धर्मस्य प्रयतेंद्रियः॥ कृत्वा मासोप
वासांश्च निर्वाप्य विधिवन्मुने॥ कृत्वा नारायणं रातमुध्य स विष्णुलोकं व्रजेन्नरः॥ यस्मिन् ज
तो महापुण्ये कुले मासोपवासकृत्॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते॥ नरो मासो
पवासानां कर्ता पुण्यवतां वरः॥ पितृमातृकुलान्याच समं विष्णुपुरीं व्रजेत्॥ नारी वा सु
महाभाग्या यो कुव्रतमास्थिता॥ कृत्वा मासोपवासांश्च व्रजेद्विष्णुं सनातनं॥ ॥नार
द उवाच॥ ॥सुदुःकरमिदं देव मूर्छाग्लानिकरं नृणां॥ व्रतं मासोपवासाख्यं न किं जन २२०
यते ऽच्यते॥ पीडितस्य नरा देव मुमूर्षो व्रतिनस्तथा॥ मा गो वा तु ग्रहो त्राय किं तु कार्यं
पितामह॥ ॥ब्रह्मोवाच॥ ॥व्रतस्थं क्रांतं दृष्ट्वा मुमूर्षं चातपोधनं॥ दृष्ट्वा तु ब्राह्मणस्

स्य कुर्यात् सम्यगनुग्रहं॥ अमृतं पाययेत् क्षीरमिष्टमानं सकृत्त्रिदिः॥ यथेह न विष्णु
र्व्येत प्राणैः स्तुत्या डिनो व्रती॥ अतिमूर्छान्वितं क्षीणं मुमूर्षुं॥ क्षुत्पीडितं पाययित्वा
क्षितं क्षीरं रक्ते दत्वा फलानि च॥ अहोरात्रं च योऽनिश्च संव्रतस्य परिपीड्यते॥ पयोमूल
लफलं दत्वा विष्णुलोकं व्रजेत्स वै॥ तं मासोपवासस्य मारूढं प्राणसंशये॥ अव्रतप्र
गुणैर्हि व्यैः परीक्षेद्ब्राह्मणास्तथा॥ नैते व्रतं विनिघ्नंति हविर्विप्रानुमोदितं॥ क्षीरौषधि
गुरोराज्ञा माषो मूलं फलानि वा॥ एवं कृत्वा निरक्षेत्स गुरुं उपायं स्तथा॥ पायये इति
ता यस्मात्स माप्नोति पुनर्व्रतं॥ अयं विष्णुर्व्रतं विष्णुर्दाता विष्णुर्व्रती तथा॥ सर्वं वि
ष्णुमयं ज्ञात्वा व्रतस्य क्षीणमुद्धरेत्॥ यदा मुमूर्षुर्निश्चेष्टः परिज्ञानोति मूर्छितः॥
तदास्य मुद्धरेत्क्षीणमिष्टं तं विमुखे स्थितं॥ परिपाल्य व्रती देहं व्रतशेषं समापये
त्॥ यथोक्तं द्विगुणं तस्य फलं विप्रमुखोदितं॥ इंद्रियार्थेषु संसक्तास्सदैव निर्मला

मतिः॥ परितोष्यते विष्णुर्नोपवासो जितात्मनां॥ कीर्तनस्य वकुन्निस्तीर्णोः स्नानहोमज
पव्रतैः॥ येनेंद्रियगणो घोरो निर्जितो दृष्टचेतसा जितेंद्रियः स हात्रणतः सर्वं कृतहितेरतः
॥ वासुदेवपरो नित्यमवश्यं नित्यमर्हति॥ कृत्वा नूनं यथोक्तं तु वै स्नवं पुरुषोत्तमं॥
विष्णुलोकमवाप्नोति पुनरावृत्तिदुर्लभं॥ ये स्मरंति सदा विष्णुं विमुधे नांतरात्मना॥
ते प्रयांति न वंसत्का विष्णुलोकमनामयं॥ विज्ञातिवार्ध रात्रे च मध्याह्ने दिवसक्षये॥
स्मृत्वा कृतं येन तु कीर्त्तितेत रतिं त्वार्णवं॥ आनंदितो यदुःखार्त्तः कृधः तुगतो यथा ह
रियोऽनुकीर्त्तयते विष्णुं सगच्छेद्वै स्नवीपुरं॥ यर्न जन्मजरारोगदुःखसंसारबंध
नैः॥ निवार्यते नरो नित्यं वासुदेवमनुस्मरन्नुस्मरन्॥ स्थावरे जंगमे चापि सूक्ष्मे स्त
न्मे मुत्ता मुते॥ विष्णुं पश्यति सर्वत्र यः स विष्णुः स्वयं नरः॥ सर्वं विष्णुमयं ज्ञात्वा त्रैलो
क्यं सचराचरं॥ यस्य ज्ञां ता मतिस्तेन पूजितो गरुडध्वजः॥ इति कल्यातिकल्मानांव्रता

नामुत्तमस्य च॥ स विष्णुलोकमवाप्नोति प्रसादाच्चक्रपाणिनः॥ विधिर्मासोपवास
स्य यथावत्परिकीर्त्तितः॥ सुतस्नेहान्मुनिश्रेष्ठ सर्वलोकहिताय च॥ कृत्वाप्युतश्च
मोन क्ष्मान्नरो विष्णुपुरीं व्रजेत्॥ नान्नकाय प्रदातव्यं नरे यं दुष्टचेतसे॥ ॥इति विष्णु
रहस्ये क्रमासोपवासव्रतं॥ ॥अथ कृच्छ्रचांद्रायणसाधारणे कर्त्तव्यता॥ ॥याज्ञवल्क्य
ः॥ कुर्यात्त्रिषवणस्नायी कृच्छ्रं चांद्रायणं तथा॥ पवित्राणि जपेत्पिंडान्गायत्र्या चाभिमं
त्रयेत्॥ त्रिषवणस्नानं प्रकृच्छ्रव्यतिरेकेण॥ तत्र कृच्छ्रेतु मनुनास कृत्स्नायी समाहि
त इति विशेषाभिधानात्॥ पवित्राणि सूक्तानि चाघमर्षणं देवकृतः शुद्धवत्यरत्नमं
दीत्यादि वसिष्ठादि प्रदर्शितानि ऋग्यजुः साम सुप्रवृत्ति। तानि यथायोगं वं जपेत् अवि
रुद्धेषु कालेषु पिंडान् ग्रासान्प्रत्येकं गायत्र्या चाभिमंत्रयेत्॥ ग्रासाभिमंत्रणे गौ नमो
कैरोत्यादि निर्मत्रे ः सह गायत्र्या विकल्पः॥ एवं जपादिष्वप्येककार्याणां मंत्राणां विक

ध्यः स्त्रिकार्याणां समुच्चय इति विवेकः॥ मनुः॥ महाव्याहृतिभिर्होमः कर्त्तव्यः स्वय
मन्वहं॥ अहिंसा सत्यमक्रोधमार्जवं च समाचरेत्॥ त्रिरह्नस्त्रिर्निशायां तु सवासा जल
मा विशेत्॥ स्त्रीशूद्रपतितांश्चैव नाभिभाषेत कर्हिचित्॥ स्थानासनाभ्यां विहरन्नशक्तो
ऽधः शयीत वा॥ ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्चकः॥ सावित्रीं च जपेन्नित्यं पवित्रा
णि च शक्तितः॥ सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमादृत इति॥ त्रिरह्न इत्यादि दिवा त्रिः रा
त्रौ त्रिरिति महत्त्वप्रायः त्रिषु सवनेषु स्नानं तच्छक्तविषयं॥ एवं न्यूनाधिकस्नानान्यमाशक्ता
शक्तापेक्षया योज्यानि॥ जाबालः॥ आरंभे सर्वकृच्छ्राणां समाप्तौ च विशेषतः॥ आज्ये
नैव हि शाखाग्नौ जुहुयाद्व्याहृतीः पृथक्॥ आद्यं कुर्यात्तु तांते च गोहिरण्यादि दक्षिणां॥ २२२
स्त्रीणां होमो न दातव्यः पंचगव्यं तथैव च॥ पराशरः॥ स्त्रीशूद्रस्य तु शुद्ध्यर्थं प्राजापत्यं
समाचरेत्॥ पंचगव्यं न कुर्वीत स्नात्वा पीत्वा शुचिर्भवेत्॥ स्त्रीशूद्रयोः पंचगव्यविहितत्व

निषेधवाद्विकल्पः॥ जाबालेन॥ शाखाग्नौ होमविधानस्त्रीणां होमो न दातव्य इति निषे
धात् गृह्याग्नावेव होमनिषेधः॥ अतश्च स्त्रीशूद्रयोरपि ब्राह्मणद्वारा लौकिकाग्नौ भव
त्येव॥ अयं च होमांगहोमः न तु कृच्छ्रप्रत्याम्नायत्वेन प्रधानहोमः॥ आरंभे सर्वकृच्छ्रा
णां समाप्तौ च विशेषतः॥ आज्येनैव हि शाखाग्नौ जुहुयाद्व्याहृतीः पृथगिति जाबाले
न विशेषाभिधानात्॥ कृच्छ्रप्रत्याम्नायत्वेन तयोस्तु प्रधानयोर्जपहोमयोः स्त्रीशूद्रयोर्नाधि
कारः॥ तथा चांगिराः॥ तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितं॥ प्रायश्चित्तं प्रदा
तव्यं जपहोमविवर्जितं॥ अत्र शूद्रशब्दः स्त्रीणामप्युपलक्षणार्थः॥ तयोः समानधर्मत्वात्॥ वै
शंपायन उवाच॥ स्नानं त्रिकालमेव स्यात्त्रिकं त्वन्वा द्विजन्मनः॥ शंखः॥ एकवासार्धवास
वा लघ्वाशी स्याद्दिने दिने इति॥ हारीतः॥ अवरमुधवतां जिंस्त्वाघमर्षणमंतर्जले जप
धौतमहतं वासः परिधाय साम्नासौम्येनादित्यमुपतिष्ठेतेति षड्विंशन्मते॥ जपहोमादि

मह० यत्किंचित्कुरुतेकं संजवेन्नचेत्॥ सर्वव्याहृतिभिः कुर्यात्प्राणायामान्विधानवेन्नचद्द्विरशंखः॥
२२३ एकवासाश्चरेद्भिक्षां स्नात्वा वासो न पीडयेत्॥ गायत्र्या दशसहस्रमाह्निकं जप उच्यते॥
बौधायनः॥ अहतं वाससी वसीत सावित्रीं व्याहृतीश्च वै जपेदष्टसहस्रं कृत्वः॥ उंकारमादि
तः कृत्वा रूपे रूपे तथांततः॥ नमो वीरासने युक्तः कुर्यात्प्राप्यं सुसंयतः॥ आसीनः शल्य
विद्धो वापि वेद्व्यथमः सकृत्॥ गव्यस्य पयसो लाभे गव्यमेवं नवेद्दधि॥ दध्नो लाभे नवेत्तक्रं
तक्रालाभे तु यावकं॥ ...मन्यतमं मन्तुउपयेत॥ वतत्पिवेत्शल्यविद्धो न वति वा यदुउ
पमार्षो॥ शल्यविद्ध इव त्रिस्त्रजः सन्नासीनः पयः पिबेद्दितयं॥ यमः॥ अगुल्मत्रेस्थितं पि
उं गायत्र्यामपि गोत्राज्ञानिमंत्रितं॥ प्रातः पाचम्य पुनः कुर्याद्दन्यस्याप्यभिमंत्रणं॥ येतु प्राणाग्नि २३
होत्रे अधिकारिणस्तेषामपोशानकर्मानंतरं प्राणाहुतयोपि पंचग्रासैर्भवंति॥ तत्र
च पूर्वोक्तप्राणमेव ग्रासं यम्न तमे मंत्रेर्ग्रासाननिमंत्र्य प्राणाय स्वाहेत्यादिभिर्मंत्रैः

प्राणाग्निहोमः कार्यः॥ ग्रासत्वे कश्चित्त्रिचतुरो वा ग्रासास्तत्र बौधायनोक्तो विशेषो ग्रास
॥ तद्यथा॥ अश्नीयात्प्राणायेति प्रथममपानायेति द्वितीयं व्यानायेति तृतीयमुदानायेति
चतुर्थं समानायेति पंचमं॥ ग्रासाश्चत्वारस्तदा द्वाभ्यां प्रथमं ग्रासं त्र्यमस्तदा द्वाभ्यां द्वाभ्यां पूर्वे
ग्रासद्वौ न तस्यामेवोत्तरमेकं सर्वैरिति वृत्तस्यार्थः॥ ग्रासाश्चत्वारो ग्रासं संनष्टं तेन तदाद्य द्वितीया
भ्यां मंत्राभ्यां प्रथमग्रासं शेषैस्तृतीयेन द्वितीयं चतुर्थेन तृतीयं पंचमेन चतुर्थं ग्रास
त्रयः तदाद्य द्वितीयाभ्यां प्रथमं तृतीय चतुर्थाभ्यां द्वितीयं॥ पंचमेन तृतीयं ग्रासद्वौ तदा
प्रथममंत्रैस्त्रिभिः प्रथमं अंतिमाभ्यां द्वाभ्यां द्वितीयं॥ ग्रासत्वेकः॥ तदा सर्वैरेवेतं यसे
दिति॥ हारीतः॥ चांद्रमसं चरुं श्रपयित्वा न वो नवा इति कुर्यात्कृष्णोक्ता याश्च रुद्रेणाभिंड
त्वा विश्व निमंत्रिताम्न्याश्नीयादिति॥ ज्योत्स्नाद्राष्ट्रेन चंद्रेरमो लक्ष्यते॥ तेनार्धरात्रा
दावपि भोजने होमो नास्ति॥ शंखः॥ आर्द्रामलकमात्रास्तु ग्रासा इंदुव्रते स्मृताः॥ तथै

वाकृतमस्तत्र शौचार्थं चैव मृत्तिका ॥ ॥ इति कृच्छ्रचांद्रायणसाधारणेकर्त्तव्यता ॥ ॥ अथ प्राजापत्यादिकृच्छ्रप्रत्याम्नायाः ॥ तत्र पूर्वोक्तरीत्या द्वादशादिनानि प्राजापत्यं कृच्छ्रं चरेत् ॥ तदशक्तो धेनुमेकां दद्यात् ॥ तदभावे निष्कं दद्यात् ॥ निष्कजत्तगोपरिमाणमकरणोन्यथापि ॥ अथवा गोरभावे देशकालोचितं गोमूल्यं देयं तत्राप्यशक्तौ तदर्धं वा पादं वा दद्यात् ॥ तथा च मिताक्षरायां ॥ गवामभावे निष्कं वा तदर्धं वा तदर्धं पादमेव वा ॥ तथा ॥ प्राजापत्यक्रियाशक्तौ धेनुं दद्याद्द्विजोत्तमः ॥ धेनोरभावे दातव्यं तुल्यं मूल्यं न संशय इति पराशर ॥ कृच्छ्रोयुतं तु गायत्र्या उदवासस्तथैव च ॥ धेनुप्रदानं विप्राय सममेतच्चतुष्टयं ॥ कृच्छ्रः प्राजापत्यः ॥ अयुतं गायत्र्याः ॥ उदवास ॥ उदके वासः ॥ स त्वहोरात्रं ॥ ॥ मिताक्षरायां ॥ ॥ कृच्छ्रो देव्ययुतं चैव प्राणायामशतत्रयं ॥ तिलहोमसहस्रं तु वेदपारायणं तथा ॥ समधान्यास्तु प्राजापत्यकृच्छ्रप्रत्याम्नायेष्वेतद् द्वादशसु दिनेषु प्रतिदिनं पंच पंच विप्र

भोजनीयाः ॥ ते च मिलित्वा षष्टिर्भवंति ॥ तथा मिताक्षरायां ॥ कृच्छ्रे पंचातिकृच्छ्रे त्रिगुणमहरहस्त्रिंशदेवं तृतीये चत्वारिंशच्च तप्ते त्रिगुणनगुणिता विंशतिः स्यात्पराके ॥ कृच्छ्रे सांतापनाख्ये नवतिरथ अधिका विंशतिः सैव हीना पर्णाचांद्रायणे स्यात्तपसि कृच्छ्रवे भोजयेद्विप्रमुख्यान् ॥ अत्र कृच्छ्रे अहरहरिति प्रत्येकं संबध्यते ॥ स्वल्पधान्यस्तु द्वादशब्राह्मणान्भोजयेत् ॥ तथा च चतुर्विंशतिमते ॥ विप्रा द्वादशवा भोज्याः पावकेष्टिस्तथैव च ॥ अन्या वा पावनी कार्या वित्तसमान्याकुर्मनीषिणः ॥ अत्र प्रतिदिनं द्वादश द्वादशाः किंतु द्वादशैव पुण्यतीर्थे विधियुक्तप्रकारेण स्नात्वा तद्दिनं तु स्नानं विधाय केशान्न्वापयित्वा पुनर्विधिवत्स्नात्वा पूर्ववत्केशान्संख्यापयेत् ॥ एवं द्वादशस्नानानि प्राजापत्यकृच्छ्रप्रत्याम्नायः ॥ तथा च पराशरः ॥ कृच्छ्रो देव्ययुतं चैव प्राणायामशतत्रयं ॥ पुण्यतीर्थे नार्द्रशिरःस्नानं द्वादशसंख्यया ॥ अनार्द्रशिरो यस्मात्सावनार्द्रशिराः ॥

म हा॰
२२५

अनार्द्रशिरसः स्नानमनार्द्रशिरःस्नानं ॥ इति प्राजापत्याम्नायाः ॥ अथातिकृच्छ्रप्रत्या
म्नायाः ॥ तत्रातिकृच्छ्रकरणे शक्तौ याज्ञवल्क्यः एकपाणिपूरान्नभोजनयुक्तानि कृच्छ्र
प्रत्याम्नायत्वेन धेनुद्वयं दद्यात् ॥ तथा च षड्विंशन्मते प्राजापत्येऽतुगामेकमतिकृच्छ्र
द्वयमस्त्वनमिति ॥ एकैकग्रासमश्नीयादिति ॥ मतत्क्षातिकृच्छ्रकरणाशक्तौ धेनुत्रयं देयं
॥ अत एव चतुर्विंशतिमते ॥ पराकतप्तातिकृच्छ्रे तिस्रस्तिस्रस्तु गामाहुस्त्रयेति गवाम्
नावेतावंतो निष्कास्तावंति गोमूल्यानि देयानि ॥ निष्कत्रावेनरदर्धपादं वा ॥ अथवा यावं
त्यो धेनवस्तावंति गायत्रीजपानामयुतानि तावंति उदवासाः पूर्वोक्तरीत्या कार्याः ॥ उ
ततावंति प्राणायामशतद्वयानि तावंति वा तिलहोमसहस्राणि अपि वा तावंति वेद
पारायणानि भवंति ॥ अथवा यावंत्यो धेनवस्तावंतोऽत्र कृच्छ्रा भवंति अतोऽल्पधनेन
धेनुसंख्यायां द्वादश विप्रा भोजनीयाः ॥ चतुरधनेन तु द्वादशसु दिनेषु प्रतिदि २२५

षु प्रतिदिनं पंचदशपंचदश विप्रा भोजनीयाः ॥ तथा च चतुर्विंशतिमते कृच्छ्रे पंचाति
कृच्छ्रे त्रिगुणमहरिति अतिकृच्छ्रे त्रिगुणं ॥ पंचदश विप्रा भोजनीयाः प्रतिदिने द्वादश
सु दिनेष्विति सर्वः ॥ अत्र च मिलित्वा अशीत्युत्तरशतं ब्राह्मणा भवंति अथवा यावत्यो
धेनवस्तत्संख्याया ब्राह्मणा द्वादशकर्तव्याः प्रत्याम्नायाः ॥ अथ कृच्छ्रातिकृच्छ्रप्रत्या
म्नायाः ॥ तत्र प्राजापत्यत्रयस्थाने कृच्छ्रातिकृच्छ्रस्य विहितत्वात् कृच्छ्रातिकृच्छ्रकर
णाशक्तौ तिस्रो धेनवो दातव्याः ॥ तदभावे निष्कत्रयं सार्धनिष्को वा पादोननिष्को वा देयः
॥ अथवा गायत्र्ययुतं दिनत्रयमुपवासो त्रीणि प्राणायामशतद्वयानि वा तिलहोम
सहस्रत्रयाणि त्रीणि वेदपारायणानि अपि वा हरहः त्रिंशत्संख्याका ब्राह्मणा भो
जनीयाः ॥ तथा च चतुर्विंशतिमते ॥ कृच्छ्रे पंचातिकृच्छ्रे त्रिगुणमहरहस्त्रिंशद्वैव रती
य इति ॥ रतीये कृच्छ्रातिकृच्छ्रेऽहरहः त्रिंशद्ब्राह्मणभोजनीयमित्यर्थः ॥ रात त्रि

महा. २२६

शग्रासाणां भोजनं द्वादशसु दिनेषु प्रतिदिनं कर्त्तव्यं मिलित्वा षष्ठ्युत्तरं त्रिशतं ग्रासाणा
भवंति अत्र समर्घधान्यस्येतत्॥ तदा तेन त्रिगुणिता द्वादशग्रासाणां भोजनीयाः॥ तेच मिलि
त्वा षट्त्रिंशत् तस्मात् प्रत्याम्नायास्तु प्राजापत्यप्रत्याम्नायप्रकरणोक्तरीत्या मावलोगावसा
वक्तव्यमात्तेमाः॥ ॥इति कृच्छ्रातिकृच्छ्रप्रत्याम्नायाः॥ ॥अथ तप्तकृच्छ्रप्रत्याम्नायाः॥
॥तत्र द्वादशाहसाध्ये तप्तकृच्छ्रे प्रत्याम्नाये नतिस्रो गावो देयाः॥ पराकतप्तातिकृच्छ्रेति
स्मृतिस्तु गास्त्वेति॥ चतुर्विंशतिमते॥ अभिधानात्॥ चतुरहसाध्ये तप्तकृच्छ्रे त्वेकधे
नुः॥ त्र्यहसाध्ये तु निष्कार्धं देयं॥ गवामभावे निष्कं वेत्यादिका अन्ये प्रत्याम्नायाः॥ कृच्छ्रा
तिकृच्छ्रप्रत्याम्नायः॥ कारणोक्तरीत्या विज्ञेयाः॥ समर्घधान्यस्य चतत्कृच्छ्रे अयं विशेषः २२६
द्वादशादिनेषु प्रतिदिनं चत्वारिंशच्चत्वारिंशद्ग्रासाणां भोजनीया इति॥ तथा चतुरह
साध्ये त्र्यहसाध्ये च तप्तकृच्छ्रे प्रतिदिनं चत्वारिंशच्चत्वारिंशदिति तथा चतुर्विंशति

मते॥ कृच्छ्रं पंचातिकृच्छ्रे त्रिगुणमहरहस्त्रिंशदेवं तृतीये चत्वारिंशच्च तप्त इति॥ तप्तेत
प्तकृच्छ्रे अहरहश्चत्वारिंशदित्यन्वयः॥ इति तप्तकृच्छ्रप्रत्याम्नायाः॥ ॥अथ सांतपनप्र
तिसांतपनप्रत्याम्नायाः॥ ॥तत्र सप्ताहसाध्यस्य सांतपनस्य सार्धप्रत्याम्नायस्या
ने विहितत्वादेकाधेनुर्निष्कार्धं चरेयं तथा च षड्विंशन्मते पराकतप्तातिकृच्छ्रस्याने
कृच्छ्रत्रयं चरेत्॥ सांतपनस्य चार्धमशक्तो व्रतमाचरेदिति॥ दिनद्वयसाध्ये सांत
पने निष्कार्धं चरेयं॥ दिनत्रयसाध्ये मतिसांतपनाख्ये तु धेनुमेका दद्यात्॥ अनये
वरीत्या गायत्रीजपादिरूपप्रत्याम्नायेष्वपि परिमाणं कल्प्यं॥ यत्रैकाधेनुर्निष्कार्धं
वा देयं भवति॥ तत्र गायत्र्याश्च मुनजपो धेनुस्थाने अर्धनिष्कस्थाने तु पंचसहस्राणीस
नयारीत्या प्रत्याम्नायमध्ये तु प्राजापत्यप्रत्याम्नायप्रकरणे द्रष्टव्या॥ ॥इति सांतपन
प्रतिसांपनप्रत्याम्नायः॥ एकेन तिस्रो धेनवो अर्धनिष्कं चरेयं॥ पंचदशादिनसाध्ये तु

महा. ॥ ॥ अथ मतिमहासांतपनप्रत्याम्नायाः॥ तत्रैकविंशतिदिनसाध्ये महासांतपने प्रत्या
२२७ म्नायत्वेन तिस्रो धेनवोऽर्धनिष्कं च देयं॥ पंचदशदिनसाध्ये तु धेनुद्वयं निष्कार्धं च दे
यं॥ सप्ताहसाध्ये त्वेका धेनुर्निष्कार्धं चेति स्यात्॥ एतत्कल्पनायाम् अंतेषडुपवास
तुल्यप्राजापत्यप्रत्याम्नायत्वेन धेनुविधानं॥ सप्ताहसाध्ये तु सांतपने निष्कार्धस
हितधेनुदानमुक्तं सांतपनप्रकरणे दर्शितं॥ सांतनस्य चाध्यर्धमिति॥ अनया
दिशा गायत्रीजपादिरूपप्रत्याम्नायेष्वप्यूह्यं॥ ते च प्रत्याम्नायभेदाः प्राजापत्यप्रत्या
म्नायप्रकरणे द्रष्टव्याः॥ ॥इति महासांतपनप्रत्याम्नायाः॥ ॥अथ पराकप्रत्या
म्नायाः॥ चतुर्विंशतिमते पराकतप्तकृच्छ्राणां स्थाने कृच्छ्रत्रयं चरेत्॥ जपहोमा २२७
दिकं वा विकल्पमेत्सूर्वकल्पवदिति॥ कृच्छ्रत्रयस्थानीयपराककरणाशक्तौ ति
स्रो धेनवो देयाः॥ तथा गायत्रीजपादिप्रत्याम्नायाश्चापि त्रिगुणाः कर्तव्याः॥ ते च

च प्राजापत्यप्रत्याम्नायप्रकरणे प्राक्प्रदर्शिताः॥ ॥इति पराकप्रत्याम्नायाः॥ ॥
अथ यावकव्रतगोमूत्रयावकव्रतपयोव्रतानां प्रत्याम्नायाः॥ ॥तत्र यावकव्र
ते पयोव्रते च प्रत्याम्नायत्वेन पंच धेनवो देयाः॥ षडुपवासा एकप्राजापत्यस्थान
मिति मासे पंच षड्भवंतीति च वा॥ यद्यपि यावकव्रते प्रतिदिनं यावकमुच्यते॥
तथापि पूर्वोक्तयावकभोजनस्य नक्तेशसाध्यत्वादुपवासतुल्यत्वमेवत्वेव॥ प
योव्रते तु पयःपाने क्लेशाभावेपि ग्रासमात्रपर्याप्तस्यैव पयसः पानादुपवा
सकल्पत्वं गोमूत्रयावकव्रते तु क्लेशाधिक्यात्प्रत्याम्नायाम्नायत्वेन षड् धेन
वो देया इति तत्त्वं॥ एवं गायत्रीजपादिप्रत्याम्नायाश्च विकल्पनीयाः॥ ते च प्राक्प्रा
जापत्यप्रत्याम्नायप्रकरणे प्रपंचिताः॥ ॥इति यावकव्रतगोमूत्रयावकव्रतप
योव्रतानां प्रत्याम्नायाः॥ ॥अथ चांद्रायणप्रत्याम्नायाः॥ तत्र समग्रधनेन चांद्र

पणप्रत्याम्नायत्वेनाष्टैणवो देयाः॥ तथा चतुर्विंशतिमते॥ अष्टौ चांद्रायणे देयाः प्रत्या
म्नायविधौ सदेति॥ तथापि पादिकामध्यमयवमध्यचांद्रायणयोर्गौतमाद्युक्ताधिके
तिकर्त्तव्यतासहितयोरप्यष्टौ चांद्रायणे देया इत्येतद्योज्यं॥ अस्य धनेन तु तिस्रो गावो
देयाः॥ तथा च पराशरनिबंधे प्राजापत्ये तु गामेकामतिकृच्छ्रे द्वयं स्मृतं॥ चांद्रायणे
पाराके च तिस्रस्ता दक्षिणा तथेति॥ एतच्च धेनुत्रयदानं स्वल्पेतिकर्त्तव्यतासहित
योर्यवमध्यचांद्रायणयोस्तथा मतिचांद्रायणादिष्वपि योज्यं॥ एवं शक्त्यापेक्षया पाव
त्या धेनवो देयमते॥ तत्र तदभावे निष्कस्यात्तदर्धं पादमेव वेत्युक्तरीत्या दातव्यं॥ अ
थवा प्रतिधेनु चायुतमयुतं गायत्रीजपो वा तथा धेनुसंख्याकाउदवासा वा धेनु
संख्याकाउदवासा वा धेनुसंख्याकानि प्राणायामशतानि वा धेनुसंख्याकानि
वेदपारायणानि वा तत्संख्याकतिलहोमसहस्राणि वा प्रतिधेनु द्वादश द्वादशब्रा

ह्मणभोजनानि वा प्राजापत्यप्रत्याम्नायप्रकरणोक्तरीत्या प्रतिधेनु वा द्वादश द्वादशस्ना
नानि वा कार्याणि॥ एते च विकल्पा व्रीहियववन्नैच्छिकाः॥ अपि तु दितानुदितहोमव
द्व्यवस्थिताः॥ व्यवस्था च देशकालाद्यपेक्षया॥ तथा च बौधायनः॥ ॥ देशं कालं तथा
त्मानं द्रव्यं द्रव्यप्रयोजनं॥ उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति॥ शौचं च
शास्त्रेणानुविधिकारणं सर्वमभिधीयते॥ एवमन्यत्रापि न्यूनाधिककल्पेषु शक्त्याद्यपे
क्षो विकल्पो बोध्यः॥ अनेनैवाभिप्रायेण मिताक्षरादिनिबंधेषु न्यूनाधि
कपक्षाः प्रदर्शिताः॥ तद्यथा॥ चांद्रायणं मृगारेष्टिः पवित्रेष्टिस्तथैव च॥ मित्र
विंदा पशुश्चैव कृच्छ्र मासत्रयं तथा॥ तिलहोमाश्रुते चैव पराक द्वयमेव च॥ गाय
त्र्यालक्षजाप्यं च समान्याहुः स्मृतिरिति॥ तपस्यसमर्थेनसमर्थधान्येनमा
सावधिकालं प्रतिदिनं चतुर्विंशतिब्राह्मणभोजनीयाः॥ तथा चतुर्विंशतिमते॥

कृच्छ्रे पंचातिकृच्छ्रे त्रिगुणमहरहस्त्रिंशदेवं तृतीये चत्वारिंशच्च तप्ते त्रिगुणेन गुणिता
विंशतिः स्यात्पराके॥ कृच्छ्रे सांतपने च तिथ्युदधिका विंशतिः सैव हीना ग्रासाच्चान्
द्रायणे स्यात्तपसि लकुशाब्जोनोजयेद्विप्रमुख्यानिति॥ अस्यार्थः॥ अहरहरि
ति सर्वत्रान्वेति॥ कृच्छ्रे प्राजापत्ये द्वादशसु दिनेषु अहरहः पंचविप्रमुख्यान् भो
जयेत्॥ अतिकृच्छ्रे पूर्वोक्तलक्षणे प्रोक्तसंख्याकेषु दिनेषु प्रतिदिनं त्रिगुणं त्रै
गुण्यं पंचपंचापेक्षया पंचदश इत्यर्थः॥ तृतीये कृच्छ्रातिकृच्छ्रे पूर्वोक्ते कृच्छ्रातिकृच्छ्र
श्री दिनेषु प्रत्यहं त्रिगुणगुणिताहरहस्त्रिंशत्॥ तप्ते तप्तकृच्छ्रे पूर्वाभिहिततप्तकृच्छ्रे
पूर्वाभिहिततप्तकृच्छ्रदिनेषु प्रतिदिवसं चत्वारिंशत् पराके पराकव्रतसंख्याक २२९
दिनेषु प्रत्यहं त्रिगुणेन गुणिता विंशतिः षष्टिरित्यर्थः॥ सांतपनाख्ये कृच्छ्रे पूर्ववदेवा
हरहः षड्विंशतिः॥ चांद्रायणव्रतसंख्याकदिनेषु प्रतिग्रासं द्वात्रिंशद्धीना षडुधि

काविंशतिः॥ चतुर्विंशतिरित्यर्थः॥ एते च पक्षाः पूर्ववदेव शक्त्याद्यपेक्षया योज्याः॥
॥ ॥ इति चांद्रायणप्रत्याम्नायाः॥ ॥ अथ गोवधव्रतप्रत्याम्नायाः॥ ॥ याज्ञवल्क्योक्तव्रत
चतुष्टयं प्राक् प्रदर्शितं॥ तल्लक्षणप्रकरणे तत्रज्ञानमात्रबालसंबंधिगोमात्रवधे
त्रिरात्रमुपोष्य दशगावश्चैकोवृषभश्च देयः॥ त्रिरात्रोपवासस्य स्थाने पूर्वोक्तगावो वृष
भश्च निष्कार्धं देयं॥ कामतस्तद्द्विगुणं॥ अज्ञानतः॥ क्षत्रियसंबंधिगोमात्रव्यापाद
ने पंचगव्यं पिबन्नोपोष्य मासमासीत संयतः॥ गोष्ठेशयो गोऽनुगामी गोप्रदानेन शुद्ध्य
तीत्यनेन प्रकारेण मासं पंचगव्यव्रतं चरित्वा तेभ्यो दद्यात्॥ एतच्चरणाशक्तौ एतस्मा
त्स्थाने तत्क्लेशानुकूलेन व्रतप्रत्याम्नायत्वेन षोडश वा काचव्रतांते चेत्सवधेनवो देया
॥ अष्टौ चांद्रायणे देयाः॥ प्रत्याम्नायविधौ सदैति बकृच्छ्रेशसाध्यं चांद्रायणप्रत्या
म्नायत्वेनाष्टौ गावो विहिताः॥ चांद्रायणव्रतस्य तस्यापि बकृच्छ्रेशसाध्यत्वान्मास

साध्यत्वाच्च समानविषयत्वेन युक्तमप्यधेनुपरिकल्पनं॥ कामतस्त्वेता दशधेनवः॥
काचरद्विगुणत्वेनेति सप्रदायागावः॥ अज्ञानतो वैरपसंबंधिगोमात्रव्यापादने मासम
तिकृच्छ्रं कुर्यात्॥ एतदाचरणाशक्तौ दशदिनसाध्यप्राणिपूरणाजत्नोजनयुक्त
तिकृच्छ्रप्रत्याम्नायत्वेन गोद्वयदानस्यातिकृच्छ्रप्रत्याम्नायप्रकरणे दर्शितत्वादत्र
मासातिकृच्छ्रे पंच गावो भवंति॥ मतृकग्रासमासमात्रनोजनयुक्तस्यैकादशदिन
साध्यस्यातिकृच्छ्रस्य करणाशक्तौ तिस्रो गावो विहिता इति मासस्साध्ये तिकृच्छ्रे सप्त
गावो निषधं चरेत्॥ उत्तमत्र कामतो द्विगुणमनक्रमेणादशपंचदश वा भवंति॥ गवा
मनावे गोसंख्यातिकृच्छ्रप्रत्याम्नायप्रकरणोक्ताः प्रत्याम्नायाः शक्त्यपेक्षया कर्त्त २३०
व्याः॥ अज्ञानतः शूद्रस्वामिकगोमात्रव्यापादने मासप्राजापत्यविधानात्तद्दश नैं
गोद्वयं निषधं चरेत्॥ कामतः पंच गावः तदशक्तावितरे पूर्वोक्ताः प्रत्याम्नायाः कार्याः

॥ इति गोवधव्रतप्रत्याम्नायाः॥ तत्र च षडुपवासतुल्यप्राजापत्यप्रत्याम्नायत्वेन प्रा
पत्येतु गामेकामिति विधानात् पंच गावो भवंति॥ मासव्रते॥ जपनियमाद्यनेकेतिकर्त्तव्य
तोपेतमासव्रते कृच्छ्राधिक्येन तेनांशयोगव्रत इत्याष्टौ गावः कल्प्याः॥ ॥ इति मासोपवास
व्रतप्रत्याम्नायाः॥ ॥ अथ प्रायश्चित्तोपक्रमप्रकारः॥ तत्र कर्मविपाकप्रायश्चित्तानु
पयुक्तमपीतरप्रायश्चित्तानुपयुक्तमपीतरप्रायश्चित्तोपयुक्तं किंचिदुच्यते॥ तथा या
ज्ञवल्क्यः॥ कृच्छ्राणां दापकौ राजा निर्दिष्टो धर्मपावकः॥ ॥ अपराधी प्रयोक्ताचरत्तिता
कृच्छ्रपालकः॥ महापापेषु कृच्छ्राणां प्रायश्चित्तानां दापको राजा भवति॥ ब्रह्महत्यादि
प्रायश्चित्तेषु राज्ञा तांविना द्विजास्तैः॥ प्रायश्चित्तं नोपवर्ण्णनीयमित्यर्थः॥ प्रायश्चि
त्तस्य निर्दिष्टो धर्मपावक इत्युच्यते॥ यस्मिन्ननुवादे शिष्टलोकाः प्रयुंजते॥ अंगिराः॥
वेदविद्याव्रतस्नातः सत्यसंधो जितेन्द्रियः॥ अनेकधर्मशास्त्रज्ञः प्रोच्यते धर्मपावक

महा॰
२२१

॥अपराधी पापकारी लब्धमोक्षस्त्वभिधीयते॥ रक्षिता राजपुरुषः कृताकृतप्रत्यवेक्ष
णेन प्रायश्चित्तपरिपालक इति कथ्यते॥ प्रकृतमनुसरामः॥ धर्मरक्षात्रिमोयप्यवे
द्रूपोवाम्रसो वान कथंचन प्रायश्चित्तविधानं हि कुर्वन्तीति विदुर्बुधाः॥ अव्रतानाममंत्रा
णां जातिमात्रोपजीविनां॥ सहस्रशातमुक्तानां पर्षत्वं नोपपद्यते॥ पातके चरितं पर्षत्स
हस्रं महदादिषु॥ उपपापेषु पंचाशत्तत्स्यात्तथा न वेत्॥ बहुभिर्विद्वद्भिर्विद्वद्भिर्मिलि
त्वा विचार्य प्रायश्चित्तं विधेयमिति त्रातारिद्राशनं तात्पर्यार्थः॥ अतएव याज्ञवल्क्य
॥ चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा॥ सा ब्रूते यं स धर्मः स्यादेको वाध्यात्मवित्तमइ
ति॥ मनुः॥ त्रैविद्यो हेतुकस्तर्की नैरुक्तो धर्मपाठकः॥ त्रयश्चाश्रमिणः पूर्वे पर्षदेषा २२१
दशावरेति॥ तिस्रो विद्या ऋग्यजुः॥ सामात्मिका यस्यास्तौ त्रैविद्यः॥ हेतुकोऽनुमानज्ञः
॥ तर्कोऽस्मास्त्वीति तर्की संशयेसत्येकस्मिन्कोटौ प्रामाणिकत्वारोपेकृते बाधकादर्श

नात्प्रामाण्येनात्र न भवितव्यमिति यः प्रत्ययः स तर्कः॥ स च वेदशास्त्राविरोधी ग्राह्यः॥ एवं
विधायाः पर्षद उपस्थानं च स्वमाणप्रकारेण कार्यं॥ अत्राह वृद्धसमाचारः व्रतग्र
हणदिने॥ तद्यथा॥ अनुजानः सायंकाले पर्षदं प्रदक्षिणीकृत्य स्वकीयमेनो विख्या
पयतीति तत्रायमाशयः॥ अंगिरसा प्राप्तपापस्य पर्षदोऽनुज्ञा नाल्पं वै भोजनं निषि
द्धं॥ अस्याप्ययमभिप्रायः॥ पश्चात्तापवान्न भवेत्॥ अविलंबेनैव प्रायश्चित्तं ग्रहणी
यादिति॥ अन्यथा दीर्घकालं भोजनत्यागे मरिति देहधारणाभावेन प्रायश्चित्ताचरणमे
व न स्यात्॥ तस्मादेव व्रतणात्प्रायश्चित्तविलंबे मितमेध्याहारादिभिः शरीरधारणं कुर्व
तन स्वच्छंदचारि स्यात्॥ इमां स्मार्त्तोक्तिं दृष्ट्वा व्रतग्रहणादिन एव भोजनं मन्यते क
चौ दद्वतरानुतापस्यासंभवात्॥ उपक्रमदिने शरीरस्य धैर्यरक्षितत्वात्॥ मनुः॥ प्राय
श्चित्तीयतां प्राप्य दैवात्पूर्वकृतेन वा॥ न संसर्गं व्रजेत्सद्भिः प्रायश्चित्ते कृते द्विजः॥ अंगि

रा॥ उपस्थितस्तु न्यायेन व्रतादेशनमर्हति॥ कृते निःसंशये पापे न भुंजीतानुपस्थितः॥
भुंजानो वर्धयेत्पापमसत्यपर्षदि ब्रुवन्॥ संशये तु न चोक्तव्यमावस्यापस्य निष्कृतिः॥ प्र
मादश्च न कर्त्तव्यो यथैवासंशये तथा॥ कृत्वा पापं न गूहेत गूहमानस्य वर्धते॥ बहुवा स्व
ल्पकं वापि कर्म विख्याप्य निवेदयेत्॥ प्रायश्चित्ते समुत्पन्ने ह्रीमान् सत्यपरायणः॥ मृदु
रार्जवसंपन्नः शुद्धिं याचेत मानवः॥ सचैलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः॥ क्ष
त्रियो वापि वैश्यो वा पर्षदं समुपतिष्ठति॥ दत्त्रियाः पादानं प्रदद्यान्नामं॥ उपस्थाय ततः
शीघ्रमार्त्तिमान् धरणीं व्रजेत्॥ गात्रैश्च शिरसा चैव न च किंचिदुदाहरेत्॥ ततस्ते प्रणिपा
तेन दृष्ट्वा तं समुपस्थितं॥ दृष्टाः पृच्छंति किं कार्यमुपविश्य पाप्मतः स्थितं॥ किं ते कार्यं ब्रूहास्मा
न्निः किं वा मृगयसे द्विज॥ तत्त्वतो ब्रूहि तत्सर्वं सत्यं हि गतिरात्मनः॥ अस्माकं चैव सर्वेषां स
सर्वेवपरं बलं॥ यदि श्रेयस्त्वसे सत्यं नियतं प्राप्स्यसेऽमुत्र॥ यथागतेस्य संसेन ततं २३२

शुध्यति कर्हिचित्॥ एवं सर्वमनुज्ञातः सर्वं ब्रूयादशेषतः इति॥ न भुंजीतानुपस्थितः प
र्षदमनुपस्थित इत्यादि॥ अनुपस्थितः पर्षदमनुपस्थितः॥ संशयो नाम पर्षदुपस्था
तुः स्वगतपापसंदेहः॥ कार्यस्य निष्कृतिः॥ पापस्य निश्चयः॥ अथवा कार्यस्य निष्कृति
॥ प्रायश्चित्तनिश्चयः॥ संशये तु न चोक्तव्यमित्येतन्न्याय्यानि योगविषयं प्रमादश्च
न कर्त्तव्यः॥ पुनः पापं न कुर्यादित्यर्थः॥ अथवा चिरकालसंदेहे वृत्ताहविष्यभोज
नादिशरीररक्षणं प्रमादः स न कर्त्तव्यः॥ तथैवासंशये असंशयपापस्य निश्चये देशां
तरादिव्यवहितेषु विद्वत्सु पर्षदुपस्थानाशक्ये यथा हविष्यभोजनात् शरीररक्षणं
क्रियते॥ तथा संशयस्यलेपालर्थः॥ पर्षदग्रे पापख्यापनं चरेत्तिणाशनानंतरं कु
र्यात्॥ तथाह पराशरः॥ पापं प्रख्यापयेत्पापी दत्वा धेनुं तथा वृषमिति॥ अत्रैव विशे
षमाह॥ विष्णुः॥ पादमतेवस्त्रदानं कृच्छ्रार्धे तिलकांचनं॥ पादहीने तु मेकां गां कृच्छ्रे गो

मिपुनंस्मृतमिति॥ अनयैव दिशा चान्द्रायणमप्येतत्प्रायश्चित्ताधिकमूह्यं॥ मनुवचनं विख्या
प्यपापं वक्तव्यः किंचिद्दत्वाव्रतंचरेदिति॥ तत्र कीर्त्तिकविषयं॥ यत्र च पर्षदग्रे दक्षिणां ते
न धेनुवृषयोरन्यतरदुत्सयं वाहीयते तत्र धेनुमूल्यं निष्को वा दातव्यो न च स्वल्पतो गोवृष
तो वा॥ यथाहांगिराः॥ बहुस्रोनप्रदेयानि गोवृषञ्च पनेस्विमः॥ वित्तरूद्दक्षिणा सेता
रंतारयंतिहि॥ एकातकस्य दातव्यान बहूनां कथंचन॥ सा तु विक्रयमापन्ना दह
त्यासप्तमं कुलमिति॥ एवं पूर्वोक्तप्रकारेण सचैलस्नानं स्नात्वा वासाः पर्षदं प्रदक्षिणी
कृत्य पर्षद्दक्षिणां दत्वा दंडवत्प्रणम्य पापं सर्वं विख्याप्य तदग्रे तूष्णीमासनुगत्वो ते
ष्कं का पर्षदग्रे तूष्णीं तिष्ठेत्॥ ततो ब्राह्मणास्तमुद्दिश्य परस्परं प्रायश्चित्तस्वरूपं २३३
चिंतयेयुः॥ तथा चांगिराः॥ तेषां निविष्टे तेकार्ये उत्सार्यो हि स कार्यवान् तस्मिन्नुत्सा
रिते विप्रेये यथा धर्मपावकाः॥ ते तथा तत्र जल्पेयुर्विशंकः परस्परं॥ धर्मज्ञास्तेषु

यश्चोक्तं यत्र सानुग्रहं भवेत्॥ विप्रश्च पर्षत्तत्सर्वं प्रायश्चित्तं प्रकल्पयेत्॥ यथाका
लं यथादेशं यश्च कार्यांतरं भवेत् पर्षदः संमतं चैव कारिणश्च बलाबलं॥ सर्वेषां
निश्चितं यच्च यच्च प्राणान्नपीडयेत्॥ कार्यांतरं हृच्च मातापितृशुश्रूषादि यच्च प्राणा
न्नपीडयेत्॥ यत्र प्राणपीडाकरमरणांतिकप्रायश्चित्तं व्यतिरेकेण दर्शनोपदि
ष्टं प्रायश्चित्तं विधीयते॥ नैव शुद्धिमवाप्नोति प्रायश्चित्ते कृतेपि सः॥ अत एव धर्मज्ञा
स्माराणि प्रायश्चित्तं वदंति ये॥ प्रायश्चित्ते तानवेसूतः स्तत्पापं पर्षदं व्रजेत्॥ देवलः॥
एको नार्हति तत्कर्तुं मनुत्वानोप्यनुग्रहं॥ धर्मज्ञाबहवो विप्राः कर्त्तुमिच्छंत्यनुग्रहं॥
स्नेहाद्वा यदि वा लोभाद्भयाद्ज्ञानतोपि वा॥ कुर्वत्यनुग्रहं ये च तत्पापं तेषु गच्छति॥ अं
गिराः॥ ॥ आर्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः॥ जानंतो न प्रयच्छंति ते तेषां
समभागिनः तस्माद् आर्तसमासाद्य ब्राह्मणं च विशेषतः॥ जानद्भिर्धर्मपंथानं न चा

व्यं तु परान्मुखैः॥ अनर्चितैरनाहूतैरमार्गैश्च वसंसदि॥ प्रायश्चित्तं न दातव्यं जानद्भिरपि
कुत्सितः॥ एवं धर्मशास्त्रानुसारेण प्रायश्चित्तनिर्णयं प्रायश्चित्तस्वरूपं निरूप्य
ततएकेन तत्प्रायश्चित्तस्वरूपमनुवादयेत्॥ तत्रायं प्रयोगः॥ पर्षदुपदिष्टेनामुकप्रा
यश्चित्तेन चीर्णेन सांगोपांगेनामुकपापाद्विमुक्तो भविष्यसि तस्मात्सांगोपांगं कर्त्त
व्यमिति एवं त्रिर्ब्रूयात्॥ शिष्टसमाचारात्॥ इमं च प्रयोगवाक्यरचनाप्रदर्शनरचना
र्थं तस्मा यत्र यथोचितं तत्र तथा प्रयोक्तव्यं॥ अंगिराः॥ सर्वेषां निश्चितं मत्वा प्रा
णिनां पातयेत्॥ अहमस्मिं वयेरेकः पर्षदा यो नियोजितः॥ एवं त्तोस्त्वमिदं विप्रैर्यत्तु
वाद्विनय वेश्वतं तत्ते यत्नेन कर्त्तव्यमन्यथा तद्भ्यानवेत्॥ महान्तमात्तवेन्द्रीर्णं व्रतं शुधि २३६
कं रमहत्॥ तद्वा कुर्यात्प्रयत्नेन शक्त्या विप्रांश्च पूजनं॥ पर्षदा यो नियोजितइत्यनेनानु
वादकस्यानुतित्वेनदक्षिणा गम्यते॥ तथाहि॥ निरुक्तो हि कर्म करोत्यवति॥ स च न्नति

मपेक्षते॥ किंच पापानुवादो पि पापमेवेति दृष्टत्वोत्तात्वावेन को पि प्रवर्त्तेत॥ तस्मा
त्तापानुसारेणानुवादकस्य न तिरूपदक्षिणादेया॥ वर्णक्रमेण चानुवादकविशेषोंगि
रसैव दर्शितः॥ ब्राह्मणे ब्राह्मणो नोत्तुस्त्रियाणां पुरोहितः॥ वैश्यानां याजकश्चैव प्रा
यश्चित्तं समादिशेत्॥ अगुरुः क्षत्रियाणां यो वृषाणां याप्ययाजकः॥ प्रायश्चित्तं समा
दिशेत्तपतमकृच्छ्रं समाचरेत्॥ तत्रैव ब्राह्मणस्यापि क्षत्रियादेः प्रणामिन॥ अंतरा ब्राह्म
णः कृत्वा व्रतमेषां समादिशेत्॥ तथास्मृत्यं समासाद्य तरा धर्मपुरःसरं॥ प्रायश्चित्तं
प्रदातव्यं वेदमंत्रविवर्जितं॥ सुमंतुः॥ अस्यवारागद्वेषादज्ञानमानेषु प्रायश्चित्तेषु
यज्ञहवनाध्ययनब्रह्मचर्यपरो नित्यात्प्रा इंडीमेषत्रीस्व मेमेव संवत्सरेण महापा
तकानि तस्य रोव्यपोहतिकि किंषं न ब्राह्मणस्य पतनमिक्षुसाचार्यः॥ गण्यादिवद्रण
त्सर्षदः सकाशात्प्रायश्चित्तमजज्ञमानो ब्राह्मणस्तमंचेत्प्रायश्चित्तस्वरूपं जानीया

म.हा.
२२५

ततश्चाण्डालान्नुज्ञामंतरेण प्रियस्य पापस्य प्रायश्चित्तं तावदृत्तमाचरेत्॥ कृष्णमित्या
कांक्षयामाह यत्तद्दहनादिनितया कालमपि निर्दिशति संवत्सरेणेति॥ एतच्चोपलक्षण
॥ अतश्च यावन्मात्रा वा कालउपयुक्तः यावती चेतिकर्त्तव्यतोपयुक्ता तावन्मात्रेणा सं
॥ पर्षदुद्दिष्टप्रायश्चित्तस्याप्याचरणहेतुमाह॥ नब्राह्मणस्य पतनमिच्छंति॥ आचा
र्यइति॥ अत्र ब्राह्मणग्रहणात् ततक्षत्रियादेः पर्षदनुपदिष्टप्रायश्चित्ताचरणाधिकर
॥ ॥ एवं पूर्वोक्तप्रकारेण पर्षदमुपस्थाय पर्षदुपदिष्टव्रतं मनसि विधाय नखरोमादि
नीवापयित्वा स्नानं प्रायश्चित्तोपक्रमं कुर्वीत॥ तद्यथा॥ दिनांते नखरोमादिनीवा
पयित्वा स्नानं विधाय प्रायश्चित्तसंकल्पं कृत्वा तत्र प्राच्यांगानि करिष्यन्निस्त्रित २२५
स्य तताद्वादशांगुलप्रमाणेन नानाविधक्षीरवृक्षोद्भवेन कंटकवृक्षोद्भवेन वा काष्ठेन
दंतान्विशोध्याचम्य भस्मगोमयमृद्वारिपंचगव्यकुशोदकैर्दशस्नानानि वक्ष्यमाणप्रका

रेण दशस्नानानि कृत्वा वासः परिधायाचम्य वैष्णवं श्राद्धं विधाय गोदानं निर्वर्त्यानं
तरमाज्येनाष्टावष्टाविंशतिरष्टोत्तरशतं वा व्याहृतिभिर्हुत्वाथ वक्ष्यमाणलक्षणपं
चगव्यं एषकपगानीमृगाय आदिमंत्रैर्वा प्रणवेन वा तानि मेलयित्वा समालोड्य त
तः सप्तपत्रैर्हरितैः कुशैः पंचगव्यमुद्धृत्येरावत्यादिभिर्मंत्रैर्द्वादश कृती कृत्वा प्रणवेनै
व कृतशेषसमालोडनमप्रणवेनैव निर्मथ्य प्रणवेनैवोद्धृत्य प्रणवेनैव पिबेत्॥ आलोड
नं शोधनं तु हस्तेन॥ निर्मथनं काष्ठेन॥ पानं च पलाशमध्यमपर्णेन पद्मपत्रेण सु
वर्णपात्रेण ताम्रपात्रेण ब्रह्मतीर्थेन वा भवति॥ एवमुपक्रांतव्रतं समाप्य प्रांते गोहिर
ण्यादि दक्षिणां दद्यात्॥ ॥ अथात्रक्रमेण मंत्रसहितः प्रयोगः प्रदर्श्यते॥ सचैलं स्ना
त्वा क्लिन्नवासाः पर्षदं॥ प्रदक्षिणीकृत्य पर्षदं दक्षिणां दत्वा नत्वा पापं सर्वं विख्याप्य
तदुपदिष्टव्रतं मनसि निधाय दिनांते नखरोमादीन्वापयित्वा स्नात्वा प्रायश्चित्तसंकल्पं

महा० २३६

कृत्वा तत्र प्रत्यंगानि करिष्य इत्यभिलप्य शास्त्रविहितं द्वादशांगुलप्रमाणं दंतकाष्टं
गृहीत्वा पूर्वाभिमुखः सन् मंत्रं पठेत्॥ तत्र मंत्रः॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसू
नि च॥ ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पते इति॥ अनेन मंत्रेण दंतकाष्टस्याग्रभागं
किंचिद्दंतैश्चर्वयित्वा नैव प्रदेशेन दंतान् संशोध्य तावत् भ्रमणेन काष्टांतरेण जिह्वामुल्लि
ख्य प्रक्षाल्य काष्टद्वयं किंचिद्दूरं कृत्वा विसृज्याचम्य नद्यादिषु स्नायीत स्नानप्रका
रस्तु तूष्णीं स्नानं नाम स्वकायमेवमवानुपलिप्योदकेन स्नायात्॥ एवमेव गोमयेनानु
लिप्य पुनर्वारिणा स्नायीत एवमेव मृदानुलिप्य पुनरुदकेन॥ एवं नद्यादिषु दक
सहितैः स्नात्वा पश्चात्केवलेनोदकेन स्नानं कुर्वीत॥ ततो गोमूत्रेण स्नात्वाथ गोमये २३६
नान्तरं क्षीरेण पश्चाद्दध्ना घृतेन तदनु कुशांतरितेनोदकेनेति दश स्नानानि मं
त्रवर्जं कुर्वीत॥ मलापकर्षणं स्नानं वारुणं चोपसिध्य इति विष्णुनामजस्नान

त्वेन निर्दिशत्॥ अथवा स्नानं चोपसिद्धयज्ञफलकत्वात्॥ शुद्धेश्च द्वादशरूपेणा
भिलक्षितत्वात्॥ मंत्रपाठेनाद्यौ त्रेसमंत्रपाठेता निस्नानानि॥ स्त्रीशूद्राणां तम
त्रकमेव स्नानं॥ तस्माद्भस्मानुलेपनानापि दशसु दशसु भस्मपपन्नेः तथा मंत्रेऽधिकारा
भावात्॥ ॥लिंगपुराणे॥ ॥ईशानेन शिरोदेशं मुखं तत्पुरुषेण तु॥ हृदये देशमघोरे
ण गुह्यं वामेन सुव्रत॥ सद्येन पादौ सर्वांगं प्रणवेन तु शोधयेदिति अथ क्रमेण मं
त्राः॥ तत्र भस्मस्नानमंत्राः॥ ईशानाय नमः इति मंत्रेण शिरसि॥ तत्पुरुषाय नमः इ
ति मुखे॥ अघोराय नमः इति हृदये॥ वामदेवाय नमः इति गुह्ये॥ सद्योजाताय नमः
इति पादयोः॥ प्रणवेन सर्वांगे॥ अयमेकः प्रकारः॥ प्रकारांतरं तु॥ ईशानः सर्व
विद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो अस्तु सदा
शिवो॥ इति शिरसि॥ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्॥

महा॰ २३७ ॥ ॥इतिमुखे॥ ॥अघोरेभ्योथघोरेभ्योघोरतरेभ्यः सर्वेभ्यः सर्वसर्वेभ्योनमस्तेअस्तुरुद्ररू
पेभ्यः इतिहृदये॥वामदेवायनमोज्येष्ठायनमः॥भवेभवेनातिभवेभजस्वमांभवोद्भवा
यनमः॥ ॥इतिपादयोः॥प्रणवेनसर्वांगे॥अथवाअग्निरितिभस्मजलमितिभस्म॥स्थ
लमितिभस्म॥व्योमेति॥भस्मसर्वंहवाइदं॥भस्मेतेतेमंत्रान्यासाः॥इतिभस्मस्नानेमंत्रांत
राणि॥इतिभस्मस्नानं॥नंतरंगोमययेनस्नायीत॥तत्रमंत्रः॥मानस्तोकेतनयेमान
आयुषिमानोगोषुमानोअश्वेषुरीरिषः॥वीरान्मानोरुद्रभामिनोवधीर्हविष्मंतोमन
साविधेमते॥अथवा॥गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं॥ईश्वरींसर्वभूतानां
तामिहोपह्वयेश्रियं॥अपिच॥अग्रमग्रंचरंतीनामोषधीनांरसंवने॥तासामृषभपत २३७
त्नीनांपवित्रंकायशोधनं॥तन्मेरोगांश्चशोकांश्चनुदगोमयसर्वदा॥इतिगोमयस्ना
नेवैकल्पिकामंत्राः॥अथमृदास्नानं॥तत्रमंत्राः॥अश्वक्रांतेरथक्रांतेविष्णुक्रांतेव

सुंधरे॥त्रिरस्ताधारयिष्यामिरक्षस्वमांपदेपदे॥भूमिर्धेनुर्धरणीलोकधारिणी॥उद्धृ
तासिवराहेणकृष्णेनशतबाहुना॥मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतं॥मृत्तिकेब्र
ह्मदत्तासिकाश्यपेनाभिमंत्रिता॥मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्रतिष्ठितं॥मृत्ति
केप्रतिष्ठितंसर्वंतन्मेनिर्णुदमृत्तिके॥त्वयाहतेनपापेनगच्छामिपरमांगतिं॥ ॥इतिमृ
त्तिकास्नानमंत्राः॥ ॥अथकेवलोदकस्नानं॥तत्रमंत्राः॥आपोहिष्ठामयोभुवस्ता
नऊर्जेदधातन॥महेरणायचक्षसे॥योवःशिवतमोरसस्तस्यभाजयतेहनः॥उ
शतीरिवमातरः॥तस्माअरंगमामवोयस्यक्षयायजिन्वथ॥आपोजनयथाचनः॥
अथवा॥इदमापःप्रवहतयत्किंचदुरितंमयि॥यद्वाहमभिदुद्रोहयद्वाशेपउतानृतं॥
इतिकेवलोदकस्नानमंत्राः॥अथपंचगव्यस्नानानि॥तत्रगोमूत्रेगोमयंक्षीरंद
धिघृतानांक्रमेणमरीचिनादेवतादर्शिताः॥देवतासंप्रवक्ष्यामिआनुपूर्वेणमस्मयाः

महा.

२३८

वरुणो देवतामूत्रे गोमये हव्यवाहनः॥ सोमः क्षीरे दध्नि वायुर्घृते रविरुदाहृत इति॥ अ
तस्तत्र देवताप्रकाशमंत्राः प्रदर्श्यंते॥ तत्र गोमूत्रस्नानमंत्रः॥ ऋतावसुतासुक्षितिषुक्षि
यं नो व्यास्मत्पाशं वरुणो मुमोचत्॥ अवोचन्नाता अदितेरुपस्याद्यूयं पात स्वस्तिभिः स
दा नः॥ उपलक्षणमेतत्॥ तस्माद्वरुणप्रकाशकाः श्रौताः स्मार्त्ता वा मंत्राग्राह्याः॥ एवं
सर्वत्रापि॥ अथ गोमयस्नानमंत्रः॥ पाहि नो अग्न एकया पाह्युत द्वितीयया॥ पाहि गीर्भि
स्तिसृभिरूर्जांपते पाहि चतसृभिर्वसो॥ अथ क्षीरस्नानमंत्रा उरुष्या णो अभिशस्तेः सो
म नि पाह्यंहसः॥ सुश्वा सुशेव एधि नः॥ अथ दधिस्नानमंत्राः॥ आत्मा देवतानां भुअं
वनस्य गर्भो यथावशं चरति दिदेवएषः॥ घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हवि २३८
षा विधेम॥ अथ घृतस्नानमंत्राः॥ कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्प
तंति त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते॥ अथवाश्नराशरोक्कामं

णः यास्याः गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं॥ आप्यायस्वेति च क्षीरं दधिक्राव
ण्णेति दधि तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकं इति॥ तत्र गायत्री प्रसिद्धा
॥ गंधद्वारेत्ययं मंत्रः॥ प्राक् प्रदर्शितः॥ आप्यायस्व समेतु ते विश्वतः सोम
वृष्ण्यं भवा वाजस्य संगथे॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः॥ सुरभि
नो मुखा करत्॥ प्रण आयूंषि तारिषत्॥ शुक्रमसि ज्योतिरसि तेजोसि॥ देवस्य त्वा
सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां॥ अभिषिंचामीति वाक्यशेषः॥ द
र्भणः॥ एवं दशस्नानानि कृत्वा वासः परिधायाचम्य वैष्णवं श्राद्धं कुर्वीत॥ तद्यथा
॥ विष्णूद्देशेन त्रिभ्योधिकान् मुख्यान् ब्राह्मणान् भोजयेत्॥ भोजनासंभवे भोजनप
र्याप्तमामान्नं हिरण्यं वा दद्यात्॥ एवं वैष्णवं श्राद्धं विधाय आदितो गोदानमाचरे
त्॥ तत्र गोदानमंत्रः॥ गवां मंत्रः॥ गवामंगेषु तिष्ठंति भुवनानि तु सर्वशः॥ यस्मात्तस्मा

माहा० २३८ छिवं मेस्यादिह लोके परत्र चेति॥ इति गोदानानंतरमाज्येनाष्टौ व्याहृतीर्निरस्योत्तर
रांतं कृत्वा पंचगव्यं जुहुयात्॥ तत्र पंचगव्यं होमप्रकारः॥ ताम्रवर्णाया गोर्मूत्रं श्वे
तवर्णाया गोमयं॥ कांचनवर्णायाः पयः॥ नीलवर्णाया दधि॥ कृष्णवर्णाया घृतं अ
थवा सर्वं पंचगव्यं कापिलं वा॥ असंभवे यथालाभोपपन्नं वा एकस्याः॥ संपाद्य पल
परिमितं माषाष्टकं वा अंगुष्ठार्धपरिमितं गोमयं॥ द्विगुणपरिमाणं वा मूत्रं पलाश
मध्यमपत्रनिर्मिते वा पद्मपत्रविरचिते वा सुवर्णमये ताम्रमये वा पात्रे वा निक्षिपे
द्गायत्र्या प्रणवेन वा॥ तदनंतरमंगुष्ठार्धपरिमितं वा षोडशमाषपरिमितं वा गोम
यं गंधद्वारेत्यनया ऋचा वा प्रणवेन वा निक्षिपेदस्मिन्पात्रे गोमूत्रं निहितं तत्रैव॥ तत २३८
श्च सप्तपलपरिमितं वा द्वादशमाषपरिमितं वा अर्धांगुष्ठपरिमाणं गोमयाष्टगुणं
वा क्षीरमाप्यायस्वेत्यनया ऋचा प्रणवेन पूर्वं द्रव्यद्वयं यत्र निक्षिप्तं तत्रैव निक्षिपेत्॥

अथ सप्तपलं वा दशपलं वा अंगुष्ठार्धपरिमितगोमयापेक्षया पंचगुणं वा दधि
क्राविण्ण इत्यनया ऋचा वा प्रणवेन वा पूर्वोक्तपात्रे निक्षिपेत्॥ ततस्तु एकपलं गोवा
माषाष्टमितं वा अंगुष्ठार्धपरिमितगोमयापेक्षया चतुर्गुणं वा घृतं तेजोसीत्यने
न यजुषा प्रणवेन पूर्वोक्तपात्र एव निक्षिपेत्॥ तदनंतरं चैकपलं वा माषचतुष्टय
परिमितं वा कुशोदकं देवस्य त्वेत्यनेन यजुषा प्रणवेन वा पूर्वोदितपात्रे स्था
पयेत्॥ प्रणवः प्रसिद्धः॥ गायत्र्यादयो मंत्रा अस्मिन्नेव प्रकरणे पंचगव्यस्नान
प्रस्तावे प्राक् प्रदर्शिताः॥ एवं गोमूत्रादीन्येकस्मिन्पात्रे कृत्वा प्रणवेन समुद्धार्य
हस्तेन समालोड्य पुनः प्रणवमुच्चार्य यज्ञियकाष्ठेन निर्मथ्य प्रणवेनैव वा निमंत्र्य
सप्तपत्रैर्हरितैः कुशैः पंचगव्यमुद्धृत्य इरावती धेनुम॥ ती हि भूतं सूयवसिनी म
नवे दशस्या॥ व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः॥ इदं विष्णु

विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे। मानस्तोके तनये मान आयुषि मा
नो गोषु मा नो अश्वेषु रीरिषः॥ वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतो नमसा विधेम
ते॥ त्वान्न इंद्राग्नी त्रवतावीमनोत्रिः त्वान्न इंद्रावरुणा रातहव्या त्वान्न मिंद्रासोमा सुवि
ताय शंयोः॥ त्वान्न इंद्रापूषणा वाजसातौ॥ अग्नये स्वाहा। सोमाय स्वाहा॥ गायत्री प्रण
वः॥ भूर्भुवः स्वः स्वाहा॥ अग्नये स्विष्टकृते स्वाहा॥ इति हुत्वा कृतांजलिर्व्रतग्रहणं
करिष्य इति ब्राह्मणान् पृष्ट्वा कुरुष्वेति तैरनुज्ञातो कृतत्रोपं पंचगव्यं प्रणवेन पिबे
त्॥ एतच्च यामाद्बहिः स्नानं न तत्र दर्शनेक्रत्तव्यं॥ कृतत्रोपः सर्वपेमं नोछे प्रणीयं
॥ अत एव बाल्हृधादिग्रहणाद्यपेक्षया गोमूत्रादीनि पूर्वोक्तवैकल्पिकपरिमाण २४०
पेक्षया मेलनीयानि॥ एवं व्रतग्रहणं कृत्वा ततः परं मौनी भूत्वा मनोक्तेन मनसावि
चितनीयमत्रि ग्राममति वाहयेत॥ एवं मुपक्रांते व्रते सम्यक्पारं नीत्वा ततउद्याप

निकरिष्यन्निति संकल्प्याग्नौ व्याहृतिभिराज्यं पूर्ववद्देवं वैष्णवं श्राद्धं विधायांते गोदा
नमाचरेत्॥ प्राच्यांगकरणवेनायां वैष्णवश्राद्धगोदानानंतरं होमः विधाय वैष्णव
श्राद्धमिति श्राद्धानंतरं गोदानादेर्विहितत्वात्॥ होमानंतरमेव कृतत्रिपस्य पंचग
व्यस्य पाने व्रतस्य गृहीतत्वाच्च॥ उद्यापनानुष्ठानसमये तु होमानंतरं श्राद्धगोदा
नादि॥ उपक्रमे होमस्य सन्निहितत्वादवसानेपि सन्निधानस्योचितत्वात्॥ एवमंते गो
दानानंतरमवशिष्टानि द्रव्याणि दद्यात्॥ तानि च श्राद्धं कृत्वा व्रतांते तु गोहिरण्या
दिदक्षिणात्यक्तमादिग्राष्टेनोपात्तानि॥ द्रव्यास्वरूपाणि च संग्रहकारेण प्रदर्शितानि गोभू
तिलहिरण्याज्यवासोधान्यगुडानि च॥ रौप्यं लवणमित्याहुर्दशदानानि पंडिता इति॥
अत्र क्रमेण मंत्राः गोदानमंत्रस्त्वादिगोदानसमये दर्शितः॥ अथ भूमिदानमंत्रः॥ स
र्वभूतास्रया भूमिर्वराहेण समुद्धृता॥ अनंतसस्यफलदा अतः शांतिं प्रयच्छ मे॥

अथ तिलदानमंत्रः॥ महर्षेर्मलसंभूताः॥ सताकश्यपस्य तिलाः स्मृताः॥ तस्मादेषां प्रदा
नेन मम पापं व्यपोहतु॥ अथ हिरण्यदानदानमंत्रः॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभा
वसोः॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे॥ ॥अथ धान्यदानमंत्रः॥ सर्वदेवमयं धा
न्यं सर्वोत्पत्तिकरं महत्॥ प्राणिनां जीवनोपायमतः शांतिं प्रयच्छ मे॥ ॥अथ वस्त्रदानमं
त्रः॥ ॥अथ लवणदानमंत्रः॥ ॥यस्माद्रसा रसाः सर्वे नोत्कृष्टा लवणं विना॥ शंभोः प्री
तिकरं नित्यमतः शांतिं प्रयच्छ मे॥ ॥इति दशदानमंत्राः॥ पापानां परिपाकस्य शांति
कर्मविवर्त्मना॥ उक्तानि परिभाषायामुपयुक्तान्यशेषतः॥ ॥इति श्रीमहार्णवाख्ये म
हिते प्रबंधे मांधातृनाम्नो मदनात्मजस्य॥ सत्कर्मरत्नप्रकरेण पूर्णो पूर्णस्तरंगः खलु स २४१
प्तमोयं॥ ॥इति परिभाषा समाप्ता॥ ॥अथ रोगनिर्बर्हणानि॥ तत्र क्षयरोगहरणानि॥ ॥क्षय
रोगनिदानमाह॥ याज्ञवल्क्यः॥ ब्रह्महा क्षयरोगी स्यादिति॥ तन्निवृत्त्यर्थं षडब्दं प्राय

त्तिं कुर्यात्॥ प्रायश्चित्तार्धमर्हंति स्त्रियो रोगिण एव चेति॥ रोगिणोर्धं प्रायश्चित्तस्य
तेनैवाभिधानात्॥ ॥अथ क्षयरोगहरप्रायश्चित्तं॥ अथ क्षयरोगहरकरजीदानं॥
पद्मपुराणे॥ क्षयी स्यात्क्षेत्रमारणे॥ क्षेत्रमारणं॥ क्षेत्रगतसस्यमारणमुदकदाना
दिप्रतिबंधरूपापनिष्टाचरणेन॥ अथवा क्षेत्रस्त्रियां गर्भप्रतिघातः॥ बौधायन
स्तु तन्निवर्तकं करजीदानमाह॥ कारयेत्करजीं दिव्यां पलैः सर्वत्र संयुतां॥ फलप
गेन संयुक्तां सुवर्णस्य पलेन तु॥ यथा विभवतः कुर्याद्वस्त्रेण वेष्टयेत्तु कैः॥ ब्राह्मण
वेनाजमेषाप्रियैर्नानाविधैः शुभैः॥ होमं च कारयेत्तत्र पूर्ववद्ब्राह्मणेन च॥ तस्मै तां
करजीं दद्यादलंकारपूर्विकां॥ पूजिताय दरिद्राय वृत्तस्वाध्यायात्मवेदिने॥ धर्मज्ञा
याति शांताय मंत्रेणानेन तां त्वयी॥ हिरण्यगर्भ पुरुष परात्पर जगन्मय॥ करजीदानेन देवे
श क्षयं क्षपय मे प्रभो॥ पुण्याहवाचनं कार्यं ब्राह्मणैर्वेदपारगैः॥ शिष्टैरिष्टैर्बंधुभिश्च

सहभोजनमाचरेत्॥ फलपूगेनेत्यादि॥ फलानां पूगः समूहः॥ फलेनतु॥ फलस्वरूपंप
रिभाषायांपरिमाणप्रकरणेद्रष्टव्यं॥ यथाविभवतः विभवानुसारेण॥ समर्थश्चेत्सुव
र्णधिकेनापिकदलीकारयेत् हिरण्मयैः॥ सूत्रकैः॥ सूत्रैरथावेष्ट्य॥ वस्त्राद्यावेष्टनेनकद
लीपूजोपलक्ष्यते॥ पूजामंत्रश्च॥ त्र्यंबकंयजामहे इत्ययं॥ होमंचकारयेत्तत्रपूर्वदिति
पूर्वंवच्छ्वेनमृत्युंजयमंत्रस्योपलक्षितत्वात्॥ कदलीदानमंत्रेचपरमपुरुषस्यरक्षा
धिदेवतात्वेनोपादानं॥ तथाकर्मणोपिमृत्युनिर्हरणार्थत्वात्॥ त्र्यंबकमंत्रस्यपरिभा
षायांकूष्मांडहोमप्रकरणेदर्शितः॥ होमसंख्याचाष्टोत्तरशतंसहस्रमयुतंवा॥ द्र
व्यमाज्यंतिलाश्च॥ कदलीपूजानंतरंब्राह्मणान्भोजयित्वाहोमंकुर्यात्॥ वचनपाठगत
क्रमबोधेप्रमाणाभावात्॥ एवंकदलीदानोक्तकर्मनिर्वर्त्य स्वस्तिवाचनानंतरंशिष्टै
रिष्टैश्चसहभुंजीत॥ ॥इतिक्षयरोगहरकदलीदानं॥ ॥अथराजयक्ष्मव्याधिहरप्रति

कृतिदानं॥ ब्रह्मांडपुराणे॥ धर्मराजस्याग्रेपवित्रामप्रायश्चित्तेदरातिमः॥ राजय
क्ष्मानवेत्तस्यरोगपीडातिदारुणा॥ पूर्वोक्तेनविधानेनप्रदद्यात्प्रतिरूपकं॥ पूर्वो
क्तविधिरस्माभिः परिभाषायांदर्शितोव्याधिप्रतिमादानविधिप्रकरणे॥ प्रतिमाल
क्षणंतुकर्मविपाकसारे॥ राजयक्ष्माकृशतनुःश्वरचापासितर्जनी॥ दधत्रिनेत्रो
दंष्ट्रास्यांदर्शोहेतुमुखस्ततः॥॥ इतिराजयक्ष्महरप्रतिकृतिदानं॥ ॥अथासाध्यस
र्वरोगहरव्याधिप्रतिकृतिदानं॥ ब्रह्मांडपुराणे॥ ॥ब्रह्मोवाच॥ ॥सुवर्णरत्नरजतै
र्यथाशक्त्यनुरूपतः॥ कृत्वाचप्रतिमांव्याधेर्द्व्यादिग्रामममलतः॥ शतेनवातदर्धे
नत्रिंशताविंशसंख्यया॥ जातरूपमयंव्याधिप्रतिरूपंतुकारयेत्॥ निधायपात्रेसं
पूर्णेतंडुलैःसितरूपकैः॥ अलंकृत्यचसौवर्णंरूपंत्रगुरुलेपनैः॥ वाससायुगेनसंवे
ष्ट्यहिरण्यबकुन्तपणैः॥ अलंकृतामविप्रायदद्यान्मंत्रमुदीरयेत्॥ मंत्रमाह॥ येमां

माहा.
२४२

रोगाः प्रबाधंते देहस्थाः सततं ततः॥ यस्तीव्रप्रतिरूपेण तान्गोणान्द्विजसत्तम॥ प्रतिग्र
हीतुरितिकर्त्तव्यतामाह॥ वारमितेवतद्रूपं यस्तीमाव्याधिर्निसह॥ ततः सरोगी दाता
च दीर्घायुत्वं प्रपद्यते॥ सुवर्णरत्नरजतैरित्यादि॥ सुवर्णेन शरीरनिर्माणं॥ रत्नेन च
क्षुषी॥ रजतेनास्थीनि श्वेतगोजकण्ठवयथाशक्ति प्रतिमामानुरूपतः कुर्यादित्यर्थः॥
निष्कस्वरूपं परिताषामाणपरिमाणप्रकरणे ज्ञातव्यं॥ जातरूपं सुवर्णं पात्रे कांस्यपात्रे
॥ कांस्यं चमस्तमणे देयमिति कर्मविपाकसंग्रहे दर्शनात्॥ इत्यसाध्यसर्वरोगहरस्या
धिप्रतिरोन॥ ॥ अथ प्रकारांतरेणासाध्यसर्वरोगहरणं॥ कृष्विने॥ असाध्यव्याधिनाग्र
स्तउग्रेण प्राणहारिणा॥ चतुर्दश्यामुपोष्यैकां कृत्वास्नानुकुर्याच्चरुं॥ आ ते रौद्रेण सूक्ते २४२
न प्रत्यृचं वाग्यतः शुचिः॥ पूर्वमाज्याहुतीर्हुत्वा उपस्थामेच्च शंकरं॥ हविःशेषेण वर्तेत
एकांतरमतंद्रितः॥ पूर्णमासे यजेन्नस्करोगेभ्यः प्रमुच्यते॥ होमकर्मण्यशक्तानाज

पस्तद्विगुणो भवेत्॥ आ ते रौद्रेणेत्यादि॥ आ ते पितरित्यनेन रुद्रदैवत्येन सूक्तेन पू
र्वमाज्याहुतीरिति॥ उपस्थानात्सर्वहविःशेषेणेत्यादि॥ एकस्मिन्दिनउपवासः॥ अ
परस्मिन्नहविःशेषेण पारणं॥ अन्नहविष्यरूरेव॥ नाज्यमेव॥ तथा रोगिणो मांस
शरीरनिर्वाहानुपपत्तेः॥ अतश्च प्रतिदिनं रुद्रहोमानंतरमाज्यहुत्वा शंकरोप
स्थानं कार्यं होमः प्रत्यृचं॥ उपस्थानं सूक्तेन व्याधितरतमत्वावेन सूक्तावृत्त्या अशे
त्तरशतं सहस्रं चरुहोमकार्यं॥ स्वयमशक्तः श्रेराचार्येण कारयेत्॥ आचार्यस्य
प्येकांतरोपवासः पूर्ववदेव॥ मत्कंजपरुद्रं जपेत्॥ पूजयेत्॥ ॥ आ ते पितरिमस्य
पंचदशर्चस्य सूक्तस्य गृत्समदऋषिः रुद्रो देवता त्रिष्टुप्छंदः॥ विहितार्थे विनियो
गः॥ आ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः॥ अभि नो वीरो अ
र्वति क्षमेत प्रजायेमहि रुद्र प्रजाभिः॥ १॥ ॥ त्वा दत्तेभी रुद्र शंतमेभिः शतं हिमा

अशीय ते भेषजेभिः॥ व्यस्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः॥२॥ श्रेष्ठो जात
स्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो॥ पर्षि नः पारमंहसः स्वस्ति विश्वा अभीती
रपसो युयोधि॥३॥ मा त्वा रुद्र चुकुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती॥ उन्नो वीरा
अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि॥४॥ हवीमभिर्हवते यो हविर्भिरव स्तो
मेभी रुद्रं दिषीय॥ ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै॥५॥ उन्मा
ममंद वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानं॥ घृणीव च्छायामरपा अशीया वि
वासेयं रुद्रस्य सुम्नं॥ क्व स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः॥ अपभ
र्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः॥७॥ प्र बभ्रवे वृषभाय श्वितीचे महो म
हीं सुष्टुतिमीरयामि॥ नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम॥८॥ स्थि
रेभिरंगैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः॥ ईशानादस्य भुवनस्य भूरेर्न २४४

वा उ योषद्रुद्रादसुर्यं॥९॥ अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपं॥ अ
र्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति॥१०॥ स्तुहि श्रुतं गर्तसदं युवानं म
गं न भीममुपहत्नुमुग्रं॥ मृळा जरित्रे रुद्र स्तवानो अन्यं ते अस्मन्निवपंतु सेनाः॥११॥ कु
मारश्चित्पितरं वंदमानं प्रति नानाम रुद्रोपयंतं॥ भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं
भेषजा रास्यस्मे॥१२॥ या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु॥ या
नि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि॥१३॥ परि णो हेती रुद्रस्य वृज्याः
परि त्वेषस्य दुर्मतिर्मही गात्॥ अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ
॥१४॥ एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि॥ हवनश्रुन्नो रुद्रेह बो
धि बृहद्वदेम विदथे सुवीराः॥१५॥ इति प्रकारांतरेण साध्यरोगहरणं॥ अथ ज्ञाता
तात पांक्तं राजयक्ष्महरणं॥ राजहा राजयक्ष्मीस्या देषा तस्यापि निष्कृतिः॥ गोन्न

माहा॰ २४५

हिरण्यमिश्रान्नजलवस्त्रप्रदानतः॥ घृतधेनुप्रदानेन तिलकुंभप्रदानतः॥ इत्यादिभिः
क्रमेणैव रुग्णस्य रोगः प्रशाम्यति॥ गवादानि तिलकुंभं तानि शक्तिरोगाद्यनुसारेण। व्य
स्तानि समस्तानि वा दातव्यानि॥ आदित्याद्येन ग्रहशांतिविनायकशांत्यादयोनुसंधे
॥ ॥घृतधेनुविधिर्मत्स्यपुराणे॥ तत्र गुडधेनुविधानस्यैव घृतधेन्वादावतिदिष्टत्वा गु
डधेनुविधिरुच्यते॥ गुडधेनुविधानस्य यद्रूपमिह यत्फलं तदिदानीं प्रवक्ष्यामि स
र्वपापप्रणाशनं॥ कृष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि। गोमयेनोपलिप्तायां दर्भा
नास्तीर्य यत्नतः॥ अत्र हस्तो रत्निरिति दानखंडे॥ यावद्भिरजिनैश्चतुर्हस्तमिताल्प
राच्छाद्यते तावंत्यजिनानि ग्राह्याणीत्यर्थः॥ अरत्निश्राष्टप्रमादेत्पर्याप्तवेणकैके २४५
नैवाजिनेनाच्छादनं॥ अथवा आयामविस्तारो मिलित्वा चतुर्हस्तमितं ह्येतं॥ लघ्वैण
काजिनेन तद्दस्तसंपरिकल्पयेत्॥ प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकां

॥प्राङ्मुखीं प्राक्छिराः॥ वत्सोपि तथैव॥ उत्त मा गुडधेनुः स्यात्सदा भारचतु
ष्टये॥ वत्सं भारेण कुर्वीत भाराभ्यां मध्यमा स्मृता॥ अर्धभारेण वत्सः स्यात्क
निष्ठा भारकेण तु॥ चतुर्थांशेन वत्सः स्यात् गृहवित्तानुसारतः॥ भारलक्षणं परिभा
षायां परिमाणलक्षणेऽस्माभिः॥ गृहवित्तानुसारतः॥ पूर्वोक्तोत्तममध्यमादिकल्पना
नवं तीत्यर्थः॥ धेनुवत्सौ घृतास्यौ नासितसूक्ष्मांबरावृतौ। शुक्तिकर्णाविक्षुपादौ शु
चिमुक्ताफलेक्षणौ॥ अत्र मुक्ताफलसाहचर्याच्छुक्तिरपि मुक्ताशुक्तिकैव ग्राह्या॥
सितसूत्रसिरालौ च सितकंबलकंबलौ॥ कंबलः॥ सास्ना॥ ताम्रगंडकपृष्ठौ तौ
सितचामररोमकौ॥ गंडकं ककुत्प्रदेशे गंडस्थलं च॥ विद्रुमभ्रूयुगोपेतौ नवनीतस्त
नान्वितौ॥ क्षौमपुच्छौ कांस्यदोहाविंद्रनीलकतारकौ। तारका चक्षुर्मध्यभागः॥ सुवर्ण
शृंगाभरणौ राजतःखुरसंयुतौ॥ नानाफलमयैर्दंतैर्घ्राणगंधकरंडकौ॥ फलमयैर्द

माहा॰ तैर्घ्राणिगंधकरंडकौ॥ फलमयैर्दंतैः संयुतां वित्तमत्वमः॥ अत्र च स्वशक्त्यनुसारेण सुव
२४६ र्णशृंगादिकं विधेयं॥ वित्तशाठ्यं न कारयेदित्यस्य सर्वशेषत्वात्॥ इत्येवं रचयित्वा तां धू
परीपैस्तथार्चयेत्॥ अर्चनामंत्रः॥ धेनुस्त्वं पृथिवी सर्वा यस्मात्केशवसंनिधा॥ सर्व
पापहरा नित्यमतः शांतिं प्रयच्छ मे॥ एवमनेन मंत्रेण सवत्सां धेनुं समभ्यर्च्य तां धेनुं
मामंत्रयीत॥ तत्रामंत्रणमंत्रानाह॥ या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता धे
नुरूपेण सा देवी मम पापं व्यपोहतु॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः॥
चंद्रार्कशक्रशक्तिर्या धेनुरूपेण सा देवी मम पापं व्यपोहतु॥ विष्णोर्वक्षसि या लक्ष्मीः स्वा
हा या च विभावसोः॥ चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु मा श्रिये॥ चतुर्मुखस्य या ल २४६
क्ष्मीर्या लक्ष्मी धनदस्य च॥ लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे॥ स्वधा त्वं पितृ
मुख्यानां स्वाहा यज्ञभुजां त॥ या सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छ मे॥ एवमामंत्रितां

धेनुं ब्राह्मणाय निवेदयेत्॥ ब्राह्मणस्तु पुच्छदेशे प्रतिगृह्य स्वस्ति कुर्यात्॥ एवं गुडधे
नुविधिमभिधायैतमेव विधिं घृतधेन्वादिष्वतिदिशति॥ विधानमेतद्धेनूनां सर्वासा
मिह पठ्यते॥ सर्वासां प्रत्यक्षधेनुव्यतिरिक्तानां प्रत्यक्षधेनावपि सुवर्णशृंगित्वादि
यथावित्तवतः समानमेव॥ यास्तु पापविनाशिन्यः पठ्यंते दश धेनवः॥ तासां स्वरूपं व
क्ष्यामि नामानि च नराधिप॥ प्रथमा गुडधेनुः स्यात्॥ घृतधेनुस्तथापरा॥ तिलधेनुस्तृ
तीया च चतुर्थी जलधेनुका॥ क्षीरधेनुश्च विख्याता मधुधेनुस्तथापरा॥ सप्तमी श
र्कराधेनुर्दधिधेनुस्तथाष्टमी॥ रसधेनुश्च नवमी दशमी स्यात्स्वरूपतः॥ प्रत्यक्षधेनु
रित्यर्थः॥ कुंभाः स्युर्द्रवधेनूनामितरासां तु राशयः॥ कुंभद्रोणः॥ कलशपर्यायः॥ अ
थवा परिमाणवचनः॥ तच्च परिमाणं परिभाषायां परिमाणप्रकरणे द्रष्टव्यं॥ सुवर्ण
धेनुमप्यत्र केचिदिच्छंति मानवाः॥ नवनीतेन रत्नैश्च तथान्येपि महर्षयः॥ एतदेव

विधानं स्मारे ते चोपस्कराः स्मृताः॥ मंत्रावाहनसंयुक्ताः सदा पर्वणि पर्वणि॥ मया प्रोक्तं प्र
दातव्या भुक्तिमुक्तिफलप्रदाः॥ गुडधेन्वादयो देया उपरागादिपर्वसु॥ ॥ इति गुडधेन्वादिवि
धिः॥ ॥ क्षयी क्षयरोगनिवृत्तये पूर्वोक्तां घृतधेनुं दद्यात्॥ घृतधेनुविधानान्यन्यान्य
पि बहूनि संति तानि॥ अतश्च घृतधेन्वादिविधिषु विकल्पो वेदितव्यः॥ ॥ इति क्षयात
पश्चोक्तं राजयक्ष्महरणं॥ ॥ महार्णवाख्ये महिते प्रबंधे मांधातृनाम्नो मदनात्मजस्यास
त्कर्मरत्नप्रकरेण पूर्णोऽयमोघप्रथितस्तरंगः॥ ॥ अथ शूलरोगहराणि॥ याज्ञवल्क्यः
॥ अन्नहर्त्तामयावी शूलरोगवान्॥ धान्यहृत्त्वाभ्यकुंते स्तोहरतोद्विशांतरम इति तेनै
व॥ कनिष्ठसाहसं दंडाभिधानात्॥ कनिष्ठसाहसानामुपपातकसमत्वादुपपात २४१
कप्रायश्चित्तं त्रैमासिकं कर्त्तव्यं शूलमात्रस्य तथापि रोगस्यासाध्यत्वे निदानकृत
र्यप्यत्वासपरिकल्पनया षण्मासिकं व्याधेरल्पत्वे तु प्रायश्चित्तान्यत्वमपि कल्पनी

यं॥ इति शूलरोगहरप्रायश्चित्तं॥ ॥ अथ शूलरोगहरत्रिशूलदानं॥ तदुक्तं॥ च
तुर्वर्गचिंतामणौ॥ शूलेन शूली भवति मनुष्याणां च हिंसकः॥ पलेनाथ तदर्धेन
तदर्धेनाथवा कृतं॥ सौवर्णं राजतं वापि शूलं कुर्यात्प्रयत्नतः॥ ताम्रेण वायसा वा
पि त्वष्ट्रादिरेणाथवा पुनः॥ रक्तवस्त्रेण संवेष्ट्य तिलानामुपरि न्यसेत्॥ तिलानां तु परि
माणं द्रोणं वापि तदर्धकं॥ तदर्धं च यथाशक्त्या पूजयेद्ब्राह्मणः शुचिः॥ अर्घादि मूल
मंत्रेण षोडशैर्वोपचारकान्॥ क्रियाविद्ब्राह्मणः पूजां कृत्वा होमं च कल्पयेत्॥ शूलस्य
दक्षिणे पार्श्वे स्थंडिलेग्निः प्रणीयते॥ समिदाज्यतिलांजुत्वा ततः शांतिं प्रकल्पयेत्॥
तेनोदकेन चाभिसिंचेत् शूलिनं रोगिणं नरं॥ ततो कृतवते शूलं पूजयित्वा स्वशक्तितः॥
दद्याद्दक्षिणां तत्तुप्राङ्मुखाय स्वकदनुरवः॥ मंत्रेणानेन परमात्मा सर्वपरिस्मरे
त्॥ त्वं शूल ब्रह्मणा सृष्टं त्रिपुराणां विनाशनं॥ दैत्यानां दानवानां च शंकरस्यायुधस्तथा

॥कुक्षिस्थमध्यपार्श्वस्थमयवा१९संगतं॥मूलं विनाशयत्वं मे महादेवेन धारितं॥
ततः स्नात्वा तु भुंजीत ब्राह्मणैः सह बंधुभिः॥ मूलजहिंसासमुत्पन्नादिष्टनाशमनुनाश
येत्॥ पत्नेनेत्यादि॥ पत्नेशेणयोर्जन्मलग्नं परिभाषायां परिमाणप्रकरणेभिहितं॥ पू
जने ब्राह्मणः शुचिरिति॥ ब्राह्मणः पूर्वोक्तं मूलं पूजयेदित्यर्थः॥ मूलमंत्रेणार्घ्यादुप
चारान्नत्र कल्पयेदित्यन्वयः॥ मूलं मंत्रः॥ शैवपंचाक्षरो वा रुद्रप्रकाशको वैदिको मं
त्रो वा॥ शैवपंचाक्षरस्य वामदेवऋषिः॥ पंक्तिश्छंदः॥ शिवो देवता पूजायां विनियोगः॥ मं
त्रस्तु॥ नमः शिवाय॥ केचन प्रणवादि पठंति। वैदिकमंत्रास्तु त्र्यंबकपरिभाषाया
मित्यादयो बहवः प्रदर्शिताः॥ समिदाज्यतिलान्हुत्वेति समिदादिहोमेषु कर्मविपा
कसंग्रहा होममंत्रांतराणि प्रदर्शितानि॥ तद्यथा॥ समिद्धोमे तावत्॥ पुरुषएवे
दमित्यस्य नारायणऋषिः॥ पुरुषो देवतानुष्टुप्छंदः॥ समिद्धोमे विनियोगः॥ २४८

पुरुषएवेदं सर्वं यद्भूतं यच्च भाव्यं॥ उतामृतत्वस्येशानो यदन्नेनातिरोहति॥ समिध
श्च पंक्तियाः॥ आज्यहोमे त्र्यंबकमंत्रः॥ तिलहोमे तु यतइंद्रभयामहइति॥ मंत्र
द्वयमपि परिभाषायां कूष्मांडहोमप्रकरणे प्रदर्शितं॥ होमसंख्या त्वष्टोत्तरशता
द्युता तत्वाध्यादितरत्तमत्रावेन कल्प्यात ततः शांतिः प्रकल्पयेदिति॥ शांतिः घोषयं
तिः तत्र चानोन त्राइत्यारभ्याभूत्वामनीमः॥ शन्नोवातः पवतामिति नैऋत्यायाणां
वंद्वयमपि परिभाषायां॥ व्याधिप्रतिमादानविधौ दृष्टव्यं॥ एतच्चोपलक्षणं॥ अतो
यस्मां शापायामा शांति सा तच्छाखीयैर्ग्राह्या॥ एतच्च शांतिवाचनं वारुणकलशं
संस्थाप्य तस्याग्रे कुर्यात्॥ ततस्तेनोदकेन शांतिकलशोदकेन मूलजं नरमाभिषिंचेत्॥
कलशस्थापनप्रकारस्तु नवग्रहयज्ञे सूर्यादिपूजानंतरं दर्शितः॥ अभिषेकप्र
कारोपि तत्रैव वसोर्धारानंतरं दर्शितः॥ सर्वपरिस्मरेदिति॥ एवंविधपापर्चरणाद

यं रोगः संजातः॥ तन्निवृत्त्यमेव वक्ष्यमाणं शूलहरणं मंत्रस्मिन विशेषेण विज्ञेयं शूलं
संस्मृतब्रह्मणाय रथ्यादिसर्पः॥ एतच्च पूर्वं शूलसाधारणं॥ ॥इति शूलहरत्रि
शूलहरणं॥ ॥अथारुचिशूलहरं॥ ॥कर्मविपाकसंग्रहे॥ ॥अथाहीनो धनवान्दा
नेष्वरतिस्तामसः स्यान्नीचाधमः॥ सोरुचिशूलहरं भ॥ न भुक्ती जायते तत्रैष निस्तारः॥
चांद्रायणं चातिकृच्छ्रं॥ बोधायनेनोक्तो जनेविप्रकर्त्ता च मनुष्यः स्यादरोचकी॥
प्राजापत्यमथापरं॥ हेमाद्यपि च कुर्वीत व्याधेरनुरूपकं॥ चांद्रायणादीनि व्र
तानि समस्तानि वा व्रमः॥ शक्तिरोगाद्यपेक्षया योज्यानीत्यर्थः॥ हेमस्तु शूलहर
त्रिशूलहरणोक्तप्रकारेण आदिशब्देन विष्णुसहस्रनामापामार्जनविष्णुसहस्र २४५
नामारुद्रस्तोत्राणि जप्तव्यानि तानि च परित्राणायो दर्शितानि॥ तथा चांद्रायणादी
न्यपि॥ ॥इत्यरुचिशूलहरं॥ ॥अथ प्रकारांतरेणारुचिशूलहरं॥ कर्मविपाकसंग्र

हे॥ साक्षाद्धंति गवादीनि यः पुनर्जन्मांतरे॥ शिरोरोगी श्रोत्ररोगी शूली वारुचि
मान्भवेत्॥ एतन्निवृत्तये वर्षं चैत्रि द्विवर्षं च त्रिवर्षकं॥ चरेत्कृतं तरते गोहिर
ण्यादिकं दिशेत्॥ अत्र गोहननं यज्ञसाधनत्वादिगुणविशिष्टगोहननं प्रायश्चित्तस्य गु
रुत्वात्॥ आत्रेदिशब्देन यज्ञविधानो गोहिरण्यादिकमित्यादिशब्देन वासो विधीयते
॥ तरं तेचेति च कारेण धरचजपः॥ जपसंख्या वायुतं॥ उपपन्नपरत्वः परित्राणायोव्या
धिप्रतिमादानविधौ द्रष्टव्यः॥ इति प्रकारांतरेणारुचिशूलहरं॥ अथाजीर्णशूलह
रं॥ कर्मविपाकसमुच्चये॥ निदानमाह वृध्दगौतमः॥ अन्नं स्वयं तु भुक्त्वान्नमव्रतस्य
द्विजस्य च॥ शूलव्याधिर्भवेत्तिमजीर्णात्यातिपीडितः॥ अन्नं स्वैवान्नं सततं ज्मांतरे
भुक्त्वा यस्तन्निमित्तप्रायश्चित्तमकुर्वन्नास्ते यस्त्वाव्रतस्य द्विजस्य नित्यकर्मानुष्ठान
रहितस्य वा धुर्मिकस्य चान्नं भुक्त्वा एवं वदास्ते स शूलव्याधिमान्भवेदित्यर्थः॥ अ

माहा. २५०

त्रेयं निष्कृतिः कुर्यादुपवासत्रयं तथा॥ दद्याद्रजतत्रयं रूप्यं ब्राह्मणाय सकांचनं॥ पज
म्रितिः॥ परिभाषायां परिमाणप्रकरणेऽभ्यधायि॥ रजतदाननमंत्रोपि तत्रैव प्रायश्चित्तो
पक्रमप्रघट्टे॥ ॥इत्यजीर्णशूलहरं॥ ॥अथ प्लीहशूलहरं॥ कर्मविपाकसंग्रहे॥
विश्वस्तविषदाता च प्लीहवान् जायते नरः॥ स चाष्टशूली च॥ तन्निर्हरणं॥ यत्तु
प्रायश्चित्तं समादिष्टं॥ चांद्रायणं पराकं च तथाप्यंजपावच॥ तन्निर्हरणार्थं
तु प्रायश्चित्तं समादिष्टं॥ चांद्रायणं पराकं च तथाप्यंजपावच॥ अपामार्जन
कस्यापि जपः संख्यालयुतं॥ अपामार्जनस्तोत्रमपि परिभाषायां विष्णुसह
स्रनामानंतरं द्रष्टव्यं॥ स्तोत्रजपस्तु व्याधिविमोक्षार्थं संध्या चांद्रायणपरा २५०
कयोर्लक्षणमपि परिभाषायामेव॥ इति प्लीहशूलहरं॥ ॥कर्मविपाकसमुच्चये
॥जठरशूलहरं॥ ॥श्रुताध्ययनसंपन्नं याचितारमकिंचनं॥ ब्राह्मणं दांतमाहू

य दानार्थं न ददाति यः॥ स नवेकूवरे शूली तथाध्मानी च कर्हिचित्॥ कृच्छ्रातिकृ
च्छ्रचांद्राणि स कुर्याद्रोगमुक्तये॥ चांद्रं चांद्रायणं॥ कृच्छ्रातिस्वरूपाणि परिभाषायामप्य
नि॥ एतानि समस्तानि वा रोगगुरुलघुत्वानुसारेण योज्यानि॥ इति जठरशूलहरं॥ ॥
अथ कटिशूलहरं॥ ॥कर्मविपाकसमुच्चये गोगामी कटिशूली स्यात्तस्य चांद्रायणं त
था॥ कृच्छ्रं चैवातिकृच्छ्रं च जपं सौरं च निर्दिशेत्॥ गावासः कांचनं दद्यात्सहिरण्यं घृ
तं तथा॥ सौरजपउघन्नपरचजपः॥ स च जपः॥ परिभाषायां दर्शितः॥ संख्यात्वयु
तं॥ गवादिदाननमंत्रा अपि॥ तत्रैव प्रायश्चित्तोपक्रमप्रघट्टे दर्शिताः॥ सहिरण्यघृतस
नेत्राज्यावेक्षणमंत्रः॥ अलक्ष्मीर्यच्च दौःस्थ्यं मे सर्वगात्रेष्ववस्थितं॥ तत्सर्वं नाशमायातु ल
क्ष्मीं पुष्टिं च वर्धय॥ ॥इति कटिशूलहरं॥ ॥अथ हस्तशूलहरं॥ कर्मविपाकसंग्रहे
॥पूर्वजन्मनि नास्तिक्यात्संध्यादिरहितो द्विजः॥ हस्तशूली स भवति निष्कृतिस्तत्र कीर्ति

श्रोत॥ भोजयेद्ब्राह्मणान्दद्यात्कन्यां जपेत्सौरं हिरण्पदः॥ सौरं सूक्तं मंत्रं वा॥ सौरमंत्रोऽष्टाह्न
शेवाउद्यन्नद्यकृचोवानयोः स्वरूपं निष्कस्वरूपं परिभाषायामुदीरितं॥ सौरसूक्तं
तु॥ उदुत्यं जातवेदसमिति त्रयोदशार्चस्य सूक्तस्य कण्व ऋषिः॥ आद्यानवगायत्र्यः
शिष्टाश्चानुष्टुभः सूर्यो देवता जपे विनियोगः॥ तदपि सूक्तं परिभाषायां महासौरप्र
करणे बोधव्यं॥ हिरण्पद इति॥ नवेदितिशेषः॥ ॥इति हस्तम्लनहरं॥ ॥अथ कर्णस्म्र
जहरं॥ ॥कर्मविपाकसमुच्चये मैथुनमृणुयान्मित्रो: कर्णमूलीनवेत्तुसः॥ स्यान्नैव
बधिरः किंचित्कप्राजेऽससुरागच्छवान्॥ निष्कविंशतिकं दद्याद्ब्राह्मणायकुटुंबिने॥ वि
ष्णुप्रकाशकान्मंत्रान्जपेद्रोगोपशांतये॥ अपामार्जनपाठेन मंत्रितं सलिलं पिबे
त्॥ भोजनं ब्राह्मणेभ्यश्च दद्याद्दक्षिणां तथा॥ मैथुनशब्दं बुधिपूर्वं कस्मृणुयादित्य
र्थः॥ निष्कस्वरूपं परिभाषायां परिमाणप्रकरणे निहितं॥ विष्णुप्रकाशकामंत्राः॥ २५१

पुरुषसूक्तं तद्विष्णोरिति ऋचश्च तत्रैव पुरुषसूक्तं परिभाषायामेव प्रदर्शितं॥ त
द्विष्णोरिति ऋचस्य ऋषिर्मेधातिथिः विष्णुर्देवता गायत्री छंदः॥ जपे विनियोगः॥
तद्विष्णोरिति ऋचश्च तत्रैव पुरुषसूक्तं परिभाषायामेव प्रदर्शितं॥ तद्विष्णोरिति पर
मं पदं सदा पश्यंति सूरयः॥ दिवीव चक्षुराततं॥१॥ तद्विप्रासो विपन्यवो जागृवांस
सः समिंधते॥ विष्णोर्यत्परमं पदं॥२॥ अपामार्जनस्तोत्रमपि परिभाषायामेव॥ स
जलं पिबेति॥ सः रोगी पुरुषसूक्तादि जपसंख्या व्याध्यनुसारेणाष्टोत्तरशताद्यु
तां ताकल्प्या॥ ॥इति कर्णमूलजहरं॥ ॥अथ नयनमूलजहरं॥ कर्मविपाकसंग्रहे॥ ॥
नग्नां परस्त्रियं दृष्ट्वा सूर्यं चास्तमयोदये॥ नेत्रमूलीनवक्लोपि नेत्रितुत्तमतेदृग
वर्चो मे देहि मंत्रेण होमसाद्दश्चाहुतं॥ वयः सुपर्णा इति च नेत्रे सिंचेच्च वारिणा॥
कृत्वा ध्यांत इति जपेन्नेत्रमूलजं प्रणश्यति॥ परस्त्रियं दृष्टेति कामतः॥ यथा सूर्य

मपि॥ वर्चोमे देहीत्यनेन वर्चोदा असि वर्चो मे देहीति॥ एतन्नागहरो मंत्रो जप्यते॥ होम
काले स्वाहांतः कर्त्तव्यः॥ अस्य मंत्रस्य प्राजापत्यः परमेष्ठी वामदेवो वा ऋषयः॥ अ
ग्निर्देवता अतिशक्करी छंदः॥ अप्सु चामृतमिति॥ अथोत्तरमयुतं वयः सुपर्णा इ
त्यस्या गौरवीतिर्ऋषिः॥ इंद्रो देवता॥ अनुष्टुप् छंदः॥ विदितार्थे विनियोगः॥ वयः सु
पर्णा उपसेदुरिंद्रं प्रियमेधा ऋषयो नाधमानाः॥ अप ध्वांतमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्
यस्मान्निधयेव बद्धान्॥१॥ अक्षीभ्यां ते नासिकाभ्यामित्येतदुक्तं परित्राणाय सौ
रोगप्रतिमादानविधौ द्रष्टव्यं॥ यथाशक्ति यथारोगं च जपसंख्या कल्प्या॥ नेत्रसे
चनं च यावद्रोगविमुक्तिः॥ यथाशक्ति ब्राह्मणान्भोजयेत्स्वयं भील सूर्यपूजा च का २५२
र्या॥ नेत्राधिदेवतात्वात्तस्य॥ ॥इति नेत्रशूलहरं॥ ॥अथ शातातपप्रोक्तं शूलरोग
हरं॥ ॥शूली परोपतापेन जायते वपुषातनुः॥ सोऽन्नदानं प्रकुर्वीत तथा रुद्रजपेद्बु

धः॥ वपुषातनुः॥ कृच्छ्राच्छरीरदस्यर्थं॥ व्याधितरतमनौ वेनान्नदानादेरभ्यासः॥ रु
द्रजलक्षणं रुद्रविधाने परित्राणायामाद्द्रष्टव्यं॥ ॥इति शातातपप्रोक्तं शूलहरं॥ ॥अथ
शूलरोगप्रतिकृतिदानं॥ ॥प्रतिकृतिलक्षणं कर्मविपाकसारे॥ अनुक्तेषु तु रोगेषु
रोषाग्निज्वलितेक्षणः॥ त्रनंगजीपणं शक्तिशूलं पाशांकुशेन दधत्॥ चक्रखड्गगदा
वज्रशरक्षुरधनूंषि च॥ नासाग्रन्यस्ततर्जन्या तर्जयन्नरिपार्श्वगान्॥ दंष्ट्रा दष्टाध
रपुटं दूरालालिमदक्षिणं॥ उत्पन्नत्रिमुखं धावन्प्रहर्त्तुं पार्श्वयोः कृशं विशीर्ण
केशं रोगाणां प्रतिरूपं प्रकल्पयेत्॥ शततस्यार्धमर्धं वा हेम्नो निष्काणि तेन तु॥
तदेव प्रतिमामानं कर्मशांतिषु पिस्तुतः॥ अतोऽस्यास्याल्पेन यो दद्यान्महादानेनन
राधमः॥ प्रतिगृह्णाति वा तस्य दुःखशोकावहं भवेत्॥ ये च रोगाः प्रबाधंते देहस्था
ः सततं तु मां॥ ग्रहणं प्रतिरूपं तु सह रोगैर्द्विजोत्तम॥ मंत्रेणानेन वै दद्यात्सर्वरो

माहा॰ २५२ ताकृतार्चनः॥ बाहुमिसेवग्रहीयात्तद्रूपं व्याधिभिः सह॥ आचार्यं यजमानस्तु अनु
यायाच्छतं परं॥ अनुक्तेषु तु रोगेषु द्विव्यादि मंत्ररोगप्रतिमामाविशेषलक्षणेनाभिहितं तत्र
रोगप्रतिमामेव विविधं लक्षणोपेतां कुर्यादित्यर्थः॥ आकृत्यादिकं स्वधिछितमित्यर्थः॥
उघानउप्युद्धतं॥ निःधृत्स्वरूपं परिभाषायां परिमाणप्रकरणे बोधव्यं॥ कर्मण्यंति
षपिस्वत इति॥ एवमन्यत्रापि कर्मविपाकग्रंथेषु स्वतः स्वतः सामान्यन्यायेन प्राप्त
त्वात्प्रतिमानं कर्तव्यमित्यर्थः॥ यद्यप्येवं तथाप्यत्रच व्याधिगुरुलघुत्वापेक्षमात्रा
त्वाद्यनुसारेणच प्रतिमामानं कल्प्यं॥ न स्वशास्त्रं विरुध्यति॥ शास्त्रे एतद्यस्वत इति
प्रदात्॥ तथा देशकालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं॥ उपपत्तिमवस्थांच ज्ञात्वा शौ २५२
चं प्रकल्पयेदिति॥ बौधायनवचने शौचपदस्योपलक्षणार्थत्वाच्चावगंतव्यं॥ येदि
ति॥ बौधायनवचने शौचपदस्योपलक्षणार्थत्वाच्चावगंतव्यं॥ ये ये रोगा इति दान

मंत्राः॥ पूर्ववदीत्यादिकृतार्चन इति॥ आतंकोदेवतानत्रैः त्यादरस्यपरिभाषायां व्याधिप्रतिमा
दानविधावुक्तप्रकारेणेत्यर्थः॥ दान्तंपरमिति॥ दानपरमिति॥ दानं परदानीत्यर्थः॥ समु
दायापेक्षमेकवचनं॥ ॥ इति स्थूलरोगप्रतिकृतिदानं॥ ॥ इति श्रीमहार्णवाख्ये महिते प्र
बंधे मांधातृनाम्नो मदनात्मजस्य॥ सत्कर्मरत्नप्रकरेण पूर्णे पूर्णोयमासीन्नवमस्तरं
गः॥ ॥ अथ ज्वरहराणि॥ तत्र गार्ग्यः॥ ये पुनः क्रूरकर्माणः पापाः पिशुनचेतसः॥ ते
न वेद्युः सदा शीतज्वरवंतस्तदेनसः॥ शतमेषु तसंख्याकं प्रकुर्यात्प्रयतो जपं॥ जा
तवेदसमंत्रेण ब्राह्मणान्भोजयेत्ततः॥ सुरामासोपहाराद्यैर्बलिः सर्वत्र शस्यते॥ स
हस्तकजरास्थानदाततोजनमेवच॥ सदाशीतज्वरवंत इत्यादि प्रतिदिनं शीतज्वर
युक्ते ज्वरप्रादुर्भावकाले शीतपूर्वकज्वरेण युक्ता इत्यर्थः॥ जातवेदसमंत्रेण जपे कु
र्यादित्यन्वयः॥ तत्रायुतसंख्याकमित्युपपत्तिलक्षणं॥ रोगगुरुलघुभावेन जपे गुरु

महा. २५४

लघुत्वेनजपेगुरुलघुत्वावःकल्प्यः॥एवंब्राह्मणभोजनेपि॥एकंब्राह्मणंभोजनंज
पांगत्र्यपूरमभिषेकांगं॥सुरादिभिर्बलिरधिकारिभेदेनसहस्रकलशस्नानंतुनम
कानुवाकेरीश्वरस्य॥पुरुषःसूक्तेनविष्णोः॥शीतज्वरेतथाकुर्यादभिषेकंहरेःस
हाइति॥कर्मविपाकसंग्रहेभिधानात्॥नमकानुवाकानामप्याद्दीनितथारुद्राभिषेक
प्रकारश्चपरिभाषायांद्रष्टव्यः॥पुरुषसूक्तस्यार्घ्याद्यपितत्रैवद्रष्टव्यं॥जातवेदसमं
मंत्रस्यकश्यपऋषिः॥जातवेदाग्निर्देवतात्रिष्टुप्छंदः॥विहितार्थेविनियोगः॥जात
वेदसेसुनवामसोममरातीयतोनिदहातिवेदः॥सनःपर्षदतिदुर्गाणिविश्वानावेव
सिंधुंदुरितात्यग्निः॥ ॥इतिशीतज्वरहरं॥अथोष्णज्वरहरं॥कर्मविपाकसंग्रहे॥मं २५८
गलेषुचकार्येषुसततंकोपवान्नरः॥उष्णज्वराभिभूतःस्यात्तत्तापस्यापनुत्तये॥स
हस्रकलशस्नानंरुद्रेणोदृश्यकारयेत्॥ब्राह्मणान्भोजयेच्छक्त्याजपेद्वैजातवेदसंत

तथामाहेश्वरतंत्रेपि॥उष्णज्वरेमहेशस्यप्रकुर्यादभिषेचनमिति॥रुद्रेणशतरुद्रे
णवानमकानुवाकेरित्यर्थः॥अस्यार्षादिपरिभाषायांद्रष्टव्यं॥जातवेदसस्यशीतज्व
रहरे॥जातवेदसग्रहणंमृत्युंजयस्याप्युपलक्षणं॥अस्यतार्षादितैत्तिरीयशाखानु
सारेणपरिभाषायांकूष्मांडहोमप्रकरणेत्वधायिपते॥त्र्यंबकंयजामहे॥इत्यस्यमं
त्रस्यवसिष्ठऋषिः॥मृत्युंजयरुद्रोदेवता॥अनुष्टुप्छंदः॥इत्युष्णज्वरहरं॥ ॥अथशीता
तपप्रोक्तविविधज्वरहरं॥ ॥देवस्वहरणादेवजामतेविविधज्वरः॥ज्वरोमहाज्वरश्चै
वशैवोवैष्णवश्च॥ज्वरेरुद्रजपंकुर्यान्महारुद्रंमहाज्वरे॥महारुद्रंजपेच्छैवेवैष्णवे
तद्वंजपेत्॥ज्वरेरुद्रजपमित्यादि॥रुद्रमहारुद्रादिलक्षणानिरुद्रानुवाकानामार्षा
दिचपरिभाषायामुदीरितं॥महारुद्रजपंच॥अथवातच्छेदेनवुधिस्थानिवेस्यवा
निपुरुषसूक्तसहस्रनामापाठेविष्णुस्तुत्यस्तोत्राणिपरामत्रंपते॥अतस्तद्वयंरु

म संबधं च शतरुद्रं पुरुषसूक्तादि जपेत्॥ शतरुद्रियाः। २। निचपरिभाषायां रचिताति
॥ ॥ इति शातातपप्रोक्तं विविधज्वरहरं॥ अथ सर्वज्वरहरं कुंभदानं॥ ॥ पद्मपुराणे॥ ॥
आगाररक्षाही ज्वरवान् जायते तत्र निष्कृतिः॥ नवं कुंभं समानीय सम्यक्संचाव्रणं दृढं जो
हितं कार्ष्मरहितं स्थापयेत्तंडुलोपरि॥ परिमाणं तंडुलानां द्रोणं पंचकमिष्यते॥ विष्णु
भास्तंडुलाया स्ताः श्वेतवस्त्रेण वेष्टयेत्॥ मधुना प्यमनुज्ञेन रवंडेना घृगुडेन वा॥ तैल
नो स्नान सावा तं पूरयेच्छक्तितो नरः॥ श्वेतपुष्पैरर्चयेत्॥ मधुनाप्यथवान्येन खंडेना
घृगुडेन वा॥ तैलेनास्नान सावा तं पूरयेच्छक्तितो नरः॥ श्वेतपुष्पैरर्चयेत्तं गंधपुष्पैस्त
थापरैः॥ होमश्च पूर्ववत्कार्यः समिदाज्यचरूत्करैः॥ सुवर्णेन यथा शक्त्या ब्राह्मणा
य निवेदयेत्॥ तस्मै कुं तव तेरन्न सुतरां जायपन्नतः॥ मंत्रेणानेन विधिवत्पूजयित्वा २५५
ज्वरी नरः॥ महेशदेवदेवेश वासुदेव परात्परः॥ कुंभेनानेन दत्तेन ज्वरः क्षिप्रं प्रण

श्यतु॥ एकांतरं संनिपातं तृतीयकचतुर्थकौ पाक्षिकं मासिकं वापि सांवत्सरिकं
मेव वा॥ नाशयेतां ममक्षिप्रं वासुदेवमहेश्वरौ॥ द्रोणपंचकमित्यादि। द्रोणस्वरूप
परिमाणं प्रकरणे द्रष्टव्यं॥ श्वेतवस्त्रेण वेष्टयेदिति॥ कुंभमित्यन्वयः॥ तं कुंभं गंध
पुष्पैस्तथापरैरिति॥ अपरैश्चैतैरक्तपीतादिभिरित्यर्थः॥ होमश्च पूर्ववदिति॥ पूर्व
वत्पूर्वोक्तप्रकारेण स च प्रकारः॥ शूलहरत्रिशूलदाने द्रष्टव्यः॥ तिलस्थाने चरुरित्ये
तावान्विशेषः॥ कुंभदानमंत्रस्य रुद्रविष्णुप्रकाशकत्वात्॥ कुंभप्रजापि रौद्रेण वै
ष्णवेन वा मंत्रेण कार्या होमोप्यनयोरन्यतमेन॥ तत्र रौद्राः॥ रौद्रवयं चाहरः॥ शूलरोगह
रत्रिशूलदाने द्रष्टव्यः॥ रुद्रगायत्री तु उमामहेश्वरदाने वक्ष्यते॥ अन्ये च त्र्यंबकमित्या
दयः परिभाषादिषु दर्शिताः॥ वैष्णवाश्चापि तद्विष्णोः परमित्यादयस्तत्रैव दर्शिताः॥ ना
रायणेष्टाक्षरमंत्रस्तु मंत्रद्वधिहरनारायणमूर्तिदाने पिरूप्यते॥ गोपालमंत्रस्तुन

कांधा हरे॥ सुवर्णेन यथाशक्त्येति॥ सुवर्णेन युतं कुंभं निवेदयेद्विचक्षणः॥ महेश्वराय देवदे
वेशोच्चारस्य श्लोकद्वयं दानमंत्रः॥ ॥इति सर्वज्वरे कुंभदानं॥ ॥अथ ज्वरतर्प्पणं॥ त
त्रा मंत्रक्रमः॥ गोविंदसंज्ञकं कंचनतापसं तथा॥ पुत्रं तापसं तरंति लोदकैरंजलित्रय
दानेन एकमेकं एवं तर्पयित्वा पश्चात् ज्वरानुसारेण॥ एकांतरज्वरादौ सुतं तर्पणं ज्वरमु
द्दिश्य कर्त्तव्यं॥ ज्वरतर्पणे रक्तचंदनतावारक्तपुष्पाणि ग्राह्याणि॥ तत्र निजतर्पणमंत्रो
॥ मौसौ सरस्वतीतीरे कुब्जगोत्रसमुद्भवः॥ त्रिरात्रज्वरदाघेन मृतो गोविंदसंज्ञकः॥
ज्वरापनुत्तये तस्मै ददाम्येतत्तिलोदकं॥ तथा॥ तथा च नर्मदातीरे च पुत्रस्तापसोमृतः॥
रात्रौ ज्वरविनाशाय तस्मै दद्यात्तिलोदकं॥ ॥अथ ज्वरतर्प्पणमंत्रः॥ ॥त्रिपाद्भस्मप्रह
रणस्त्रिशिरा रक्तलोचनः॥ स मे प्रीतः सुखं दद्यात्सर्वामयपतिर्ज्वरः॥ ॥इति ज्वरतर्प्प
णं॥ ॥अथ ज्वरप्रतिकृतिदानं॥ ॥तल्लक्षणं च॥ ॥कर्मविपाकसारे॥ ॥त्रिपाद्भस्मप्रहर

णो रक्ताक्षस्त्रिशिरा ज्वरः॥ भस्मप्रहरणो भस्मास्त्र इत्यर्थः॥ पूजादिविधानं कृत्वा तं को
देवतानंत्रेसारस्य परिभाषायां व्याधिप्रतिमादानविधानमुक्तं॥ ॥इति ज्वरप्रतिकृतिदा
नं॥ ॥इति श्रीमहार्णवाख्ये महिते प्रतिप्रबंधे मांधातृनाम्ना मदनात्मजस्य॥ सत्कर्मर
त्नप्रकरे पूर्णे पूर्णोयमासीदधुनामसत्तरंगः॥ ॥अथ श्वासहरणं॥ ॥अत्र निदानमु
मामहेश्वरसंवादे॥ कृतघ्नो जायते मर्त्यः कफवान् श्वासकासवान्॥ उष्णज्वरी च नित्यं
हि पित्तरोगसमन्वितः॥ एतन्निष्कृतिः कर्मविपाकसमुच्चये चांद्रायणत्रयं कुर्यात्
चांद्रादि प्रयोजनं॥ अग्निरिताख्यसूक्तेन चरुणा सर्पिषा युतं॥ अष्टाधिकं तु जुहुया
दुक्तरोगस्य शांतये॥ अन्यच्च वायुपुराणे॥ तद्विष्णोरिति सूक्तेन जपं कुर्याद्द्विजोत्तमा
नः॥ पूजयेद्भोजयेद्द्यात्तन्मनानान्यमानस इति॥ चांद्रायणस्वरूपं कृच्छ्रलक्षणप्र
करणेऽस्य धायि॥ चरुणा सर्पिषा युतमिति॥ चरुणाऽयुतं सर्पिषा युतमिति प्रत्येकं

संबध्यते॥अग्निंदूतारव्यसूक्तं सकलं वा होममंत्रः॥प्रत्यृचं च॥अयं च व्यवस्थितो
विकल्पः॥व्याधिग्रस्ताद्याधिके सूक्तं सकलं जप्यते प्रत्यृचमिति॥एवं सर्वत्र वेदि
तव्यं॥तद्विप्रासोरितिसूक्तेनेति॥तद्विप्रासः परमंपदमित्यनयार्चा प्रातर्युजाविबोधये
त्येतत्सूक्तं जप्यते॥तदंतर्गतत्वात्तस्याः एकस्तस्मा ऋचः सूक्तव्यपदेशो नावाच्य॥द
ध्यात्तन्मना इति॥दानं दध्यादित्यर्थः॥तच्च देयं मधुसर्पिर्वासांसि हिरण्यं॥तत्र मधुदाने
मंत्रः॥यस्मात्पितॄणां श्राद्धे तृप्तिरित्यमतोऽस्तु वै॥मध्वत्तव प्रसादेन पाहि मां दुःखसा
गरात्॥आज्यादिदानमंत्रास्तु प्रायश्चित्तोपक्रमप्रधृतो दर्शिताः॥ ॥अग्निं दूतं वृणी
महे इत्यस्य सूक्तस्य द्वादशर्चस्य ऋषिर्मेधातिथिः॥अग्निर्देवता गायत्री छंदः॥विहितार्थे विनि २५१
योगः॥अग्निं दूतं वृणीमहे इत्यस्य सूक्तस्य द्वादशर्चस्य ऋषिर्मेधातिथिः॥अग्निर्देवता गाय
त्री छंदः॥विहितार्थे विनियोगः॥अग्निं दूतं वृणीमहे होतारं विश्ववेदसं॥अस्य यज्ञ

स्य सुक्रतुं॥१॥अग्निमग्निं हवीमभिः सदा हवंत विश्पतिं॥हव्यवाहं पुरुप्रियं॥२॥अ
ग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे॥असि होता न ईड्यः॥३॥तां उशतो विबोधय यद
ग्ने यासि दूत्यं॥देवैरासत्सि बर्हिषि॥४॥घृताहवन दीदिवः प्रति ष्म रिषतो दह॥अ
ग्ने त्वं रक्षस्विनः॥५॥अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा॥हव्यवाड्जुह्वास्यः॥
क्रक्॥६॥कविमग्निमुपस्तुहि सत्यधर्माणमध्वरे॥देवममीवचातनं॥७॥यस्त्वामग्ने ह
विष्पतिर्दूतं देव सपर्यति॥तस्य स्म प्राविता भव॥८॥यो अग्निं देववीतये हविष्मां आ
विवासति॥तस्मै पावक मृळय॥९॥स नः पावक दीदिवोऽग्ने देवाँ इहा वह॥उप यज्ञं
हविश्च नः॥१०॥स नः स्तवान आ भर गायत्रेण नवीयसा॥रयिं वीरवतीमिषं॥११॥
अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः॥इमं स्तोमं जुषस्व नः॥१२॥२॥इत्यग्निं
दूतमिति सूक्तं॥ ॥प्रातर्युजाविबोधयेत्येकविंशतिऋचस्य सूक्तस्य मेधातिथिऋषि

॥आदितस्तृतस्य आश्विनस्तृतस्य सावित्र्यः देव्याग्नेय्यौ। का देवीनामेकेंद्राणी वरु
णान्यग्नायीनां द्यावापृथिव्यौ। कापार्थिवीपदै स्त्वष्ट्वा। गायत्री छंदः॥ विहितार्थे वि
नियोगः॥ प्रातर्युजा विबोधयाश्विनावेह गच्छतां॥ अस्य सोमस्य पीतये॥१॥ या सुर
था रथीतमोभा देवा दिविस्पृशा॥ अश्विना ता हवामहे॥२॥ या वां कशा मधुमत्यश्वि
ना सूनृतावती॥ तया यज्ञं मिमिक्षतं॥३॥ नहि वामस्ति दूरके यत्रा रथेन गच्छथः॥ अश्वि
ना सोमिनो गृहं॥४॥ हिरण्यपाणिमूतये सवितारमुपह्वये॥ स चेत्ता देवता पदं॥५॥
अपां नपातमवसे सवितारमुपस्तुहि॥ तस्य व्रतान्युश्मसि॥६॥ विभक्तारं हवामहे
वसोश्चित्रस्य राधसः॥ सवितारं नृचक्षसं॥७॥ सखाय आ निषीदत सविता स्तोम्यो नु नः
॥ दाता राधांसि शुंभति॥८॥ अग्ने पत्नीरिहावह देवानामुशतीरुप॥ त्वष्टारं सोमपी
तये॥९॥ आ ग्ना अग्न इहावसे होत्रां यविष्ठ भारतीं॥ वरूत्रीं धिषणां वह॥१०॥ अभि

नो देवीरवसा महः शर्मणा नृपत्नीः॥ अच्छिन्नपत्राः सचंतां॥११॥ इहेंद्राणीमुपह्व
ये वरुणानीं स्वस्तये॥ अग्नायीं सोमपीतये॥१२॥ मही द्यौः पृथिवी च न इमं यज्ञं मि
मिक्षतां॥ पिपृतां नो भरीमभिः॥१३॥ तयोरिद्घृतवत्पयो विप्रा रिहंति धीतिभिः॥ ग
धर्वस्य ध्रुवे पदे॥१४॥ स्योना पृथिवी भवानृक्षरा निवेशनी॥ यच्छा नः शर्म सप्रथ
ः॥१५॥ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे॥ पृथिव्याः सप्त धामभिः॥१६॥
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं॥ समूढमस्य पांसुरे स्वाहा॥१७॥ त्रीणि पदा
विचक्रमे विष्णुर्गोपा अदाभ्यः॥ अतो धर्माणि धारयन्॥१८॥ विष्णोः कर्माणि पश्य
त यतो व्रतानि पस्पशे॥ इंद्रस्य युज्यः सखा॥१९॥ तद्विष्णोः परमं पदं सदा पश्यंति सू
रयः॥ दिवीव चक्षुराततं॥२०॥ तद्विप्रासो विपन्यवो जागृवांसः समिंधते॥ विष्णोर्य
त्परमं पदं॥२१॥४॥ इति प्रातर्युजा विबोधमेत्येतत्सूक्तं॥ इति कफज्वरसहित

मा०ह०
२५८

श्वासकासहरं ॥ अथप्रकारांतरेण श्वासकासहरं ॥ कर्मविपाकसंग्रहे ॥ कुरुक्षे
त्रादिदेशेषु कालेषु ग्रहणादिषु ॥ महादानानि गृह्णीयान्निषिद्धान्यथवा स्वयं ॥ अ
पात्रतो दानस्यो निषिद्धेस्यथ मानवः ॥ स पापाच्छ्वासकासैश्च कुष्ठैस्य क्रमि
भिस्तथा ॥ कंडूलाश्चैव पीड्येत तद्रोगस्य प्रशांतये ॥ महिषीमममैदेवतादद्याद्विज्ञानु
सारतः ॥ कांस्यपद्दीं घृतैर्दानं तस्य मम सुखावहं ॥ असमर्थं तु दोषायनवतीहरपन्न
च ॥ जपेत्पौरुषं सूक्तं नाम्नाचैव सहस्रकं उप्यन्नं चेष्यात् वाज्यं च होमश्चायेन्त
रायुतं ॥ हिरण्यपरक्तवासांसि पंचाशद्द्विप्रभोजनं ॥ सहस्रकलशस्नानं प्रकुर्याद्रो
गशांतये ॥ निषिद्धानीत्यादि निषिद्धानि कालपुरुषादीनि ॥ स्वयमपात्रतो वेदवि २५८
त्सकर्मानुष्ठानादिरहितः ॥ पतितोऽत्र निषिद्धानि तद्दानादीनि वा अनापदि गृह्णीया
त् ॥ निषिद्धेस्योदानस्यः पतितादितादिस्यः महिषीदानप्रकारः परिभाषायां देयमेव

स्तुस्वरूपनिरूपणेऽदृष्टव्यः ॥ महिषीदानमंत्रस्तु कालमत्स्यस्वरूपां तां महिषीं
रक्तभूषणां ॥ सालंकारां प्रदास्यामि मम सद्गतिं प्रयच्छतु ॥ पुरुषसूक्तं विष्णुसहस्र
नाम उप्यन्नऋचां नामाद्यादि परिभाषायामादृष्टव्य ॥ होम उप्यऋचैव ॥ हिरण्यपर
क्तवासांसि इत्यादि तिशेषः ॥ सहस्रकलशस्नानेन नमकानुवाकैः रुद्रस्य हिरण्य
दानादि मंत्रास्तथा नमकानुवाकाश्च परिभाषायामेव निरूपिताः ॥ अत्रापि व्याधि
गुरुलघुत्वेन महिषीदानादीनि समस्तानि व्यस्तानि वा योज्यानि ॥ ॥ इति प्रकारां
तरेण श्वासकासहरं ॥ ॥ अथ शातातपप्रोक्तं श्वासकासहरं ॥ पिशुनो नरकस्या
ते जायते श्वासकासवान् ॥ घृतं तेन प्रदातव्यं सहस्रपलसंख्यया ॥ उप्यन्नं त्यजप
: कुर्याद्धोमश्च वाज्ययोरपि ॥ पलस्वरूपमुप्यन्नऋचश्च परिभाषायामन्यधा
यि ॥ जपहोमयोः संख्या रोगानुसारेण कल्प्या ॥ ॥ इति शातातपप्रोक्तं श्वासकास

हरं॥ ॥अथश्वासकासहरध्वजपाशदानं॥॥ पद्मपुराणे॥ ॥श्वासकाससुतोमर्त्यो वि
शेषहरणोन्नवेत्॥ बौधायन॥ ॥ध्वजं पाशं प्रजैकेन कुर्यात्तु रजतेन वा॥ पलार्धे
नाथवाप्युधस्फटिकोपममाहरात्॥ रत्नैर्मरकतैः सम्यक्‌ बंधमंगेषु सर्वतः॥ कुं
भेच स्थापयेत्तत्र तिलानां द्रोणपंचके॥ कुंभस्योपरि संस्थाप्य ध्वजं पाशं च तोत्तमं॥
निष्कद्वययुतं तु ब्राह्मणाय निवेदयेत्॥ वस्त्रेणावेष्टयेत कुंभं गंधपुष्पाक्षतार्चि
तं॥ भुजच्छित्तसमेताय श्रोत्रियाय कुटुंबिने॥ वरुणस्य तथा वायोः प्रीतयर्थं विनि
वेदयेत॥ नमः पाशात्तते तुभ्यं नमो ध्वजकराय ते॥ जजाधिपते तुभ्यं वायो सर्वज
नप्रिय॥॥ युवयोः प्रीतयर्थं विनिवेदयेत्॥ नमः पाशात्तते तुभ्यं नमो ध्वजकराय तेज २६०
लाधिपतये तुभ्यं वायो सर्वजनप्रिय॥ युवयोः प्रीतये दत्तौ ध्वजपाशौ सुराजनौ॥
श्वासकासैं हरतां मे प्रीतौ सर्वजनाश्रयौ॥ एवं कृत्वा श्वासकासी नीरोगस्तत्र॥॥

भवेत्॥ रजतेन वेत्यादि रजतेन वर्णेन वेत्यर्थः॥ ययातु रजते ननदास दाप्युधस्फटिकोप
मं॥ अंगेषु अवयवेषु तत्तत्प्रदेशेषु मरकतरत्नैर्बंधं युक्तं ध्वजं पाशं च कुर्यात्॥ कुंभं
च स्थापयेदित्यादि॥ एवं कुंभं स्थापयित्वा तत्र कुंभे पंचद्रोणतिलान् संस्थाप्य तस्य कुंभ
स्थापयित्वा तत्र कुंभे पंचद्रोणतिलान् संस्थाप्य तस्य कुंभस्योपरि ध्वजपाशं च निक्षिपेत्॥
कीदृशमित्यत आह निष्कद्वययुतमिति॥ निष्कद्वयं ध्वजपाशौ च कुंभं स्थापयेदित्यर्थः॥
ब्राह्मणाय निवेदनं॥ कुंभादि पूजानंतरमेव॥ पूजाप्रकारमाह॥ वस्त्रेणावेष्टयेदिति॥
अत्र कुंभे वरुणवायु तत्तत्प्रकाशक मंत्राभ्यामावाह्य षोडशोपचारैः पूजयित्वा ध्वज
पाशौ च नाममंत्रैः॥॥ संपूज्य नमः पाशात्तते तुभ्यमित्यादि मंत्रेण ध्वजपाशावुक्तलक्षण
युक्त ब्राह्मणाय दद्यात्॥ द्रोणनिष्कयोर्लक्षणं परिमाणप्रकरणे द्रष्टव्यं॥ वरुणवायव्यं मं
त्रौ तु नवग्रहयज्ञप्रकरणे दर्शितौ॥ ॥इति श्रुततानपप्रोक्तं श्वासकासहरं ध्वजपाशदा

नं॥ ॥अथश्वासकासमूर्च्छानिदानं॥ वृद्धहारीतः कर्मविपाकसारे॥ श्वासस्त्रिवाकुः पात्रगा तृ
कमंडलुयुतो ज्वलन्॥ कासकर्मांगसंधानो दीर्घोदंडधरः॥ कुब्ज॥ करेणनादयन्नृघ
टांविवृताज्ञोतिज्जीषणः॥ श्वासस्त्रिवाकुरिति॥ अत्रविद्रोषा तुपादाना दक्षिणपार्श्वे बा
कुदये॥ वामेत्वेकोबाकुः एवमन्यत्रापि विषमबाकुस्यत्वेविज्ञेयं॥ कर्मांगसंधानः कू
र्मद्व संकुचितांगईत्यर्थः॥ यदातु श्वासकासयोरैकैवमूर्च्छिस्तदा त्रिबाकुः संकुचि
तांगश्चैवं कर्त्तव्या॥ एतत्प्रतिमाप्रदानविधानं तु आतकोदेवतातत्रेस्मारस्यपरिभाषायां
व्याधिप्रतिमादानविधानमुक्तं॥ इतिश्वासकासहरं॥ ॥इतिश्रीमहार्णवाख्ये महिते
प्रबंधे मांधातृनाम्नो मदनात्मजस्य॥ सत्कर्मपाककर्मविपाकसमुच्चये॥ ॥शोफीहस्त
त्रयं कुर्यात् गायत्र्या अयुतं जपं तिलहोमसहस्रं च जपेन्मृत्युंजयं तथा॥ तिलहोमस्तु व्या २६१
हृतिभिः गायत्री व्याहृतिभिर्बकमंत्राणां मध्या दितपाकृच्छ्रं जन्हा॥ जपरिभाषयोक्तप्र

यं॥ मृत्युंजयजपसंख्यापि सहस्रं॥ ॥इति कर्मविपाकसमुच्चयोक्तं शोफहरं॥ ॥अ
थ कर्मविपाकसंग्रहोक्तं शोफहरं॥ अन्नैर्मार्गे नदीतीरे छायायां पुलिने नरः॥ मूत्रं
पुरीषं वल्मीके यः प्रमुंचेत् जले पिवा॥ स्वयथुव्याधिमाप्नोति लेवमाहरं॥ अन्नैर्मार्गे नदी
तीरे छायायां पुलिने नरः॥ मूत्रं पुरीषं वल्मीके यः प्रमुंचेज्जलेपिवा॥ स्वयथुव्याधिमा
प्नोति स्येवमाह सदाशिवः॥ छायायामिति वृक्षरेवालयछायायां॥ मूत्रपुरीषग्रहणं
॥ ष्ठीवनादेरुपलक्षणं॥ अस्यादित्यग्रहणं च पुण्यस्थानोपलक्षणार्थं इंच इतिमंत्रेहि
जपेदष्टोत्तरायुतं॥ आपोहिष्टेति होमः स्याच्चरुणा सर्पिषायुतं॥ इदं वो विष्णुस्तस्य
रोत्तेषां परिभाषायां॥ नवग्रहमकरणोक्तपाजमंत्रेषु न एव॥ आपोहिष्टेति ऋच
स्तुपरिभाषायामेव रोगप्रतिमादानविधौ स्पष्टं वर्ण्यः॥ चरुणा सर्पिषायुतमिति॥ च
रुणा सर्पिषायुतमिति॥ प्रत्येकसंबध्यते॥ व्याधितरतमभावेन होमसंख्या मान्यूना

धिकन्नावपरिकल्प्यः॥॥ इतिकर्मविपाकसंग्रहेऽङ्केशोफहरं॥ अथशोफहरंचवस्त्रदा
नं॥॥ तत्रह बौधायनः॥ विप्रकर्त्ताच्चोकृणशोफीचत्वतिमानवः॥ तस्यकर्मविपाको
कव्याधिनाशनमुत्तमं॥ दानंवस्त्रस्यमन्त्रोषेणसर्वशोफविनाशनं॥ होमंवस्त्रंसमानी
यवकूमूल्यंचयद्भवेत्॥ मुक्ताफलानिवध्नीयाद्वस्त्रप्रांतेसमंततः॥ कुंकुमेनांकि
तंसम्यक्कर्पूरागरुधूपितं॥ तंडुलोपरिसंस्थाप्यतंतुजाश्वस्वशक्तितः॥ उपचारैः
षोडशभिराचार्यःपूजयेत्ततः॥ होमंचापिकुर्वीतसमिदाज्यतिलैःक्रमात्॥ उद्बुध्यस्व
स्विदंविष्णुरयव्याहृतिभिस्तथा॥ मंत्रेक्रमेणजुहुयात्स्विष्टकृत्तुततःपरं॥ कृत्वाकृत्वा
चसंपातान्पात्रेसर्वान्निवेशयत्तु॥ संख्याचाष्टोत्तरशतमष्टाविंशतिरेववा॥ संपातेनो
गमुन्नज्यास्त्वर्वमेवहि रोगिणः॥ अन्नोत्याभितिसूक्तेनयथालिंगतथैवच॥ वाससा
मार्जनंकुर्यान्मार्जयेदूर्जमुष्टिना॥ आचार्यायाप्यतद्वस्त्रंदद्यात्तत्रासदक्षिणं॥ मंत्रे

णानेनविधिवत्तिणनिमुरकंस्पुचि॥ ऋषीणांप्रवरोगस्त्योलोपामुद्रापतिःप्रभुः॥ होम
वस्त्रप्रदानेनतुष्टोव्याधिंव्यपोहतु॥ ब्राह्मणेभ्यस्ततःपश्चाद्याच्छक्त्याचदक्षिणां॥
ततःस्नात्वाशुचिर्भूत्वावस्त्रमाल्योपशोभितः॥ ब्राह्मणैर्बंधुभिःसार्धंभुंजीतःसुसमा
हितः॥ सतंडुलांश्चस्वशक्तितइतिजवृतीतिश्चेषः॥ आचार्यदिति॥ होमवस्त्रमगस्त्य
पैवलमाचार्यःपूजयेदित्यर्थः॥ पूजामंत्रस्तु॥ अगस्त्यःखनमानइत्यस्यागस्त्यांतेषा
ससीब्रह्मचारीऋषिः इंद्रोदेवताअथवाअगस्त्यप्रीतयेवासोरीपतेइतिवस्त्रपूज
यामगस्त्योदेवतात्रिष्टुप्छंदः॥ वासपूजायांविनियोगः॥ अगस्त्यःखनमानःखनित्रैः
प्रजामपत्यंबलमिच्छमानः॥ उभौवर्णावृषिरुग्रःपुपोषसत्याःदेवेष्वाशिषोजगामात्र
बुध्यस्वस्विलादि॥ उद्बुध्यस्वाग्नेप्रतिजागृहि इदंविष्णुर्व्याहृतीनांचपरिभाषायांनवग्रह
प्रकरणेकृष्णांउग्रकरणेचर्षायांदिरर्शितः॥ तथास्विष्टकृद्धोमस्यच॥ कृत्वाकृत्वाच

संपातानिति॥ यदाज्यहोमस्तदा प्रत्याहुति होमानंतरं संपाताज्यबिंदून्॥ हुतपात्रां
तरे स्थापयेत्॥ तेन सं॰ तेनाज्यबिंदुसमुदायेन रोगिणः सर्वगात्रं परिमार्जयेत्॥ के
नमंत्रेण अक्षीभ्यामिति सूक्तेन॥ एतच्च सूक्तं परिभाषायां रोगप्रतिमादानविधौ द्रष्ट
व्यं॥ गात्रपरिमार्जनसाधनद्रव्यमाह॥ वाससा मार्जनं कुर्यादिति॥ पूजितवाससा प
रिमार्जनं पश्चाद्दर्भमुष्टिना॥ तद्वस्त्रं पूजितं स्वमाचार्याय दद्यात्॥ आचार्य इति प्रति
ग्रहात् प्रजप्तानां॥ तच्चदानं सदक्षिणं भवति॥ इति शोफहरवस्त्रदानं॥ ॥ तत्र लक्षणं
कर्मविपाकसारे॥ शोफः पंचकरस्तीक्ष्णो दग्धादन्तः शरचापधृक् रथानक्षुरिकां घंटां
कुलिशं च बलं ग्रासस्तथा॥ पंचकर इति॥ दक्षिणेत्रयः कराः वामे द्वाविति पंच॥ पूजाविधा
नं च॥ आतंको देवता तत्र तु परिभाषायामुक्तं व्याधिप्रतिमादानविधौ॥ इति शोफ
हरप्रतिमादानं॥ ॥ इति श्रीमहार्णवाख्ये मदिते प्रबंधे माधारनाम्नो मदनात्मजस्य स

त्कर्मरत्नोपचिते तरंगः पूर्णो नवत्या द्विशतोपरम्यः॥ ॥ अथ पांडुरोगहराणि॥ तत्र कर्म
विपाकसमुच्चये॥ देवद्विजद्रुहारी पांडुरोगी भवेन्नरः॥ कृच्छ्रातिकृच्छ्रे कुर्याच्च॥ चांद्राय
णमतंद्रितः॥ कुर्यात्कूष्मांडहोमं च स्वर्णं च द्वे च वाससी॥ ब्राह्मणेभ्यो यथाशक्ति पांडु
रोगस्य शांतये॥ देवद्विजेत्यादि॥ देवाश्च द्विजाश्च द्वेरजतं॥ कृच्छ्रादिकूष्मांडहोमप
र्यंतानां स्वरूपाणि तथा सुवर्णादिदानमंत्राश्च॥ परिभाषायां निरूपिताः॥ इति कर्म
विपाकसमुच्चयोक्तं पांडुरोगहरप्रायश्चित्तं॥ अथ शिरोवेदनासहितपांडुरोगहरं॥
कर्मविपाकसंग्रहे॥ अग्निष्टोमादिकं कर्मोपक्रम्य न समापयेत्॥ स पांडुरोगी भव
ति शिरोवेदनया तथा॥ कृच्छ्रातिकृच्छ्रे कुर्याच्च चांद्रायणमतंद्रितः॥ दानं च भोजये
द्विप्रान्निष्कालेन यथेप्सितं कृच्छ्रादिलक्षणानि परिभाषायामुदीरितानि॥ इति शि
रोवेदनासहितपांडुरोगहरं॥ ॥ अथ पांडुरोगहरएवीदानं॥ तत्र शौनकः॥ ॥ अंत्य

माहा. जागमनेमर्त्यः पांडुरोगी प्रजायते॥ वक्ष्यामि तत्प्रतीकारं दानहोमादिकर्मणा॥ पल
२६४ त्रयेण कुर्वीत राजतेन वसुंधरां॥ तदर्धेनाथवा कुर्याद्वित्तशाठ्यं न कारयेत्॥ सपर्व
तवनाकुंभांसमुद्रपरिवेष्टितां नवरत्नानि निक्षिप्य म्भेत वस्त्रेण वेष्टयेत्॥ कांस्यपा
त्रे विनिक्षिप्य पलाष्टकविनिर्मितां॥ देवीमावाहयेत्तत्र सर्वाधारां हरिप्रियां॥ एसेहि
देवि धात्रि त्वं रूपेस्मिन्सम्यगाविश्य सहिता पर्वतैर्द्वीपैः ससाद्रिसुमनोहरैः॥ एवमावा
ह्य तां देवीं गंधमाल्यैः समर्च्चयेत्॥ उपचारैः षोडशभिराचार्यः सर्वशास्त्रवित्॥ हो
मं चापि प्रकुर्वीतः समिदाज्यतिलैरपि नमिन्नमेति मंत्रेण समिधोमः प्रकीर्तितः॥ तथा
नमिर्नमि मगान्मातामातरमित्यपित्यपि॥ मंत्रः प्रकीर्तितस्त्वाज्योजुहुयात्सर्पिषा तिलैः॥ २६४
क्रमेरुत्तरतस्त्वापि कुंभं वस्त्रेण वेष्टितं॥ स्थापयेद्दक्षिणंभागमंभस्या नादिभिन्त्रिकां॥
प्रक्षिपेच्च तथा मधुवारिणा परिपूरितं॥ पवमानादिभिर्मंत्रैरभिषेकं च कारयेत्॥ आचा

र्यस्तानुवाकेन ऋणं तिस्त्वापि प्रकल्पयेत्॥ आ त्रिषिक्तस्य चांगानि वस्त्रेण परिमार्जयेत्॥
आत्तीम्वामं तुवाकेन यथालिंगं सदर्भकं ॥ आसार्यामतु तां पृथ्वीं दद्याद्रोगी समाहितः॥
मंत्रेणानेन विधिवन्स्नात्वा सुखायफकरस्तु खः॥ धात्री धरित्री जगतां नाथ राहेणैर्धतासु
रा॥ रत्नगर्भासमुद्रैकवसनासर्वशोभना॥ दानेनानेन सुप्रीता पांडुरोगं व्यपोहतु॥
पलत्रयेण कुर्वीतेत्यादि॥ पलस्वरूपं परिमाणप्रकरणे द्रष्टव्यं॥ गंधमाल्यैः समर्च
येदिति॥ अर्चनं तु नमिन्नमेत्यादि मंत्रेण॥ अस्य मंत्रस्याग्निर्ऋषिः। नमिर्देवता॥ उप
रिष्टाद्बृहती पूजायां होमे विनियोगः॥ नमिन्नमेत्यस्य वरिणांतरिक्षं महित्वा॥ उपस्थे
देव्यदितेर्ग्निमन्नादमन्नाद्यायादधे॥ समिधोम इध्माज्यतिलहोमयोरप्युपलक्षणं॥
अयं च तिलहोमो व्याहृतिभिर्होमसंख्या चाष्टोत्तरशतादि सहस्रांता॥ नमोर्नमि पूजा
दौ मंत्रविकल्पमाह नमिन्नमित्यादिना॥ ४॥ अस्याप्यग्निर्ऋषिः नमिर्देवता अनुष्टु

पृछंदः॥ सुधवारिणा पूरितं कुंभं स्थापयेदित्यन्वयः॥ कुंभस्थापनः प्रकारो मृत्तिकाश्व
नवग्रहप्रकरणे द्रष्टव्यः॥ पवमानादिभिर्मंत्रैरिति॥ पवमानमंत्राः॥ स्वादिष्टया मदिष्ट
येत्येवमादयः॥ पवमानः सुवर्जन इत्यनुवाकस्य आदित आरभ्यैनस्तत्क्रांत राण्यनुवाकांत
राणि च नानाशाखापरिपठितान्यभिषेके विनियुक्तानि युक्तानि लक्ष्यंते॥ तानि च यथाशा
खं ग्राह्याणि॥ स्वादिष्टयेति सूक्तमात्रेणैवात्र प्रदर्श्यते॥ पवमानः सुवर्जन इत्यनुवाको
गणहोमप्रकरणे दर्शितः॥ अभिषिक्तस्य चाणनीति॥ अहीन्यामित्यनुवाकेन मंत्रेण स
हर्जं कंपयाज्ञवति तथा वस्त्रेण परिमार्जनसाधनेनाभिषिक्तस्यांगानि परिमार्जयेदित्य
र्थः॥ अत्तीम्या हीमिति सूक्तं रोगप्रतिमादानविधौ द्रष्टव्यं॥ एवं पृथ्वीदाने कृते फलमा २६५
ह॥ अनेन विधिना दत्तं पृथ्वीदानं प्रयत्नतः॥ यज्ञा तवै कृतं मर्त्यैर्भूत्यजागमनेननु॥ तस्
र्वं नाशमायाति पांडुरोगादिकं महत् शांत्यर्थं ब्राह्मणैः सार्धं कुर्यात्पुण्याहवाचनं॥ तच्च पु

ण्याहवाचनं पृथ्वीदानानंतरं कर्तव्यं॥ अथ स्वादिष्टया मदिष्टयेत्येतत्सूक्तं॥ अस्य द
शर्चस्य सूक्तस्य विश्वामित्रो मधुच्छंदा ऋषिः पवमानसोमो देवता गायत्री छंदः॥ अ
भिषेके विनियोगः॥ स्वादिष्टया मदिष्टया पवस्व सोम धारया॥ इंद्राय पातवे सुतः॥
रक्षोहा विश्वचर्षणिरभि योनिमयोहतं॥ द्रूणा सधस्थमासदत्॥ २॥ वरिवोधातमो भ
व मंहिष्ठो वृत्रहंतमः॥ पर्षि राधो मघोनां॥ ३॥ अभ्यर्ष महानां देवानां वीतिमंधसा॥
अभि वाजमुत श्रवः॥ ४॥ त्वामच्छा चरामसि तदिदर्थं दिवे दिवे॥ इंदो त्वे न आशसः॥ ५
॥ पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता॥ वारेण शश्वता तना॥ ६॥ तमीमण्वीः समर्य
आ गृभ्णंति योषणो दश॥ स्वसारः पार्ये दिवि॥ ७॥ तमीं हिन्वंत्यग्रुवो धमंति बाकुरं दृतिं॥
त्रिधातु वारणं मधु॥ ८॥ अभीममघ्न्या उत श्रीणंति धेनवः शिशुं॥ सोममिंद्राय पात
वे॥ ९॥ अस्येदिंद्रो मदेष्वा विश्वा वृत्राणि जिघ्नते॥ शूरो मघा च मंहते॥ १०॥ इति स्वादिष्टयेति

स्तक्तं ॥ ॥इतिपांडुरोगहररप्यीदानं ॥ ॥अथशातातपप्रोक्तंपांडुरोगहरं ॥ ॥उरस्त्रेनि
हतेचैवपांडुरोगःप्रजायते ॥ कस्तूरिकापलंदद्यात्ब्राह्मणायविशुद्धये ॥ तेनगुरुलघु
पक्षाव्याधितरत्नमतानानुसारेणयोज्या ॥ ॥इतिशातातपप्रोक्तंपांडुरोगहरं ॥ ॥अथपांडु
रोगप्रतिमादानं ॥ ॥तत्रप्रतिमालक्षणमनुक्तेषुतुरोगेष्विस्तारादिनामूलरोगप्रकरणेनि
हितं ॥ अवशिष्टविधिस्तुआतंकोद्भवनातत्रैसारम्भपरिभाषायांरोगप्रतिमादानवि
धाउक्तः ॥ ॥इतिपांडुरोगहरप्रतिमादानं ॥ ॥इतिश्रीमहार्णवाख्येमहितेप्रबंधेमाधा
त्रनाम्नोमदनात्मजस्य ॥ सत्कर्मरत्नप्रकरेणपूर्णेत्रयोदशोयंप्रथितस्तरंगः ॥ ॥अथा
त्रपीडहराणि ॥ ॥कर्मविपाकसमुच्चये ॥ छिन्नान्त्राणिजायंतेवैद्यहंतुततःपरं ॥ ज्वरौ
ज्ञीतोर्धकोरहरुक्पानेननिवृत्तये ॥ कृच्छ्रातिकृच्छ्रंकुर्याद्वाराजतब्राह्मणभोजनं ॥ उपघंत्रप
कृच्छ्रजपःस्याद्पुतत्रमसंख्यपापात्रातेस्तकेनववर्ज्यंजुकुर्याद्बहुतमेषच ॥ अथवाम २६३

हिषींदद्यात्प्रतिरूपेणकांचनीं ॥ ज्वरौर्ज्ञीतोर्धकाविस्तारादि ॥ ज्ञीतज्वरउष्णज्वरस्य ॥
कृच्छ्रातिकृच्छ्रस्वरूपमुपपन्नकृच्छ्रेषुपरिभाषायांद्रष्टव्यं ॥ आतेपितमरुतामितिसू
क्तेन ॥ एतच्चसूक्तंह्यपरोगहरप्रकरणेद्रष्टव्यं ॥ चरुम्बाज्यंचप्रत्येकमष्टोत्तरशा
तंजुहुयात् ॥ अत्रचसकलंसूक्तंमंत्रोनत्र्यृचं ॥ महिषीदानमंत्रस्तुश्वासकासहरप्र
करणेद्रष्टव्यः ॥ महिषीप्रतिमायांसुवर्णपरिमाणंवित्तानुसारेणकुर्यात् ॥ इत्यांत्र
पीडहरप्रायश्चित्तंमहिषीदानंच ॥ ॥वृधिहरनारायणदानं ॥ तच्चब्रह्मांडेप्रोक्तं ॥ मत्स
विघ्नकरोमर्त्योजायंतेचात्रवृधिमान् ॥ वक्ष्यामितत्प्रतीकारंदानहोमादिकर्मणा ॥
कुर्यात्स्वर्णमयींमूर्तिंस्नुजांनारायणस्यतु ॥ व्यावहारिकनिष्काणांमेकेनाथतदर्ध
तः ॥ नारायणमूर्त्तिलक्षणंपंचरात्रागमे ॥ नारायणश्चतुर्बाहुःशंखचक्रेतथोत्तरे ॥ द
क्षिणेतुगदापद्मेनीलजीमूतसंनिभे ॥ वामेश्रीवत्सकौस्तुभपुष्टि ॥ पद्मकरापरइति ॥ ना

रायणोऽरं खादीनि विन्यसेत्॥ कथमित्याह शंखमित्यादि॥ उत्तरे वामभागे॥ शंखमध
स्तात् चक्रमुपरि॥ दक्षिणे दक्षिणभागे॥ उपरि गदां पद्ममधस्तात्॥ एवं चतुर्भुजं बाहुषु
विन्यसेत्॥ वामे नारायणस्य वामपार्श्वे वृत्तकीहस्ताहस्तद्वयस्थितैकवक्त्रकी मुक्ता
लक्ष्मीः स्थापनीया॥ अपरे दक्षिणपार्श्वे पद्मकराएकैकपद्मयोर्जितहस्तद्वयोपेता पुष्टि
स्थापनीया॥ लक्ष्मीपुष्टिस्थापनीया॥ लक्ष्मीपुष्टिप्रतिमे अपि हेममये॥ एवं विधानारायण
मूर्तिं वक्ष्यमाणप्रकारेण पूजयेदित्याह॥ प्रक्षाल्य पंचगव्येन स्नापयेत्॥ कुंकुमोपरि॥
श्वेतवस्त्रेण संवेष्ट्य गंधमाल्यैः समर्चयेत्॥ उपचारैः षोडशभिर्वा आचार्यो वैष्णवः शुचिः॥
सर्वज्ञस्तस्यार्थं तत्त्वोब्रह्मविद्यासुनिष्ठितः॥ होमं च कारयेत्तत्र साग्नेय्यां दिशि रागस्ततः॥ २६१
समिदाज्यतिलैश्चैव जुहुयान्मूलमंत्रतः॥ तिलान् व्याहृतिभिर्हुत्वा सर्वरोगात् प्रमुच्यते॥
रोगी तथार्चयेद्देवं नारायणमनामयं॥ मूलमंत्रेण विधिवन्नैवेद्यं चरुश्रिष्यते॥ नमोंतना

मसेंकारं मूलमंत्रः प्रकीर्तितः॥ ततस्तां प्रतिमां दद्यादात्मसुखाय स्फुरत्सुखः॥
मंत्रेणानेन विधिवद्भक्त्या परमया युतः॥ नारायण जगन्नाथ शंखचक्रगदाधर॥ पू
र्वजन्मनि यत्पापं दारिद्र्याद्यैः कृतं मम॥ अत्र रुग्भिर्महारोगं दानेनानेन तोषितः॥ चक्रह
स्त गदापाणे श्रीमन्मा प्रजगत्पते॥ एवं दत्वा तु तं देवं ततोऽभ्याक्षालयेत्ततः॥ विप्राणां भोजनं
दद्यात् स्नात्वा भुंजीत बंधुभिः॥ एवं कृत्वा समाप्नोति नीरोगत्वं नरोत्तुवि॥ आरोग्ययुक्तो नि
त्यं तु सुचिरं सुखमेधते॥ आग्नेय्यां दिशीत्यादि नारायणमूर्तिपूजाप्रदेशात् आग्नेय्यां दिशि कु
ण्ड इति स्वगृह्योक्तप्रकारेणाग्निं प्रतिष्ठाप्य दिविधामेतदर्थः॥ मूलमंत्रतः समिदाज्ययोर्हो
मः॥ मूलमंत्रेण नारायणमर्चयेत्॥ इत्यन्वयः॥ विधिवन्नैवेद्यमिति॥ विधिवन्नैवेद्यमि
ति॥ विधिवच्चरुं संपाद्य तस्माच्चरोरुद्धृत्य नैवेद्यं नारायणाय दत्वा वह्नौ नहोमं कुर्या
दित्यर्थः॥ विधिवत्संपादनं नाम स्वगृह्योक्तप्रकारेणाग्निर्वापादि विधिपूर्वकं चरुश्रप

मह. णं॥ मूलमंत्रो यथा॥ नमो नारायणायेति॥ नमःशब्दं ते स्थितिर्यस्य नाम्नस्तच्चतुरक्षरमंत्रस्तु॥ ॐ नमो
२६८ नारायणाय॥ अस्य मंत्रस्य साध्यनारायण ऋषिः॥ देवी गायत्री छंदः॥ नारायणः परमात्मा
देवता विहितार्थे विनियोगः॥ होमसंख्या चाष्टोत्तरशतादि देशकालवयःशक्त्याद्यपे
क्षया कल्प्या॥ व्याहृतीनामप्यादिकूष्मांडहोमप्रकरणे तथा नवग्रहावारप्रकरणे
च प्रदर्शितं॥ ॥इत्यत्र रुधिहरनारायणदानं॥ अथात्र रुधिमूर्त्तिदानं॥ तत्रत्त्वत्तंतुक
र्मविपाकसारे॥ अंत्ररुधिः कृशोनरलमेदिनीमवलोकयन्॥ प्राजेबधारी सततं कथा
जेनपि वन्मधु॥ प्राजेबधारीति प्राजेबदारे नात्राणपुच्यते॥ अथवा द्विकादि॥ अन्यत्तु
तिकर्त्तव्यता कपालरोगप्रतिमादानविधावातंको देवतातत्रैत्यादिना दर्शितः॥ ॥इत्यंत्र २६८
रुधिमूर्त्तिदानं॥ ॥इति श्रीमहार्णवाख्ये मदितेप्रबंधे मांधातृनाम्नो मदनात्मजस्य सत्क
र्मरत्नप्रकरेण पूर्णो चतुर्दशोयं प्रथितस्तरंगः॥ ॥अथ व्रणहराणि॥ ॥तत्र शातातपः॥

क्तं मस्तकव्रणहरं॥ जात्यन्त्यस्त्रीगमनाज्जायते मस्तकव्रणी॥ तसातकविमुध्यर्थं
प्राजापत्यत्रयं चरेत्॥ प्राजापत्यलक्षणं कृच्छ्रप्रकरणेभिधास्ये॥ ॥इति शातातपप्रोक्तं
मस्तकव्रणहरं॥ ॥अथ नासिकाव्रणहरं॥ ॥शातातपः॥ श्रोत्रियस्त्रीप्रसंगे तु जायते ना
सिकाव्रणी॥ हरं॥ कर्मविपाकसंग्रहे॥ कर्मकाले कुक्कुटाश्वखरादीन्वायमर्दते॥ स
नासिकाव्रणी चास्मात्तदाई नेत्रंमजायते॥ उपायं नयुरु चेनाज्यप्रयुक्तमादमुतं चरुं॥
श्रीसूक्तं च जपेद्धत्वा दूर्वाक्षतविमिश्रितं॥ त्रिरवामांच निबध्नीयाच्छिवसंकल्पमंत्रितं
॥कर्मकाले कुक्कुटस्वरचांडालादीन्बुद्धिपूर्वकं दृष्ट्वा पश्चात्तत्साम्मिश्रितत्वेनाचम
नप्राणायामादीन्स्तत्तत्कर्मस्वर्मस्वविहितान्योनकरोति सएवंविधव्याधिमान्भव
तीत्यर्थः॥ उपायत्रयमाह चरुमाश्रादि परिभाषायां दृष्टव्यं॥ व्याधितरतमभावेनास्मु
तंतदर्धमधिकं वा हवनं कल्प्यं॥ श्रीसूक्तजपेपि व्याध्याद्यपेक्षया सहस्राद्ययुता

मा॰ह॰ तासंख्याकल्पा॥शिवसंकल्पमंत्रितांरत्नानिबध्नीयात्नमः॥शिवसंकल्पसूक्तंतुपरि
२६८ ज्ञाषायांरुद्रविधानेदर्शितं॥हिरण्यवर्णांहरिणीमित्येतस्यपंचदशर्चस्यश्रीसूक्तस्या
नंदविक्लीतकर्दमइंदिरासुतारुषयः॥श्रीर्देवता॥आद्यास्तिस्रोनुष्टुभः॥एकाप्रस्ता
रपंक्तिः॥जपेविनियोगः॥हिरण्यवर्णांहरिणींसुवर्णरजतस्रजां॥चंद्रांहिरण्मयींलक्ष्मीं
जातवेदोममावह॥१॥तांमआवहजातवेदोलक्ष्मीमनपगामिनीं॥यस्यांहिरण्यंविंदे
यंगामश्वंपुरुषानहं॥२॥अश्वपूर्वांरथमध्यांहस्तिनादप्रमोदिनीं॥श्रियंदेवीमुपह्व
येश्रीर्मादेवीजुषतां॥३॥कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीं॥पद्मेस्थि
तांपद्मवर्णांतामिहोपह्वयेश्रियं॥४॥चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजु २६८
ष्टामुदारां॥तांपद्मनेमींशरणंप्रपद्येअलक्ष्मीर्मेनश्यतांत्वांवृणोमि॥५॥आदित्यवर्णे
तपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः॥तस्यफलानितपसानुदंतुमायांतरायाश्च

बाह्याअलक्ष्मीः॥६॥उपैतुमांदेवसखःकीर्तिश्चमणिनासह॥प्रादुर्भूतोस्मिराष्ट्रेस्मि
न्कीर्तिमृद्धिंददातुमे॥७॥क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहं॥अभूतिमस
मृद्धिंचसर्वाणिनुदमेगृहात्॥८॥गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं॥ईश्वरींस
र्वभूतानांतामिहोपह्वयेश्रियं॥९॥मनसःकाममाकूतिंवाचः॥सत्यमशीमहि॥पशू
नांरूपमन्नस्यमयिश्रीःश्रयतांयशः॥१०॥कर्दमेनप्रजाभूतामयिसंभवकर्दम॥
श्रियंवासयमेकुलेमातरंपद्ममालिनीं॥११॥आपःसृजंतुस्निग्धानिचिक्लीतवसमे
गृहे॥नचदेवींमातरंश्रियंवासयमेकुले॥१२॥आर्द्रांपुष्करिणींयष्टींसुवर्णांहेममालि
नीं॥सूर्यांहिरण्मयींलक्ष्मींजातवेदोममावह॥१३॥आर्द्रांपुष्करिणींपुष्टिंपिंगलांप
द्ममालिनीं॥चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह॥१४॥तांमआवहजातवेदोल
क्ष्मीमनपगामिनीं॥यस्यांहिरण्यंप्रभूतंगावोदास्योश्वान्विंदेयंपुरुषानहं॥यःशुचिः

प्रयतोभूत्वा जुहुयादाज्यमन्वहं॥श्रियःपंचदशर्चंच श्रीकामःसततंजपेत्॥पद्मानने
पद्मऊरूपद्माक्षीपद्मसंभवे॥तन्मेभजसिपद्माक्षीयेनसौख्यंलभाम्यहं॥अश्वदा
यीगोदायीधनदायीमहाधने॥धनंमेजुषतांदेवीसर्वकामांश्चदेहिमे॥पुत्रपौत्र
धनंधान्यंहस्त्यश्वाश्वतरीरथं॥प्रजानांभवसीमाताआयुष्मंतंकरोतुमां॥धनम
ग्निर्धनंवायुर्धनंसूर्योधनंवसु॥धनमिंद्रोबृहस्पतिर्वरुणंधनउच्यते॥वैनतेयसोमंपि
बतुवृत्रहा॥सोमंधनस्यसोमिनोमिनः॥श्रीवर्चस्वमायुष्यमारोग्यमावुर्लत्स्वमानंम
हीयते॥धान्यंधनंपशुंपुत्रलाभंशतसंवत्सरंदीर्घमायुः॥ ॥इतिश्रीसूक्तं॥ ॥प्रका
शांतरेणनासिकाव्रणहरं॥ ॥अथहृदयव्रणहरं॥शातातपप्रोक्तं॥स्वजातिजायाग २७०
मनेजायतेहृदयव्रणी॥तस्मात्तद्विशुध्यर्थंप्राजापत्यद्वयंचरेत्॥स्वजातिजायाग
मनइति॥स्वजातिजायायामागमनमितिएकःसमासः॥अयमभिप्रायः॥ब्राह्मणा

दयःपुरुषायथायोगंवर्णचतुष्टयेपिब्राह्मणींक्षत्रियांवैश्यांशूद्रांचेतिपरिणीय
स्वस्वजातीयांब्राह्मण्यादिस्त्रियंपातित्यादोषाभावेउपभोगात्परित्यजंतितेस्वजायाग
मनाइतिव्यवह्रियंते।तदातेषुविहिताचरणस्वजायागमनरूपेणविधारकप्रयत्ने
नउदितापूर्वसुलक्षणेनेनकालांतरेहृदयव्रणंवेतोन्तवृतीति॥अथवाकेवलसजाती
यामेवस्त्रियमुद्वाह्यव्यभिचारादिरतास्तानोपभुंजनेतेपितादृशोभवतिस्वजातिजा
यागमनमितिसमासार्थः॥ब्राह्मणस्यब्राह्मणीस्वजातिः॥एवंक्षत्रियादेरपिक्षत्रियादि
॥तस्यजायासवर्णापुरुषात्तरताभेत्यर्थः॥तस्यउपयोगःस्वजातिजायागमनेप्राजा
पत्यद्वयंतुकृच्छ्रप्रकरणेद्रष्टव्यं॥ ॥इतिहृदयव्रणहरं॥ ॥अपोरोगव्रणहरं॥
कर्मविपाकसमुच्चये॥जलाध्यक्षंधनप्रायनिमित्तेनम्रियेतयः॥भवेदुरसिदु
ष्टंहिव्रणंतस्यापिनिष्कृतिः॥सहस्राजोद्वयसम्यक्पंचाशद्विप्रभोजनं॥दक्षिणांच

यथाप्रायश्चित्तमुक्तो भवति दोषतः॥ अनधिकारिणा विहितमार्गे राजन्यादिमरणे कृत
इत्यर्थः॥ गोदानमंत्रस्तु प्रायश्चित्तोपक्रमपद्धतावुक्तः॥ इत्युक्तो रोगव्रणहरं॥ अ
थ हस्तिरोगव्रणहरं शातातपप्रोक्ते। पिचुघ्रसाचिगमने हस्तिरोगे व्रणी भवेत॥ तेनापि
निष्कृतिः॥ कार्या अजादानेन यत्नतः॥ अजादानमंत्रस्तु नवग्रहयज्ञप्रकरणे द्रष्टव्यः॥
॥ इति हस्तिरोगव्रणहरं॥ ॥ अथ वामांगव्रणहरं॥ शातातपप्रोक्ते॥ मातृष्वसृगमने वा
मांगे तु व्रणी भवेत्॥ तेनापि निष्कृतिः कार्या सम्यग्दासीप्रदानतः॥ सम्यगिति॥ शास्त्रा
नुसारेणालंकृत्य दद्यादित्यर्थः॥ दासीदानमंत्रस्तु त्वं दासी मया तुभ्यं श्रीवत्सप्रति
पादिता॥ सदा कर्मकरी चाग्या मयेष्टं च समस्तुतां॥ ॥ इति वामांगव्रणहरं॥ अथ अंगु
लीव्रणहरं॥ ॥ शातातपप्रोक्ते॥ फलहारी च पुरुषो भवेद्वैवांगुलिव्रणी॥ नानाफला
नामयुतं स दद्याद्द्विजन्मने॥ ॥ इत्यंगुलीव्रणहरं॥ ॥ अथ चरणहरं॥ शातातपप्रो

क्ते हीनजातिस्त्रीगमने जायते चरणव्रणी॥ तस्मात्कविमुक्त्यर्थं प्राजापत्यं समाचरे
त्॥ प्राजापत्यलक्षणं कृच्छ्रप्रकरणे अभिधास्ये॥ ॥ इति चरणव्रणहरं॥ ॥ अथ स्तनव्रण
हरं॥ कर्मविपाकसंग्रहे॥ मातृत्वचारिमा नारी ब्रह्मचर्यविघातिनी॥ सा भवेद्दुष्टदोषे
ण संभोगं क्षमते न च॥ संभोगानंतरं तीव्रवेदना पुरुषस्य च॥ दद्यान्नीलवृषान् त्रीन्वै
मधुसर्पिस्तिलानपि॥ व्रणदोषेरोगीति॥ व्रणदोषेण मुक्ता भवेदित्यर्थः॥ संभोक्तुं न च द
म इत्यभिधानाद्यर्थो गोनावेव व्रणं॥ चकाराद्स्त्रीपूंसमो रुजमोरपि तीव्रवेदना भव
ति॥ नीलवृषानिति॥ लोहितो यस्तु वर्णेन मुखे पुच्छे तु पांडुरः॥ श्वेतखुरविषाणाभ्यां स नी
लो वृष उच्यते॥ एवं लक्षणलक्षितान्वा वेतु वर्णैर्न नीलोत्या सुः॥ वृषदानमंत्रस्तु॥ नवग्र
हयज्ञप्रकरणे द्रष्टव्यः॥ ॥ इति स्तनव्रणहरं॥ वाराहपुराणे॥ ॥ मोरहीतानि जो मोहा
न्निमुक्तो धर्मनिश्चये॥ नगंदरो च भवेत्तस्य स्वधर्मं वदतो मुखे॥ मोरहीत्येति मोलोना उक्त

च गृहीत्वा धर्मनिष्क्रयो ॥ निर्मुक्तः सन्नधर्मं वदतितस्य धर्मं वदतो न वर्तितव्यं ॥ ब्रह्म
पुराणे ॥ आचार्यं चार्यागमने ॥ जगंदरमुतो भवेत् ॥ अत्र प्रतिक्रियामाह ॥ द्रुधुगैतमः ॥ मा
णिक्यं पद्मरागं च वज्रं वैदूर्यमेव च ॥ गोमेदं मरकतं पुष्पराग च मौक्तिकं ॥ हरितं चन्न
वेतानि स्वर्णपात्रोपरि न्यसेत् ॥ अर्घं वा राजतं ताम्रे गव्याज्येन प्रपूरयेत् ॥ नवग्रहाणां प्र
सर्वं ब्राह्मणाय पुराणं धनुष्यात्तैर्धूपैर्दीपैर्नैवेद्यैस्तान्प्रपूरयेत् ॥ स्वलिंगैर्मन्त्रैर्वमंत्रैश्च होमः
कार्यस्तु पूर्ववत् ॥ ततो ब्राह्मणमाहूय सर्वज्ञं गस्त्वार्यको विदं ॥ आदित्यादिग्रहाः सर्वे नव
रत्नप्रदानतः ॥ विनाश्यं तु मे वृत्तं गदरं ॥ अनेन कर्मणा नूनं मया व्याधिहितेन तु ॥ नरो
नैरुज्यमाप्नोति निःसंदिग्धं जगंदरी ॥ हरितं चेत्यादि ॥ हरितं हरितरत्नं ॥ अथवा राज
तइति ॥ अथ चेति ॥ योत्र विकल्पः ॥ यस्मिन् स्वर्णादिपात्रे नवरत्नानि स्थापितानि तत्पात्र
गव्येनाज्येन पूरयित्वा दिग्रहाणां पुरतस्थापयेत् ॥ नवग्रहान् पुष्पैर्गैरादित्यादिप्रकाशकैर्म २१२

न्त्रैः पूर्ववत्पूजयेत् ॥ पूजाप्रकारस्तु परिभाषायाम् ॥ अस्माभिर्दर्शितः ॥ आदित्यादिग्रहाः
सर्वे इति श्लोकेपेतपात्रदानमंत्रः ॥ एवं पात्रं दत्वा पश्चात्त्वग्रहयज्ञत्विग्भ्यो दक्षिणां द
त्त्विणां दत्वा ग्रहयज्ञोक्तप्रकारेण ग्रहयज्ञशेषं समापयेत् ॥ इति जगंदरहरं ॥ प्र
कारांतरेण जगंदरहरं ॥ ज्ञानातप प्रोक्ते ॥ स्वगोत्रस्त्रीप्रसंगे तजायते च जगंदरी ॥ तेनापि
निष्कृतिः कार्या मेषीदानेन यत्नतः ॥ मेषदानविधिश्चेमं दान्निहरप्रकरणे प्रदर्शयिष्य
ते ॥ अयं तु विशेषः ॥ तच्चरजतमयो मेषः ॥ अत्र प्रत्यक्ष मेषः ॥ अत्र प्रत्यक्ष मेषीतिसौ
वर्णस्वुरत्वाद्युः सजोपि विधिरत्रापि स्यात् ॥ मेषीमंत्रदानेन नूहः कार्यः ॥ तद्यथा ॥ देवा
नां यो मुखं हव्यवाहनः ॥ सर्वपूजितः ॥ तस्मात्त्वं वाहनं प्रज्वं देवेशो दैर्महर्षिभिर्निवन्नदानेन रू
हः कार्यः ॥ तद्यथा ॥ देवानां यो मुखं हव्यवा ॥ जगंदरं पूर्वकर्मविपाकेन तु यन्मम ॥ त
त्सर्वं नाशयत्वद्य सौख्यं चापि प्रवर्धयेत् ॥ ॥ इति प्रकारांतरेण जगंदरहरं ॥ ॥ अथ पूय

वहव्रणहरं कर्मविपाकसंग्रहे ॥ अतिमानादतिक्रोधादतिस्नेहाद्भयादपि ॥ मोधर्मनिष्ठ
यं ज्ञानन्नात्मघात्यां कुरुते नरः ॥ स पूयव्रणोन्मित वहव्रणी तमेष्यतु ॥ तत्र कृच्छ्रं प्रकुर्यात्तु तिल
प्रस्थप्रदो जवेत् ॥ होमश्चरुषट्तास्याच्च तिलैरष्टोत्तरशतं ॥ सहस्रं वा व्याहृतिभिः कुर्याद्ब्रा
ह्मणभोजनं ॥ तत्र कृच्छ्रप्रकरणे द्रष्टव्यं ॥ प्रस्य लक्षणं तु परिमाणप्रकरणे व्याधिगुरुलघु
त्वावेन सहस्रं शतं वा होमः ॥ ब्राह्मणभोजनं शक्त्यानुसारेण ॥ ॥ इति पूयवहव्रणहरं ॥ ॥ अ
थ नाडीव्रणहरं ॥ ॥ उमामहेसंवादे ॥ परेषां ब्राह्मणानां येन मुष्टिघातेन चैव हि ॥ असत्यवद
नाच्चैव शौचहीनश्च लप्तुतस्तथा नाडीव्रणी च जायेत तद्रोगस्यापनुत्तये ॥ चांद्रायणं चातिकृ
च्छ्रमतिचांद्रायणं चरेत् ॥ आ ते रोद्रेण सूक्तेन शतमष्टोत्तरेण तु ॥ कूष्मांडहोमः कर्तव्य २९३
: सोमारुद्रजपस्तथा ॥ यत्किंचेदमिमां सम्यग्जपेदयुतसंख्यया ॥ चांद्रायणादीनि व्याधि
गुरुलघुत्वावेन व्यस्तानि समस्तानि वा योज्यानि ॥ चांद्रायणादिलक्षणानि कृच्छ्रप्रकरणे द्र

ष्टव्यानि ॥ आ ते पितुर्मरुतामिति सूक्तमसाध्यसर्वरोगहरे द्रष्टव्यं ॥ सूक्तेन समयेण हो
मः ॥ कूष्मांडहोमः ॥ परिभाषायां दर्शितः ॥ सोमारुद्रेत्यस्य सूक्तस्य बार्हस्पत्यः शंयु
र्ऋषिः सोमारुद्रौ देवता त्रिष्टुप्छंदः ॥ जपे विनियोगः ॥ जपसंख्या चाष्टोत्तरसहस्रं ॥
सोमारुद्रा देवता त्रिष्टुप्छंदः ॥ जपे विनियोगः ॥ जपसंख्या चाष्टोत्तरसहस्रं ॥ सोमा
रुद्रा धारयेथामसुर्यं प्र वामिष्टयोरमश्नुवंतु ॥ दमेदमे सप्त रत्ना दधाना शं नो भूतं
द्विपदे शं चतुष्पदे ॥ १ ॥ सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश
॥ आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि संतु ॥ २ ॥ सोमारुद्रा युवमेतान्य
स्मे विश्वा तनूषु भेषजानि धत्तं ॥ अव स्यतं मुंचतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्म
त् ॥ ३ ॥ तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः ॥ प्र नो मुंचतं वरुणस्य
पाशाद्गोपायतं नः सुमनस्यमाना ॥ ४ ॥ इति सोमारुद्रेति सूक्तं ॥ यत्किंचेदमित्यस्य वसि

माहा॰ २७४ एऋषिःवरुणोदेवताजगतीछंदः॥जपेविनियोगः॥यत्किंचेदंवरुणदैव्येजनेभिद्रोहंम
ष्याश्चरामसि॥अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसोदेवरीरिषः॥ ॥इ
तिनाडीव्रणहरं॥ ॥अथगंडमालाहरं॥ ॥वायुपुराणे॥ ॥गलगंडीगणाद्व्यूहर्त्तानिवृति
मानवः॥दानेनतस्यप्रतीकारंवक्ष्यामिशृणुभास्कर॥माणिक्यंपद्मरागंचवज्रंमौक्तिकमेव
च॥वैडूर्यंपुष्परागंचवज्रंमरकतंतथा॥एभिर्माल्यांप्रकुर्वीतसूत्रमप्यत्रराजतं॥सर्व
त्रराजतंसूत्रमितिवेदेप्रकल्पयेत्॥ताम्रपात्रेविनिक्षिप्यतिलानामुपरिन्यसेत्॥तिलानां
चपरीमाणंद्रोणपंचकमिष्यते॥यद्वातदर्धमेवस्यात्स्वशक्त्यावापिकारयेत्॥महाशांतिंत
थाकुर्याद्ब्राह्मणैर्वेदपारगैः॥महाशांतिंतथाकुर्याद्ब्राह्मणैर्वेदपारगैः॥महाशांतिर्नवग्रह २७६
रुणातिरितिचिंतामणौ॥साचास्माभिःपरिभाषायांदर्शिता॥आचार्यस्तुशुचिर्दक्षःसर्व
लक्षणार्थतत्त्ववित्॥कृतदत्तोपसंपन्नःसर्वप्राणिहितेरतः॥एवंविधंपूजयित्वावरुणमा

तुलेपनैः॥होमंचकारयेत्तेनसमिदाज्यचरूत्कटं॥आसनेनतथामंत्रःसोमंराजा
नमित्यपि॥मंत्रेणस्विष्टकृतदद्यात्गलगंडीचवायुपत॥मंत्रेणानेनविधिवत्स्नात्वाशुखाय
स्कहन्मुखः॥माल्येयंसर्वदेवानांब्रह्मविष्णुशिवादिभिः॥इंद्रादिलोकपालैश्चतथासर्वा
मरैरपि॥इयंमेकंठजन्मामाधारिताप्रीतिपूर्वकं॥ब्राह्मणाययप्रदत्तेयंगंडुगंडंव्यपोहतु॥
ग्रहशांतिःकृतायैस्तुतेभ्योदद्यात्तुदक्षिणां॥पुण्याहवाचनंकृत्वाभुंजीतसहबंधुभिः॥
होमंचकारयेत्तेनेत्यादि॥अयंचहोमोग्रहयज्ञहोमएवनततःपृथक्कृतः॥अतएवादि
त्यादिप्रकारांतरोपलक्षणार्थमाहसनेनतथामंत्रइत्याद्युक्तं॥मंत्रेणस्विष्टकृतकुर्यो
ममंत्रस्तुनवग्रहयज्ञप्रकरणेकूष्मांडहोमप्रकरणेचद्रष्टव्यः॥गलगंडीवायुपतःसन्त्वस
माणमंत्रेणरक्तमालांदद्यादित्यन्वयः॥माल्येयमित्यारभ्यगलगंडंव्यपोहत्वित्यंतोदानमंत्रः
ब्रह्मादिभिरमरैर्मेयंमालाकंठजन्मासतोप्रीतिपूर्वकंधारितासाब्राह्मणायप्रदत्ताइयंमेग

माहा. जेगंडव्यपोहलन्वय॥ ॥इतिगंडमालाहरं॥ ॥अथप्रकारान्तरेण गंडमालाहरं॥ ॥कर्म
२७५ विपाकसंग्रहे॥ अध्यापयति शिष्यांस्तु यः प्रतार्य गुरुस्तथा। शिष्यो गुरुं वंचयित्वा यो
धीते तस्य तस्य च॥ जायते गंडमालाख्यो रोगस्तदुपशांतये॥ तथा॥ अन्नत्रितयपापि
वा गंडमाली भवेन्नरः॥ कृच्छ्रत्रयं प्रकुर्वीत चांद्रायणमथापरं॥ अष्टोत्तरसहस्रं तु
जपेत्पुरुषसूक्तकं॥ सौरमंत्रजपस्तद्वद्द्वात्रिंशमितिमार्जनं॥ ब्राह्मणान्भोजयेच्छ
क्त्या ततो रोगाद्विमुच्यते॥ कृच्छ्रादिव्रतानां कृच्छ्रप्रकरणे निरूपितं॥ सौरमंत्रजप
स्तद्वदिति॥ अष्टोत्तरसहस्रमित्यर्थः॥ सच उपलत्य रुच॥ पुरुषसूक्तं चायं रुच
श्च परिजाप्यमानं प्रदर्शितः॥ अत्रीन्द्रामितिसूक्तं च तत्रैव प्रदर्शितं॥ मार्जनं त्रिंशत्प्र २७५
जति पादपर्यंतं कुशैरेवमार्जनं॥ ॥इतिप्रकारांतरेण गंडमालाहरं॥ ॥अथपूपित्तव्र
णहरं॥ ॥कर्मविपाकसमुच्चये॥ चंडालादिवचः॥ श्चायनोत्तुजानस्तथैव हि॥ चुक्केसपा

दत्वनतुः पित्तोद्रेकी च जायते॥ व्रणवानपि जायेत तस्यापस्यापनुत्तये॥ कृच्छ्रातिकृ
च्छ्रं कुर्वीत चांद्रायणमथापरं॥ यथाविभवतो दद्यात्तिलान्वेदविदे तथा॥ यमसूक्तेन
विप्रेंद्र सर्पिषा मधुसूदनः॥ सहस्रं तु जुहुयाद्दत्वेयमप्रीत्यर्थमेव च॥ चंडालादिवचः॥ अ
एवन्निसादि॥ यो जो जनकाजन्म सकलकामतश्चंडालादिवचः॥ कृत्वा जोजनं न प्रति सज्ज
ति॥ अथ च तत्प्रायश्चित्तमपि न करोति तस्य जन्मांतरे पादजतनुत्वादि रोगो भवेत्॥ कृ
च्छ्राति कृच्छ्रव्रतानि कृच्छ्रप्रकरणे द्रष्टव्यानि॥ यमसूक्तेनेति। यमसूक्तमंत्रैर्वा अ
प्रदर्श्यते॥ यमसूक्तेन यत्नेन मधुसूदनमुद्दिश्य सहस्रसर्पिस हस्रमंसेन च जुहु
यात्। तथा यमुद्दिश्यापि सर्पिषा तेन च सहस्रं सहस्रं जुहुयात्॥ सहस्रमित्यष्टाधि
कसहस्रं॥ सूक्तस्य त्रिषष्टिवारावृत्ते यं संख्या जायते॥ ॥परे यिवांसं प्रवतो महीरनु
ति षोडशर्चस्य यमसूक्तस्य यमऋषिः॥ मधुसूदनमुद्दिश्य होमपक्षे यमगुणोपेतोम

स्तृन्नोरेवता॥यमोदेवत्वेनहोमेतुमधुमदंतमयुग॥विशिष्टोयमोदेवतात्रिष्टुप्छंदः॥
त्रयोदश्याचतुर्दश्याषोडश्याश्चानुष्टुभः॥पंचदश्याबृहती॥होमेविनियोगः॥परेयिवां
सं प्रवतोमहीरनुबहुभ्यःपंथामनुपस्पशानं॥वैवस्वतंसंगमनंजनानांयमंरा
जानंहविषादुवस्य॥१॥यमोनोगातुंप्रथमोविवेदनैषागव्यूतिरपभर्तवाउ॥यत्रानः
पूर्वेपितरःपरेयुरेनाजज्ञानाःपथ्या३अनुस्वाः२मातलीकव्यैर्यमोअंगिरोभिर्बृहस्प
तिर्ऋक्वभिर्वावृधानः॥यांश्चदेवावावृधुर्येचदेवान्स्वाहान्येस्वधयान्येमदंति॥३॥इमंय
मप्रस्तरमाहिसीदांगिरोभिःपितृभिःसंविदानः॥आत्वामंत्राःकविशस्तावहंत्वेनारा
जानहविषामादयस्व॥४॥अंगिरोभिरागहियज्ञियेभिर्यमवैरूपेरिहमादयस्वविवस्वंत २९६
हुवेयःपितातेस्मिन्यज्ञेबर्हिष्यानिषद्य॥५॥अंगिरसोनःपितरोनवग्वाअथर्वाणोभृगवः॥
सोम्यासःतेषांवयंसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम॥६॥प्रेहिप्रेहिपथिभिःपू

र्व्येभिर्यत्रानःपूर्वेपितरःपरेयुः॥उभाराजानास्वधयामदंतायमंपश्यासिवरुणंचदे
वं॥७॥संगच्छस्वपितृभिःसंयमेनेष्टापूर्तेनपरमेव्योमन्॥हित्वायावद्यंपुनरस्तमे
हिसंगच्छस्वतन्वासुवर्चाः॥८॥अपेतवीतविचसर्पतातोस्माएतंपितरोलोकमक्र
न्॥अहोभिरद्भिरक्तुभिर्व्यक्तंयमोददात्यवसानमस्मै॥९॥अतिद्रवसारमेयौश्वा
नौचतुरक्षौशबलौसाधुनापथा॥अथापितॄन्सुविदत्रांउपेहियमेनयेसधमादंमदं
ति॥१०॥२॥यौतेश्वानौयमरक्षितारौचतुरक्षौपथिरक्षीनृचक्षसौताभ्यामेनंपरि
देहिराजन्स्वस्तिचास्माअनमीवंचधेहि॥११॥उरूणसावसुतृपाउदुंबलौयमस्य
दूतौचरतोजनाँअनु॥तावस्मभ्यंदृशयेसूर्यायपुनर्दातामसुमद्येहभद्रं॥१२॥यमायसोमंसु
नुतयमायजुहुताहविः॥यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः॥१३॥यमायघृतवद्ध
विर्जुहोतप्रचतिष्ठत॥सनोदेवेष्वायमद्दीर्घमायुःप्रजीवसे॥१४॥यमायमधुमत्तमंरा

त्तरव्यंजुहोतन॥ इदंनमऋषिभ्यः पूर्वजेभ्यः पथिकृद्भ्यः॥१५॥ त्रिकंद्रुकेभिः पततिखलु
र्वीरेकमिद्बृहत॥ त्रिष्टुग्गायत्री छंदांसि सर्वाता यम आहिता॥१६॥ १॥ इतियमसूक्तं॥
इतिसपिंडब्राह्मणहरं॥ ॥अथब्राह्मणगजदानं॥ वृद्धगौतमः॥ पलेनवातदर्धेनवातदर्धेनत
दर्धार्धेनवापुनः॥ कारयेद्वाहनंहैमंचतुर्दंतंतुवारणं॥ आचार्यःप्रयतात्मातुतस्यप्र
र्वैःसमाहितः॥ उपचारैःषोडशभिरर्चयेद्गंधपुष्पकैः॥ ततोब्राह्मणमाहूय सर्वशा
स्त्रार्थकोविदं॥ कृतरक्षोपसंपन्नमनुद्वेगकरंनरं॥ तमासंपूज्यवस्त्राद्यैर्होमंतेनच
कारयेत्॥ मंत्रैःपौराणिकैःसम्यक्संहिताशास्त्रचोदितैः॥ चत्वारोदिग्गजायेचपुष्पदं
ताह्वयश्चये॥ सार्वभौमादयोयेचआकुलास्तोषयामितान्॥ समिदाज्यतिलैर्होमोगज

संप्रीतयेचवैतत॥ तस्मैकृतवतेसम्यक्गजप्रीत्यर्थमादतः॥ मंत्रेणानेनविधिवद्भ
क्तिसमन्वितः॥ प्राङ्मुखस्तुब्राह्मणोचउदङ्मुखायेंद्रस्यवाहनैरावतश्चतुर्दंतोगजानां

नायकश्चयः॥ दिग्दंतिनांपूज्यतमोब्राह्मणायप्रयतुमन्नुः॥ अनंतरंतुसंपूज्यतमाचार्यमु
दाह्यतं॥ ब्राह्मणानन्भोजयित्वाचस्वयंभुंजीतवाग्यतः॥ एवंकृतेब्रह्मवधात्तत्क्षणादेव
नश्यति॥ तेनैतद्धूलिनिर्णूनंकार्यमारोग्यहेतवे॥ पलेनवातदर्धेनेत्यादि॥ अत्रव्याधिनि
दानंसपिंडब्राह्मणहरोऽक्रमेवृत्तेयं॥ पलत्त्वणंपरिमाणप्रकरणेद्रष्टव्यं॥ वाहनमितिइं
द्रस्यवाहनमैरावणमित्यर्थः॥ उपकारकमिति॥ अभिधारणादिनाविघ्नोपकारकं॥ पा
र्श्वइति। समीपइत्यर्थः॥ मंत्रैःपौराणिकैरित्यादि॥ पौराणिकैरनादिभिः संहिताशास्त्र
चोदितैः॥ संहितामंत्रज्योतिर्वेदः॥ सैवसंहिताशंसनाड्डास्त्रं॥ अथवाशास्त्रंस्मृतिः॥
तत्रचोदितैः॥ एतदुक्तंभवति॥ वैदिकैःस्मार्तैश्चगजप्रकाशकैर्मंत्रैरिति॥ तेचगण
प्रतिप्रकाशकावैदिकाःस्वस्वशाखोक्ताःप्रसिद्धाः॥ तत्रकेचनग्रहयज्ञप्रकरणेसर्व्रिता
॥ अथवापौराणिकैःपुराणविहितैः॥ तदेवप्रकटयति। संहिताशास्त्रचोदितैः॥ संहि

तामंत्रज्ञोगोवेदः॥ सैवसंहितार्वीसनाछास्त्रं॥ अथवाङ्मास्तंस्मृतिः॥ तत्रचोदितैः॥ एत
दुक्तंभवति॥ वैदिकैः स्मार्तैश्चगजप्रकाशकैर्मंत्रैरिति॥ तेचगणपतिप्रकाशकावैदिका
ःस्वस्वशाखोक्ताः प्रायाः॥ तत्रकेचनग्रहयज्ञप्रकरण्यति॥ संहितागस्त्यचोदितैः॥ सं
हिताशास्त्राणिमहाभारतादीनि॥ सर्वपुराणार्थसारत्वाद्भारतादीनिपुराणानीत्युच्यं
तेतत्रोदितैर्मंत्रैः॥ अथवापौराणिकाअन्येसंहिताशास्त्रचोदितास्तपरे॥ तत्रकोमं
त्रः ऐरावणमस्तुईतइतिगजदानमंत्रएवपूजाहोममयोरपियास्यः॥ अपरोमंत्रः॥ चत्वा
रोदिग्गजायेचेत्यत्रैवपूर्वोक्तः॥ मंत्रांतरंतुसुप्रतीकगजेंद्रत्वंसरस्वत्यानिषेचकः॥ इं
द्रस्यवाहनंश्रेष्ठंपूतंचेत्यत्रैवपूर्वोक्तः॥ मंत्रांतरंतुसुप्रतीकगजेंद्रत्वंसरस्वत्यानिषे २२८
चकः॥ इंद्रस्यवाहनंश्रेष्ठंपूतदेवेंद्रवंदितेति॥ एतेमंत्राविकल्पेनग्राह्याः॥ एषुमंत्रेषु
सुप्रतीकादीनिपरानीतरदिग्दंतिनामप्यपलक्षणानि॥ ॥इतिव्रणगजदानं॥ ॥अ

थपार्श्वस्फोटहरं॥ ॥कर्मविपाकसंग्रहे॥ ॥खरकाकादिमांसानांभक्षकः स्फोटवा
न्भवेत्॥ पार्श्वयोस्तन्निवृत्त्यर्थंकृच्छ्रमानायणंतथा॥ अतिकृच्छ्रंचकर्तव्यंजपश्चा
प्यंतराम्युतं॥ शिवसंकल्पसूक्तस्यपार्श्वस्फोटादिमुच्यते॥ कृच्छ्रादिस्वरूपाणिकृच्छ्रप्र
करणेद्रष्टव्यानि॥ शिवसंकल्पसूक्तंतुपरिशिष्टाध्यायोरुद्रविधानेप्रदर्शितं॥ व्याधिता
रतस्मात्कृच्छ्राद्याशक्तिकल्पनीया॥ ॥इतिपार्श्वस्फोटहरं॥ ॥अथहस्तपादतलस्फो
टहरं॥ ॥अथहस्तपादतलस्फोटहरं॥ ॥कर्मविपाकसंग्रहे॥ ॥चंडालकृतवापीषुतडा
गेकूपकादिषु॥ स्नात्वापीत्वाचसर्वांगेहस्तपादयोः॥ स्फोटमुक्तश्चसभवेत्त
च्छ्रंसांतपनंचरेत्॥ गांहिरण्यंचवासश्चदद्याछक्त्यनुसारतः॥ कूपएवकूपकः॥ चंडा
लयजमानेनकारितावाप्यादिषुअनातुरेज्ञानपूर्वंमसकृन्निस्नैमित्तिकादिस्नाना
दिकर्मकृतसर्वांगदाहादिमान्भवेदित्यर्थः॥ ॥इतिहस्तपादतलस्फोटहरं॥ ॥अ

मा०हृ० २१९

यस्त्रीस्तनस्फोटहरंकर्मपाकसमुच्चये ॥ अथमंत्यतुनर्त्तारंजारमालिंगितेनच । सा
र्धंक्रीडतियानारीतमेवानुस्मरत्यपि ॥ तस्यास्तुनयोःस्फोटाज्जायंतेजन्मांतरे ॥ नगे
न्वरकंस्रवतितत्रोगस्यप्रशांतयेदद्यात्क्षाःपंचलवणंहरिद्रांधान्यमेवच ॥ उमामहेश्व
रंश्चैवपूजयेच्चधनेसति ॥ निष्कद्वादशकंदद्यात्कपेलामग्निसूक्तकं ॥ अन्यमतत्वि
त्यादि ॥ अथमंत्यतुनर्त्तारमित्यस्यैवविवरणंजारमालिंगेत्यादिकं ॥ गाःपंचदद्याद्विलव्य
यः ॥ धनेसतिनिष्कद्वादशकंदद्यात् ॥ पूर्वोक्तगवादिदानानंतरंधवांश्चद्वादशसौवर्ण
निष्कान्दद्यात् ॥ धनरहितश्चेन्निष्कदानंकुर्यात्यथाशक्तिकुर्यादित्यर्थः ॥ लवणादीन्य
पिविनवाय्यतुसारेणदद्यात् ॥ ॥ तामग्निवर्णामित्युनेनजातवेदसेइत्ययमनुवाकोज २७९
प्यते ॥ जातवेदसइत्यस्यसप्तर्चस्यानुवाकस्ययाज्ञिकीदेवताउपनिषदऋषयः ॥ दुर्गा
ग्निविलित्रोपयायोगंदेवताःत्रिष्टुपछंदः ॥ जपेविनियोगः ॥ जपसंख्याचाष्टयुतं ॥ जात

वेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपर्षदतिदुर्गाणिविश्वानावे
वसिंधुंदुरितात्यग्निः ॥ १ ॥ तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टां ॥ दु
र्गांदेवींशरणमहंप्रपद्येसुतरसितरसेनमः ॥ अग्नेत्वंपारयानव्योअस्मान्स्वस्तिभि
रतिदुर्गाणिविश्वा ॥ पूश्चपृथ्वीबहुलानउर्वीभवातोकायतनयायशंयोः ॥ ३ ॥ विश्वा
निनोदुर्गहाजातवेदःसिंधुंनानावादुरितातिपर्षि ॥ अग्नेअत्रिवन्मनसागृणानोस्मा
कंबोध्यवितातनूनां ॥ ४ ॥ पृतनाजितंसहमानमुग्रमग्निंहुवेमपरमात्सधस्था
त् ॥ सनःपर्षदतिदुर्गाणिविश्वाक्षामद्देवोअतिदुरितात्यग्निः ॥ ५ ॥ प्रत्नोषिकमीड्योअ
ध्वरेषुसनाच्चहोतानव्यश्चसत्सि ॥ स्वांचाग्नेतनुवंपिप्रयस्वास्मभ्यंचसौभगमायज
स्व ॥ ६ ॥ गोभिर्जुष्टमयुजोनिषिक्तंतवेंद्रविष्णोरनुसंचरेम ॥ नाकस्यपृष्ठमभिसंव
सानोवैष्णवींलोकइहमादयंतां ॥ ७ ॥ इतिस्त्रीस्तनस्फोटहरं ॥ ॥ अथनानास्थान

गतस्फोटहरं॥ कर्मविपाकसमुच्चये॥ अग्निर्दग्धगा गोपीत्वा पयः स्फोटकवान्भ
वेत्॥ उपवासत्रयं कुर्याद्भोजयेद्विंशतिद्विजान्॥ इति नानास्थानगतविस्फोटहरं॥
अथ भगंदररोगमूर्त्तिदानं॥ तत्रादौ च कर्मविपाकसारे॥ भगंदरः पांसुलीर्णके
ण हत्वाग्निं वधनः॥ पंगुः पात्रं कुलाधरः पीगासीनः कुकुधनः॥ ककुदहपांगंतदेव
पीवापश्चाद्रोगे कृत्वा तत्र हतः॥ प्रहारमुक्तः कर्त्तव्यं इत्यर्थः॥ अथ वा ककुछहेनम
स्तकं लक्षमनेत तत्र हतः॥ एतन्मूजादिविधानं तु परिज्ञाषायां रोगप्रतिमादानविधावु
क्तं कोदेवता तत्रैस्मादिनाप्रदर्शितं॥ ॥इति भगंदरमूर्त्तिदानं॥ ॥अथ गंडमालारो
गप्रतिमादानं॥ ॥तत्रादौ कर्मविपाकसारे॥ ॥गंडरोगः क्रूरैः षड्भिः शंखचक्रपर २८०
श्वधात्॥ पात्राचापनारात् विक्लवावन्नाशीर्णशिरोरुहः॥ इति कर्त्तव्यता कल्पापस्तु
परिज्ञाषायामातं कोदेवता तत्रैस्मादिनारोगप्रतिमादानविधावस्मधामि॥ इति गंडमाला

रोगप्रतिमादानं॥ ॥अथ व्रणमात्रमूर्त्तिदानं॥ ॥तत्रादौ चातुर्के तु रोगे घिस्तादिनाम्रल
रोगहरप्रकरणे निर्दिष्टं॥ पूजादिविधानं तु परिज्ञाषायां रोगप्रतिमादानविधावुक्तं कोदे
वतात्रैस्मादिनानिरूपितं॥ ॥इति श्रीमहार्णवाख्ये महिते प्रबंधे मांधातृनाम्नो मदना
त्मजस्य॥ सत्कर्मरत्नप्रकरेण पूर्णे पूर्णोन्नवसंचरद्गास्तरंगः॥ ॥अथ वातरोगहरा
णि॥ कर्मविपाकसंग्रहे॥ देवतानां ब्राह्मणानां च धनापहरणात्तथा॥ स्वामिद्रोहाद्वात
रोगी भवेदस्यापि निष्कृतिः॥ कृच्छ्रातिकृच्छ्रौ कुर्वीत चांद्रायणमथापरं॥ वातस्त्वा वातु
मंत्रं हि जपेद्धा सुतसंख्यया॥ अग्निरस्मीत्यृचं चापि जपेच्च तु कुमारपि॥ कृच्छ्रादिस्व
रूपाणि परिज्ञाषायां कृच्छ्रप्रकरणे द्रष्टव्यानि॥ वातस्त्वा वातु भेषजमित्यस्या वातायन
उलकृषिः वायुर्देवता गायत्री छंदः॥ विहितार्थे विनियोगः॥ वातस्त्वा वातु भेषजं शंनु
मयोभुनो हृदे॥ प्रणस्त्वायूंषि तारिषत॥ अ

माहा॰
२८१

नयाऽयुतसंख्यया॥जपेद्धमादयंतं॥१॥इतिश्रीस्तनस्फोटहरं॥ ॥अथनानास्थानग
तस्फोटहरं॥कर्मविपाकसमुच्चये॥अनिर्दत्तायागोपीत्वापयः स्फोटकवान्भवेत्
॥उपवासत्रयंकुर्याज्जपेद्विंशतिद्विजान्॥इतिनानास्थानगतविस्फोटहरं॥ अ
थभगंदररोगमूर्तिदानं॥ ॥तल्लक्षणंचकर्मविपाकसारे॥भगंदरः प्रासुराणांकेरो
रुन्नानिबंधनः॥पंगुःपादांकुरोधरःपीठासीनःकलुधृतः॥कलुतत्पांगदेवश्री
वापश्चाग्रगेकृत्वातत्रहतः प्रहारमुक्तःकर्त्तव्यस्तथा॥अथप्राक्कृच्छ्रेतमस्त
कंलक्षणेतात्रहतः॥एतत्पूजादिविधानंतुपरिभाषायांरोगप्रतिमादानविधावातं
कोदेवतातत्रेत्यादिनाप्रदर्शितं॥ ॥इतिभगंदरमूर्तिदानं॥ ॥अथगंडमालारोगप्र २८१
तिमादानं॥ ॥तल्लक्षणंकर्मविपाकसारे॥ ॥गंडरोगः करैः षड्भिः शंखचक्रपरश्वधा
त्॥पाशचांकेपद्मरान्बिल्वधावन्नाशंसितोरुहः॥इतिकर्त्तव्यताकजापस्तुपरिभा

षायामातंकोदेवतातत्रेत्यादिनारोगप्रतिमादानविधावस्माभिःइतिगंडमालारो
गप्रतिमादानं॥ ॥अथव्रणमात्रमूर्तिदानं॥ ॥तल्लक्षणंचानुक्तेष्वपुरोगेष्वित्यादिनाभू
तरोगहरप्रकरणेनिहितं॥पूजादिविधानंतुपरिभाषायांरोगप्रतिमादानविधावातंको
देवतात्रेत्यादिनानिरूपितं॥ ॥इतिव्रणमूर्तिदानं॥ ॥इतिश्रीमहार्णवाख्येमहितेप्रबं
धेमांधातृनाम्नोमदनात्मजस्य॥सत्कर्मरत्नप्रकरेणपूर्णेपूर्णेनवत्संचरहरात्तरंगः॥
॥अथवातरोगहराणि॥कर्मविपाकसंग्रहे॥देवतानांब्राह्मणानांवधेनापहरणात्त
था॥स्वामिद्रोहात्तरोगीजवेदस्मापिनिष्कृतिः॥कृच्छ्रातिकृच्छ्रौकुर्वीतचांद्रायणम
थापरं॥वातस्त्वावातुमंत्रेहिजपेदायुतसंख्यया॥अग्निरस्मीत्यचंचापिजपेत्तुजुहुयादं
पि॥कृच्छ्रादिस्वरूपाणिपरिभाषायांकृच्छ्रप्रकरणेद्रष्टव्यानि॥वातस्त्वावातुभेषजमित्य
स्यावातायनउलकऋषिःवायुर्देवतागायत्रीछंदः॥विहितार्थेविनियोगः॥वातस्त्वावातुन्ने

मा॰हृ॰
२८२

षन्नं शं तु मयो नु नो हृदे ॥ प्राणा आयूंषि तारिषत ॥ अनयाऽमुतसंरक्षया ॥ जपस्तथायु
तसंख्या होमस्त्वथ वक्त्रोऽग्निरस्तात्वनयापि ॥ अस्या देवश्रवा देववातश्चेति द्वावृ
षी अग्निर्देवता त्रिष्टुप्छंदः ॥ विहितार्थे जपे विनियोगः ॥ अग्निरस्मि जन्मना जातवे
दा घृतं मे चक्षुरमृतं म आसन् ॥ अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि
नाम होमद्रव्यमाज्यं ॥ यथाशक्ति हिरण्यदानमपि कुर्वीत ॥ ॥ इति वातरोगहरप्राय
श्चित्तं ॥ ॥ अथ प्रकारांतरेण वातरोगहरं ॥ कर्मविपाकसंग्रहे ॥ गुरुप्रत्यर्थितां यातो
वातरोगी भवेन्नरः ॥ नामत्रयेण कुर्वीत जपं होमं च तर्पणं तथा ॥ अच्युताय नमः ॥ अनंता
य नमः ॥ गोविंदाय नमः ॥ इति नामत्रयमंत्राः ॥ अस्य नामत्रयस्य वृशिष्ट करणपनार २८२
दा ऋषयः महाविष्णुर्महानारसिंहो महावराहश्च देवता ॥ अनुष्टुप् ॥ गायत्री सुतला
निछंदांसि विहितार्थे विनियोगः ॥ जपहोमयोः संख्या तु यथाशक्त्यनुसारेण सहस्रादिलक्षां

तां कुर्यात् होमद्रव्यं चाज्यं ॥ केचन लिंगपुराणोक्तं मत्तुः शंभुरुमापतिरिति नामत्रयं वर्ण
यंति ॥ ॥ इति प्रकारांतरेण वातहरोगहर ॥ ॥ अथोन्मादवायुहरं कर्मविपाकसमुच्चये ॥
मोहयित्वा परान्यस्तु तुच्छं वस्तु विगर्हितं ॥ सोन्मादवातयुक्तः स्यात्कृच्छ्रं चांद्रायणं तथा ॥
कुर्यात्सारस्वतं मंत्रं जपेद्ब्राह्मणतर्पणं ॥ मोहयित्वेति ॥ परानन्यान् शिष्टत्वकत्वेन व्यव
स्थितान् पित्राचार्यराजादीन्मोहयित्वा वंचयित्वा प्रतार्य विगर्हितं शास्त्रनिंदितं वस्तुल
शुनादिकाद्यपनोदनादिनिमित्तमंतरेण योऽत्तुं कश्चित्सर्पः ॥ कृच्छ्रादि जपस्तत्र कृच्छ्रप्रक
रणोक्तं बोध्यम् ॥ सारस्वतो मंत्रो मरुत्तागिति तस्य ॥ अस्य नेम ऋषिः वाग्देवता त्रिष्टुप्छं
दः ॥ जपे विनियोगः ॥ यद्वाग्वदंत्यविचेतनानि षसाद मंद्रा ॥ चतस्र ऊर्जं दुदुहे पयांसि
क्वस्विदस्याः परमं जगाम ॥ १ ॥ देवीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति ॥ सा
नो मंद्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु ॥ २ ॥ अत्रापि जपसंख्या यथाशक्त्यनुसारे

णसुतादिकाकृच्छ्रा॥ ब्राह्मणतर्पणमिति कुर्यादित्यनुषंगः॥ यथाशक्ति ब्राह्मणान् भो
जयेदित्यर्थः॥ इकृच्छ्रादयस्मुहरं॥ ॥अथ धनुर्वातहरं॥ ॥कर्मविपाकसमुच्चये॥ अति
छंतीमत्तमां मउपन्तु केपरस्मियं॥ वज्राहाक्रम्यस नरः सर्वसंधिषु वेदनां॥ तीव्रामाप्नो
त्यरुग्विमान् धनुर्वातयुतो भवेत्॥ ज्वरीतरेपनु त्सर्थे महिषीदानमाचरेत्॥ कृच्छ्राति
कृच्छ्रौ कुर्वीत चांद्रायणमथापरं॥ उपपन्नपजपश्चैव ब्राह्मणतर्पणं॥ नामत्रयं
जपेत्स्मंसोरोगद्गांतत्पर्थमात्मनः॥ सहस्रनामकं चापि स्तोत्रं सम्यग्विधानतः॥ अच्युता
नंत गोविंद स्तेनं नाममंत्रयंद्विज॥ अमुतत्रितयादप्साजपेत्रोगस्वरंगतये॥ पुरुषसू
क्तं जपेद्विद्वानतो रोगात्प्रमुच्यते॥ अनिर्छंतीमत्तामित्यादि॥ अत्ता मत्तत्वयोनिंपु
रुषोपक्नोगरहितामितियावत्॥ महिषी च सवत्सा देया॥ अरवान्महिषीकृत्स्ना सवत्सां
पूजयेत्ततः॥ इति ब्रह्मांडपुराणवचनात्॥ महिषीदानेमंत्रस्तुमष्ट्रासकासहरेदर्शितः॥ स

दिस्वरूपंतु कृच्छ्रप्रकरणे द्रष्टव्यं॥ उपपन्न इत्यादि ऋचः परिभाषायां रोगप्रतिमानविधौ
द्रष्टव्या॥ अत्रजपसंख्या मुतत्रयं॥ एवं सहस्रनामादीनामपि॥ नामत्रयस्यार्थादितु प्र
कारांतरेणवातरोगहरेस्तधायि॥ विष्णुसहस्रनामादीनि पुरुषसूक्तं परिभाषायां नि
रूपितं॥ ॥इति धनुर्वातहरं॥ ॥शातातप प्रोक्ते॥ सन्नाया पक्षपाती च जायते पक्षघा
तवान्॥ निष्कत्रयमितं हेम सत्पात्राय द्विजातये॥ आधंचवैस्मवं कुर्याद्दानतो हितमि
च्छता सप्तधान्यानि दद्याद्व्योगे दानं तत्रकारयेत्॥ निष्कस्वरूपं परिमाणप्रकरणे निरू
पंपरिमाणप्रकरणे निरूपितं॥ आधंचवैस्मवमिति अध्याय दीयते इति आधं॥ तद्दे
वु विष्णुदैवत्यादैस्मवं॥ विष्णुदैवतेन ब्राह्मणान्यथाशक्ति भोजयेदित्यर्थः॥ सप्तधान्या
निब्रीसादीनि यथाज्ञानोपपन्नानि द्रोणादनल्पपरिमाणानि देयानि द्रोणस्वरूपं परि
माणप्रकरणे द्रष्टव्यं॥ ॥इति पक्षाघातहरं॥ ॥अथ हिक्काहरं॥ कर्मविपाकसमुच्चये॥

योः कृत्वा ब्राह्मणेनुक्ते स्नानहोमजपादिके॥ सहिक्कारोगसंयुक्तस्तस्मात्स्मापतुन्नये
॥ चांद्रायणत्रयं कुर्यात्त्रीन्कृच्छ्रांश्च समाचरेत्॥ गामग्निवर्णामिति च जेत्सूक्तं समाहि
तः॥ चांद्रायणं प्राजापत्यकृच्छ्रयोस्तु स्वरूपं कृच्छ्रप्रकरणे निरूपितं॥ तामग्निवर्णामि
त्येतत्सूक्तं तु स्त्रीस्तनस्फोटहरेऽप्यधायि॥ जपसंख्या तु व्याधानुसारेण सहस्राघ
युतांता कल्प्या॥ ॥इति हिक्काहरं॥ ॥अथ वातव्याधिहरं मृगदानं॥ अस्मिन्निदानं वा
यु पुराणे॥ ॥वातव्याधियुतस्तेयीति॥ शांतिरूपमाह बौधायनः॥ हरिणं कारयेत्स्वा
र्णं यथेनं तु द्रव्यशक्त्या पलैः॥ तदर्धेन तदर्धेन मध्यंगे रूप्यमये द्रढे॥ तंडुलोपरि संस्थाप्य ब्रा
ह्मणाय निवेदयेत्॥ आढकत्रितयं वापि तदर्धं वा स्वशक्तितः॥ पादेषु च चतुर्षु स्यात्पंच को
स्यपात्रचतुष्टयं॥ वासुदेवतमंत्रैश्च होमं तत्र प्रकल्पयेत्॥ समिदाज्यचरूं कृत्वा चात
मष्टोत्तरं द्विज॥ अष्टाविंशतिरेवाथ मंत्रेणानेन तद्दिशेत्॥ वायो चरसि भूतानां मत्स्वलो

कपावन वाहनस्पर्शनेन वातव्याधिं विनाशय॥ अनेन कृतमात्रेण यथोक्तेन वि
धानतः॥ वातव्याधिविनिर्मुक्तो नीरुजः सुखमेधते॥ यथेनं तु द्रव्यशक्त्या पलैरित्यादि॥ य
नेन निविडं दृढमिति यावत्॥ पलजन्महरिणपरिमाणप्रकरणे निहितं॥ ब्राह्मणाय निवेद
येदिति॥ हरिणं वायुवाहनाय नम इति मंत्रेण षोडशोपचारैः पूजयित्वा वक्ष्यमाणहो
मं च निर्वर्त्य पश्चात्तं हरिणं ब्राह्मणाय दद्यादित्यर्थः॥ तंडुलपरिमाणमाह॥ आढकत्रि
तयमिति॥ आढकस्वरूपमपि परिमाणप्रकरणे निरूपितं॥ वासुदेवतमंत्रैरिति॥ अ
त्र मंत्रैरिति बहुवचनं॥ वासुदेवतानां मंत्राणां बहुत्वादन्येषां चिह्नशाखापरिपठिता
नामुपलक्षणार्थं॥ अतः स्वस्वशाखोक्तो मंत्रो विकल्पेन ग्राह्यः॥ अथवा समिदाज्यच
रूणां त्रितयानां द्रव्यैत्वबहुत्वं॥ अत एतदुक्तं भवति समिदादयो वायुदैवत्यैः एष क
मंत्रैर्होतव्या इति तत्रैको मंत्रो वातरोगहरश्चायमग्निवीं दर्शित॥ अपरे च मंत्रा नव

हमयज्ञप्रकरणोद्दिष्टा:॥ समिदाज्यचरुं हुत्वेति॥ प्रादेशमात्राः समिध इति समित्क
रणं॥ समिधश्च यज्ञियास्तु गृह्योक्तविधिनाज्यसंस्कारश्चाज्यकरणं॥ गृह्योक्त
विधिनैव निर्वापाद्युदासनप्रतिष्ठितान्निधारांतसंस्कारैश्चरु
निष्पादनं चरुकरणं॥ वायोश्चरसीति दानमंत्रः॥ ॥इति वातव्याधिहरमृगदानं॥ ॥
अथ रक्तवातशमनं॥ शातातप प्रोक्तं॥ रक्तवस्त्रप्रवालानां हारी स्यादक्तवातवान्॥
स वस्त्रां महिषीं दद्यात्सरागसमन्वितां॥ वस्त्रमपि रक्तमेव॥ महिषीदानमंत्रस्तु श्वा
कासहरेऽत्र एव॥ ॥इति रक्तवातशमनं॥ ॥ अथ वातरक्तवातपित्तहरलक्ष्मीनारा
यणदानं बौधायनः॥ सर्वर्णागमने वातरक्तवान् जायते नरः॥ सर्वर्णागमने वा
तपित्तवानपि जायते॥ लक्ष्मीनारायणं रूपं सुवर्णेन प्रकल्पयेत् पलेन वा तदर्द्धेन तद २८५
र्धेनाथवा पुनः॥ लक्ष्मीनारायणं रूपं सर्वदं सर्वकामिकं॥ पद्मासनगतं कुर्याद्देव

देवं चतुर्भुजं दक्षिणाधः करे पद्मं शंखमूर्ध्वकरे न्यसेत्॥ वामार्धे च करे चक्रं लक्ष्मी
एष्टे परः करः॥ वामोत्संगगता लक्ष्मी रत्नपात्रकरा भवेत्॥ दक्षिणश्चतुर्भुजो देव्याः ए
ष्टे देवस्य चक्रिणः॥ गरुडं रजतं कुर्याद्देवदेवस्य वाहनं॥ पक्षौ च तस्य सौवर्णौ सु
वर्णेनैव नासिका॥ वस्त्रैरन्यैस्ततानेः परिधापयेति कौतुकं॥ मुक्तादामपरिक्षिप्तं चंद
नागुरुलेपितं॥ अर्चयेत्कुसुमैर्गंधैर्लक्ष्मीनारायणात्मकं॥ प्रसन्नरमणीयं च गु
रुडस्योपरिस्थितं॥ ततो विप्रं समाहूय सुशीलं दक्षिणान्वितं॥ आचारवंतं धर्मज्ञं वे
दवेदांगपारगं॥ प्रतिग्रहनिवृत्तं च श्रुतिस्मृतिपरं स्थितं तस्मै दत्वा समानीय पू
जयेद्धस्तकुंडलैः॥ कुंकुमागरुकर्पूरै रूपवीतांगुलीयकैः पूर्वोक्तेन विधानेन होमं
तत्र तु कारयेत्॥ मंत्रेणानेन तं दद्यात्सर्वलोकनमस्कृतं॥ लक्ष्मीपते देवकीनंदने
श॥ क्षीराब्धिशायिन्वचसामगम्य गोविंद दामोदर वातरक्तं विनाशयाशुत्तपि

...ारिवर्ण॥ लक्ष्मीनारायणस्यैवं मूर्तिं दद्याद्ध्वजांकितां॥ आरोग्यवान्सुखी नित्यं जायते ना
त्र संशयः फलेनैवेति॥ प्रजस्वरूपं परिमाणप्रकरणेवं होमं च कारयेत्तत्रेमा रम्यां त्र ह
रिहरनारायणदानोक्तप्रकारेण समर्थ॥ गंतव्यं। पूर्वोक्तेन विधानेन ति[illegible] च कार
यसनु वातपित्तहरणार्थमिदं दानं क्रियते। तदा लक्ष्मीपते देव कीर्तं दत्ते ज्ञोक्तास्मिन् दान
मंत्रे गोविंदहामो हरवातपित्तमित्सूहः॥ कार्यं इति वातपित्तहरं वातरक्तहरलक्ष्मीना
रायणदानं॥ ॥अथ वातपित्तहरं॥ कर्मविपाकसमुच्चये॥ जंबुनं गंजनं तालफलं वा श्रा
ति यो द्विजः॥ स वातपित्तरोगी च जनवेद्वा चांद्रायणं चरेत्॥ ३॥ पथव्यतिरेकेण [illegible] सुना द्वि
जाणे चांद्रायणं कामतश्चे द्विगुणं॥ चांद्रायणलक्षणं कृच्छ्रप्रकरणे द्रष्टव्यं॥ ॥इति वा २८६
पित्तहरं॥ ॥अथ वातरक्तहरप्रायश्चित्तं॥ ॥शातातपप्रोक्तं रक्तवस्त्रप्रवालानां हारी
स्याद्रक्तवान् वान् चांद्रायणद्वयं कुर्याद्देतद्रोगस्य शांतये॥ चांद्रायणस्वरूपं कृच्छ्रप्र

करणे द्रष्टव्यं॥ ॥इति वातरक्तहरप्रायश्चित्तं॥ ॥अथ प्रकारांतरेण वातरक्तहरप्राय
श्चित्तं॥ तत्र बौधायनः॥ सुवर्णगमनेन रक्तवातवान् जायते नरः॥ तद्रोगनिवृत्त्यर्थं ष
ट्कृच्छ्रमाचरेत्॥ षट्कृच्छ्रं प्राजापत्यकृच्छ्राणामष्टान्तरं चातं भवति॥ आचरेत्॥
इदं च प्रायश्चित्तं स्वल्परोगस्यापि धनवतः॥ अधनस्याप्यधिकरोगवतो वा॥ ॥इति प्र
कारांतरेण वातरक्तहरप्रायश्चित्तं॥ ॥अथ वातरोगप्रतिमादानं॥ ॥तल्लक्षणं तु कर्म
विपाकसारे॥ वायुर्नरयकरः पंगुपाशी धावन्॥ समंततः विकीर्णकेशपार्श्वस्यान्नन्न
मन्त्रेण वाहनः॥ पूजाविधानं तु परिज्ञायां व्याधिप्रतिमादानविधावातंका देवता तत्रे
लादिना दर्शितं॥ इति वातरोगप्रतिमादानं॥ ॥महार्णवाख्ये महिते प्रबंधे मांधातृनाम्नो
मदनात्मजस्य॥ सत्कर्मरत्नप्रकरेण पूर्णे पूर्णस्तरंगः॥ खलु षोडशोयं॥ ॥अथ पित्तहरा
णि॥ ॥कर्मविपाकसंग्रहे॥ वैद्यहत्यां तु यः कुर्याद्दस्तुकुलौषधमयान्यथा॥ प्रयोजयेन्नरः

सोयं रक्तपित्तयुतो भवेत्॥ अघोरस्त्रायुतं वक्ष्यावन्हिं हुतमितितच्चाचर्वाज्याभ्यां ऋग्जुहु
यात् रक्तपित्तापनुत्तये॥ वैघ्नस्त्वमहं जानामीतिगर्वाद्दोषधमन्यथा॥ तस्माद्विरुध्यं द
त्वाप्रयोजयेत्॥ अथवा औषधं तस्माद्विरुध्यमेव हुत्वा तस्मात्तुक्रमाश्रेणायोदद्यात्
स रक्तपित्तवान्॥ जामतइत्यर्थः॥ अत्र वैद्यरूणस्य महाद्दिष्टनेन निषिद्धाचरणम
निर्दिष्टं॥ अतो व्याधितरतमन्यावेन निषिद्धाचरणप्रायश्चित्तानि चांद्रायणकृच्छ्राति
कृच्छ्रपराकादीनि व्यस्तानि समस्तानि वा योज्यानि॥ चांद्रायणादीनि तथा पूर्वोक्त होम
श्चेतिमिलित्वा द्वयमपि रोगनिवृत्तिसाधनं॥ चांद्रायणादिस्वरूपाणि कृच्छ्रप्रकरणेव
गंतव्यानि॥ अग्निहूतं हणीमह इत्यस्या ऋच्याद्दिश्वासकासहरेत्स्वयं॥ अयं तु विशेषः
तन्त्रसूक्तं विनिमुक्तमत्र तु प्रथमाऋगेवविनिचरुणा युतार्धं आज्येनार्धमित्ययुतसं
ख्यापूरणीया॥ अथवा व्याधिरुक्ता धाधिकेन चरुणा युतमाज्येन वायुतहोम॥ इति रक्त

पित्तहरं॥ ॥ अथ प्रकारांतरेण रक्तपित्तहरं॥ ॥ शातातपप्रोक्तं। मद्यपो रक्तपित्ती
स्यात्तस्य दद्यात्सर्पिषो घटं॥ मधुनोर्धघटं चैव सहिरण्यं विमुच्यते॥ अत्रापि मद्यपप्राय
श्चित्तानि त्रैमासिकादीनि षडब्दपर्यंतानि व्याधिशक्त्याद्यपेक्षया योज्यानि॥ एकस्मिन्मा
सि सार्धकृच्छ्रप्राजापत्यकृच्छ्रपरिगणनया त्रैमासिकप्रायश्चित्ते सार्धसप्तप्राजापत्यकृ
च्छ्राणि भवंति॥ एवमन्यत्राप्यूह्यं॥ आज्यदानमंत्रस्तु प्राग्मस्विन्नोपक्रमपद्धतावुक्तः॥ म
धुदानमंत्रस्तु उष्णज्वरसहितकफश्वासकासहरे निर्दिष्टः॥ ॥ इति प्रकारांतरेण रक्तपि
त्तहरं॥ ॥ अथ पित्तरोगप्रतिमादानं गतलक्षणं चातुर्के पुनुरोगे षष्ठिसाद्दिनाभूत्नरोगप्र
करणोक्तमेवात्रापि ज्ञेयं॥ पूजाविधानं तु परिजापयांरोगप्रतिमादानविधावातंकोद्दे
वतातत्रैलादिनाप्रपंचितं॥ ॥ इति पित्तप्रतिमादानं॥ ॥ महार्णवाख्ये महिते प्रबंधे मांधा
तृनाम्नो मदनात्मजस्य॥ सत्कर्मरत्नप्रकरेण पूर्णो पूर्णोत्र वक्ष्मस्मरशास्त्ररंगः॥ ॥१९॥ ॥

अथश्लेष्महराणि॥ तत्र शातातपः॥ अपुहारी च पुरुषो जायते श्लेष्मलः सदा॥ अत्र च ब्र
ह्मणमल्पसाराणां स्तेयं कृत्वाप्यवेक्षमत॥ चरेत्सांतपनं कृच्छ्रमिति मनूक्तसांतपनं चरे
त् सांतपनलक्षणं कृच्छ्रप्रकरणेऽभ्यधायि॥ ॥इति श्लेष्महरं॥ ॥शातातपप्रोक्ते॥ अपुहा
री च पुरुषो जायते श्लेष्मलः सदा॥ उपोष्य दिवसं सोपि दद्यात्पलशतं त्रपु पलप्रमाण
परिमाणप्रकरणेऽवगंतव्यं॥ इति प्रकारांतरेण श्लेष्महरं॥ अथ चिकित्सा कफव्याधिह
रं॥ ॥मम॥ ॥निस्तानुष्ठानविमुखः कफरोगी भवेन्नरः॥ पराजवं समाप्नोति चेत्ताहनगवा
न्यमं॥ पराजवं श्लेष्मणा शान्तुनिग्रसमाप्नोती थर्षं॥ तच्छांतमेमास समेकं शाकंभक्ष
येन्नरः॥ सहस्रनाम पाठस्य होमस्याप्येतरायुतं॥ नाममंत्रपेण कुर्वीत चरुणाज्येन च हवि
र्भवेत्॥ यावकव्रतस्वरूपं कृच्छ्रप्रकरणे निहितं॥ ॥तैर्निमममैमुक्तो मासं यावकव्र
तं कुर्यादित्यर्थः॥ विष्णुसहस्रनामानि परिजाया यां दर्शितानि॥ नाममंत्रयस्यार्थादिवा

तरोगहरे द्रष्टव्यं॥ नाममंत्रमेण होमः॥ सहस्रनामस्तोत्रस्य जपः॥ जपसंख्याध्यनुसारे
णाष्टोत्तरसहस्रादिका कल्प्या॥ ॥इति चिकित्सा कफव्याधिहरं॥ ॥अथ श्लेष्मरोगप्रति
मादानं॥ ॥तद्दर्ताणतुम्पूलरोगहरप्रकरणे अनुक्तेषु तुरोगेषु चित्सादि नान्निहितमेवा
त्राप्यनुसंधेयं प्रज्ञा विधाने तु परिज्ञाषायां रोगप्रतिमादानविधावाते कोरे वता॥ तत्रेला
दिनान्निहितं॥ ॥इति श्लेष्मप्रतिमादानं॥ ॥इति श्रीमहार्णवाख्ये महिते प्रबंधेनाम्नो म
दनात्मजस्य॥ सत्कर्मरत्नप्रकराविते स्मिन्नष्टादशोयं प्रथितस्तरंगः॥ ॥१॥ अथाप
स्मारहराणि॥ ॥शातातपप्रोक्ते धर्त्तो पस्माररोगी स्यात्तस्य दोषस्य शांतये॥ ब्रह्मकूर्चं त्र
यं कृत्वा धेनुं दद्यात्सदक्षिणां॥ ब्रह्मकूर्चलक्षणं॥ कृच्छ्रप्रकरणे दर्शितं॥ धेनुदानमंत्रस्तु
नवग्रहमखप्रकरणे दर्शितः॥ इत्यपस्मारहरं॥ ॥अथ प्रकारांतरेणापस्मारहरं॥ ॥कर्
विपाकसंग्रहे॥ गुरोस्स्वामिनि वा यस्तु प्रतिकूलं समाचरेत्॥ सोपस्मारी भवेत्तत्र कुर्याच्चां

यशोनरः॥ सदसस्पतिमंत्रेण चर्वाज्यं जुहुयात्तथा॥ कयानश्चित्रेतिसूक्तं तु जपेच्छास
णतत्परः॥ कुर्याद्धिरण्यदानं च त्रात्वा रोगस्य शांतये॥ चांद्रायणं लक्षहोमं कृच्छ्रप्रकरणोद्
ष्टवं॥ चर्वाज्यं मिलितमेव होमसाधनं पृथक्पृथक्॥ होमसंख्या च रोगानुसारतः श्रे
ष्ठरज्ञाताष्युतां नाकल्प्याः एवसूक्तं जपंपि॥ सदसस्पतिमिति सप्तमे मेधातिथिर्ऋषिः॥ स
दसस्पतिर्देवता गायत्री छंदः॥ होमे विनियोगः॥ सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं॥
सनिंमेधामयासिषं॥ कयानश्चित्रआभुवदिति पंचदशर्चस्य सूक्तस्य वामदेव ऋषि
ः॥ इंद्रो देवता गायत्री छंदः॥ जपे विनियोगः॥ कयानश्चित्रआभुवदूती सदावृधः स
खा॥ कया शचिष्ठया वृता॥१॥ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदंधसः॥ दृढाचिदा
रुजे वसु॥२॥ अभीषुणः सखीनामविता जरितॄणां॥ शतं भवास्यूतिभिः॥३॥ अभीन आ
वर्त्तस्व चक्रं न वृत्तमर्वतः॥ नियुद्भिश्चर्षणीनां॥४॥ प्रवता हि क्रतूनामा हा पदेव गच्छसि॥ २८८

अभक्षि सूर्ये सचा॥५॥१॥ संयत्त इंद्र मन्यवः संचक्राणि दधन्विरे॥ अध त्वे अध सूर्ये॥६
॥ उत स्मा हि त्वामाहुरिन्मघवानं शचीपते॥ दातारमविदीधयुं॥७॥ उत स्मा सद्य इ
त्परि शशमानाय सुन्वते॥ पुरू चिन्मंहसे वसु॥८॥ नहि ष्मा ते शतं चन राधो वरंत आ
मुरः॥ न च्यौत्नानि करिष्यतः॥९॥ अस्माँ अवंतु ते शतमस्मान्सहस्रमूतयः॥ अ
स्मान्विश्वा अभिष्टयः॥१०॥ अस्माँ इहा वृणीष्व सख्याय स्वस्तये॥ महो राये दिवित्मते
॥११॥ अस्माँ अविड्ढि विश्वहेंद्र राया परीणसा॥ अस्मान्विश्वाभिरूतिभिः॥१२॥ अस्मभ्यं
तां अपा वृधि व्रजाँ अस्तेव गोमतः॥ नवाभिरिंद्रोतिभिः॥१३॥ अस्माकं धृष्णुया रथो द्यु
मां इंद्रानपच्युतः॥ गव्युरश्वयुरीयते॥१४॥ अस्माकमुत्तमं कृधि श्रवो देवेषु सूर्य॥ व
र्षिष्ठं द्यामिवोपरि॥१५॥३॥ इति कयानश्चित्र इति सूक्तं॥ इति प्रकारांतरेणापस्मारहरं
॥ ॥ अथापस्माररोगहरविनायकस्नानं॥ ॥ तत्र बौधायनः॥ ॥ ब्राह्मणाभ्यासरोध्येन

सापस्मारान्नवेन्वर॥ वृद्धे तस्य प्रतीकारं दानहोमक्रियादिभिः॥ पूजेन वा तद्दर्धेन तद्
र्धर्धेन वा पुनः॥ विनायक प्रतिकृतिं कुर्यात्स्वर्णेन शक्तितः॥ राजतं च तथा नागमुपवी
तं प्रकल्पयेत्॥ पुष्करं पद्मरागेण हस्तं रत्नैः प्रकल्पयेत्॥ विनायकार्धमानेन आखु
देवस्य कल्पयेत्॥ विनायकार्धमानेन आखुदेवस्य कल्पयेत्॥ तस्य पद्मगे प्रदेशानि
रत्नानि विविधानि च॥ माणिक्येन प्रकुर्वीत चक्षुषी तस्य शक्तितः॥ पूर्वे च मंडपं कुर्या
त्रत्नैः षोडशभिर्दृढं॥ यथा हस्तानि कुर्यात् द्वाभिर्वा प्रयत्नतः॥ मंडपस्य चतुर्भागं वे
दिकाभिप्रकल्पयेत्॥ स्वयमेव तथाचार्यो धर्मज्ञः सत्यवाक्शुचिः॥ कुलीनो न च रुध
स्वसर्वप्राणिहिते रतः॥ रात्रौ जागरणं कृत्वा मध्यरात्रे बलिं हरेत्॥ मत्स्यमांसेन सहि २८०
तं तथा क्षीरोदकेन च॥ आचार्यः प्रयतो भूत्वा मंत्रेणानेन संयतः॥ पूर्वं संदिशंत
दद्याद्बलिं वै सार्वकामिकं॥ आदित्या वसवो रुद्रा देवान्ताः निसर्वशः॥ सर्पाः पिशाचा

डाकिन्यः शाकिन्यः पांथदेवताः॥ आपस्मारादिदैवं च वेताला नैकृतास्तथा॥ बलि
दानेन दत्तेन शांतिं कुर्वंतु सर्वशः॥ ततः प्रभाते विमले स्नातः परितवाससः॥ भूषि
ताः कटकैः सम्यगुपवीतांगुलीयकैः॥ कुंडानि दिक्षु चत्वारि मेखलासंवृतानि च॥ कु
र्यात्तेषु प्रकुर्वीत होमं मंत्रैः स्वकैस्तथा पूर्वस्मिन्नर्बुदं चैः कुर्यात्समिदाज्यचरूत्कटं
॥ विनायकं समुद्दिश्य गणानां त्वेति मंत्रतः॥ अध्वर्युर्दक्षिणे कुंडे सम्यग्धोमं समाचरे
त्॥ आथर्वणश्चोत्तरे च कुंडे होमं प्रकल्पयेत्॥ विनायकाय देवाय सर्वं तत्र हिताय च॥
समिदाज्यचरुं हुत्वा पूर्णां हुत्वा तमेव हि॥ आचार्यः प्रतिमां तां तु ब्राह्मणैः सह संयुतः॥
आसने वै हि का मध्ये वितानादि परिष्कृते तिलानामुपरि स्थाप्य गंधपुष्पैः प्रपूजयेत्
॥ वस्त्रैर्नानाविधैः शुभ्रैः केयूरकटकादिभिः॥ उपचारैः षोडशभिर्नैवेद्यायच मोद
कैः॥ यथा देवे तथाचार्ये प्यलंकारादि कल्पयेत्॥ आचार्यः परमानंदः आगतो शाम

माहा०
२८१

प्रकल्पयेत्॥ अपूपादि तथान्यच्च कारयेद्रूपकान्वितं॥ निवेद्य पार्वतीं चापि देवदेवं
महेश्वरं॥ पूजयेत् परयाभक्त्या आचार्यः स्वयमेव हि॥ तथैव रोगवान्नत्वा संपूज्य ग
णनायकं॥ गणानां त्वेति मंत्रेण तु श्रीसूक्तं तु पूजयेत्॥ ततो मध्यंदिने प्राप्ते प्रतिमा दक्षि ६
णामुखां मंत्रेणानेन दद्याच्च स रोगी भ्रातृसुतः स्वयं॥ ॐ प्रभुस्त्वोपविष्टायब्राह्मणायाति
जल्कितः॥ विनायकप्रपंचार्थे हरविघ्नविनाशकृत् त्वं देवैः प्रार्थितः पूर्वं विघ्नविघ्नविघ्न
परायणः॥ ब्राह्मणाय्यासरोधेन यज्ञातं मम वै कृतं। सर्वकर्मविपाकेन सपस्मारोन्म
दादिकं॥ जाग्रवाप्यथवाधिर्येनासिकं चाप्यजाघ्रणं। त्वद्दर्शयाप्रदानेन रोगमास्तु
विनाशय॥ चतुर्णां ब्राह्मणानां च दद्यात् छत्रं च दक्षिणां॥ एवं कृतागणपते दानं मर्त्य २८१
:सुखी भवेत्। पूजेन वा तद्धेनेत्यादि॥ पजलक्षणं परिमाणप्रकरणे द्रष्टव्यं॥ पुष्कर
मिति॥ ॥पुष्करं मुंडा हंडा यज्ञाग॥ हस्तमिति॥ हस्तः मुंडादंडः॥ चतुष्पीतस्येति॥ त

स्य विनायकस्य विनायकवाहनमूषिकायाश्च। मत्स्यमांसेनेत्यादि मत्स्येन मांसे
न क्षीरोदकेन च सहितं विचित्रमन्नं बलिं दद्यादित्यर्थः॥ बलिदानमंत्रमाह॥ आ
दि सावसवेरुद्रा इत्यादिना श्लोकद्वयेन॥ होममंत्रैः स्वकैरिति स्वकैः स्वस्वगणो
क्तैर्विनायकप्रकाशकैर्मंत्रैरित्यर्थः॥ तत्र विनायकप्रकाशका मंत्रा विनायकस्य
तौ नवग्रहयज्ञे च दर्शिताः॥ होमसंख्यात्वष्टोत्तरशतादिसहस्रांतात्वात्मा धनुसा
रेण कल्प्या। पूर्वस्मिन्नब्दकृच्छ्र इत्यादि॥ अत्र विनायकाधिवासन वेदिकातः पूर्वादि
दिग्योग्यास्या॥ सति संभवे च तस्य दिक्षु ब्रह्मचारिभिर्होमः कारयितव्यः॥ वेद चतुष्ट
याभावे स्वगणस्थायब्राह्मणेन तस्याप्यभावे तस्मिन्कर्मण्याचार्यत्वेन मोहतस्तच्छा
खानुसारेणाधिवासने वेदिकातः आग्नेय्यादिदिक्कुंडादिविधायोदिरूपहोमं चतुर्गु
णं॥ कारयेत्॥ एवमाचार्यो ऋत्विक्सहितो होमं विधाय पूर्णाहुतिं तेपूर्वाधिवासितां वि

मा०हा० नायकप्रतिमां पुनः षोडशोपचारैः पूजयेदित्याह॥ आचार्यः प्रतिमां तां त्वित्यादिना
२८२ ॥ तत्तत्कान्वितमन्त्रपादैर्नैवेद्यार्घ्यं कारयेदित्यर्थः॥ तन्मीमन्त्रस्तु पूजयेदिति॥ आचा
र्येण पूजितं विनायकं रोगवान्यजमानोपि पूजयेत्॥ स चेद्यजमानः शूद्रः स तन्मीमं
त्रेण विनायकं पूजयेदित्यर्थः॥ विनायकप्रपन्नार्त्तिहरेत्यारभ्य रोगमाशु विनाश
येत्यंता विनायकदानमन्त्राः॥ तदर्चायाः प्रदानेनेति॥ अर्चितायाः प्रतिमायायाः॥
॥ इत्यपस्माररोगहरविनायकदानं॥ ॥ अथापस्मारहरमूर्त्तिदानं॥ तदन्तृत्त
णं वानुक्तेषु तु रोगेष्वित्यारभ्य सकलरोगहरप्रकरणोदाहृतं तमेवात्रापि विज्ञेयं॥ पू
जाविधिस्तु परिभाषायां रोगप्रतिमादानविधावातंकोद्वृतात्त्रेत्यादिना प्रदर्शि
तः॥ इत्यपस्मारमूर्त्तिदानं॥ ॥ महार्णवाख्ये महिते प्रबंधे मांधातृनाम्नो मदनात्म
जस्य॥ सत्कर्मरत्नप्रकरं चितेस्मिन्नेकोविंशः प्रथितस्तरंगः॥ ॥ अथ शिरोरोगह २८२

राणि॥ शातातपप्रोक्ते नागहारी च सततं पुरुषः शीर्षरोगवान्॥ सीसं पञ्चशतं द
द्यादुपोष्य सतु वासरं॥ नागः सीसं॥ इति शिरोरोगहरसीसदानं॥ अथ प्रकारांत
रेण शिरोरोगहरं॥ कर्मविपाकसमुच्चये॥ गुरूपरोधी शिरसि रोगवान् जायते नरः
॥ कृच्छ्रातिकृच्छ्रं कुर्वीत चान्द्रायणमथापरं॥ उपधानि प्रदद्याच्च तिलपात्रं तथैव
च॥ उपधानि वै दद्यात्सर्वशिरोरोगहरत्वेनोक्तानि कृच्छ्रातिकृच्छ्रमोर्जनत्तेण कृच्छ्रप्र
करणोक्तधाम्नि॥ ॥ इति प्रकारांतरेण शिरोरोगहरं॥ ॥ अथ कर्मविपाकसंग्रहोक्तं
शिरोरोगहरं॥ प्रायोपवेशानाशनां व्रतानां त्यागकारणात्॥ शिरोरोगयुतो जन्तुः स्यात्तन्नि
ष्कृतिरथोच्यते॥ गोहत्याव्रतं कुर्यात् संचारात् द्विजभोजनं॥ उद्यंत्रं च जपेच्चैव होमः कू
ष्मांडसंज्ञकः॥ त्वेदिति शेषः गोहत्याव्रतस्वरूपं तु कृच्छ्रप्रकरणे निरूपितं॥ विप्रा
न्भोजयेदित्यर्थः॥ उदुत्यं चित्रमिति॥ उदुत्यं चित्रमहंसमंत्रं च॥ परिभाषायां रो

माहा॰ २८३ गप्रतिमादानविधौ द्रष्टव्यः॥ ॥ वक्तपसंख्यानुसारेणाष्टोत्तरसहस्राद्ययुतांताक
ल्पा॥ कूष्मांडहोमस्तु परिभाषायामेव दर्शित॥ ॥ इति कर्मविपाकसंग्रहोक्त शिरो
रोगहरं॥ अथ कांस्यरोगहरं॥ नारदः॥ ब्रह्मचारी महाभीत्या भिन्नपात्रे विशेषतः॥
॥ कांस्ये न शिरोरोगी भवतीत्याह नारदः॥ अस्त्री स्यां इत्येतत्क्रमेणाष्टोत्तरशतं जपेच्च
रुध्रतां स्वाच जुहुयाच्च तथैव हि। औषधानि प्रदद्याच्च विप्रान् संभोजयेत॥ भि
न्नपात्रे विशेषतः इति॥ सुवर्णरजतपात्रव्यतिरिक्तभिन्नपात्रभोजनजं तं रोगनिदानं वि
शेषतो भिन्नकांस्यपात्रे भोजनमित्यर्थः॥ अस्त्री स्यां नासिकास्यामिति सूक्तं प
रिभाषायां रोगप्रतिमादानविधौ द्रष्टव्यं॥ जुहुयाच्च तथैव हि इति॥ अष्टोत्तरमित्यर्थ २८३
॥ चरुणाष्टोत्तरशतं घृतेन चाष्टोत्तरशतं॥ अत्र समग्रं सूक्तं मंत्रेणानुप्रत्येकं औ
षधानि वैद्यशास्त्रोक्तशिरोरोगहरत्वेनोक्तानि॥ ॥ इति कांस्यशिरोरोगहरं॥ ॥ अ

थ सूर्यावर्त्तहरं॥ शातातपप्रोक्ते॥ औषधस्यापहरणात्सूर्यावर्त्तः प्रजायते॥ तेन
सूर्यः प्रदातव्यो निष्कैकस्य यथाविधि। निष्कपरिमितसुवर्णनिर्मितप्रतिमां दद्यादि
त्यर्थः॥ निष्कलक्षणं परिमाणप्रकरणेऽभिधास्ये॥ ॥ इति सूर्यावर्त्तहरं॥ ॥ अथ शि
रोरोगघ्नयज्ञोपवीतदानं॥ एतन्निदानं पद्मपुराणे॥ ब्राह्मणद्विट् शिरोरोगीति॥ अ
त्र निष्कृतिर्वा पद्मपुराणे॥ उपवीतं हिरण्येन निर्मितं तु पलार्धतः॥ तदर्धेन तदर्धेन य
थावित्तवतोपि वा॥ उत्तरीयं राजतं च तावत्संख्ययाकृतं॥ ब्राह्मणाय ब्रह्मविदे श्रो
त्रियाय निवेदयेत्॥ मंत्रेणानेन विधिवत्पूजितायांगुलीयकैः॥ धाता विधाता ज
गतां परमात्मा चतुर्मुखः॥ विनाशयतु मे क्षिप्रं रोगवेगं शिरोगतं॥ अथ यज्ञोपवीतदा
नमंत्रे धाता विधातेत्यादि ब्रह्मप्रकाशकरत्वोपादानां ब्रह्मपूजा षोडशोपचारसहि
तानाब्रह्मप्रकाशकैर्वैदिकैर्मंत्रैर्ब्रह्मजज्ञानमित्येवमादिभिर्नमोन्तैर्नाममंत्रैर्वा सो

त्तरीमेयज्ञोपवीते विधायतद्यज्ञोपवीतं ब्राह्मणायोक्तप्रकारेण दद्यात्॥ ब्रह्मजन्मा
नमित्यारभ्य ब्रह्मप्रकारकामंत्रानुग्रहमन्त्रप्रकरणे दर्शिताः॥ पलार्धेनेति॥ पल
त्रितयंपरिमाणप्रकरणेनिरूपितं॥ यथाविभवतोपिवेति॥ सप्तधधनेनपलादधि
कपरिमाणेनसुवर्णेनयज्ञोपवीतंकारयेदित्यर्थः॥ यावदुन्मानेनपलादधिकपरि
माणेनसुवर्णेनयज्ञोपवीतंकारयेदित्यर्थः॥ यावदुन्मानंयज्ञोपवीतं तावदुन्मानमु
त्तरीयं भवति॥ ॥इतिशिरोरोगप्रयज्ञोपवीतदानं॥ ॥अथशिरोरोगप्रतिमादानं॥॥
तत्रलक्षणांचात्वक्तेसुरोगेशिल्पादिनाप्रत्लरोगहरप्रकरणोक्तमेवात्राप्यनुसंधेयं॥
पूजाविधानंत्वातंकोदेवतातत्रैवादिनापरिभाषायांरोगप्रतिमादानविधावुक्तं॥ ॥इ २८५
तिशिरोरोगप्रतिमादानं॥ ॥महार्णवाख्येमहितेप्रबंधेमांधारनाम्नोमदनात्मजस्य॥
सत्कर्मरत्नप्रकरेण तुंगोविंशाल्लसत्तरंगोयमगाद्गाधः॥ ॥अथमुखरोगहराणि॥ तत्रपू

तिवक्त्रत्वहरं॥ ॥कर्मविपाकसंग्रहे॥ धर्मकर्माण्यपक्रम्यमध्येत्यजतियोनरः॥ अ
विद्यमानदोषाणांयोपरेषांयः प्रकाशयेत्॥ सभवेत्पूतिवक्त्रत्वंकुर्याच्चांद्रायणत्रयं॥
चांद्रायणस्वरूपंकृच्छ्रप्रकरणेद्रष्टव्यं॥ ॥इतिपूतिवक्त्रत्वहरं॥ ॥अत्रप्रकारांतरेण
मुखरोगहरं॥ कर्मविपाकसंग्रहे॥ परवाचांविघ्नकर्त्तामुखरोगीप्रजायते॥ कर्मोद्भवाट
नतोन्येषंमुखरोगः प्रजायते॥ सकृच्छ्रत्रितयंकुर्यात्तत्रैवाख्यातितिर्घृतं॥ जुहुयाद्वि
सहस्रंचदद्यादिकांचनं॥ प्राजापत्यकृच्छ्रस्वरूपंकृच्छ्रप्रकरणेत्वधायि॥ श्रीस्वादिदद्या
त्॥ ॥इतिमुखरोगहरं॥ ॥अथप्रकारांतरेणमुखरोगहरं॥ शातातपप्रोक्तं॥ श्वमार्जारा
दिभिः स्पृष्टंतुक्तांडुर्गंधवान्भवेत्॥ पीत्वात्रिरात्रंगोमूत्रंभोजयेद्ब्राह्मणत्रयं॥ दुर्गंध
वान्भवेत्तत्तुक्तेतिभोजनस्यनिमित्ततेनोपादानात्॥ ॥इतिप्रकारांतरेणमुखरोगह
रं॥ ॥अथमुखरोगहरांतरं॥ कर्मविपाकसमुच्चये॥ क्रूरसाक्षीभवेद्वक्त्ररोगीत्रयोणित

माह॰ २८५ पितवान्॥ कृच्छ्रातिकृच्छ्रे कुर्वीत चांद्रायणमथापरं॥ कुर्यात्कूष्मांडहोमं च गायत्र्या
अयुतं जपेत्॥ दद्याद्धिरण्यं श्रीं ह्रीं अस्य मुखरोगस्य शांतये॥ कृच्छ्रादिलक्षणानि कृच्छ्र
प्रकरणे द्रष्टव्यानि॥ कूष्मांडहोमः परिभाषायां निरूपितः॥ हिरण्यं श्रीहस्यास्य वि
त्तवानुसारेण दातव्यं॥ ॥इति मुखरोगहरं॥ ॥अथ मुखरोगहरगजदानं॥ ॥बौधायनः
॥ ॥वाग्विरोधं गुरोः कृत्वा मुखरोगी भवेन्नरः॥ तस्य दानेन विहितः प्रतीकारो यथु
च्यते॥ सौवर्णं राजतं ताम्रपलेनार्धपलेन वा॥ कारयेत्करिणं सौम्यं यथाविभवतोपि
वा॥ तस्यैवं कारयेद्दंतौ द्वे रजतेन तु॥ पुच्छं समौक्तिकं कुर्यान्नेत्रा नामह्निणी तथा॥ सं
वेष्ट्य पीतवस्त्रेण गंधपुष्पाहतनादिभिः॥ अर्चयेद्धान्यराशिस्थधान्यं द्रोणाष्टकं मतं २८
॥ कृतवृत्तोपसंपन्नं ब्राह्मणं संयतेंद्रियं॥ दांतं कुलीनं धर्मिष्ठमनुद्वेगकरं नृणां॥ आ
हूय परया भक्त्या वस्त्रालंकारभूषणैः॥ पूजयेत्तं यतो भूत्वा तेनैतत्कर्म कारयेत्॥ स

मिद्भिराज्यतिलैश्चैव होमं चापि प्रवर्तयेत्॥ अग्निनाग्निस्तथाप्यायेसुकज्योतिरिति क्रमा
त्॥ मंत्रा एते विनिर्दिष्टा इध्मस्याज्यस्य इष्यते॥ कृत्वा चैव प्रणीतां च ततो हस्त्यर्चनं च
वेत्॥ स्वाहांतं कर्म कृत्वा यः प्रणीतामोक्षणं तथा॥ पलेनार्धपलेन चेत्यादि॥ पलस्वरूप
परिमाणप्रकरणेऽवगंतव्यं॥ तस्यैवं कारयेद्दंतावित्यादि। यो हस्ती सुवर्णेन ताम्रेण वा
निर्मितस्तस्य शुद्धेन रजतेन कारयेत्॥ यद्वा रजतेन कारयेत्॥ यद्वा रजतेन हस्ती निर्मि
तस्तदा रजतेन रंजितविधानमनुपपन्नं रजतस्य प्राबल्यात् द्रोणस्वरूपं धान्यमानप्रकर
णे द्रष्टव्यं॥ समिद्भिर्होमकर्म मेणमंत्राह॥ अग्निनाग्निरित्यादिना॥ अग्निनाग्निरित्य
स्यामेधातिथिरृषिः॥ आद्यपादे निर्मथ्याग्निराहवनीयाग्निश्च देवता इतरत्राग्निर्देवता गा
यत्रीछंदः॥ समिद्धोमे विनियोगः॥ ॥अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा हव्यवाड्
जुह्वास्यः॥ आप्यायेत्यग्निमिंधते इत्यस्याश्चिरोक ऋषिः॥ अग्निरिंद्रश्च देवता गायत्री

छंदः॥ आज्यहोमे विनियोगः॥ आघाये अग्निमिंधे तस्त्वणंति बर्हिरानुष्टुक्॥ येषा
मिंद्रो मुवासरवा॥ ॥स्रुक ज्योतिरित्यस्य प्रजुषो ऽग्निकांडे विश्वेदेव कांडे च समाम्ना
मात॥ अग्निर्विश्वेदेवारूपयः॥ मरुतो देवता अथवा लिंगोक्तादेवता यजुष्त्वान्न छंदो
नियमः तिलहोमे विनियोगः॥ स्रुक ज्योतिश्च चित्रज्योतिश्च ज्योतिश्च ज्योतिष्मांश्च॥ स्रुकश्च
कृतपाश्चात्स८ हा॥ ॥इध्मास्य स्पष्टत इध्मा इति विशेषोपादानात॥ होम समिधः पंचा
नैवान्नवति॥ तदत्ता वेयसृग्निमकाष्ठे रिध्मादिन्नवति॥ होमसंख्याच निर्दिष्टत्वात्स्व लेक
मष्टोत्तरशतं॥ कुत्वा चैव प्रणीतां च इति॥ कर्मसंकल्पानंतरं स्वगृह्योक्त विधिनाग्निं प्रति
ष्टाप्य पात्रासादनानंतरं प्रणीतां ततः प्रणीता च प्रणीता पात्रस्थापनपर्यंतं कृत्वा ततो ह
स्त्यर्चनं न वेत॥ पूर्वोक्त धान्यराशिस्थितं षोडशोपचारैः पूजयेदित्यर्थः॥ हस्ती चात्र सु
प्रतीकोदिग्गजः॥ दानमंत्रे सुप्रतीकाशष्टश्रवणात॥ स्वाहांतं कर्मत्येति॥ पूर्वोक्त प्रकारे २९६

णाकरिणं पूजयित्वा स्वाहांतं कर्म समिदादि होमकर्म निवृत्य पश्चात्प्रणीतामोक्षणं पू
र्वस्थापित प्रणीता पात्र विसर्जनं॥ स्वगृह्योक्त विधानेन कुर्यादित्यर्थः॥ एवं पूर्वोक्त कर्मा
नंतरं किं कुर्यादित्यत आह ततः मुक्तांबरधरः मुक्त माल्यानुलेपनः॥ तस्मिन्नुत्तव
तेद्द्यात्करिणं तस हस्तिणं॥ मंत्रेणानेन विधिवत्ता सुखाय विशेषतः॥ सुप्रतीक गजेंद्र
त्वं सरस्वत्तन्निषेचके॥ इंद्रस्य वाहनेशत्त्वं सर्वदैवैश्च पूजितः॥ दानेनानेन दत्तेन मुखरो
गं विनाशय॥ ब्राह्मणान्भोजयेद्दत्तै॥ साधून्तुंजीत बंधुनि॥ ॥इति मुखरोगहर गजदानं
॥ ॥अथ जिव्हा रोगहरं॥ ॥शातातप प्रोक्ते॥ पक्वान्न हरणंचैव जिव्हा रोगं प्रजायते॥ गाय
त्र्याः जपते जन्हंर त्रंगं जुहुयात्तिलैः॥ जपकरणश्लोको गायत्र्यमुत जप सैक कृच्छ्र प्र
त्याम्नायत्वा हूत्वत्त जपस्थाने दशकृच्छ्रान्कृत्वा गायत्र्या दशसहस्राणि जुहुयात॥ कृच्छ्र
स्वरूपं कृच्छ्र प्रकरणे द्रष्टव्यं॥ ॥इति जिव्हा रोगहरं॥ ॥शातातप प्रोक्ते॥ अथ प्रकारां

मा॰ह॰ २८१ तरेण जिह्वारोगहरं॥ कर्मविपाकसमुच्चये॥ परेषां दुःखकरणात्सर्वदानृतजल्पना
त्॥ जिह्वाछेदात्तथान्येषां पक्षपाताश्च संसदि। जिह्वारोगी भवेद्दासेन्द्रणी चैवाभिजाय
ते॥ पराकद्वितयं चैव होमः कूष्मांडसूक्तकः॥ कथाभक्तिश्च सूक्तस्य जपो होमस्तथैव
च॥ श्रीसादीनां तथा दानमौषधस्य च संस्मृतं सर्वदा इति। तच्च परदुःखकारित्वबुद्ध्य
त्र संबध्यते॥ असकृदन्येषां दुःखकरणादसकृदनृतजल्पनाच्चेत्यर्थः॥ पक्षपाताच्चे
ति॥ पक्षपातोऽव्यवहारिणः॥ पराकद्वयं कूष्मांडहोमश्च परिभाषायामुदीरितः॥
कथाभक्तिश्च आनुवदिति सूक्तमपस्माररोगहरणे प्रदर्शितं॥ अनेन सूक्तेन जपहो
मश्च कर्त्तव्यः॥ जपहोमयोः संख्या व्याध्याद्यनुसारेणाष्टोत्तरशतादिकल्प्या २८१
॥ सूक्तं सकलमंत्रो न प्रत्यृचं॥ श्रीसादीनामित्यादि ज्ञाष्टेन यवगोधूममुद्गादीनि समुल्
क्ष्यंते॥ एतानि ज्ञात्वा यथानुसारेण देयानि। औषधस्यायुर्वेदे जिह्वारोगहरत्वेनाभिहित

स्य॥ ॥ इति प्रकारांतरेण जिह्वारोगहरं॥ ॥ अथ छर्दिरोगहरं॥ ॥ शातातपप्रोक्ते। वि
षप्रदश्छर्दिरोगार्तो च दद्यात्तपस्विनी॥ चकारादेकः कृच्छ्रः सौरमंत्रजपश्च समुच्ची
यते॥ कृच्छ्रः प्राजापत्यः तप्तरूपकेणासाध्यचांद्रायणादिपरः॥ अतो व्याध्यनुसारेण प्रा
जापत्यपराकचांद्रायणादिष्वन्यतमो ग्राह्यः॥ सौरमंत्रस्य सौराष्टाक्षरो वाउदुत्य
ऋचो वा महासौरवर्गो वा एते च परिभाषायामेव तत्र तत्र दर्शिताः॥ तथा प्राजापत्या
दिस्वरूपाण्यपि गोदानमंत्रश्च जपसंख्या तु व्याध्याद्यनुसारेणाष्टोत्तरशताद्यनु
तांता कल्प्याः॥ ॥ इति छर्दिरोगहरं॥ ॥ अथ हृत्पीडाहरं॥ ॥ शातातपप्रोक्ते॥ आमान्न
हरणे चैव हृत्पीडा प्रजायते॥ स दद्याद्धेनुं हेमनिष्कद्वयविनिर्मितां॥ निष्कस्वरूपं प
रिमाणप्रकरणेऽभिधास्यामि॥ अत्र चाश्विनप्रकाशमंत्रेणाश्विनदेवताप्रजापतिविधाय ब्राह्म
णाय दद्यात्॥ स च मंत्रो नवग्रहयज्ञप्रकरणे विनायकादिपंचमंत्रेषु दर्शितः॥ ॥ ॥

माहा. इति दंतपीडाहरं॥ शातातपप्रोक्ते॥ सूकरे निहते चैव दंतुरो जायते नरः॥ स दद्यात्तु
२५८ विप्रेभ्यः सर्पिर्घृतकुंभं सदक्षिणं॥ कुंभलक्षणं धान्यमानप्रकरणे द्रष्टव्यं॥ घृतदानमंत्र
स्तु प्रायश्चित्तोपक्रमप्रघट्टके उक्तः॥ ॥इति दंतुरत्वहरं॥ ॥ अथ श्यामदंतहरं॥ शाताता
पप्रोक्ते सुरापः श्यामदंतः स्यात्प्राजापत्यद्वयं चरेत्॥ शर्करायास्तुलाः सप्त दद्यात्पा
पविशुद्धये॥ जपित्वा च महारुद्रं दशांशं जुहुयात्तिलान्॥ ततोभिषेकः कर्तव्यो मं
त्रैर्वरुणदैवतैः॥ प्राजापत्यस्वरूपं कृच्छ्रप्रकरणे निरूपितं॥ शर्करातुलापुरुषदा
नानि॥ आत्मानं शर्करया तोलयित्वा तां शर्करां ब्राह्मणेभ्यो दद्यादित्यर्थः॥ तुलादान
मंत्रस्तु॥ त्वं तुले सर्वभूतानां प्रमाणं परिकीर्तिता॥ मां तोलयंति संसारादुद्धरस्व न २५९
मोस्तु ते॥ महारुद्रलक्षणं परिभाषायां रुद्रविधाने प्रदर्शितं॥ दशांशहोमे मंत्रविशे
षस्तथाहुतिसंख्याविशेषश्च रुद्रविधाने दर्शितः॥ वरुणदैवतैरिति स्फुजपलक्षणं॥

आपःस्वदग्ध्वा समाम्नातैर्वारुणैराप्यैश्चाभिषेकं कृत्वा ततः स्मार्तैरभिषेकः कर्तव्य
ः॥ स्मार्ताश्च मंत्रा नवग्रहयज्ञप्रकरणे दर्शिताः॥ ॥इति श्यामदंतहरं॥ अथ निष्ठुरत्वा
भित्वादिहरं॥ शातातपप्रोक्ते॥ परेषां तर्ककरणान्निष्ठुरोक्तिः प्रजायते॥ खरोक्तिर्हास्य
करणाद्दद्यान्मौक्तिककांचने॥ खरोक्तिर्निष्ठुरोक्तिर्नीरसोक्तिर्वा गर्दभस्वनत्वं वा॥ हा
स्यकरणात्॥ परोद्वेगजननस्य हास्यकरणात्॥ मौक्तिककांचनयोर्दानं शक्त्याप्यनुसा
रेण॥ ॥इति निष्ठुरत्वाभिनत्वादिहरणं॥ ॥अथ मूकत्वहरं॥ शातातपप्रोक्ते॥ मूकोत्त्वा
दवधाच्चैव तस्येयं निष्कृतिः स्मृता॥ तेन कार्यं विप्रेभ्यः प्रतिचांद्रायणत्रयं॥ व्रता
ते पुस्तकं दद्यात्सुवर्णफलसंयुतं॥ ब्राह्मणाय चतुर्वेदविदे वस्त्रेण संयुतं॥ इमं मंत्रं
समुच्चार्य ब्राह्मणं तं विसर्जयेत्॥ प्रतिचांद्रायणलक्षणं कृच्छ्रप्रकरणे निरूपितं॥ त
थापलक्षणं परिमाणप्रकरणे॥ इमं मंत्रं समुच्चार्य पुस्तकं दद्यादित्यन्वयः॥ तमेव दान

माह. मंत्रमाह॥ सरस्वति जगन्मातश्शब्दब्रह्माधिदेवते॥ दुष्कर्मकारिणं पापं रक्ष मां परमे
२८८ श्वरि॥ ॥ इति मूकत्वहरं॥ ॥ अथ मूकत्वहरं तिलपद्मदानं॥ ॥ वायुपुराणे स्वरोपघा
ती वाचां च हर्त्ता मूकः प्रजायते॥ वक्ष्यामि तत्प्रतीकारं येन संपद्यते सुखं॥ वाचां हर्त्ता पु
र्वं तु ज्ञात्वा मंतरेण वेदादिग्राहा॥ पुस्तकहर्त्ता च कुर्यात् स्वर्णं मंमपद्मं पलार्धेन तदर्धतः॥
मया विन्नवतः सम्यग्वित्तशाठ्यं न कारयेत्॥ तदर्धतः पलार्धेन वेत्यपि॥ पलस्वरूपं व
क्ष्यमाणं टंकस्वरूपं वक्ष्यमाणं परिमाणप्रकरणे॥ एवं रक्तवस्त्रेण संवेष्ट्य ताम्रपात्र
परिन्यसेत्॥ ताम्रपात्रपरीमाणं पलानामष्टकं विदुः॥ पीतवस्त्रेण संवेष्ट्य पात्रं तं तु विनिक्षि
पेत्॥ कारकं स्वच्छं श्वेतं विदितयोन्मानतिलराशौ प्रयत्नतः॥ उपचारैः षोडशभिरभ्य २८८
र्चः सर्वज्ञ स्वविते॥ रक्तचंदनपुष्पाद्यैर्मंत्रेणानेन पूजयेत्॥ पद्मपूजामंत्रमाह॥ ब्रह्मण
श्च नमस्तुभ्यं विष्णोरमिततेजसे॥ अतिप्रीतिकरं ज्ञानो स्तथा रूद्रस्य चैव हि॥ पूजां मम ग

हाण त्वं सर्वक्लेशविनाशक॥ पूजानंतरं कर्त्तव्यमाह॥ आग्नेय्यां दिशि वै होमः कर्त्तव्यो
मंत्रपूर्वकः॥ समिदाज्यतिलैश्चैव सावित्र्याष्टोत्तरेण तु॥ समिधो मप्रकुर्वाति सर्वरोगप्र
शांतये॥ आज्यहोमश्च कर्त्तव्यश्चित्रमित्यनयार्चा॥ तिलानां यत इदं इति व्याहृती निर
स्यापि वा॥ अग्नेरुत्तरदिग्भागे कलशस्थापनं भवेत्॥ पूर्वोक्तेन विधानेन वानिषेकादिक
रयेत्॥ प्रणीता मोक्षपर्यंतं कर्मकृत्वा विधानतः॥ तस्मै कुत वते पद्मं दद्यात् स्मृता चतुर्मु
ख॥ देवानामपि सर्वेषां यतस्त्वं प्रीतिकारणं॥ विशेषतो ब्रह्मणश्च सरस्वत्या हरेरपि॥ म
त्प्राग्वाचां निरोधेन वै रूप्यमम हे हजं॥ स्वरोपघातजं तीव्रं उः॥ सं व रोगकरं तथा॥ तत्स्य
र्वं नाशयं त्वयं ब्रह्म विष्णु शिवात्मक॥ त्रि इत्थं दद्याद्देवाह विधं तस्य यात्तु विप्र एवं द
तिर्त्किना१९७ त्वा तु तत्समाचार्यान् दृष्टतस्तमतुब्रज्य स्वरनेशाद्विमुच्यते॥ एवं पद्मोद्भवः प्राह नारद
ममहात्मने॥ आग्नेय्यां दिशि वै होमः कलशस्थापनं तथेत्यादि॥ पद्मस्थापनाप्रदेशे हा

ग्निर्यथासमिधोमेसावित्र्याष्टहरोमंत्रः॥सचपुरश्चर्यायांरोगप्रतिमारानविधावन्निहि
तः॥समिधश्चमृत्तिका॥आज्यहोमेचित्रंदेवानामितिमंत्रः॥अस्यकुत्सऋषिः॥सूर्यो
देवतात्रिष्टुप्छंदः॥आज्यहोमेविनियोगः॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्य
वरुणस्याग्नेः॥आज्यहोमेविनियोगः॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुण
स्याग्नेः॥आप्राद्यावापृथिवीअंतरिक्षꣳसूर्यआत्माजगतस्तस्थुषश्च॥तिलहोमे
चयतइंद्रेत्यनयाव्याहृतिभिर्वाजवेत्॥यतइंद्रेत्यस्यभर्गऋषिः॥इंद्रोदेवताबृहती
छंदः॥तिलहोमेविनियोगः॥यतइंद्रभयामहेततोनोअभयंकृधि।मघवंछग्धितवतन्नऊ
तयेविद्विषोविमृधोजहि॥व्याहृतीनामप्यादिनवग्रहयज्ञेदेवतावाहनप्रस्तावेनिरू
पितं॥होमसंख्याचप्रत्येकमष्टोत्तरशतंसहस्रंवापूर्वोक्तविधानेनेति॥अभिषेकप्रक
रणोक्तेनविधानेनतत्वाक्यस्याग्निर्नवग्रहयज्ञप्रकरणेदर्शितं॥प्रणीतामोक्षपर्यंतमिति ३००

प्रणीतापात्रस्योदकविसर्जनपर्यंतं॥कर्मस्वगृह्योक्तविधिनाकृत्वेत्यर्थः॥देवान
मपिसर्वेषामिस्यारस्यहविष्मंतस्तथात्रुवीसंतः॥पयहानमंत्रः॥ ॥इतिमूकत्वहरति
लपमहानं॥ ॥अथस्वलज्जिह्वात्वहरं॥कर्मविपाकसंग्रहे॥वेदंवाधर्मशास्त्रंवाविक्रीणा
त्याधियोनरः॥अधीतंतस्यनाशातिजिह्वास्वलनंनवेत्॥अपरिस्फुटवक्ताजि
ह्वायांव्रणवानपि॥कृच्छ्रातिकृच्छ्रौकुर्वीतचांद्रायणमथापिच॥सूक्तंतामग्निवर्णांस्वं
जपेद्वैवासुतत्रपः॥दधाधिरन्यविप्रेभ्योगोजनंचस्वशक्तितः॥वेदंवाधर्मशास्त्रंवा
विक्रीणीयादिति॥नतकाध्यापकइत्यर्थः॥कृच्छ्रादिलक्षणंनिकृच्छ्रप्रकरणेदर्शि
तानि॥एतानिगुरुलघुभावेनसमस्तानियोज्यानि॥तामग्निवर्णामितिसूक्तंस्त्रीस्तन
स्फोटहरेनिर्दिष्टं॥ ॥इतिस्वलज्जिह्वात्वहरं॥ ॥अथमूकत्वहरसरस्वतीदानं॥तत्रवृद्ध
मनुपुराणे॥वाग्विरोधंगुरोःकृत्वानवेदकृदत्वानवेदवान्नरः॥तस्यवक्ष्येप्रती

कारं दानेन ऋषिज्ञापितं ॥ पलेनाप्यतदर्धेन तदर्धार्धेन वा पुनः ॥ सारस्वतीं तु प्रतिमां
कुर्याद्भुजचतुष्टयं ॥ वरदं चाक्षसूत्रं च बिभ्रतीं दक्षिणे करे ॥ पुस्तकं चाक्षमं वामे द
धानां हंसवाहनां ॥ अतिशुक्लेन रौप्येण कूटस्वर्णेन चासनं प्रकुर्वीत तथा सम्यक्
सौवर्णं पद्ममुत्तमं ॥ कूटस्वर्णेन ताम्रादिमिश्रितेन रौप्येण कूटस्वर्णेन चासनं पी
ठं विधाय तस्योपरि सौवर्णं पद्मं न्यसेदित्यर्थः ॥ पद्मस्योपरि संस्थाप्य देवीं वागीश्वरीं
परां ॥ शुक्लदामसमायुक्तां शुक्लवस्त्रेण संयुतां वागीश्वर्यादिमंत्रेण पूजयेत्सित
तंडुलैः ॥ श्वेतपुष्पैः श्वेतगंधैः सकलविधिपूर्वकं ॥ वागीश्वर्यादिमंत्रेणेति ॥ यद्वाग्वदं
त्वविचेतनानीतिऋग्द्वयं वागीश्वरीमंत्रः ॥ स चोन्मादवासुहरे दर्शितः ॥ ब्राह्मणः सर्व
वेदस्तत्वस्तेन होमं समाचरेत् ॥ पायसं जुहुयाद्दत्त्वा तंडुलानिमयं तथा ॥ जुहुयात्ताभि
धश्चापितस्याज्यं चतिजानपि ॥ कृताधिवासनामेनामाचार्याय निवेदयेत् ॥ स पूज्य ब्रा

ह्मणं सम्यग्वस्त्रालंकारभूषणैः ॥ मंत्रेणानेन विधिवत्साक्षुखामसुदस्तुरवः ॥ मा वक्त्रे
ब्रह्मणो देवी या सा वागीश्वरी परा ॥ ब्रह्मविष्णुशिवैश्चान्यैः पूजिता सर्ववंदिता तुष्टान
वतु दानेन दत्तेनानेन वाक्प्रदा ॥ वाग्विरोधं गुरोः कृत्वा यन्मेगरुदत्तापणं ॥ तत्सर्वं क्षप
मत्तिप्रं वाग्मी त्वं लोकपावनी ॥ अनुज्ञाप्य ब्राह्मणं तस्य पंचेद्भुंजीत बंधुभिः ॥ अष्टद्रात
मिति ॥ अत्राधिकं दातं कृताधिवासनमित्यनेन रात्रौ जागरणं लभ्यते ॥ अतः पूर्वेद्युरा
त्राविधिवासजागरणं विधाय पुनः पुनः पूजयित्वा होमानंतरं ब्राह्मणाय निवेदयेत् ॥
मावक्त्रदसारम्य लोकपावनीसंतोदानमंत्रः ॥ ॥ इति गुरुदत्तहरसरस्वतीदानं ॥
अथैडमूकत्वहरं ॥ शातातपप्रोक्ते ॥ विद्यापुस्तकहारी चेदेडमूकः प्रजायते ॥ इति
हासचातद्याद्ब्राह्मणाय सदक्षिणां गुर्वनुज्ञामंतरेण वेदाद्यध्येता विद्याहारी ॥ उत्प
त्तिप्रभृति दोषप्रतिबंधश्चोक्तं द्विमस्तादत्वा वागिंद्रियपश्चैडमूकः ॥ इतिहासचातम

हात्मारतं॥ पुस्तकदानमंत्रस्तु मूकत्वहरे प्रदर्शितं॥ ॥इत्येडमूकत्वहरं॥ ॥अथ स्खल
ज्वाक्त्वहरं॥ ॥शातातपप्रोक्ते॥ शुकसारिकयोर्घाती नरः स्खलितवाग्भवेत्॥ स
च्छास्त्रपुस्तकं दद्यात्विप्राय सदक्षिणं॥ प्रत्येकं शुकसारिकाहननिमित्तं॥ सच्छास्त्रा
णि वेदाविरुद्धानि॥ अत्रापि पुस्तकदाने मूकहरत्वोक्तो मंत्रो ग्राह्यः॥ ॥इति स्खलज्ज्वा
क्त्वहरं॥ ॥शातातपप्रोक्ते॥ शुकसारिकयोर्घाती नरः स्खलितवाग्भवेत्॥ सच्छा
स्त्रपुस्तकं दद्यात्विप्राय सदक्षिणं॥ प्रत्येकं शुकसारिकाहनननिमित्तं॥ सच्छास्त्रा
णि वेदाविरुद्धानि॥ अत्रापि पुस्तकदाने मूकहरत्वोक्तो मंत्रो ग्राह्यः॥ ॥इति स्ख
लज्वाक्त्वहरं॥ ॥अथ साधारणेन मुखरोगप्रतिमादानं॥ तत्र लक्षणं चात्रुक्ते ३०२
मुखरोगेष्वित्यादिना भूतज्वररोगहरप्रकरणोक्तमेवात्रापि विज्ञेयं॥ पूजाविधानं त्वातंको
देवतातत्रैत्यादिना परिभाषायां रोग अथ नासिकारोगहरणं॥ ॥कर्मविपाकसंग्रहे

॥नवणस्यापह॥ तत्तु शीर्णघ्राणांघ्रिपाणिकः॥ घर्घरस्वरवांश्चैव जायते तस्य निष्कृ
तिः॥ उपवासपरश्चैव सम्यग्जपेद्दृष्ट्वोक्तराश्रुतं॥ जुहुयाच्चरुं च स्वा प्रर्णादिपरिभाषा
यां रोगप्रतिमादानविधौ द्रष्टव्यं॥ होमोप्यनेनैव रुचेनेन॥ होमसंख्या जपदशांशा
चरुणा एष्यकूसर्पिषादिच पयसक्॥ वासांसीति वक्ष्यवचनात्त्रिस्योनस्मूनानि दद्या
त्॥ कांचनं शक्त्यनुसारेण दद्यात्॥ देवद्विजगवां पूजा देवस्य स्मर्यादेः सुवर्णतिल
कादिभिः पूजा आदित्यस्य सदा पूज्यो तिलकं स्वामिनस्तथा॥ महागणपतेश्चैव कु
र्वन्सिद्धिमवाप्नुयादिति मात्स्यवल्कस्मरणात्॥ स्वामी स्कंदः॥ द्विजः पूजास्त्रकचंद
न॥ वासः सुवर्णादिभिः॥ गोपूजा आहारदानादिभिः॥ ॥इति नासिकारोगहरं॥ ॥अ
ग्नीत्यधिकद्विशातपत्रानंकपृष्ठे पतितं॥ प्रतिमादानं च॥ तत्र लक्षणं च कर्मसारे॥ ज
वाकारैः स्थितो जिह्वाग्रं तरो गोदिवाकुकौ॥ पूजादानि कर्तव्यता कल्पस्तु परिभा

पायां रोगप्रतिमादानविधावातंको देवतानक्षत्रैस्तादिना निरूपितः॥ ॥इति जितः॥॥
इतिजिह्वारोगप्रतिमादानं रंच॥ ॥महार्णवाख्ये महिते प्रबंधे मांधातृनाम्नोम
दनात्मजस्य।सत्कर्मरत्नाबुधिरेकविंशस्तुरंगस्तरंगोयमगाद्गाधः॥ ॥
त्रोधपत्रमत्रथवक्रनासत्वहरं॥॥ शातातपप्रोक्ते॥ ऊकुटेनिहतेचैववक्रना
सः प्रजायते॥ तेननिष्कः प्रदातव्यो ब्राह्मणाय महिरागमः॥ निष्कस्वरूपं परिमाण
प्रकरणेऽस्मधामि॥ ॥इतिवक्रनासत्वहरं॥ ॥अथ नासिकारोगहरं मूर्त्तिदानं
॥ तद्रत्नरत्नाचानुक्तेषु तुरोगेष्वित्यारभ्य मूत्ररोगहरं मूर्त्ति। तद्रत्नरत्नं चानुक्तेषु
तुरोगेष्वित्यारभ्यमूत्ररोगहरप्रकरणोक्तमेवात्राप्यनुगंतव्यं॥ पूजाविधानंत्वा
तंकोदेवतानक्षत्रेत्यादिनापरिभाषायां रोगप्रतिमादानविधावुदीरितं॥ ॥इतिना
सिकारोगमूर्त्तिदानं॥ ॥महार्णवाख्ये महिते प्रबंधे मांधातृनाम्नो मदनात्मजस्या

सत्कर्मरत्नप्रकरं चिते त्रयाविंशाणप्रमितस्तरस्तरंगः॥ ॥अथ नेत्ररोगहरा
णि॥ कर्मविपाकसमुच्चये॥ परदृष्टिविघातेन निष्ठित्याचरेण चकामात्मरत्नि
यं दृष्ट्वा नेत्ररोगी नवेन्नरः॥ चान्द्रायणं पराकं च पंचाशाद्विप्रभोजनं॥ कुर्यादुद्यः सु
पर्णोत्ति चरुणा सर्पिषा तथा॥ अष्टोत्तरसहस्रं तु दत्तां गोप्राणां विपातिकः॥ घर्घर
स्वरवाशैव जायते तस्य निष्कृतिः॥ उद्यन्नघनं च सम्यग्जपेदष्टोत्तरासुतंन्नुऊय
च्चुरुसर्पिस्मारक्तवासांसि कांचनं दद्याद्देवद्विजगवाः कुर्यात्पूजां स्वशक्तितः॥ उ
द्यन्नघन च सायंादिपरिभाषायां रोगप्रतिमादानविधौ दृष्टव्यं॥ होमोप्यनेनैव॥
नचेन॥ होमसंख्याजपदशांशः॥ चरुणा पृथक् सर्पिषा च पृथक्॥ वासांसीतिबहु
वचनात्रिसोनन्यूनानि दद्यात्॥ कांचनंचात्मतुसारेण दद्यात्॥ देवद्विजगवां पूजा दे
वस्य सूर्यादेः सुवर्णतिलकादिभिः पूजा आदिभ्यस्सदा पूजा तिलकं स्वामिनस्तथा॥

महागणपतेश्चैव॥ कुर्वन्सिद्धिमवाप्नुयादिति याज्ञवल्क्यस्मरणात्॥ स्वामीस्कंदः द्वि
जपूजास्नकचंदनवाससुवर्णादिभिः॥ पूजागो पूजाञ्चाहारदानादिभिः॥ ॥इतिना
सिकारोगहरं॥ ॥ज्वरकुमारोगरणांतमे॥ वर्चोदा असि मंत्रंतु जपेदान्यसकांचनं
।दद्यादिप्रायविधिवन्नेत्ररोगः प्रशाम्यति। निषिद्धितयाचारो निषिद्धियाचरण
॥चांद्रायणादिलक्षणानि लक्षणप्रकरणे निरूपितानि। विप्रभोजनमिति॥ एत
द्भोजनं मुख्यप्रधानं॥ मुख्यान्नब्राह्मणेभ्यो दद्यान्नेत्ररोगापनुत्तये॥ इतिब्रह्मांडपु
राणस्मरणात्॥ वयः सुपर्णाइत्यनया चरुघृताभ्यां प्रत्येकं प्रत्येकमष्टोत्तरसह
स्रजुहुयात् इत्थंचरुकं नेत्रशूलहरप्रकरणे दर्शिता। वर्चोदा असीतिमंत्रोपित
त्रैव॥ जपसंख्यातु व्याध्यनुसारेण सहस्रायुतं तात्कल्प्या। सकांचनान्नस्वस्व
रूपं समीक्ष्य प्रभाचक्षुर्भ्रंशक्षयं दद्यात्॥ आज्यवेष्टणमंत्रस्तु कटिशूलहरे दर्शितः॥ ३०४

॥ ॥इति नेत्ररोगहरं॥ ॥अथ नेत्रभ्रमहरं॥ कर्मविपाकसंग्रहे॥ दंपती स्वाप्रदत्ततु
मैथुनं यो निरीक्षिते॥ स नेत्रभ्रमयुक्तः स्यात् रक्षोन्यामिति मंत्रतः॥ जपहोमौ चक्र
वीतश्चाब्राह्मणभोजनं॥ सहस्रकलशस्नानं रवेः कुर्याद्विजोत्तमः॥ नेत्रभ्रम
युक्त इति॥ साक्षात्स्वयंवा अतिप्रचुरतरदृष्टिकावा भ्रममित्यभिधीयते॥ रक्षोन्या
मिती यरुक्मंत्रः॥ इयं चरुकपरिभाषायां रोगप्रतिमादानविधौ प्रदर्शिता॥ ज
पहोमयोः संख्याव्याधिगुरुलघुभावेनाष्टोत्तरशतायुतं तात्कल्प्या॥ जपहोमौ
चेति चशब्देन पुरश्चिकित्सुरहाद्भिस्य जपहोमौ समुच्चीयते॥ अयंच मंत्रोयम
न्यात्मन इतिभिर्द्वामंत्रप्रस्तावे कूष्मांडहोमे दर्शितः॥ जपहोमयोः संख्यातु पूर्वो
क्तैव॥ रवेः सहस्रस्नानं महासौरेण कुर्यात्॥ महासौरं नाम सूर्य दैवत्या ऋचः॥ सू
क्तानि च एतेषां मार्षादि परिभाषायां प्रदर्शितं॥ इदं च स्नानं सूर्यमंडलस्य मूर्त्ते

माहा·
३·५

र्वाक्रमात्तस्माज्ञीमद्भव्यं चतुष्पाज्यमधिक्तुरसप्तुलमतीर्थोदकानिमप्याहृत्य पपत्त्वानि
॥ ॥इतिनेत्रपूमहरं॥ ॥अथप्रकारांतरेणनेत्ररोगहरं॥ज्ञातातपप्रोक्ते॥घृतचौर
स्तुपुरुषोजामतेनेत्ररोगवान्॥उपोष्यसंप्रदद्याद्वै घृतधेनुविधानतः॥घृतधेनु
विधिश्चनृत्यरोगहरप्रकरणेद्रष्टव्यः॥ ॥इतिप्रकारांतरेणनेत्ररोगहरं॥अथांधत्व
धकत्वहरं॥अंधत्वनामप्रतिबद्धदृष्टित्वनोत्पादितनेत्रत्वं।नक्तांधत्वं वा॥ज्ञातात
पप्रोक्तेपि च हाचेतनाहीमोमाचहाधःप्रजायते॥नरकांतेप्रकुर्वीत प्रायश्चित्तं यथा
विधि॥चेतनाहीनोनिम्बेषेनिर्बुधिरस्यापिवक्ष्यमाणप्रायश्चित्तमेवरोगनिष्कृतिहे
तुःनरकांतेंधःप्रजायतइत्यनुषः॥प्रायश्चित्तमाह॥प्राजापत्यानिकुर्वीत त्रिंश ३·५
छायस्य विधानतः॥व्रतांतेकारयेन्नावंसुवर्णपलसंख्यया॥रत्नरौप्यमयंचैव॥ताम्र
पात्रं च पूर्ववत्॥पलसंख्याकापलेनेत्यर्थः॥रत्नोपिपपलेनैव॥पूर्ववदिति॥पलेश्चतुर्नि

र्मितांवाताम्रपात्रंनवेन्नवमितिपरिभाषोक्तप्रकारेणेत्यर्थः॥एतत्त्रपात्रंवक्ष्यमा
णवासुदेवमूर्तिस्थापनार्थपजस्वरूपंपरिमाणप्रकरणेनिरूपितं॥मण्याववक्ष्यमाण
निष्कस्वरूपमपिहेमनिष्केण कर्तव्योदेवः श्रीवत्सलांछनः॥पट्टकूलेनसंवेष्ट्य
पूजयेत्तंविधानतः॥नौकाद्विजायप्रदातव्यासर्वोपस्करसंयुता॥नौकेत्यापलत्त्र
ण॥रत्नोविष्णुप्रतिमाच॥दातव्या॥सोपस्करमिति॥उपस्करमिति॥उपस्करेनौका
दंडः सोपिसौवर्णएव।तंवासुदेवंविधानतः॥पूजयेदित्यन्वयः॥पूजयेदित्यन्तं॥पूजा
विधानंतुपरिभाषायामग्निविधानस्यपुरुषसूक्तविधावस्माभिःप्रदर्शितं॥अत्रायंमंत्र
मः॥ताम्रपात्रेवासुदेवमूर्तिंसंस्थाप्यतत्पुरस्तान्नावस्तंत्रंचोपरिनिहितप्यवासुदे
वपूर्वोक्तप्रकारेणसमभ्यर्चनौकादिसहितावासुदेवप्रतिमांब्राह्मणायदद्यादिति
॥दानमंत्रमाह॥वासुदेवजगद्वंद्य॥सर्वज्ञताणयस्थित।पातकार्णवमग्नमांतारया

श्रितारक॥ इत्युदीर्य प्रणम्याथ ब्राह्मणं तं विसर्जयेत्॥ इत्युदीर्य मंत्रमुच्चार्य प्रति
मादिकं दत्त्वा प्रणम्य विसर्जयेदित्यर्थः॥ अन्येभ्योपि यथाशक्ति विप्रेभ्यो दक्षिणां दिद्यात्
॥ ॥इत्यंधत्वहरं॥ ॥चेतनाहीनत्वहरं च॥ ॥अथ नीलजोचनहरं॥ शातातपप्रोक्ते॥ शा
कहारी च पुरुषो जायते नीलजोचनः॥ ब्राह्मणाय प्रदातव्यं महानीलमणिद्वयं॥ ॥इ
ति नीललोचनत्वहरं॥ ॥अथ कपिलाक्षत्वहरं॥ शातातपप्रोक्ते॥ रीतिरुक्कपिलाक्षः स्या
दुपोष्य दिवसद्वयं॥ रीतिं पलत्रयं तद्दद्याद्दलं कुलद्विजातये रीतिर्नाम ताम्रप्रकृतिको
धातुविशेषः पित्तलमित्युच्यते। पलस्वरूपं परिमाणप्रकरणे निरूपितं॥ ॥इति कपि
लाक्षत्वहरं॥ शातातपप्रोक्ते॥ ॥अथ मंददृष्टित्वहरं॥ कर्मविपाकसंग्रहे॥ उच्छिष्टः सं
स्पृशेदग्निं पद्भ्यां यं तमंतरे॥ मंददृष्टिर्भवेज्जन्म॥ ततथास्नं च पूर्णमुच्छिष्ट एव
सन्॥ नक्षत्राणि पश्यवा चंद्रं संस्तवे मंददृष्टिमुक्॥ अत्र निष्कृतिः कूर्मपुराणे॥ घृतेन च

रूपाणि नेत्रद्वयरश्मिहीनो कुर्यात्राने॥ जुहुयाद्युतं सम्यग्गितिर्गणस्य विनिश्चयः॥ दद्याद्रत्नं
चैव रक्तवासांसि व्याधितं गतये॥ रोगाधिकेषु च घृताभ्यां प्रत्येकमयुतं जुहुयात्॥ रो
गाल्पत्वे तदर्धं च॥ सच परिभाषायां रोगप्रतिमादानविधौ प्रदर्शितः॥ अनादान बी
जरूपाणि अर्धं घृतेनेति मिलित्वायुतसंख्या पूरणीया॥ होममंत्रस्तु पंचत्वमित्रमह
इति ऋचः॥ सच परिभाषायां रोगप्रतिमादानविधौ प्रदर्शितः॥ अन्नदानं ब्राह्मणेभ्यः स्व
शक्त्या वासांसि तिव कुरुवचनात्रिस्मानन्तुनाति॥ ॥इति मंददृष्टित्वहरं॥ ॥अथ ति
मिरहरं॥ कर्मविपाकसमुच्चये॥ देवद्विजगृहे तीर्थे पुण्यस्थाने च संस्थितं॥ प्रदीपं न
न पित्वानु तिमिरव्याधिमान्भवेत्॥ रूपप्रकाशकैर्मंत्रैरर्चिमं अजनततः॥ गात्राणि
प्रोक्षयेत्तस्मान्मुक्तो भवति किल्विषात्॥ सहस्रकलशस्नाने पुराणश्रवणादि स्थाने॥
चतुःषष्ठ्याधिकौ च॥ रूपप्रकाशकैर्मंत्रैः॥ गुणवचनेन॥ रूपशब्देन रूपवचनेन प्रकृष्ट

प्रकाशवारित्योजह्यते॥ अतः सूर्यप्रकाशकैर्मंत्रैर्जलमभिमंत्र्य गात्राणि अंगानि नेत्र
प्रधानानि सुखस्थानानि प्रोक्षयेद्यावद्रोगनिवृत्तिः॥ एतदुक्तं भवति सौरमंत्रेणाभिमंत्रितेन
सलिलमध्ये तत्त्वशरवाघाहन्यास्यनिमंत्र्य तेन नेत्रप्रधानं मुखं प्रक्षालयेदिति॥ रूपप्र
काशकैरित्यस्यान्योर्थः॥ रूपप्रकाशकैर्नेत्रगततेजप्रकाशकैः॥ सौरैरन्यैश्चमंत्रैर्ज
लमभिमंत्र्य तेन नेत्रप्रधानं सुखं प्रक्षालयेदिति॥ तत्रैको मंत्रउपदत्तयथर्वः सौरःप
रिज्ञापामारोगप्रतिमाशनविधौ प्रदर्शितं॥ ॥ अन्यश्च महासौरपरिज्ञापामेव निरू
पितं॥ तथापुनरश्विभ्यां तुरशादिति॥ रूपा उहे मे मंत्रास्तयोर्दर्शिताः॥ वर्चोसे देहीति
चवमःसुपर्णेति॥ चमंत्रौ नयनमलहरेदर्शितौ॥ ॥ एते च मंत्रा विकल्पेन ग्राह्या ३०७
॥ एककार्यास्तु विकल्पेरन्निति॥ ॥ इति तिमिरहरं॥ ॥ अथाक्षिवेदनाहरगरुडदानं॥ प
ञ्चपुराणे॥ ॥ परेषामक्षिरोधेन जायते ह्यक्षिवेदना॥ वक्ष्यामि तस्य तीकारं ब्रह्मणा नाथि

तं पुरा॥ यत्नेन कारयेद्धेम्ना गरुडं विष्णुवाहनं॥ राजतौ च तथा पक्षौ रत्नबद्धौ सुविस्तृतौ॥
कर्तव्यं चाक्षियुगलं माणिक्याभ्यां प्रकल्पितं॥ पादयोः स्वर्णकटकेरत्नाभ्यां परिकल्पये
त्॥ रत्नाभ्यामिति॥ रत्नयुक्तकटकद्वयं कुर्यादित्यर्थः॥ ग्रैवेयकं स्वर्णमयं ग्रीवायां स
विन्यसेत्॥ नासिकायां च वैडूर्यं मौक्तिकैः परिकल्पयेत्॥ मौक्तिकैर्युक्तवैडूर्यमि
त्यर्थः॥ वस्त्रैर्नानाविधैर्धूपैर्धूपमलंकृत्य सुन्नाकृतिं॥ स्थापयेत्पुरतो विष्णुप्रीत्यर्थं
च खगाधिपं॥ वेदवेदांगकुशलं वेदविद्याविशारदं॥ गंधपुष्पाक्षतैर्वस्त्रैर्दक्षिणात
ब्राह्मणोत्तमं॥ पूजयेत्संस्तु चिर्नत्वा गंधपुष्पाक्षतादिभिः होमश्चात्र कर्तव्यो मंत्रै
स्तद्वाचकैः सुतैः॥ यद्वा गरुडगायत्र्या समिदाज्यतिलादिभिः॥ अस्यैः प्रतिष्ठाकामो
तु स्वगृह्योक्तविधानतः॥ ॥ विष्णोः पुरत इति॥ विष्णुलक्ष्ये विष्णोः पुरतः स्थापयित्वेतल
र्मक्कुर्यादित्यर्थः॥ अथवा शालिग्रामपुरतः कार्यः॥ मंत्रैस्तद्वाचकैरिति॥ तद्वाचकैः

माहा॰
३०८

गरुडप्रकाराकैर्मंत्रैरिति वचनं स्वस्वगणस्वागतमंत्रोपलक्षणार्थं तत्रैकोमंत्रोमनो
जवाश्रयमाणा इति॥ अस्य मनोमा नागवरुषिः सुपर्णो देवतानुष्टुप्छंदः विहितार्थे
विनियोगः॥ मनोजवाश्रयमाण आयसी॥ मतरस्तुरो दिवं सुपर्णो गत्वाय सोमं वज्रि
ण आजरत्॥ गरुडगायत्र्या व्यास ऋषिः॥ ब्रह्मा वा। गायत्री छंदः॥ गरुडो देवता वि
हितार्थे विनियोगः॥ पक्षिराजाय विद्महे स्वर्णपक्षाय धीमहि॥ तन्नो गरुडः प्रचोदया
त्॥ समिदाज्यतिलादिभिरिति॥ आदिशब्देन चयवव्रीहयो गृह्यंते॥ होमसंख्या च
प्रतिद्रव्यमष्टोत्तरशतं एवं पूज्य कृत्वा च किं कुर्यादित्यत आह। पुण्याहवाचनं कार्यं
ब्राह्मणैर्वेदपारगैः॥ तस्मै कृतवते दद्याद्धौरिष्टीलप्यमादतः॥ च कृत्वा संपूज्य वि ३०८
धिवत्केशवरकृष्टकादिभिः॥ मंत्रेणानविधिवत्साध्युखः॥ एतच्च पुण्याहवाचनं स
नानंतरं कार्यं दानमंत्रमाह॥ देवदेव जगन्नाथ लक्ष्मीप्रियपरायण॥ वाहनस्य प्र

दानेन हर कर्मविपाकजं॥ अक्षिरोगं जगन्नाथ नारायण जगन्मय॥ पुष्पं वा पाटलं
वा पिबातरक्तम ज्ञियापि वा॥ रक्तं वाप्यथ रक्तांतं तथार्बुदमथापि वा॥ ततो विसर्ज्य
विप्रेंद्रं विष्टैरिष्टैश्च बंधुभिः॥ स्नात्वा विप्रान्भोजयित्वा सुखी भवति मानवः॥ दाना
नंतरं स्नात्वा पुण्याहवाचनं विधायाज्यावेक्षणं कृत्वा विप्रान्भोजयित्वा बंधुभिः
सार्धं भुंजीतेत्यर्थः॥ पुण्याहवाचनं कार्यमित्यत्रैव प्राग्विहितं॥ आज्यावेक्षणं तु ब्र
ह्मांडपुराणे॥ अक्षिसंज्वरोगाणामाज्यकनकसंयुतं॥ दद्याद्विप्राय विधिवत्तद्रोग
स्यापनुत्तये इति॥ आज्यावेक्षणमंत्रस्तु कटिसूत्रहरे दर्शितः॥ इत्यक्षिरोगहरगरु
डदानं॥ ॥ अथ नक्तांध्यहर गोपालदानं॥ ब्रालेनक्तांध्यं जायते तस्य रोगवानयन
दये॥ करोति सूत्रमष्टैपं तस्य वक्ष्यामि निष्कृतिं॥ विष्णोः श्रीगोपवेषस्य सम्यग्ध्यात्वा
क्तानुचक्रितसुवर्णेन प्रतिकृतिं वेणुवादनतत्परं॥ बर्हापीडकसंयुक्तां द्विभुजा

माहा०
३०९ न्यर्धे संस्थितां॥ कारयित्वाग्युत्तारां प्रस्तात्म्युचिवादिना॥ वस्त्रेण वेष्टयित्वा च
गंधमाल्यैः समर्चयेत्॥ तदुत्तोपरि संस्थाप्य देवं शक्त्यनुसारतः॥ आचार्यः सर्व
शास्त्रज्ञो वेदवेदांगपारगः॥ पूजां च मूलमंत्रेण कुर्याद्देवस्य भक्तितः॥ शक्त्यनुसार
तो गंधमाल्यैः समर्चयेदित्यन्वयः॥ पूजां च मूलमंत्रेणेति॥ मूलमंत्रोच्चारश्लोकस्य
मंत्रराजश्लोके हंसामध्यगता पगोवर्णसमध्यतः गोपीजवनकारास्फुर्गाय
स्वाहास्मरादिकः॥ उद्धृतमंत्रः॥ क्लीं कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहा॥
अस्य नारदऋषिः॥ गायत्री छंदः॥ गोपीजनवल्लभो देवता विहितार्थे विनियोगः॥ हो
मं तत्र प्रकुर्वीत समिदाज्यतिलैरपि॥ इदं विष्णुः प्रतद्विष्णुर्विष्णोर्नुकमिति क्रमात्॥ ३०९
मंत्रराजोक्तमार्गेणाचाग्नेः संस्थापनं भवेत्॥ जुहुयान्मूलमंत्रेण विधिसंपादि
तं चरुं॥ प्रणीतामोक्षपर्यंतं कृत्वा देवं प्रपूजयेत्॥ देवस्य दक्षिणे वेद्यां हविः सर्वं

समंततः॥ इदं विष्ण्वाद्यो मंत्राः क्रमेण समिदादिहोममंत्रा भवंतीत्यर्थः॥ समिधोमा
नंतरं पूर्वोक्तेन मंत्रेण विधिसंपादितस्वगृह्योक्तप्रकारेण पक्वं चरुं हुत्वा पश्चादा
ज्यादिहोमः कार्यः॥ प्रतिद्रव्यमष्टोत्तरशतं॥ इदं विष्णुरित्यस्य॥ ऋष्यादि नवग्रह
मखप्रकरणे दर्शितं॥ प्रतद्विष्णुर्विष्णोर्नुकमित्यनयोस्तु दीर्घतमा ऋषिः॥ विष्णुर्देवता
त्रिष्टुप्छंदः॥ क्रमेणाज्यतिलहोमयोर्विनियोगः॥ प्रतद्विष्णुस्तवते वीर्येण मृगो न
भीमः कुचरो गिरिष्ठाः॥ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा॥ वि
ष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि॥ यो अस्कभायदुत्तरं
सधस्थं विचक्रमाणस्त्रेधोरुगायः॥ विष्णवे त्वा॥ एवं होमं विधाय॥ स्वगृह्योक्तमा
र्गेण प्रणीतामोक्षपर्यंतं कर्म कृत्वा पुनरपि देवं गोपीजनवल्लभमूर्तिं प्रपूजयेत्
॥ प्रकृष्टं यथा तथा पूजयेत्॥ अस्यां पूजायां होमार्थं संपादितं हविर्नैवेद्यं॥ अन्य

च संपादितं सर्वमपि पक्वान्नादि॥ एवं नैवेद्यं दत्वा पश्चात्समंततो देवमन्वितः परि
तो देवमन्वितः परितो दद्यात्॥ अष्टदिक्षु बलिं हरेदित्यर्थः॥ पूर्वोक्तकर्मानंतरं क
र्त्तव्यतामाह॥ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः॥ दद्याद्गोगीग्रासमुत्सुः प्र
तिमां च सदक्षिणां॥ मंत्रेणानेन विधिवन्नमस्कृत्यायनक्तितः॥ दानमंत्रमाह॥ गोविं
द गोपीजनवल्लभेशांकंसासुरघ्नत्रिदशेंद्रवंद्य गोवर्धनादिप्रवरैकहस्तसंरक्षिता
शेषगवामनीक गोचत्तुषश्चातिनिरोधनेनजातात्तिमां च्यममनाशमाशुत्व
दीयदानेहि सुदृष्टरूपं नक्तांध्यमेतत्समपाकरोतु॥ एवं कृत्वा प्रतीकारं गोप
वेषस्य दानतः॥ अचिरादेव हि सुखी जायते नात्र संशयः॥ ॥ इति नक्तांध्यहरगो
पाजदानं॥ ॥ अथ कामलाहरगरुडदानं॥ हृधगौतमः॥ कामली नक्तंचोरस्मा
त्स्यवक्ष्यामि तिष्ठति॥ कुर्याच्च प्रतिराजानं विष्णोर्वाहनमुत्तमं॥ सुवर्णेन यथा

शक्त्या पक्षयोर्मौक्तिकद्वयं॥ नासिकायां तथा वज्रमुत्तरीयं च राजतं॥ एवं कृ
त्वा गरुत्मंतं घृतद्रोणोपरिन्यसेत्॥ द्रोणलक्षणं परिमाणप्रकरणे दृष्टव्यं॥ श्वे
तवस्त्रेण संवेष्ट्य श्वेतमाल्यैः समर्चयेत्॥ सर्वज्ञस्यार्पयेत्तत्त्वज्ञो वैस्सबोधमर्म
पाठकः॥ ब्राह्मणस्त्वर्चितो नक्त्या यजमानेन शक्तितः॥ उपचारैः षोडशभिर्द्विज
मभ्यर्चयेत्तथा॥ द्विजपत्निंगरुत्मंतमितिपावत्॥ दृष्टो ब्राह्मणः श्वेतवस्त्रादि
भिर्द्विजमभ्यर्चयेदित्यन्वयः॥ आग्नेय्यादिदिशि होमश्च कर्त्तव्यः स्थंडिले शुभे॥ समि
दाज्यतिलैस्तत्र पालाशः समिधस्मृताः॥ मंत्रो गरुडगायत्री समिदाज्यकृतौ भ
वेत्॥ तिलहोमो व्याहृतिभिस्ततः स्विष्टकृतं यजेत्॥ आग्नेय्यां दिशि लादि॥ गरु
डपूजास्थानादाग्नेय्यां॥ होमसंख्या तु प्रतिद्रव्यमष्टोत्तरशतं गरुडगायत्री त्वक्षि
वेदनाहरगरुडदाने दर्शिता॥ स्विष्टकृतं यजेत्॥ स्विष्टकृद्धोमः कर्त्तव्यः॥ सच

मा.हा. स्वर्गलोकप्रकारेण॥ तत्र कथ्यन्त स्विष्टकृद्धोमप्रकारः॥ कूष्मांडहोमप्रकरणोद
३११ दीरितः॥ स्थापयेद्व्रणं कुंभे सितवस्त्रेण वेष्टयेत्॥ निक्षिपेत्तं च रत्नानि मृत्तिकाम्या
पि रोचनं॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्॥ पंचत्वक्पल्लवानि
स्तुः पूरयेत्तीर्थवारिणा॥ स्थापयेद्व्रणं कुंभमिति॥ अत्र पाठक्रमेण विवक्षित
ः॥ अतो होमात्पूर्वं गरुडपूजासमयरावतदनंतरं वा रोगिणस्यादितिकलशं
स्थापयेत्॥ रोचना गोरोचना॥ पंचत्वचः॥ आम्राश्वत्थवटप्लक्षोदुंबराणां व
ल्लवान्यपि तेषामेव॥ अस्मिन्कलशे नवग्रहयन्त्रप्रकरणोक्तैर्वारुणैर्मंत्रैर्वरु
णाय नम इति मंत्रेण वरुणमावाह्य संपूजयेत्॥ एवं गरुडपूजाकलशस्थापन ३११
होमानंतरं कर्तव्यमाह॥ तेनाभिषेकं कुर्वीत आपो हिष्ठादिभिः क्रमात्॥ हिर
ण्यवर्णा इति च पवमानेन चैव हि आपो हिष्ठा मयोभुव इति च हिरण्यवर्णा इत्या

द्यश्च मंत्राः परिभाषायां रोगप्रतिमादानविधौ निरूपिताः पवमानेन स्वादि
ष्ठयेति सूक्तेन पवमानः सुवर्जन इत्यनुवाकेन च तत्र स्वादिष्ठयेति सूक्तः पांडु
रोगहरदृष्टादाने द्रष्टव्यं॥ पवमानः सुवर्जन इत्यनुवाकस्तु गणहोमप्रकरणोद
दीरितः॥ एवमभिषेकानंतरं किं कुर्यादित्यत आह ततः स्नात्वा शुची रोगी विलोक्य वा
हनमुत्तमं॥ सदक्षिणं मुदा युक्तः प्राङ्मुखाय निवेदयेत्॥ मंत्रेणानेन विधिवद्ब्राह्म
णाय सुखदःखुखः॥ श्रीकृष्ण परमानंद जगतः परिपालक॥ पूर्वजन्मनि यत्पाप
क चौर्यं मया कृतं तेन प्राप्तं च वैरूप्यं यन्मया तत्तु सह॥ कामलोछमिदं देव
त वाहनदानतः॥ विनाशयाशु मे कृष्ण जगतः पालकोऽसि॥ एवं गरुडदानं॥
तु कृत्वा मर्त्यः सुखी भवेत्॥ आचार्यं भोजयित्वा तु प्रणिपत्य विसर्जयेत्॥ ॥ इति
कामलाहरगरुडदानं॥॥ अथ ककराहत्वहरं॥ ॥ शातातपप्रोक्ते॥ तरक्षौनि

हतेचैवजायतेकेकरेक्षणः॥ दध्याद्रत्नमयींधेनुंसवत्सांतकरांतमे॥ तरद्रत्नमणाद
यः॥रत्नधेनुविधिस्तुत्तमरोगहरेघृतधेनुप्रसंगेनदर्शितः॥ ॥इतिकेकराक्षत्व
हरं॥ ॥अथपिंगलेक्षणत्वहरं॥ ॥शातातपप्रोक्ते।मार्जारेनिहतेचैवजायतेपिं
गलेक्षणः॥ तेनवैडूर्यरत्नानिदातव्यानिस्वशक्तितः॥रत्नानीतिबहुवचनं॥त्रिसं
ख्यानत्वप्रतिपादनार्थं॥स्वशक्तितइति॥त्रिषुपिरत्नेषुमूल्यगताल्पत्वबहुत्वद्योतनं
यंत्रिसंख्याधिकसंख्याद्योतनार्थं॥ ॥इतिपिंगलेक्षणत्वहरं॥अथनेत्ररोगहरतर्पणं
॥अत्रायंवैदिकमांत्रिकसंप्रदायः॥ तद्यथा॥उद्यन्नद्यर्चेनपच्छार्धर्चशोरुक
कसार्धशस्ततस्त्र्यचेनेति॥ पूर्वोक्तमार्गाद्यत्रसौकर्याययमन्त्रिधीयते॥ उद्यन्न
द्यन्नेनपच्छोपर्धर्चशोरुक्कसार्धशस्ततस्त्र्यचेनेति।पूर्वोक्तमार्गाद्यत्रसौकार्य
यमन्त्रिधीयतेउद्यन्नद्यमित्रमहः॥ॐसूर्यंतर्पयामिॐहरिमाणंचनाशय॥ॐसू ३१२

र्यंतर्पयामिॐहरिमाणंचनाशय॥ॐसूर्यंतर्पयामिॐशुकेषुमेहरिमाणं॥ॐसूर्यं
तर्पयामिरोपणाकासुदध्मसि॥ॐसूर्यंतर्पयामि॥अथोहारिद्रवेषुमे॥ॐसूर्यंत
र्पयामि॥हरिमाणंनिदध्मसि॥ॐसूर्यंतर्पयामि॥ॐउदगादयमादित्यो॥ॐसूर्यंत
र्पयामि॥ॐविश्वेनसहसासह॥ॐसूर्यंतर्पयामि॥ॐद्विषंतंमह्यंरंधयन्॥ॐसूर्यंतर्पया
मिॐसूर्यंतर्पयामिॐमोअहंद्विषतेरधं॥ॐसूर्यंतर्पयामि॥अथोहारिद्रवेषुमेह
रिमाणंनिदध्मसि॥ॐसूर्यंतर्पयामि॥ॐउदगादयमादित्योविश्वेनसहसासह॥ॐ
सूर्यंतर्पयामि।द्विषंतंमह्यंरंधयन्मोअहंद्विषतेरधंयन्मोअहंद्विषतेरधंॐसूर्यंतर्प
यामि॥इत्यर्धर्चशः॥अथऋक्ॐउद्यन्नद्यमित्रमहआरोहन्नुत्तरांदिवं॥हृद्रोगंम
सूर्यहरिमाणंचनाशय॥ॐसूर्यंतर्पयामि॥ॐशुकेषुमेहरिमाणं॥रोपणाकासु
दध्मसि॥अथोहारिद्रवेषुमेहरिमाणंनिदध्मसिॐसूर्यंतर्पयामि॥उदगादय

मा॰टी॰
३१३

मादयमादित्यो विश्वेन सह॥ द्विषंतं मह्यं रंधयन्मो अहं द्विषते रधं ॐसूर्यं तर्पयामि॥ इस
कूक्सप्तसार्धककू: उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवं हृद्रोगं मम सूर्य हरिमाणं
रोपणाकासु दध्मसि ॐसूर्यं तर्पयामि॥ ॐअथो हारिद्रवेषु मे हरिमाणं निदध्मसि॥
उदगादयमादित्यो विश्वेन सहसा सह॥ द्विषंतं मह्यं रंधयन्मो अहं द्विषते रधं ॐसू
र्यं तर्पयामि दृष्टोऽइति सार्धरुक्कू:॥ अथ परचेत्तत्रिः॥ ॐउद्यन्नद्य मित्रमह आरोहन्नुत्त
रां दिवं। हृद्रोगं मम सूर्य॥ हरिमाणं च नाशय॥ शुकेषु मे हरिमाणं रोपणाकासु दध्म
सि॥ अथो हारिद्रवेषु मे हरिमाणं निदध्मसि॥ उदगादयमादित्यो विश्वेन सह सासह
॥ द्विषंतं मह्यं रंधयन्मो अहं द्विषते रधं ॐसूर्यं तर्पयामि एवं दृचेन रविर्द्दि॥ अ
स्य सकृज्जप्ता पितर्पणप्रयोगस्यापि ध्रुवसारेण एकविंशतिरष्टोत्तरशतमिता वावृ
त्तिः कल्पनीया॥ अत्र तर्पणे रक्तचंदनरक्तपुष्पाणि ग्राह्याणि॥ अथ संचतर्पणप्रका ३१३

रेण केवलं नेत्ररोगहरः अपि तु ज्वरादिहरोपि॥ ॥ इति नेत्रादिरोगहरतर्पणं॥ ॥ अ
थ कामलारोगप्रतिमादानं॥ ॥ तल्लक्षणं च कर्मविपाकसारे॥ ॥ पीतांगः कामलारो
गः कपाली सुराख्यान्वितः। पूजाविधानं वातं कोदेवता तत्रेत्यादिना परिज्ञाया मां
रोगप्रतिमादानविधा व्याख्यातं॥ ॥ इति कामलारोगप्रतिमादानं॥ ॥ अथ साधा
रणेन नेत्ररोगप्रतिमादानं॥ ॥ तल्लक्षणं कर्मविपाकसारे॥ अक्ष्णोर्नृरोगस्तु पा
रपादान्नहरणान्मयः॥ पूजादानिकर्तव्यता क[illegible]प्यस्तु परिज्ञाया मां रोगप्रतिमा
दानविधावातं कोदेवता तत्रेत्यादिना दर्शितः॥ ॥ इति साधारणेन नेत्ररोगप्रतिमाद
नं॥ ॥ महार्णवाख्ये महिते प्रबंधे माधारत्नाक्मोमदनात्मजस्य सत्कर्मरत्नोपचितेग
तो यस्त्वात स्मये विंशतमात्तरंगः॥ ॥ अथ पकर्णरोगहराणि॥ ॥ कर्मविपाकसंग्र
हे॥ मातापितृगुरूणां च देवब्राह्मणयोस्तथा॥ शृणोति निंदां बुध्याथः कर्णाज्ञानस

रोगिणि तं॥ पूर्वं च प्रस्तव लस्य गतिः कृच्छ्रचतुष्टयात्॥ हिरण्यरक्तवस्त्राणां दानाद्ब्रा
ह्मणभोजनात्॥ जपाद्धोमाच्च जपति सौरमंत्रेण शंकितः॥ शंकित इति॥ सर्वत्रास्त
वध्यते॥ अतः कृच्छ्रेष्वपि शक्त्यनुसारेण प्राजापत्यपराकचांद्रायणादीनि ग्राह्या
णि॥ एतस्त्रत्रीणि च कृच्छ्रकरणे दर्शितानि हिरण्यादिदानान्यपि स्वशक्त्यनु
सारेण कुर्वीत जपो होमश्च सौरमंत्रेण ऐन्द्रसूक्तादिभिः कार्यः सौरमंत्राश्चा
त्राघनघृत्वेच॥ अस्य चार्णादिनेत्ररोगहरतर्पणे दर्शितं॥ ॥इति कर्णपूयरोगिणि
तहरं॥ ॥अथ कर्णकृमिरोगहरं॥ कर्मविपाकसमुच्चये॥ सर्वाचारविहीनश्च
प्रेतश्राद्धान्नादनः॥ सत्त्वे कृमिकर्णस्तु तस्यापस्यापनुत्तये॥ दद्यान्नीलवृषा
न्सं च यथोक्तविधिना नरः॥ नीलवृषलक्षणं तत्र गवां ग्रहणे दर्शितं विधानतः॥ वृ
षदाने प्रयोगस्तु बरकाचनशलनेन प्रकारेण वृषदानमंत्रस्तु नवग्रह

यज्ञप्रकरणे दर्शितः॥ ॥इति कर्णकृमिरोगहरं॥ ॥अथ बाधिर्यत्वहरं॥ ॥शाता
तपप्रोक्तं॥ ॥स्वसत्यातोच बधिरो नरको ते प्रजायते॥ तेन कार्यं विमुक्ष्यर्थं यति
चान्द्रायणत्रयं॥ व्रतांते पुस्तकं दद्यात्सुवर्णफलसंयुतं॥ ब्राह्मणाय चतुर्वेदवि
दे वस्त्रेण संयुतं॥ इमं मंत्रं समुच्चार्य ब्राह्मणाय चतुर्वेदविदे वस्त्रेण संयुतं॥ इ
मं मंत्रं समुच्चार्य ब्राह्मणं तं विजसर्जयेत्॥ इमं मंत्रं समुच्चार्य पुस्तकं दद्यादि
त्यन्वयः॥ तमेव दानमंत्रमाह॥ सरस्वति जगन्मातः शब्दब्रह्माधिदेवते॥ दुःक
र्मकारिणं पापं रक्ष मां परमेश्वरि॥ यतिचांद्रायणलक्षणं च कृच्छ्रप्रकरणे परि
माणप्रकरणे चास्माभिः॥ ॥इति बाधिर्यहरं॥ ॥अथ कुब्जकर्णत्वहरं॥ शा
तातपप्रोक्ते॥ शय्यां दद्यात्स विप्राय सोपधानां सतूलिकां शय्यादानमंत्रस्तु
नवग्रहयज्ञप्रकरणे दर्शितः॥ ॥इति कुब्जकर्णहरं॥ ॥अथ कर्णरोगप्रतिमारानं॥

मा.हा. ३१५

तत्रलक्षणंचकर्मविपाकसारे॥कर्णरोगःकृतघ्नःस्यात्सकपालोजपन्स्थितः॥पूजा
विधिस्तुपरिभाषायांरोगप्रतिमादानविधावातकोदेवतातत्रेत्यादिनाख्यातः॥॥
इतिकर्णरोगप्रतिमादानं॥ ॥महार्णवाख्येमदितेप्रबंधेमांधातनाम्नोमदनात्मज
स्य॥सत्कर्मरत्नोपचितेगतोसंख्यातरंगस्तुविंशतमातरंगः॥ ॥अथवक्रकंठरोगहर
णं॥शातातपप्रोक्ते॥अप्येवंविनिहतेचैववक्रकंठःप्रजायते॥प्राजापत्यानिचत्वा
रिसप्तधान्यानिवैसृजेत्॥दत्त्वाफलनिदद्याच्चचंदनंसद्विजातये॥प्राजापत्यस्व
रूपंकृच्छ्रप्रकरणेनिरूपितं॥सप्तधान्यानिव्रीहिशालियवगोधूममाषानिष्पावसं
ज्ञवंदद्यात्पूजनलक्षणंपरिमाणप्रकरणेबोधव्यं॥ ॥इतिवक्रकंठत्वहरं॥ ॥अ ३१५
थदीर्घगलत्वहरं॥ ॥शातातपप्रोक्ते॥बकघातीदीर्घगलोदद्याज्जांबवंतोमु
तां॥गोदानमंत्रोनवग्रहयज्ञप्रकरणेदर्शितः॥ ॥इतिदीर्घगलत्वहरं॥ ॥अथ

कंठरोगहरं॥ब्रह्मांडपुराणे॥ ॥अन्नस्यान्नस्यशेषात्तुकंठरोगःप्रजायते॥ ॥कृच्छ्र
त्रयंप्रकुर्वीतदद्याद्धेनुंसदक्षिणां॥दद्याद्वैकंठरोगाणांकंबलंकमलोद्भवं॥कृच्छ्रल
क्षणंकृच्छ्रप्रकरणेदर्शितंधेनुदानमंत्रस्तुनवग्रहयज्ञप्रकरणेनिहितः॥कंबल
दानमंत्रस्तुऊर्णाच्छादनलोकानांशीतवातश्रमापहं॥सर्वदुःखहरंयस्मादतःशां
तिंप्रकल्पयेत्॥ ॥इतिकंठरोगहरं॥ ॥अथविकृतस्वरहरं॥शातातपप्रोक्ते॥उ
ष्ट्रंविनिहतेचैवजायतेविकृतस्वरः॥सतत्पापविशुद्ध्यर्थंकृच्छ्रमेकंचरेन्नरः॥क
र्पूरस्यपलंदद्यात्ताराद्व्याणिशक्तितः॥कृच्छ्रपलयोःस्वरूपंपरिभाषायांत
त्तत्प्रकरणेनिहितं॥कर्पूरदानमंत्रस्तुकर्पूरंरुचिरंविप्रगृहाणेमंसुपूजि
तं॥पुष्पगंधस्थितानासामेकमज्ञामीमनामिति॥ ॥इतिविकृतस्वरत्वहरं॥ ॥
अथकंठरोगप्रतिमादानं॥तत्रलक्षणंतु॥कर्मविपाकसारे॥कंठरोगःकृत

माहा. त्वासो द्विभुजः पाशांकुशधरः ॥ कपालमालाभूद्दीर्घः सोत्तीर्णो हारकत्वचाः ॥
३१६ पूजादानि कर्त्तव्यता कलापस्तु परिभाषायामातं कोदेवतातत्रेत्यादिना रोगप्र
तिमादानविधौ निरूपितः ॥ ॥ इति कंठरोगप्रतिमादानं ॥ ॥ महार्णवकर्मविपाके प्र
बंधे माधारनाम्नो मदनात्मजस्य ॥ सत्कर्मरत्नप्रकरेण — — पूर्णस्तरंगः खलु पं
चविंशः ॥ ॥ अथ पाणिरोगहराणि ॥ शातातपप्रोक्ते ॥ पारावपतेच निहते पीत
पाणिः प्रजायते ॥ पारावतंच सौवर्णं प्रदद्यान्निष्कमात्रकं ॥ निष्केयत्तापरिमा
णप्रकरणे समुपवर्णिता ॥ ॥ इति पीतपाणित्वहर ॥ ॥ अथ ह्रस्वपाणित्वह
रं ॥ शातातपप्रोक्ते कंदमूलस्य हरणं ह्रस्वपाणिः प्रजायते देवतायतने कु ३१६
र्यादुद्यानं तस संज्ञं तमे ॥ चांद्रायणं च कुर्वीत ब्रह्मकूर्चविधानतः ॥ चांद्रायणब्रह्म
कूर्चयोर्लक्षणं कृच्छ्रप्रकरणेऽभ्यधायि ॥ ॥ इति ह्रस्वपाणित्वहरं ॥ ॥ अथ स्विन्नपा

णित्वहरं ॥ ॥ शातातपप्रोक्ते ॥ स्नारहारीच पुरुषः स्विन्नपाणिः प्रजायते ॥ स द
द्याच्च विप्राय काश्मीरं च पलत्रयं ॥ काश्मीरं कुंकुमकेसरः ॥ तद्दानमंत्रस्तु क
तस्वरत्वहरोक्तः कर्पूरदानमंत्र एव ॥ तत्र कर्पूरं रुचिरमित्यत्र काश्मीरं रुचिर
मित्यूहः कार्यः पलः स्वरूपं परिमाणप्रकरणे निरूपितं ॥ ॥ इति स्विन्नपाणित्वहरं
॥ ॥ अथ भुजस्तंभहरं ॥ ॥ शातातपप्रोक्ते ॥ अयोनौ चैव गमनात् भुजस्तंभः प्रजा
यते ॥ सहस्रकलशस्नानं शंभोः पूजामथाविधि ॥ चांद्रायणस्याचरणं तत्र प्रकु
र्यात्तु निष्कृतिः ॥ ईश्वरस्य सहस्रकलशस्नानप्रकारः ॥ पूजाप्रकारश्च रुद्रवि
धाने अभिषेकप्रकरणे निरूपितः ॥ तत्र स्नाने च रुद्रानुवाकमंत्राः ॥ चांद्रायणत
प्तकृच्छ्रयोर्लक्षणं कृच्छ्रप्रकरणे दर्शितं ॥ ॥ इति भुजस्तंभशमनं ॥ ॥ अथ कुनखि
त्वहरं ॥ ॥ शातातपप्रोक्ते ॥ ॥ कुनखी नरकस्यांते जायते विप्रहेमहृत् ॥ स सुवर्णं

पलं दद्यात्कृत्वा चांद्रायणत्रयं॥ कुनखी जायते हस्तस्वर्णः॥ पलं चांद्रायणमोर्जन्यत्तां
तत्प्रकरणे निहितं॥ ॥इति कुनखित्वहरं॥ ॥अथ पाणिरोगप्रतिमादानं॥ तत्र स्त्रीणां
चातुर्केषु रोगेपि स्त्रादिनाम्ज्वरोगहरप्रकरणोक्तमेवात्राप्यनुसंधेयं॥ पूजा विधानं
तु परिज्ञापयामासा तं कोहं वतात त्रेलादिना रोगप्रतिमादानविधौ निरूपितं॥ ॥
इति पाणिरोगप्रतिमादानं॥ ॥महार्णवाख्ये महितैः प्रबंधे मांधाररुपाज्ञा नाम्नो मदना
त्मजस्य॥ सत्कर्मरत्नप्रकरेण पूर्णो व्यद्वि शारगपः प्रथितस्तरंगः॥ ॥अथ हृद्रोगह
रं॥ शातातपप्रोक्ते॥ उदक्या वीक्षितं भुक्त्वा जायते कृमिजोदरः॥ गोमूत्रयावकाहारः स
प्तरात्रेण शुध्यति गोमूत्रयावकलक्षणं॥ कृच्छ्रप्रकरणे निहितं॥ ॥इति कृमिजोदरत्व ३११
हरं॥ ॥अथ कृमिहरं॥ शातातपप्रोक्ते॥ अनभ्यस्य ऋणं चैव जायते कृमयो हृदि य
धावत्तद्धि शुध्यर्थं पुरोषं नीष्मपंचकं यथावत् व्रतां गन्तं ब्रह्मचर्यं दक्षिणादाना

गुणयुक्तमित्यर्थः॥ कार्तिकशुक्लैकादश्यादीनि वा माघशुक्लैकादश्यादीनि वा पंच
दिनानि भीष्मपंचकमित्युच्यते॥ ॥इति हृत्कृमिहरं॥ ॥अथ कृमिकुक्षित्वहरं॥ ॥क
र्मविपाकसमुच्चये॥ जंतुविनिहते चाद्ये कृमिकुक्षिस्तु जायते तथा॥ मृतेऽतर्ये द्रिया
नारीनीलीवस्त्रं प्रधारयेत् तस्मान्नानरकं याति कृमिकुक्षिस्ततः परं॥ ततः परं॥ न
रकोपभोगानंतरं मानुषशरीरमासाद्येत्यर्थः॥ स नीलवस्त्रत्यागं चरेत् चांद्रायण
व्रतं॥ कुर्यात्त्रिरात्रादिज्ञात्वोज्ज्वारच्याछ्छेमात्वमौषधं॥ नीलवस्त्रलक्षणं॥ तत्प्रकरण ह
रे निहितं॥ हवनदानमंत्रस्तु नवग्रहमखप्रकरणे निहितः॥ चांद्रायणस्वरूपं तु
कृच्छ्रप्रकरणेऽभ्यधायि॥ तु पथ्यं कृमिकुक्षिहरत्वेन वैद्यशास्त्रोक्तं॥ ॥इति कृमिकु
क्षिहरं॥ ॥अथ कुक्षोदरत्वहरं॥ ॥शातातपप्रोक्ते॥ तुला वासरत्वपसंस्पृष्टं जाय
ते तु कुक्षोदरः॥ त्रिरात्रं वै स्नवकुर्यात् मातद्धि प्रमुच्यते विप्लवं विस्मृदे चेनक्रिय

मासं व्रतमुपवासात्मकं कुर्यादिति मार्गः ॥ ॥ इति क्रोडरत्वहरं ॥ ॥ अथोदरगुल्म
हरं शातातपप्रोक्ते इन्द्रोर्विकारहा राचनवे उदरगुल्मवान् ॥ गुडधेनुं प्रदातव्या
तेनतद्दोषशांतये ॥ गुडधेनुविधिस्तु तत्तमरोगहरप्रकरणे कथितः ॥ ॥ इत्युदरगुल्म
हरं ॥ ॥ कर्मविपाकसंग्रहे ॥ गुरोः प्रत्यर्थितां ॥ यातो गुल्मवान् जायते नरः ॥ गुल्मवान्
वातगुल्मवानित्यर्थः ॥ आचरेत्तन्निरुत्यर्थं मासमेकं पयोव्रतं ॥ मुंचामि त्वेति सूक्ते
प्रत्यृचं चरुसर्पिषा ॥ जुहुयादमृतं सम्यग्वातआवातु भेषजं ॥ एतत्सूक्तं जपेद
प्याद्यन्तदानं च शक्तितः ॥ पयोव्रतस्वरूपं कृच्छ्रप्रकरणे उपवर्णितं ॥ मुंचामि त्वेति पं
चर्चस्य सूक्तस्य प्राजापत्यो यक्ष्मनाशनो ऋषिः यक्ष्मघ्नी देवता अनुष्टुप्छंदः ॥ अं ३१८
त्यानुष्टुप् होमे विनियोगः ॥ मुंचामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राज
यक्ष्मात् ॥ ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्रमुमुक्तमेनं ॥ यदि क्षितायुर्य

दि वा परेतो यदि मृत्योरंतिकं नीत एव तमाहरामि निर्ऋतेरुपस्थादस्पार्षमेनं श
तशारदाय ॥ २ ॥ सहस्राक्षेण शतवीर्येण शतायुषा हविषाहार्षमेनं ॥ इन्द्रो यथैनं
शरदो नयात्यति विश्वस्य दुरितस्य पारं ॥ ३ ॥ शतं जीव शरदो वर्धमानः शतं हेमं
तान् शतमु वसंतान् ॥ शतमिंद्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः
॥ ४ ॥ आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव ॥ सर्वांग सर्वं ते चक्षुः सर्वमायुश्च
ते विदं ॥ ५ ॥ मुंचामि त्वेति सूक्तं ॥ चरुसर्पिषेति ॥ चरुणामृतसर्पिषा वामृतं ॥ ॥
वात आवातु भेषजमित्यृचस्य सूक्तस्य वातायन उल ऋषिः वायुर्देवता गायत्री छं
दः ॥ जपे विनियोगः ॥ जपसंख्याप्ययुतमेव ॥ वात आ वातु भेषजं शंभु मयोभु नो हृ
दे ॥ प्रण आयूंषि तारिषत् ॥ उत वात पितासि न उत भ्रातोत नः सखा स नो जीवातवे
कृधि ॥ यददो वात ते गृहेऽमृतस्य निधिर्हितः ॥ ततो नो धेहि जीवसे ॥ ३ ॥ वात आ

वात्विति स्तक्तं ॥ ॥ इति वातगुल्महरं ॥ ॥ अथ गुल्महरविनायकदानं ॥ ॥ पद्मपुराणे ॥ गु
ल्मी स्याद्दलजागमः ॥ अत्र शांतिप्रकारमाह ॥ बौधायनः ॥ सौवर्णं राजतं ताम्रं कारये
त्कांस्यतोपि वा ॥ मदार्कमूलकाष्ठेन विघ्नेशं शक्तितो नरः ॥ पुष्करं कल्पमेधेमं सौवर्णं
लोचनद्वयं ॥ पुष्करकल्पमेधेममित्यादि राजतप्रतिमादौ द्रष्टव्यं ॥ आखुं च कल्पये
त्तस्य मयाहेवो विनिर्मितः ॥ मृण्मयेन सुवर्णादिना देवो गणेशो निर्मितस्तेनैव ॥ आ
खुं च कल्पयेदित्यर्थः ॥ नागयज्ञोपवीतं च कल्पयेत्तस्य गुल्मवान् ॥ चंदनागरुवस्त्रा
द्यैः पूजितं तु विनायकं सहिरण्यं पक्वान्नमस्य स्वशक्त्या पूजितायच ॥ कृतहोमायशा
ताय सर्वज्ञाय स्वार्थवेदिने ॥ मंत्रेणानेन विधिवत् दक्षिणान्नि सुरवायतुदद्यादिति चे
त् ॥ विनायकं वल्लभागौर्मंत्रैः पूजयित्वा तैरेव होमं प्राज्येनाष्टोत्तरशताहुतिसह
स्रांतं व्याधानुसारेण विधाय ततस्तं विनायकं स्वशक्त्यानुसारेण हिरण्योपेतं ब्राह्मणा

य दद्यादित्यर्थः ॥ दानमंत्रमाह ॥ विनायक गणेशान सर्वदेवनमस्कृत ॥ पार्वती
नंदन मम गुल्ममाशु विनाशय ॥ कृतेनानेन दानेन नीरोगो जायते नरः ॥ वि
नायकपूजां माहो मेच मंत्राः ॥ तत्र गायत्री विनायक शांतौ दर्शिताः ॥ तथान्ये वि
नायकप्रकाराः कोमंत्रान् वग्रह शांतौ निरूपिताः ॥ तथान्येपि विनायकप्रकार
काः स्वस्वशाखोक्ता ग्राह्याः ॥ ॥ इति गुल्मरोगहरविनायकदानं ॥ ॥ अथ सकृत्प्ली
हजलोदरहरं ॥ शातातपप्रोक्तं ॥ गर्भपातनजा रोगा यकृत्प्लीहजलोदराः ॥ तेषा
प्रशमनार्थाय प्रायश्चित्तमिदं स्मृतं ॥ एतेषु द्व्यादि प्रायः ॥ जलधेनुं विधानतः ॥
सुवर्णरूप्यताम्राणां पलत्रयसमन्वितां ॥ प्रायश्चित्तमिदं स्मृतमिति ॥ इदं कर्म
विपाके सामान्यप्रायषडार्विकमित्यर्थः ॥ एतच्च षडार्षिकं साशीतिशतकृच्छ्रद्वय
नेन परिभाषायां दर्शितं ॥ पलत्रयसमन्वितामिति ॥ सुवर्णस्यैकं पलं रजतस्यै

कंतप्तताम्रस्यापीतिपलत्रयंपलत्रयात्मकंपरिमाणप्रकरणेद्रष्टव्यं॥ ॥इतियकृत्प्ली
हजलोदरहरं॥ ॥अथप्लीहोदरहरं॥ ॥कर्मविपाकसंग्रहे॥ वृत्तकाध्यापकोय
स्तुकन्यादूषणतत्परः॥ प्लीहवान्सतुवैविप्रोजपेच्छ्रीसूक्तमन्त्रहि॥ अयुतत्र
यसंख्याकंप्लीहोदरविमुक्तये॥ अन्यच्चचमवेधोमञ्जरूणासर्पिषाद्यकृष्मां
स्तूक्तस्यार्षादिनाशिकाग्रणहरप्रकरणेत्रधायि॥ होमस्तुसाधिज्ञात्वाघृतु
सारेणाप्युतत्रयमनर्थंदन्तांत्रेणवाभवति॥ ॥इतिप्लीहोदरहरं॥ ॥अथोदरव्या
धिहरं॥ ॥कर्मविपाकसंग्रहे॥ मोक्षस्तविक्षरूपाणांनेदमुत्तमनावतः॥ साध
येदुरव्याधियुक्तोभवतिमानवः॥ कुर्यात्कृच्छ्रचातिकृच्छ्रंत्रांप्रायमणमथामरं॥ ३२०
सहस्रकजशाल्मानमीश्वरस्यतुकारयेत्॥ जपेदयुतसंख्याकमुद्घत्रयरचं
तथा॥ आतेपितरतःसूक्तात्पठतेनचरूणाप्यमक॥ अष्टोत्तरसहस्रंतुयुक्त

याज्ञततःपरं॥ मधुनाज्येनसंयुक्तंहिरण्यंशक्तितोदिशेत्॥ प्राजापत्यकृच्छ्रादि
त्रत्राणानिकृच्छ्रप्रकरणेद्रष्टव्यानि॥ सहस्रकलशस्नानंत्रातेनरुद्रेण॥ अस्यत्वा
र्षादिरुद्रविधानेद्रष्टव्यं॥ उद्घत्रयचरचस्यार्षादिपरिभाषायांरोगप्रतिमादानवि
धौ॥ आतेपितरित्यस्यत्वार्षादिरुद्रविधानेक्तासाध्यसर्वरोगहरे॥ मधुनाज्येनसं
युक्तंहिरण्यमितित्र्योण्यपिदद्यात्कृदद्यात्॥ अथवाहिरण्यप्रधानेमधु
सर्पिषीअगंमदाद्यत्कृदयग्रहीयतेतदादानमन्त्राअपिदद्यागेव॥ तत्राज्यदान
मंत्रोहिरण्यदानमंत्रश्चप्रायश्चित्तोपक्रमपद्धतौदर्शितः॥ मधुदानमंत्रस्तुकफ
श्वासहरे॥ यदातुहिरण्यप्राधान्येनमधुसर्पिषीदीयेते॥ तदाकेवलहिरण्यदा
नमंत्रवोमेवाज्याधमधाज्योपेतंहिरण्यंतुभ्यमहंसंप्रददे॥ इतिप्रयोगःकार्यः॥
॥ ॥इत्युदरव्याधिहरं॥ ॥अथजलोदरहरं॥ ॥कर्मविपाकसंग्रहे॥ राजावातंनि

मुक्तेन निमुक्तेन निमुक्तो धर्मनिश्चये॥ पुरोहितः प्राड्विवाकः सचिवो वान्यथाचरे
त्॥ जलोदरत्वं प्राप्नोति तस्य वक्ष्यामि निष्कृतिं॥ पयसा वर्तयेन्मासं त्रिसंध्यं तु नम
॥ सहस्रकलशस्नानं महादेवस्य चैव हि॥ भोजयेच्छतं विप्रान्मुच्यते किल्बिषात्
तः॥ पयोव्रतं जपस्तत्र रुद्रैकादशकरणेन दृष्टव्यं॥ सहस्रकलशस्नानं शतरुद्रेण॥ अस्म
च्छाखोदितस्नानविधिश्च रुद्रविधाने दर्शितः॥ ॥इति जलोदरहरं॥ ॥अथ जलो
दरहरमकरदानं॥ ॥तत्र निदानं पद्मपुराणे॥ ॥उदरव्याधियुक्तस्तु नवेद्गुर्वंगनाग
मे॥ उदरव्याधिर्जलोदरव्याधिरित्यर्थः॥ अत्र निष्कृतिमाह बौधायनः॥ कुर्याच्च
मकरं सम्यग्राजतं ताम्रमेव वा॥ पलत्रयेण तदर्धार्धपादैकेन सुवर्णकृतिं॥ पुच्छे रत्ना ३२१
नि देयानि कटिं रूप्येण कारयेत्॥ नेत्रे स्वर्णमये कार्ये जिह्वा रीत्या प्रकल्पयेत्॥ पादयो
ः प्रक्षिपेत्तत्र घृतपात्रे पुरोदयो॥ यदा ताम्रेण निर्मितो मकरस्तदायं विशेषः॥ क

टिं रूप्येण कारयेत्॥ इति शिष्टं पूर्ववदपि समानं॥ रीतिः पित्तलकांस्यः पाद
योः प्रक्षिपेदिति॥ अग्रिमपादद्वयं पुरतो घृतपात्रे द्वयं प्रक्षिपेदित्यर्थः॥ कुम्भ
वस्त्रेण संवेष्ट्य चंदनागरुचर्चितं॥ ताम्रे तु जलपात्रे तु स्थापयेन्मकरं शुभं॥ ब्राह्म
णं वस्त्रसंपन्नं दत्त्वा तु मनोजुषं॥ वस्त्रैः कटककेयूरैः पूजयेद्गुणीयकैः॥ होमो व
रुणदैवत्ये इति वरुणदैवतं स्वस्वशाखोक्तवारुणमंत्रेणेत्यर्थः॥ तत्र वरुणप्रका
शका मंत्रास्त्वन्नो अग्ने तत्त्वायामि इमं मे वरुण इत्याद्या ग्रहयज्ञप्रकरणे एनोका पा
ला ग्रहणप्रस्तावे च दर्शिताः॥ होमसंख्यालक्षणेनाष्टोत्तरशतं द्रव्यमाज्यं॥ होमश्च वरुण
पूजा मकरपूजा च विधाय स्वगृह्योक्तविधिनाग्निं प्रतिष्ठाप्य कार्यः॥ ततः किं कु
र्यादित्यत आह॥ ततस्तोदरिको विप्रं मकरं तं निवेदयेत्॥ विप्राय दद्यादित्यर्थः
॥ दानमंत्रमाह॥ जलाधिदेव देवेश पश्चिमाशापते विभो॥ उदरव्याधिनाशं मे कु

माहा. रूदानेन तोषिता॥ ॥इति जलोदरहरमकरदानं॥ ॥अथ गुल्मप्रतिमादानं॥ ॥तल्ल
३२२ क्षणं कर्मविपाकसारे॥ गुल्मकुंचितसर्वांगो दंडधारी त्र्यंबकः॥ दधानकिंकिणीमालां
बधकेशो द्विलोचनः॥ पूजादीतिकर्त्तव्यता तु परिभाषायां रोगप्रतिमादानविधावातं
को देवतातत्रेत्यादिना निरूपिता॥ ॥इति गुल्मप्रतिमादानं॥ ॥अथ परुल्लीहप्र
तिमादानं॥ तल्लक्षणमपि कर्मविपाकसारे॥ लीहाय कुमिकुदजौं चवरदानम
धारिणौ॥ हस्तं गोपात्राङ्कः पद्मसौरवङ्गदउन्नमकरौ॥ गुरुत्वगुदजो रोगः॥ अन्नविशे
षणो भुलिंगब्धत्वमम्बाहसः॥ पूजाविधानं परिभाषायां रोगप्रतिमादानविधावातंको ३२२
देवतातत्रेत्यादिना प्रपंचितं॥ ॥इति परुल्लीहप्रतिमादानं॥ ॥अथ महोदरप्रति
मादानं तल्लक्षणमपि कर्मविपाकसारे॥ महोदरामयः स्मृतेः क्रूरो महिषप
दृष्टगः॥ खङ्गचर्मधरः कांतस्तथा पीतांबरावृतः॥ पूजादानिकर्त्तव्यता कलापस्तु

परिभाषायां रोगप्रतिमादानविधावातंको देवतातत्रेत्यादिनोपवर्णितः॥ ॥इति
महोदरप्रतिमादानं॥ ॥महार्णवाख्ये महिते प्रबंधे मांधातृनाम्नो मदनात्मजस्य
॥ सत्कर्मरत्नप्रकरेण पूर्णे पूर्णस्तरंगः खलु सप्तविंशः॥ ॥अथ मंदाग्निहराति
॥ ॥शातातपप्रोक्ते॥ मंदोदराग्निर्भवति सतिद्रव्येन योजयेत्॥ सतिद्रव्ये करन्न
हस्यपि पाठः॥ प्राजापत्यत्रयं कृत्वा भोजयेच्च शतं द्विजान्॥ नान्नवैश्यजेदिति॥ नित्य
नैमित्तिकानि सायंप्रातर्होमवैश्वदेवप्राणाग्निहोत्रहोमादीनि अनापदि यो न कु
र्यादित्यर्थः॥ प्राजापत्यलक्षणं कृच्छ्रप्रकरणेऽभ्यधायि॥ ॥इति मंदाग्निहरं॥ ॥
अथ प्रकारांतरेण मंदाग्निहरं॥ वृद्धपराशरः॥ ॥गोमांसखादको मंदजठराग्नि
तु नरः॥ प्राजापत्यं चरेत् कृच्छ्रमतिकृच्छ्रं तथैव च॥ अग्निमंत्रं जपेन्नित्यमग्निसूक्तं च
विचक्षणः॥ प्राजापत्यादिस्वरूपं कृच्छ्रप्रकरणे निरूपितं॥ अग्निरस्मीति मंत्रो वा

तृरोगहरमायश्चित्तेप्रदर्शितः॥ अस्तिक्तस्यार्पादिनासिकाव्रणहरेनिहितं॥ अन
मोऽश्वजपोयावद्रोगशांतिसावृत्तितिदिनमष्टाविंशत्यादिकोत्तवेत्॥ ॥इतिप्रकारांत
रेणमंदाग्निहरं॥ कर्मविपाकसंग्रहोक्तंमंदाग्निहरं॥ अकारणंगरंकृत्वाप्रतिमापुप
तिमः पुनः॥ समंदाग्निर्भवेद्देवमतकल्पस्यजायते॥ आतेरीगेणसूक्तेनचरुंच
जुहुयाद्घृतं॥ अष्टोत्तरशतंसम्यकृतत्तापसापनुत्तये॥ तामग्निवर्णामितिचजपे
त्सूक्तसहस्रकं॥ तोजनेषद्ब्राह्मणान्॥ तसम्यकचत्वारिंशत्सुखीभवेत्॥ आतेरी
द्रेणेत्यादि॥ आतेपितर्मरुतामितिसूक्तकं रुद्रविधानोक्तासाधयसर्वरोहरेद्द
र्शितं॥ तामग्निवर्णामिति॥ पुस्तकेऽस्ति नस्फोटहरेप्रधायि॥ ॥इतिकर्मवि
पाकसंग्रहोक्तंमंदाग्निहरं॥ ॥अथवौधायनोक्तंमंदाग्निहरमेरवहान्॥ ॥बौधा
यनः॥ अग्नेर्मांद्यंभवेद्यस्ययस्नेताग्निविनाशकः॥ वक्ष्यामितत्प्रतीकारंमयोक्तं

ब्राह्मणपुरा॥ पलार्धेनतदर्धेनतदर्धार्धेनवापुनः॥ राजतंकारयेत्सौम्यमग्नेर्वाहन
मुत्तमं॥ अग्निवाहनंमेषः॥ सौवर्णास्यखुराः कार्याश्चेतवस्त्रेणवेष्टयेत्॥ श्वेत
माल्यैः श्वेतगंधैर्धूपंदद्यान्नधूत्कटं॥ तंडुलोपरिसंस्थाप्यवाहनंपूजयेत्सुधीः॥
तंडुलानांपरीमाणंद्रोणमत्रमुदाहृतं॥ द्रोणस्वरूपंपरिमाणप्रकरणेवगंतव्यं
॥एवंपूजयित्वापूजाप्रदेशग्नाहाग्नेय्यांदिशिहोमः॥ कार्यइत्याह॥ आग्नेय्यांदि
शिहोमश्चसमिदाज्यतिलैरपि॥ आचार्यणविनातेनसर्वशास्त्रार्थवेदिना॥
वृकचेनतुकर्तव्यंतत्रमंत्रानिमान्शृणु॥ अग्निमूर्धेतिमंत्रेणसमिधोमः प्रशस्य
ते॥ अग्नेनयेत्याज्यहोमोप्यग्निनाग्निस्तिलैस्तथा॥ मंत्रायायोक्तमार्गेणचाग्नेः
संस्थापनंभवेत्॥ भुणीतामोत्तपर्यंतेकृतेस्थानंविधीयते॥ आपोहिष्ठेतिऋ
मिश्चापिहिरण्यतिरचेनच॥ पवमानानुवाकेनमार्जयेद्विगिणंततः॥ त्रातोवा

मा.हृ. तानुवाकेनशांतिंचापिप्रकल्पयेत्॥ तस्मैकृतवतेरोगीप्राप्नुसुखः॥ सदक्षिणांपूजिता
३२४ यद्याद्वाहनमुत्तमं॥ देवानांयोमुखंहव्यवाहनःसर्वपूजितः॥ तस्यतद्वाहनंपूज्यंमरे
वेशैर्महर्षिभिः॥ अग्निमांद्यंपूर्वकर्मविपाकोमंतुमन्मथः॥ तस्यवैनाशायत्ति
प्रजठराग्निंप्रवर्धय॥ एवंविप्रायमोदद्याद्देवाहनमुत्तमं॥ बलवानग्निमान्मर्त्यो
जीवेद्वर्षशतंपुनः॥ ततश्चबंधुभिर्विप्रैःस्वात्वाभुंजीतमानवः॥ अग्निमूर्धेत्यादि
॥अग्निमूर्धेत्यादि॥ अग्निमूर्धेत्ययंमंत्रोनवग्रहयज्ञेमंगलपूजायांगतेनप्रदर्शि
तः॥ अग्निनाग्निरित्ययंतुमुखरोगहरणजपदाने॥ अस्यैतन्मेतस्यागस्त्यऋषिः॥ अग्निर्दे
वता॥ त्रिष्टुप्छंदः॥ आज्यहोमेविनियोगः॥ अग्नेनयसुपथारायेअस्मानिविश्वानि ३२४
देववयुनानिविद्वान्युयोध्यस्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेम॥ मंत्रा
ध्यायोक्तमार्गइति॥ मंत्राध्यायोगुक्तं॥ प्रणीतामोक्षप्रणीतापात्रस्योदकविस

र्जनं॥ एतदंतेहोमकर्मणिकृतेसतिस्नानंविधीयते॥ वक्ष्यमाणमंत्रैरभिषेकः
कार्यइत्यर्थः॥ अत्राभिषेकविधानादेवाग्निवाहनपूजाप्रजाप्रदेचगदीक्षानदि
ग्भागेकलशंसंस्थाप्यतत्रवरुणंनवग्रहयज्ञप्रकरणोक्तैर्वारुणैर्मंत्रैर्नाममंत्रे
णवावासंपूजयित्वाततःपूर्वोक्तप्रकारेणकृत्वातेरोगिणंवारुणकलशोदके
नाभिषिंचेत्॥ अभिषेकमंत्रमाह॥ आपोहिष्ठेत्यादिनापवमानानुवाकेनेत्यंते
नतत्रापोहिष्ठामयोभुवइतिऋचोहिरण्यवर्णाइतिऋचश्चपरिभाषायांरोग
प्रतिमादानविधावुदाहृताः॥ पवमानसुवर्जनइत्ययमनुवाकोगणहोमप्रक
रणेप्रदर्शितः॥ ॥शान्तातानुकेनेति॥ अनेनचस्वस्वगणोक्ताशांतिरूपजप्य
तेतत्रच्छन्दोवातइत्यादितैत्तिरीयकोपनिषच्छांतिस्तयाप्रजामनघोषछंतिर
पिपरिभाषायामेवरोगप्रमाणदानविधौनिरूपिता॥ ॥इतिअग्निमांद्यहरबौ

यनोक्तमेषदानं॥ ॥अथ अजीर्णहरं॥ ॥कर्मविपाकसंग्रहे॥ अन्नहर्त्ताच
जीर्णश्चोन्नवेदस्यतुनिष्कृतिः॥ उपवासत्रयं कुर्यात्प्राजापत्यमथापि वा॥ जुहुया
च्चरुसर्पिर्भ्यामग्निरश्मीत्यृचानया॥ अष्टोत्तरसहस्रं हि जुहुयाच्च जपेत्तथा॥ उ
पवासत्रयप्राजापत्ययोः शरीरदार्ढ्याद्यनुसारेण व्यवस्थाज्ञेया॥ चरुणा सर्पि
षा च सहस्रं जुहुयात्॥ अयं च होमो जपानंतरं जपोपि सहस्रवयं अग्निरश्मी
त्यस्या कृष्णादिव्रातरोगहरप्रायश्चित्ते प्रदर्शितं॥ कृच्छ्रविधाने वक्ष्यत्युक्तं जीर्ण
ननिषेद्धाकंपंचन॥ ध्यात्वा चातुरमन्त्रस्यास्याग्निरश्मीत्यृचं जपेत् ध्यात्वा वातु
रमन्त्रस्य। अन्नस्यस्मरन्नातुरं वा स्नातादिकं नवेदित्यर्थः॥ ॥इत्यजीर्णहरं॥ ॥अ
थप्रकारांतरेण जीर्णहरं॥ शातातपप्रोक्तं॥ परान्नविघ्नकरणाद्जीर्णमभिजा
यते॥ लक्षहोमं प्रकुर्वीत प्रायश्चित्तं यथाविधि॥ लक्षहोमप्रायश्चित्तं॥ अस
मर्थश्चेल्लक्षहोममपिकृत्वा यथाविधि प्रायश्चित्तं कृच्छ्रातिकृच्छ्रं चांद्राय
णादीनि व्याध्यनुसारेण व्यस्तानि समस्तानि वा कुर्वीत॥ लक्षहोमप्रकारश्च
नवग्रहमखोक्तप्रकारेणाग्रहपूजा कुंडमंडपादिकं च विधाय॥ व्याहृतिभिर्गा
यत्र्या वा तिलव्रीहियवैर्लक्षसंख्यया होमं कुर्वीत ततो वसुधारां निवर्तयेत्॥ एत
च्च सर्वं परिभाषायामस्माभिर्विहितं॥ कृच्छ्रादिलक्षणान्यपि तत्रैव द्रष्टव्यानि॥ ॥
इति प्रकारांतरेण जीर्णहरं॥ ॥अथ महाग्निप्रतिमादानं॥ ॥एतच्च लक्षणं तत्तु
क्तेषु तद्रोगेषु इत्यादिनाग्रज रोगप्रकरणोक्तमेवात्राप्यनुसंधेयं॥ पूजाविधा
नं त्वातंकोदेवतातत्रैवास्मत्परिभाषायां रोगप्रतिमादानविधावुदाहृतं॥ ॥इ
ति महाग्निप्रतिमादानं॥ ॥महार्णवाख्ये महिते प्रबंधे मांधातृनाम्नो मदनात्म
जस्य॥ सत्कर्मरत्नौघनिधानमष्टाविंशस्तरंगोयमगादगाधः॥ ॥अथ प्रजा

मा.ह.
३२६

हीनत्वहराणि ॥ ॥ अग्निमांद्यस्मातः शरीरंगत्वं तत्वेन तत्प्रतीकारकर्मानंतरमांत
रत्वेनबुद्धिस्थित्वादस्यप्रकरणस्य संगतिः ॥ पराशरः ॥ पराप्रज्ञान्मर्त्यस्तुमतिही
नोजवेदसौ ॥ अतिकृच्छ्रं तदा कुर्यात्त्र्यांब्राह्मणसमान्वितं ॥ अतिकृच्छ्रातिस्वरूपंकृ
च्छ्रप्रकरणेद्रष्टव्यं ॥ ॥ इतिप्रज्ञाहीनत्वहीनत्वहरं ॥ ॥ अथप्रज्ञाजाड्यहरघंटा
॥ ब्रह्मवैवर्त्ते ॥ गुरूणामननुज्ञातो योवेदाध्ययनंचरेत् ॥ चरेत्कुर्यादित्यर्थः ॥ धा
तूनामनेकार्थत्वात् ॥ सजडः प्रज्ञयाहीनः संसारेजायतेनरः ॥ वक्ष्यामितत्प्रतीका
रंमुग्धकांस्यमयीरटा ॥ शोचनांकारयेद्विद्वांश्चतुरेषाविभूषितां ॥ पलैस्तुकु
र्यादिंशत्या त्रिंशता वा तदर्धतः ॥ सुस्वरां तामतिश्लक्ष्णांपंचगव्येनधारयेत् ॥ पल ३२६
स्वरूपंवक्ष्यमाणद्रोणस्वरूपंचपरिमाणप्रकरणेद्रष्टव्यं ॥ धावयेत् शोधये
त् ॥ श्वेतवस्त्रेणसंवीतांतंडुलोपरिविन्यसेत् ॥ तंडुलानांपरिमाणं द्रोणत्रितय

मिष्यते ॥ तदर्धमथवाप्यस्य परिमाणं स्वशक्तितः ॥ आचार्यः सर्वशास्त्रार्थतत्व
ज्ञो वेदांगपारगः ॥ धर्मज्ञश्चकुशलः स्वाचारः संजितेंद्रियः ॥ आहूयपर
याभक्त्यापूजयेत्तद्विधानतः ॥ विधानतः ॥ चार्यपूजनं नामगंधमाल्यवस्त्रादि
निवेदनं ॥ एतेनाचार्येणघंटादिपूजाकर्त्तव्येत्याह ॥ तेनैवकारयेत्पूजां विधि
तः शास्त्रचोदितैः ॥ उपचारैः षोडशभिर्मंत्रेणानेनशक्तितः ॥ आवाहयेत्तुवागी
शां घंटायांपरमेश्वरीं ॥ आवाहनेमंत्रमाह ॥ एह्येहिदेविसर्वेशि घंटायां
सान्निध्यंकुरु ॥ सर्वसत्वोपकारार्थं ज्ञानमुद्धेष्यसत्वरे ॥ एवमावाहितां घं
टांब्रह्माणंचापिपूजयेत् ॥ तद्घंटामिति ॥ अत्रघंटाशब्देनघंटायामावाहितास
रस्वतीलक्ष्यते ॥ अस्यास्तुपूजायद्वागीतिरचेन ॥ अपरंचतुर्भ्याद्वामुहरे ॥
प्रदर्शितः ॥ ब्रह्मप्रकाशकमंत्रस्तुब्रह्मजज्ञानमितितत्रग्रहयज्ञप्रकरणेनि

हितं॥ पूजानंतरकर्त्तव्यमाह॥ स्वगस्तोक्तप्रकारेण प्रतिष्ठाप्य तु तान्रानं॥ होमं तु
याज्ञयत्नेन समिदाज्यतिलैरपि नैवेद्यं पायसं दद्याद्वैच गुडलेतथा॥ सर
स्वति प्रेदमिति मंत्रो व्याहृतुसंमतः॥ अत्र पूजायां होमकर्मणि च॥ अयं वा मंत्रो
यक्षाणि तिरश्चो वा विकल्पेन ग्राह्यः॥ सरस्वति प्रेदमवेति मंत्रप्रसमाम्नात
योऽस्याग्निऋषिः सरस्वती देवता अनुष्टुप्छंदः॥ पूजादिषु विनियोगः॥ स
रस्वति प्रेदमव सुभगे वाजिनीवति॥ तां त्वा विश्वस्य भूतस्य प्रगायामस्यग्रत
॥ तस्मै कृतवते दद्याद्घंटां पूजितां यतुमंत्रेणानेन विधिवत्सोगी पूर्वामुख
शुचिः॥ उदङ्मुखोपविष्टाय सम्यक्तावागीश्वरीपरं॥ दानमंत्रमाह॥ गुरोरवज्ञयापञ्च
स्वमाध्ययनं कृतं॥ सरस्वति जगन्मातर्जगज्जाड्यापहारिणी॥ साहाय्ये सकलं तत्त्वं वि
ष्णुरुद्रादिभिस्तुता॥ तन्ममाध्ययनोत्थं च जाड्यं हर वरानने॥ घंटादानेन तुष्टा त्वं ब्रह्म

णा निर्मिता पुरा॥ एवं दानं तु त्वा ध्यतमाचार्यं तमाप्य च॥ अन्येभ्यः शक्तितो दद्याद्ब्राह्म
णेभ्यश्च भोजनं॥ ततः स्वबंधुभिः सार्धं स्नात्वा भुंजीत मानवः॥ एवं यः कुरुते दानं प्र
ज्ञाहीनो जडोऽपि वा॥ प्रज्ञावान् जडो वस्तुर्जायते वाक्पतिर्यथा॥ ॥ इति प्रज्ञाजाड्य
हरं॥ ॥ अथ चेतनाहीनत्वहरं॥ ॥ शातातपप्रोक्ते॥ पितृहा चेतनाहीनो मातृहांध
श्च जायते॥ नरकांते प्रकुर्वीत प्रायश्चित्तं यथाविधि॥ नरकांते मानुषं शरीरमा
साद्य तत्र चेतनाजायते इत्यर्थः॥ प्रायश्चित्तस्वरूपं विशेषेण तत्रैव प्रकरणेऽध्वह
रप्रपंचितं॥ ॥ इति चेतनाहीनत्वहरं॥ ॥ अथ प्रज्ञाहीनत्वरोगप्रतिमादानं॥ एत
स्य वृत्तगच्चानुक्ते सुतुरोगेषि त्मादिहिनाम्ना जरोगहरप्रकरणोक्तमेवात्रापि विज्ञेयं॥
पूजाहोतिकर्तव्यताकल्पस्तु परिभाषायां तं कोदेवता तत्रैसारिनारोगप्रतिमादान
विधावुक्तः॥ ॥ इति प्रज्ञाहीनत्वरोगप्रतिमादानं॥ ॥ महार्णवाख्ये महिते प्रबंधेऽस्मिं

धारनाम्नोमरनात्मजस्यसत्कर्मरत्नोघनिधानन्ततत्रिंशस्तरंगोयमगारगाधः॥
अनन्तकृच्छ्रंप्रजायते॥ तेनापिनिष्कृतिःकार्याशास्त्रदृष्टेनवर्त्मना॥ शास्त्रादृष्टेनव
र्त्मनैत्सनेद्विधानिःष्कृतिरुच्यते॥ तत्रैकामाजापत्यादिकृच्छ्ररूपा॥ साचनरकाद्युप
नोगेनकर्मणः॥ हीनत्वाद्गुरुतल्पगामश्चित्तस्यार्धंतदर्धंशान्त्यानुसारेणक
र्त्तव्यमन्यपरानिष्कृतिमाहस्थापयेत्कुंभमेकंतुपश्चिमायांमुनेद्विज॥ नीलवस्त्रस
मांछन्नंताम्रमात्र्यानिवृद्धिनं॥ तस्योपरिन्यसेद्देवंलोहपात्रप्रतेजसं॥ सुवर्णनि
ष्कनिर्मितं॥ यादसांपतिं॥ जलेजन्तुरूपस्यकेनवरुणंविम्बरूपिणं॥ वरुणंमू
र्त्तिंसुपाशावरंदकरामकरवाहनां॥ चत्वतिसामविष्णुसत्रस्त्रत्रसामवेदंसमा ३२८
पयेत्॥ सुवर्णपुत्रिकादत्त्वानिष्कविंशतिसंख्ययादद्यात्मायसंपूज्यनिष्पापःभि
तिध्रुवं॥ यादसामधिपोदेवोविश्वेषामपिपावनः॥ संसाराब्धौकर्णधारोवरुणः

पावनोस्तुमे॥ इमंमंत्रंसमुच्चार्यआचार्यायथाविधि॥ दद्याद्देवमजंकृत्यमत्रकृ
च्छ्रमवाप्तये॥ अत्रायंक्रमः॥ स्वातुकृत्येषुवेदिनेस्पृद्विजमुपजिप्याजकस्ततत्र
पश्चिमदिग्भागेकुंभंसंस्थाप्यतंउपमर्मासंपात्रंनिक्षिप्यतत्रोक्तवरुणप्रति
मांनिधायतां॥ ष्याविंशतिनिष्कनिर्मितांसौवर्णमत्रकृच्छ्रपुत्रिकामपिनिक्षिप्य॥
ततोवरुणंपुरुषसूक्तेनषोडशोपचारैःपूजयेत्॥ रोगप्रतिमांतुमन्त्रकृच्छ्राधिदे
वतायैनमइतिनाममंत्रेणार्चयेत्॥ अथवासामवेदविदाब्राह्मणेनपूजितप्रति
मासंनिधावेववेदपारायणंकारयेत्॥ तदशक्तौवेदवाक्यचेनवामध्यासनवचनाध्या
यिनावावेदपारायणंनिष्पादयेत्॥ रोगप्रनिवृत्तिरूपदृष्टप्रयोजनस्यैवमपिनि
ष्पत्तेः॥ वेदपारायणविधिःपरिशिष्टायामनिहितः॥ यावत्पारायणसमाप्तिचप्र
तिनंप्रवेदकारीसावरुणंरोगप्रतिमांचपूजयेत्॥ समाप्तिचपारायणेतांरोगप्रति

म०र्ह० ३२८ मां ब्राह्मणाय दद्यात्॥ तत्रायं प्रयोगः॥ अमुकगोत्रायामुकशर्मणेऽमुकरोगग्रस्तां
त्वर्धममुं प्रतिकृतिं॥ तुभ्यमहं संप्रददे॥ नममेन्कृच्छ्रीर्यो अहं निष्पापः स्यामिति ब्रुव
न्॥ प्रतिगृहीत्रे रोगप्रतिमां दद्यादिति॥ ततो ब्राह्मणमधिपदस्य सुस्नोकमुच्छ्रार्य
वरुणप्रतिमां तस्मै वा तस्मै वा दद्यादिति॥ निष्कस्वरूपं परिमाणं प्रकरणे स्वधा
मि॥ यजेत्पुरुषसूक्तेनेति पुरुषसूक्तेन पूजाप्रकारः॥ परिज्ञापायां पुरुषसूक्ते
विधा निरूपितं त्रिवेदपारायणविधेरपि परिज्ञापायामेव पारायणविधौ॥ मन्त्र
कृच्छ्रप्रतिमादानलक्षणं तु रातत्प्रकरणे तेनिधास्यते॥ ॥इति मन्त्रकृच्छ्रहरं॥ ॥अथ प्र
कारांतरेण मन्त्रकृच्छ्रहरं॥ शातातपप्रोक्तं। यस्तु योनौ वगमनान्मन्त्रकृच्छ्री प्रजाय ३२८
ते॥ तिलपात्रत्रयं चैव सदद्याद्रात्मशुद्धये॥ तत्र कतिलपात्रदानप्रकारमाह वि
ष्णुः॥ ताम्रपात्रे तिलान्कृत्वा पलषोडशकल्पिते॥ सहिरण्यान्स्वशक्त्या वा विप्राय

प्रतिपादयेत्॥ नाशयेत्त्रिविधं पापं वाङ्मनःकायसंभवं॥ प्रकारांतरस्तु कूर्मपुरा
णे तिलपूर्णं ताम्रपात्रं सहिरण्यं द्विजातये॥ प्रातर्दत्त्वानुविविवुः स्वप्नप्रमिहसितः
॥ तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमं॥ ताम्रपात्रं दशपलं जघन्यं परिकीर्त्ति
तं॥ द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमं स्मृतं॥ स्वर्णमेकं जघन्ये तु द्विगुणं मध्यमे
क्षिपेत्॥ त्रिगुणं चोत्तमं तद्वत्तु वर्णं परिकीर्त्तितं॥ सुवर्णदक्षिणां दद्यात्सर्वपापप्र
मोभवेत्॥ सुवर्णदक्षिणां दद्यात्सर्वपापप्रमोभवेत्॥ पलसुवर्णयोः स्वरूपं परिमा
णं प्रकरणे निरूपितं॥ ॥इति प्रकारांतरेण मन्त्रकृच्छ्रहरं॥ ॥अथ मन्त्रकृच्छ्रहरांत
रं॥ ॥कर्मविपाकसमुच्चये॥ ॥मद्यपरीगुरुतल्पगश्च विधवामधिगच्छति॥ स नवं मन्त्र
कृच्छ्रं तु गुरुतल्पार्धमाचरेत्॥ गुरुतल्पार्धं गुरुतल्पप्रायश्चित्तस्यार्धं षडाब्दिकं प्रा
यश्चित्तमाचरेदित्यर्थः॥ ॥इति मन्त्रकृच्छ्रहरांतरं॥ ॥अथ मन्त्रकृच्छ्रहरतिलपद्म

दानं॥ तत्र निदानं॥ वाक्पुराणे॥ सुरापो मन्त्रकृच्छ्रस्यादितिश्चात्र निष्कृतिमाह॥ बौ
धायनः॥ सौवर्णं कारयेत्सम्यक्पलेनार्धपलेन वा यथास्वशक्तिमतिमान्दद्यमष्टद
लेम्बुजं॥ वित्तशाठ्यं न कुर्वीत तन्न वेत्तिः फलमन्यथा॥ तिलद्रोणाढके वापि ताम्रपात्रे
जलान्विते॥ निदधीतेप्सितोप्यः॥ द्रोणपरिमिते वाढकपरिते वा तिलराशौ जलपरि
मितं ताम्रपात्रे निदधीतेत्यर्थः॥ पलद्रोणयोर्लक्षणं परिमाणप्रकरणे द्रष्टव्यं॥ पा
त्रमध्ये तु तत्संनिदध्यात्कुंकुमान्वितं॥ ब्राह्मणं श्रुतसंपन्नं दरिद्रं चाग्निहोत्रि
णं आहूय गंधमाल्याद्यैर्विधिवत्तावातिनक्तितः॥ अर्चयेदितिशेषः॥ एवं ब्राह्म
णं समर्च्य तेन च नमस्कारं॥ पद्ममध्ये प्रजपित्वाश्चौकृत्वा च तस्य ब्राह्मणस्य व
क्ष्यमाणप्रकारेण दद्यात्॥ तथा च बौधायनः॥ प्रोक्त एव तिलपद्मदानोत्तरे॥ आ
ज्येन च तिलैर्होमं कार्यमाष्टोत्तरशतं॥ पद्मे वावाहयेद्देवं नमस्कारं ग्रहनायकं॥

एष्येहि भगवन्देव पद्मेस्मिन्संनिधिं कुरु॥ अमीतनो दारद्र्यात्मन्सहस्त्रे हे
तिनिर्वृतः॥ आवाहनमंत्रः॥ आवाह्य तस्मिं देवेशं प्रजयेद्रक्तचंदनैः॥ पुष्पैश्च
रक्तैरपरैः कुंकुमागुरुचंदनैः॥ नैवेद्यपायसं दद्यादन्नानेत्तीरमेव चेति॥ आ
ज्यहोमस्तिलहोमश्च व्याहृतिभिः कार्यः॥ एवं संपूज्य किं कुर्यादित्यत आह॥
तत स्वर्णमयपद्मं दद्यान्मंत्रेण संयुतं॥ दानमंत्रमा॥ खगपख्यापनं गोसौ दाद
र्यान्मात्रमीतनुः॥ पद्मेनानेन दत्तेन प्रीतस्तरणिरस्तु मे॥ कृतेनानेन दानेन मनु
न्नो मन्त्रकृच्छ्रान्न मुच्यते॥ मन्त्रकृच्छ्रातुरस्तस्मादेतत्कुर्यात्समन्त्रतः॥ एतत्त्वप
द्मदानमादित्यवासरे॥ कपद्मदानप्रयोगस्त्वादिन्सेहति कारयेदिति बौधा
यनस्मरणात्॥ ॥इति मन्त्रकृच्छ्रहरतिलपद्मदानं॥ ॥अथाश्मरीहरं॥ ॥शा
तातपप्रोक्ते॥ मातुः सपत्नीगमने जायते चाश्मरीगदः॥ सतु पापविशुध्यर्थं

प्रायश्चित्तमंत्रमासिकं दद्याद्विप्रायश्चिदुषेमधुधेनुं प्रयोदितं॥तिलद्रोणशतं चै
वहिरण्येन समन्वितं॥मधुधेनुविधानं तु तन्मयरोगहरे प्रदर्शितं द्रोणस्वरूपं तु प
रिमाणप्रकरणे॥ ॥इत्यश्मरीहरं॥ ॥अथ वक्रमूत्रत्वहरं तत्रागातातपप्रोक्ते॥ दुग्ध
धेनुचौरः स्तु पुरुषो जायते वक्रमूत्रवान् स दद्याद्दुग्धधेनुविधिरपि तन्मयरोगहरे
गुडधेनुप्रस्तावे द्रष्टव्यः॥ ॥इति वक्रमूत्रत्वहरं॥ ॥अथ प्रकारांतरेण वक्रमूत्रत्व
हरं॥ ॥कर्मविपाकसमुच्चये॥ सोदर्यागामिनो रोगो जायते वक्रमूत्रता पराक
द्वितयं चत्वारि शतब्राह्मणभोजनं॥ आतस्त्के न मुक्तमादृष्टोत्तरसहस्रकं॥ सर्पि
षाचरुणा तेन जपस्याद्वाहितेन तु॥ सहस्रनाम्नास्तकस्यापौरुषं स्यचराक्ति
तः॥ गायत्र्यां च जपः कार्यस्तत्पापस्यापनुत्तये॥ पराकलक्षणं॥ कृच्छ्रप्रकरणे
द्रष्टव्यं॥ आते पितर्मरुतामित्येतत्सूक्तं मातेसूक्तं तत्सूक्तं मातेसूक्तं तस्यापि हि

कृविधानं क्रोसाध्यसर्वरोगहरे निरूपितं॥ रोगस्यान्त्यत्वे प्रत्यर्चं होमः॥ आधि
क्येतु सकलसूक्तावृत्त्याहोमः॥ पक्षद्वयेपि चरुणा एषुकसर्पिषा दृष्टषक् जपस्ता
वानिति॥ अष्टोत्तरसहस्रमेव तत्॥ आ ते पितरित्यनेन सूक्तेन सहस्रनाम्ना पु
रुषसूक्तस्य गायत्र्या अथ जपः शक्तितो न वृत्तिः अष्टोत्तरसहस्रादधिकं न्यूनं चे
त्स्पष्टं॥ एतपाम्ध्यादिपरिभाषायामामुद्ररीति॥ ॥इति प्रकारांतरेण वक्रमूत्रत्व
हरं॥ ॥अथ मूत्रत्वहरं॥ ॥अथ मूत्रकृच्छ्रप्रतिमादानं॥ तल्लक्षणं च॥ कर्मवि
पाकसारे मूत्रकृच्छ्रमयः॥ खडुकर्तरीवज्रायुधकरखरः॥ कर्त्तरणं कर्त्तरः छेदन
खडुश्चाः कर्त्तरणं॥ ॥अनेन छेदनासाधनविशेषो लक्ष्यते॥ तदस्यास्तीति खडुक
र्तरी॥ खर इति कूर इत्यर्थः॥ पूजादानापूजारीतिकर्त्तव्यताविशेषस्तु परिभा
षायां रोगप्रतिमादानविधावांतको देवता तत्रेत्यादिना निरूपितः॥ ॥इति मूत्र

कृच्छ्रप्रतिमाहानं॥ ॥महार्णवाख्येमहितेप्रबंधेमांधातृनाम्नोमदनात्मजस्य॥
सत्कर्मरत्नःप्रकरेणतुंगस्त्रिंशत्तरंगोयमगाद्गाधं॥ ॥अथप्रमेहहरणं॥
कर्मविपाकसमुच्चये॥चांडालीगमनात्सर्वप्रमेहव्याधिमान्भवेत्॥तत्त्विपा
सातुरश्चैवजायतेतस्यनिष्कृतिः॥चांद्रायणत्रयंकुर्यात्तप्तवप्रमध्यातरतथा
॥परं॥अपरपिपीलिकामध्यचांद्रायणत्रयंचेत्यर्थः॥ इदमापइतिद्वाभ्यामु
दुत्तममर्थैकया॥जुहुयात्सर्पिषाचैतान्जपेन्मंत्रान्समाहितः॥ इदमापइति
द्वाभ्यामुदुत्तममर्थैकया॥जुहुयात्सर्पिषाचैतान्जपेन्मंत्रान्समाहितः॥ इदमा
पप्रवहतइतिद्वाभ्यामुदुत्तममर्थैकया॥जुहुयात्सर्पिषाचैतान्जपेन्मंत्रा
न्समाहितः॥इदमापप्रवहतइतिद्वयोर्मेधातिथिऋषिः॥आपोदेवताअंत्य
र्धर्चोहग्निर्देवताअनुष्टुप्छंदःविहितार्थेविनियोगः॥इदमापप्रवहतयत्किंचि

दुरितंमयि॥यद्वाहमभिदुद्रोहयद्वाशेपउतानृतं॥१॥आपोअद्यान्वचारिषंरसे
नसमगस्महि॥पयस्वानग्नआगहितंमासंसृजवर्चसा॥उदुत्तममितित्रैकोमं
त्रः॥उदुत्तममितिमंत्रस्याःशुनःशेपऋषिः॥असावेवदेवतातत्त्वायामिधीयतेवरुणो
देवतात्रिष्टुप्छंदः॥विहितार्थेविनियोगः॥उदुत्तमंवरुणपाशमस्मदवाधमंवि
मध्यमंश्रथाय॥अथावयमादित्यव्रतेतवानागसोअदितयेस्याम॥१॥जपहो
मयोःसंख्याव्याध्यनुसारेणअष्टोत्तरसहस्रात्मिकाज्ञेया॥ ॥इतिसर्वप्रमेहहरं॥ ॥
अथसम्भ्रमप्रमेहहरं॥ ॥कर्मविपाकसंग्रहे॥तिर्यग्गामीसम्भ्रमेणप्रमेहेनयुतोभ
वेत्॥कुर्यात्कांतपनादीनिप्रायश्चित्तंयथाविधि॥सांतपनादीनीति॥सांतपनय
तिमहासांतपनपर्णकृच्छ्राणि॥एतत्त्रत्रयाणिकृच्छ्रप्रकरणोदर्शितानि॥ ॥इतिस
म्भ्रमप्रमेहहरं॥ ॥अथवातप्रमेहहरं॥ ॥कर्मविपाकसंग्रहेपर्वव्यवायीमनुजः

महा· कन्यागामी तथैव च ॥ वातः प्रमेहयुक्तः स्यात्कु॥ र्याच्चांद्रायणत्रयं चांद्रायणं स्व
३३३ रूपं कृच्छ्रप्रकरणे द्रष्टव्यं ॥ ॥इति वातप्रमेहहरं ॥ ॥अथ मधुप्रमेहहराणि ॥ कर्म
विपाकसमुच्चये ॥ मधुप्रमेही मातृगामी सततं जायते नरः ॥ पितृव्यार्याभिगामी
च जलमेवाग्रसद्यमः ॥ योगच्छेदगिनीनित्यमिक्षुमहीति नित्यशः ॥ पितृव्यार्यासप
त्नजननीसततमधुमेही ॥ नित्यमिक्षुमेही स्यान्नरः ॥ एते नरोगाधिकाः सूच्यते ॥ प्रा
यश्चित्तं कुमारत्रयकृच्छ्राण्यष्टौ पंच चात्र षष्टिमाचरेत्सम्यक् ततो रोगाद्विमुच्यते
पउषं वा षं च कुमात्रा यश्चित्तं न वृतीत्यर्थः ॥ सर्वत्र सौरमंत्रेण जपहोमौ चक ३३३
र्त्तव्यौ संख्या चाष्टोत्तरसहस्रं सौरमंत्रा अथवह वउषल्त येत्यादयः परिभाषायां
तत्र दर्शिताः ॥ ॥इति मधुप्रमेहादिहराणि ॥ अथ प्रमेहप्रसुवर्णधेनुदानं ॥ वा
सुधुराणे ॥ ब्राह्मणस्वर्णहारी च प्रमेही जायते नरः ॥ वृद्धगौतमः ॥ धेनुं स्वर्णमयीं

कुर्यात्पूर्वेण विधिना ततः ॥ पूर्वेण विधिना पलेन वा तदर्धार्धेन वा पुनः ॥ रित्यनेन वि
धिना धेनुं कुर्यादित्यर्थः ॥ एतस्मेसादीनि कृत्तकर्त्ताकजापस्तुत्तमरोगहरप्रक
रणे गुडधेनुदानप्रसंगेन दर्शितः ॥ सुवर्णमंचं रत्नाद्यां तथा रूप्यखुरामपि तथा ता
म्रकं कुर्याद्दृष्ट्वा गेन पूर्ववत् ॥ ब्राह्मणं श्रुतसंपन्नं वै स्वं वचकुंटं विनं ॥ आचार
वंतं धर्मिष्ठं द्विजमुख्यपणे ग्रुतं गृहमाहूय विधिवत्संजमेद्रूषणादिभिः ॥ यथाविज्ञ
वतो न्यत्सा होमं पूर्ववद्देवहि पूर्ववत् ॥ स्वगृह्योक्तविधिना स्थापनादिकृत्वेत्यर्थः ॥ मं
त्रैः सुवैस्तवैः सम्यक्पत्ना द्रासमिधैः स्मृतः ॥ होमसंख्या चाष्टोत्तर द्वातं ॥ वैस्तवमंत्राः ॥
स्तद्विष्णोरित्याद्याः ॥ तत्र तद्विष्णोरिति कूष्मांडहोमप्रकरणे दर्शितः ॥ अन्येपि स्वस्व ग
स्वोक्ता प्रकारश्चात्रास्याः ॥ तथा नारायणोष्टाक्षरमंत्रः हृद्धिहर नारायण मन्त्रिदाने
गोपाल मंत्रस्तु नक्ताध्यहर गोपाजदाने प्रदर्शितः ॥ होमांते किं कुर्यादित्यत आह ॥

मा॰ह॰
३३४

होमांतेतां प्रदद्याच्च मंत्रेणानेन महवान्॥ मंत्रमाह॥ चक्रे सुदर्शनं यस्य राजते
ष्टतयैव हि॥ प्रमेहहरं तु त्तिप्र विष्णुर्गरुडवाहनः॥ अत्रोदरां रवपयेत्रां खचक्रग
दापद्मधारी त्वयं॥ दानेन प्रमेह रोगप्रमेत त्कार्यमनीषिभिः॥ कृतेनानेन दानस्य ति
प्रमेहा रुणादाश्च पि॥ ॥इति प्रमेहघ्नं सुवर्णधेनुदानं॥ ॥अथ प्रकारांतरेण प्रमेह
हरं॥ ॥शातातपप्रोक्ते॥ तपस्विनीप्रसंगेन प्रमेही जायते नरः॥ मासं रुद्रजपः का
र्यो दद्यात्कन्या च कांचनं॥ तपस्विनीप्रसंगः तपस्विनीगमनं॥ रुद्र लक्षणं परिज्ञा
पायां तु रुद्रविधाने प्रदर्शितं॥ कांचन सुवर्णं यथाशक्ति दद्यात्॥ ॥इति प्रकारांत
रेण प्रमेहहरं॥ ॥अथ प्रमेह प्रतिरूपक दानं तल्लक्षणं च कर्मविपाकसारे॥ प्रमेहः ३३४
पाणिमुख्यस्य दत्तिणं पाणिनीषणः॥ पापः पार्श्वेतलाः कुर्वन्यादाथ्याते चगजंति पूजा
दीनि कर्तव्यता कलापस्तु परिज्ञाषायां रोगप्रतिमादानविधावात्तं कोरेवतान्नत्रेसा

दिनानि रूपितः॥ ॥इति प्रमेहप्रतिरूपकदानं॥ ॥इति श्रीमहार्णवाख्ये महिते
प्रबंधे मांधारनाम्नो मदनानिरूपितेत्र॥जस्य॥ सत्कर्मरत्नौघनिधानमेकत्रिं
शास्तरंगोयमगाद्गाधः॥ ॥अथ लिंगहानिरूपणव्याधिहरणं॥ तत्र लिंगहानिह
रं॥ ॥शातातपप्रोक्ते॥ मातृगामी नवेद्यस्तु तस्य लिंगं विनश्यति॥ चांडालीगमने चैव हा
न कुष्टः प्रजायते तस्य प्रतिक्रियां कर्तुं कुंजमुत्तरतो न्यसेत्॥ उत्तरतः॥ पुष्पस्य लिप्त
मदनाद्सो त्तरदिग्भागे उदकानि पूरित कलशं स्थापयेदित्यर्थः॥ ॥अत्र चमत्ति
कापद्य वाहानि नवग्रहयज्ञप्रकरणोक्त जलशस्थापनाप्रस्तावोक्तानि स्थापयेत्
॥ कुंभवस्त्रसमाछन्नं कुंभमाल्यविलेपितं॥ तस्योपरिन्यसेत्कांस्यपात्रे देवं धनेश्व
रं सुवर्णनिष्कपकेन निर्मितं नरवाहनं यजेत्तु रूपसत्केन धनेंद्रं विप्ररूपिणा निष्कस्व
रूपं॥ बोधव्यं॥ धनदं नरवाहनं॥ वरदानमयकरं च कुर्यात्॥ यजेत्तु जपेत्पूजाप्र

माहा.
३३५

कारस्य परिज्ञाणं मे पुरुषसूक्तविधाने निरूपितः॥ अथर्ववेदविद्विप्रान्स्वर्वण
समापयेत्॥ अथर्ववेदपारायणक्रमादिस्पष्टं॥ अथ यावद्भिर्दिनैर्वेदपारायण
समाप्तिर्भवति तावत्सु दिनेषु उक्तवेदपूजा वक्ष्यमाणप्रतिमापूजा च कार्या पारायण
विधिस्तु परिज्ञाणं मया निरूपितः॥ ॥ अथर्ववेदे नावेव कचेन वायव्या ज्ञातोप
पन्नरोगस्त्वाध्यायिनाथ्वावेदपारायणं कारयेत्॥ अस्य कर्मणो रोगनिहन्तिरू
परत्वात्सर्वोपयोगात्॥ वेदान्तरपारायणेनापि दृष्टार्थसिद्धेः॥ अथर्ववेदपारा
यणक्रमनं तु मन्त्ररत्नः पिशाचादीनां तद्देवत्वमित्वात्॥ धनदस्य च तत्सत्वप्र
सिद्धमेव॥ कुर्वे रप्रतिदिनमावेदपारायणसमाप्ति पूजयेदित्युक्तं॥ तद्देवरोग ३३५
प्रमामपि पूजयेदित्याह सुवर्णपुत्रिकां कृत्वा निष्कविंशतिसंख्यया॥ दद्याद्विप्रा
य सम्पूज्य निःपापः स्यामिति ब्रुवन्॥ इयं च प्रतिमा रोगप्रतिमा लक्षणमेतत्प्रतिका

रणं न्तेव्युत्वा दमिष्यते अत्र च लिंगग्रहानि प्रतिमाधिदेवतायै नम इत्यनेन मन्त्रेणे
तां प्रतिमां पूजयेत्॥ एवं प्रतिदिनं संपूज्य वेदपारायणस्यान्ते अत्तन प्रतिमादाने
नाहं निष्पापस्यामिति ब्रुवन्॥ इमां प्रतिमां विप्राय दद्यात्॥ यथाशक्ति दक्षिणां
च धनप्रतिमादानमन्त्रमाह॥ निधीनामधिपो देवः शंकरस्य प्रियसखा॥ सौम्या
शाधिपतिः श्रीमान्मम पापं व्यपोहतु॥ इमं मन्त्रं समुच्चार्य आचार्याय यथाविधि॥
दद्याद्देवहीनकुष्ठी लिंगनाशी च मुच्यति॥ प्रयोगप्रकारोऽमूत्र लघुकं प्रकरण
स्तु पूर्वं वर्णितः॥ ॥ इति लिंगग्रहानिहरं अथ षंढत्वहरं॥ ॥ शातातपप्रोक्तं॥ उष्ट्रा
हीनु षंढः स्यात्स दद्याच्च द्विजातये रौप्यपलत्रयं उग्रधर्वत्रयसमन्वितं॥ पल
स्वरूपं परिमाणप्रकरणे निरूपितं॥ रजतदानमन्त्रस्तु प्रायश्चित्तोपक्रमप्रथ
तावुदीरितं॥ ॥ इति षंढत्वहरं॥ ॥ अथ हर्षणव्याधिहरं॥ ॥ कर्मविपाकसंग्रहेन

पोन्मादिहस्त्यादीन्अपराधं विनैव यः छेदयेत्तस्य मुष्कस्तु नवे दग्ध इवाग्निना ॥ शि
लापिष्टसदृक्तस्य सव्रणस्यापि जायते ॥ रुधिरं प्रस्रवेत्यस्मात् तत्तस्यैव निष्कृति
:परा ॥ ज्ञातरुद्रजपेन्मन्त्रमष्टोत्तरसहस्रकं ॥ यतिचान्द्रायणं चैकं कुर्याद्दद्याच्च गां
ततः ॥ विष्णुरपि जायते वृषणे यस्य व्याधिः परमदारुणः ॥ जपित्वा दशसाहस्रमु
च्यते रुद्रसंहिता ॥ रुद्रसंहितारुद्राध्याय ॥ अष्टोत्तरसहस्रदशसाहस्रो स्तुव्या
धितरमत्वावापेक्षया विकल्पः ॥ अष्टोत्तरसहस्रं दशसाहस्रं दशसाहस्रमित्यने
न च महारुतिरुक्त जपो जप्तस्तेन महारुद्रातिरुद्रयोर्जप्तवान् तु रुद्रविधाने दर्शि
तं ॥ यानि चांत्रपीडाप्रकरणोक्तानि कर्माणि तानि सर्वाण्यपि वृषणव्याधिहर
णि विद्धे ॥ यानि यतिचान्द्रायणं स्वरूपं पञ्चकृच्छ्रप्रकरणे द्रष्टव्यं ॥ गोदानमंत्रस्तु प्रा
यश्चित्तोपक्रमे प्रपधतावुक्तः ॥ ॥ इति वृषणव्याधिहरं ॥ ॥ अथ लिंगहानिप्रतिमाद

नं ॥ ॥ तद्व्रतरणं चात्रुक्तेष्पुतुरोगेष्वित्यादिनाम्रजप्रकरणाहरोक्तमेवात्राप्यनुसं
धेयं ॥ पूजाविधानं त्वातको देवता तत्रत्यादिना परिज्ञायां गोरोगप्रतिमादानविधा
वुक्तः ॥ ॥ इति लिंगहानिप्रतिमादानं ॥ वृषणव्याधिप्रतिमादानं ॥ ॥ महार्णवाख्ये
महितेप्रबंधे मांधातृनाम्नो मदनात्मजस्य सत्कर्मरत्नप्रकरेण पूर्णो द्वात्रिंश ए
षः प्रथितस्तरंगः ॥ ॥ अथ गुदरोगहराणि ॥ शातातपप्रोक्ते ॥ सुरात्वमेज्जेवा
पि सकृद्विष्टां करोति यः ॥ गुदरोगो भवेत्तस्य पापरूपः सुदारुणः ॥ मासं सुरार्च
नेनैव गोदानद्विमेन च ॥ प्राजापत्येन चैकेन तरणं प्रतिगुदजा रुजः ॥ यद्यपि सुरार्च
नमिति सामान्येनाभिहितं तथापि स्तर्मप्राधान्येन रुद्रविष्णुरज्जौ आरोग्यं भास्क
रादितिस्मृतः ॥ पूजाच स्वशक्त्या यथानुसारेण गंधपुष्पवस्त्रालंकारादिभिः ॥ सु
रार्चनगोदानप्राजापत्याचरणेषु क्रमोपि पाठक्रमेणैव तद्बाधे प्रमाणाभावात् ॥

महा०
३३७

प्राजापत्यस्वरूपं कृच्छ्रप्रकरणेऽभ्यधायि॥ गोदानमंत्रस्तु कृच्छ्रोपक्रमएवधृतौ॥ ॥इ
ति गुदरोगहरं॥ ॥अथार्शोरोगहरं॥ कर्मविपाकसमुच्चये॥ दत्वाथवेतनं सोध्येता
रायापिचवेतनं॥ १॥ अध्यापयेच्च शुश्रूमातं जपेद्वाथ्यर्शोमुनोन्नवेत्॥ तन्निवृत्त्यै
प्रकुर्वीत कृच्छ्रं चैवातिकृच्छ्रकं॥ चांद्रायणं चैवतथाजपेत्सूक्तं च पौरुषं॥ यन्न
ध्यदेवं विष्णुरुद्रमंत्रजपेत्त्रयं॥ तामग्निवर्णामितिचजपेत्सूक्तं समाहितं॥ हिरण्य
सघृतं तथाच्छोत्रियाय कुटंविनेदत्वाथवेत्तनमित्यादि॥ तत्रकाध्यापीत्यतका
ध्यापकस्येत्यर्थः॥ मधश्चेत्यस्य विहितलिंगदक्षिणादिव्यतिरेकेण स्वपरिकल्पि ३३७
तः॥ चन्निर्गृहीत्वा परार्थ्य शुश्रूषाकं पेत्रासोप्यर्शोरोगमुतोनंवेदित्यर्थः॥ कृच्छ्रादि
स्वरूपाणि कृच्छ्रप्रकरणेपरिभाषायां वोध्यानि॥ पौरुषं पुरुषसूक्तंअस्यचा
र्थादिपरिभाषायां पुरुषसूक्तविधानेगणहोमप्रकरणे च प्रदर्शितं॥ उद्यन्न

द्यउरुचस्पतेत्येवरोगप्रतिमारानविधौ विष्णुरुद्रमंत्रोऽमपिपरिभाषायामेव॥ ता
मग्निवर्णामित्यस्यतार्थादिस्तोत्रमस्फोटहरे निरूपितंपुरुसूक्तादीनां सर्वे
षांजपेसंख्याव्याधितरतमभावेनाथेत्तरस्यहस्त्राधिकानप्पात्राक्षापेक्षया
तादिकाबाकल्पनीया॥ सहिरण्यघृतंदद्यादिति॥ आज्येहिरण्यनिक्षिप्याज्यावे
क्षणं कृत्वा दद्यादित्यर्थः आज्यावेक्षणमंत्रस्तु कृहिमहजहरे दर्शितः॥ तथाश्रोत्रि
याय कुटुंबिनेएकवर्षपर्याप्तंधनं दद्यात्॥ अनेनैवाभिप्रायेण ब्रह्मगीतासुव
चनं॥ समाम्नातं श्रोत्रियाय सम्यग्निने च विशेषतः॥ असाध्यव्याधिनाग्रस्तो धनं
दद्यात्द्विजोत्तमे इति॥ कृच्छ्रादीन्येतानि व्याधिगत्याद्यनुसारेण व्रतानि वा मोज्या
नि॥ ॥इत्यर्शोरोगहरं॥ ॥अथार्शोरोगप्रसुवर्णधेनुदानं॥ ॥तत्रलिंगपुराणनिदानं
॥पद्मपुराणे॥ ॥अर्शोवान्गोवधात्स्यादिति॥ अत्रप्रतीकारमाह॥ ॥बौधायनः॥

सौवर्णांगं प्रकुर्वीत पलार्धैकेन वा पुनः॥ विस्तारं चैव कुर्वीत चतुर्भागेन तर्णकं
॥ पलत्रयेण परिमाणमा प्रकरणे निरूपितं॥ तर्णको वत्सः॥ रत्नश्रृंगी रौप्यखुरी
नानावस्त्रैरलंकृता॥ अहाणमुपरि स्थाप्य नवधान्यानि विन्यसेत्॥ होमस्तु पूर्वव
त्कार्यो गोविंदप्रीतये तथा॥ अहाणमुपरीति॥ नवग्रहस्थापनाय देवा उपरीत इत्य
र्थः॥ एतेन नवग्रहमखोपि कर्तव्य इत्युक्तं॥ नवति॥ चसपरिभाषायां विशेषतो
निरूपितः॥ सुवर्णधेनोः पुरुतो नवधान्यानि नवसंख्याकानि व्रीहियवादीनि
स्थानसंवेन तन्नान्येव विन्यसेत्॥ होमस्तु पूर्ववदिति॥ ग्रहमखोक्तप्रकारेणाग्र
हहोमः॥ कार्य इत्यर्थः॥ गोविंदप्रीतय इति॥ सुवर्णगवीदानस्य गोविंदप्रीत्यर्थत्वा
त्तदुद्देशेनापि होमस्य कर्तव्यतां दर्शयति अस्मिन्होमे मंत्रा नूह्याणि च दर्श
यति॥ इदं विष्णुः विष्णोर्नुकमिति क्रमात्॥ समिदाज्यचरुं हुत्वा पूर्णाहुत्यंतनाव हि॥ इ

दं विष्णुरित्यस्यास्तु कृष्णादि नवग्रहमखप्रकरणे दर्शितं॥ अतद्विष्णुर्विष्णोर्नुक
मित्यनयोस्तु नक्षाहरणे पाजदाने॥ इदं विष्णुरित्यादयो मंत्राः॥ समिदादि होमे
ष्वुक्रमेणन्नवति॥ होमेत्वन्यएव क्रमः॥ समिद्धोमानंतरं चरुहोमः॥ होमसंख्या
तु व्याधितारतम्येनाष्टोत्तरशतादि कुर्य्यात्॥ पूर्णाहुत्यंत इति॥ पूर्णाहुत्यंते होमक
र्मणि निवृत्ते इत्यर्थः॥ ततः किं कुर्यादित्यत आह॥ प्रयतस्तु ततो रोगी ब्राह्मणाय वेद
पारगे॥ अनहत्तोपसंपन्नकुलीने धर्मवादिने॥ दंभज्ञानोपसंपन्नमनुद्वेगकरं
नराणांन्यास्वमसमानाम्पूजयेत्प्रीतिपूर्वकं॥ अनुलेपकवस्त्राद्यैरुपानच्छ
त्रकैरपि॥ मंत्रेणानेन तस्मै तां दद्याद्रोगी यतात्मवान्॥ गोविंदमनुसाध्यामनग
वामध्येस्थितमुत॥ मंत्रेणानेन गोविंदं गोपीजनवल्लभेतिवक्ष्यमाणेन॥ अधु
ना गोविंदध्यानश्लोकमाह॥ बर्हापीडकसंयुक्तं वेणुवादनतत्परं गोपीजनैः

महा॰ ३३९

परिवृतं वस्त्रयुग्मावृतं सकं ॥ दानमंत्रमाह ॥ गोविंद गोपीजनवल्लभेश कंसासु
रघ्नत्रिदशेंद्रवंद्यं ॥ गोदानदत्तः कुरु मे दयां जो अर्शोरोगविनाशं पितारिवर्गं ॥ दानेना
नेन नियतमशासो नाम तेस्तु तस्मात्कुमार्गमलेन तत्समासेत दर्शसः ॥ ॥ इत्यर्शोघ्न
सुवर्णधेनुदानं ॥ ॥ अथ गुदरोगप्रतिमादानमर्शोरोगप्रतिमादानं च ॥ तत्र गुदरोग
प्रतिमालक्षणं तूक्तं गुदरोगे षिक्कपक्कम्मूत्ररोगे षिक्कपक्कम्मूत्ररोगप्र
करणोक्तं विज्ञेयं ॥ अर्शोरोगप्रतिमालक्षणं तु कर्मविपाकसारे ॥ अर्शोरोगः कृ
ष्णवक्त्रः खड्गचर्मधरो दुर्धरकः ॥ अस्य यत्र पूजादीनि कर्त्तव्यता विशेषस्तु परिभा
षामात्रतो देवतांतरसादिना रोगप्रतिमादानविधानवद्धारितः ॥ ॥ इति गुदरो ३३९
गप्रतिमादानमर्शोरोगप्रतिमादानं च ॥ ॥ महार्णवाख्ये महिते प्रबंधे मांधातृना
तनजस्य ॥ सत्कर्मरत्नप्रकरेण पूर्णे ख्यातस्मिन्मल्लिशतमातरंगः ॥ ॥ अथाति

साररोगहरदानं ॥ कर्मविपाकसमुच्चये ॥ स्वर्णाग्निं शमयेद्यस्तु सोतिसारयुतो
भवेत् ॥ अग्निरश्मीस्त्वचं जघ्वा रत्नांशं शंजुहुयान्निशातान् ॥ सर्पिषा चाप्युतान् दद्याद्धिर
ण्यब्राह्मणाय वै ॥ स्वर्णाग्निरौप्यनाभिश्च तण्डवास्स्क सारद्रायश्चित्तं चैमासिकं क
र्त्तव्यं ॥ अग्निरश्मीतीयमस्वातरोगहरे ॥ प्रदर्शितं ॥ जपश्च व्याधितरमतावेन प्रति
दिनं मावडोपवृंगात्सप्तोत्तरशतमष्टोत्तरसहस्रं वा कार्यः ॥ ॥ अथ वास्तु तमशौ सुत
हृमादिकं वा संकल्प्य ॥ संकल्पपरिपूर्तिकर्त्तव्या ॥ दशांशहोमां प्येवमेव ॥ यद्यपि
प्रायश्चित्ते होमे व्याहृतयो मंत्रा दृष्टास्तथाप्यनुष्ठितमंत्रेणैव होमस्य
न्यास त्वाग्निरश्मीत्येषैव होमे मंत्रः ॥ हिरण्यं च शक्त्यनुसारेण ॥ दद्यात् ॥ ॥ इ
त्यतिसाररोगहरं ॥ ॥ अथातिसाररोगहर वृक्किमूर्त्तिदानं पद्ये ॥ अतीसारी सत्त्व
तिप्रस्त्रोतोग्निविनाशकः ॥ अ   त्र प्रतीकारे वैधामनीये ॥ सुवर्णेनाघृतात्मेण कु

र्मास्त्रतिरुतिंबुधः॥ वह्नेः शाकल्यतुसारेण पजेनार्धेन वा पुनः॥ वह्निमूर्त्तिं जकृणां तु विं
तामणां दिपुदर्शितं तस्मान्न्याजाकुंभं रक्तचंदनेन विलेपितां॥ रक्तवस्त्रेण संवी
तां मेषस्योपरि संस्थितां रक्तमाल्यसुसछन्नां मुक्ताराम पस्कृतां॥ कनकाचुलव
र्णां चैव द्वादशांके निंनां सुतां॥ ब्रह्मचर्यान्विते विप्रे कनिष्टे वाग्निहोत्रिणि॥ अगु
जी यक वस्त्राद्यैर्न्नपितेनां निवेदयेत्॥ मंत्रेणानेन विधिवत्॥ अग्निः प्रीत्यर्थमा
दतः॥ विप्रे कनिष्टे चाग्निहोत्रिणीति॥ अत्र कनिष्ठ इपदविज्ञागः॥ अकनिष्टे ज्ये
ष्टेस्वाचारे पतोउत्तम इति॥ कनिष्टे इति पद विभागे कनिष्टे अवधे तरुण इति भा
वत्॥ एवं विधे विप्रे तां प्रतिमां निवेदयेत्॥ विशिष्टाय विप्राय दद्यादित्यर्थः॥ दा
नमंत्रमाह॥ त्रेताग्निरीश्वरस्त्वमतश्चरसि वै नृणां त्वं वेत्थ प्राकृतं पापमतिसारं
विनाशय॥ एवं कृत्वा नरः॥ सम्यगतिसारं विमोहति॥ नीरुजः समुखी नित्यं दीर्घ

मायुश्च विंदति॥ ॥इत्यतिसारहरवह्निमूर्त्तिदानं॥ ॥अथ शातातपप्रोक्तो तिसारं
॥स्त्रीहंता चातिसारी स्यात्॥ अस्यासौ पमेदृशा॥ दद्या च्चशार्कराधेनु तेज येद्यश
तं द्विजान्॥ शार्कराधेनुविधिश्च राजयक्ष्महरे दर्शितः॥ ॥इतिशातातपप्रोक्ताति
सारहरं॥ ॥अथ रक्तातिसारहरं॥ शातातपप्रोक्ते॥ दावाग्निदायकश्चैव रक्तातीसा
रवान्नवेत्॥ तेनोदपानं कर्त्तव्यं रोपणीयस्तथा वटः॥ उदपानमिति॥ उदकं पी
यते स्मिन्निति॥ उदपानं कूपो वा निपानं वा प्रपा वा॥ ॥इति रक्तातिसारमिहरं॥ ॥
अथ ग्रहणीरोगहरं॥ ॥कर्मविपाकसंग्रहे॥ अनन्यगतिकां मंमुढ्रां कारणं वि
ना परित्यजति यः सोयं ग्रहणीरोगवान्नवेत्॥ शिवसंकल्पसूक्तस्य जपस्मात्तत्र
शांतये॥ अश्वेत्तरसहस्त्रं हि हिरण्यं च तथा मधु॥ दद्याद्वित्तानुसारेण सौरमंत्र
जपस्तथा॥ शिवसंकल्पसूक्तस्य चाणादिरुद्रविधानें गन्यासप्रस्तावे दर्शितं॥

महा.
३४१

॥ अष्टोत्तरसहस्रं त्रिकालं प्रजप्तव्यं व्याधितरतमत्वे सहस्राद्यप्यधिकं द्विगुणादिकं
कल्प्यं सौरमंत्रं तु यत्नपरश्च ॥ अस्य त्वार्षादि पुरस्तात्पामारोगप्रतिमादानविधा
वुदीरितं ॥ अत्रापि जपसंख्यापूर्ववदेन केवलं त्रिवसंकल्पादि जप एव अपि तु धे
नुमपि दद्यात् तदित्याह ...रितं ॥ अत्रापि जपसंख्यापूर्ववदेन केवलं त्रिवसं ॥ धे
नुं सुलक्षणां दद्याद्वस्त्राचरणसंयुतां ॥ पयस्विनीं गुणोपेतां ब्राह्मणाय कुटुंबिने ॥
॥ वस्त्राभरणसंयुतां वन्तेनआचरणेन मुक्तः ॥ ॥ इति ग्रहणीरोगहरं ॥ ॥ अथ
ग्रहणीहरधेनुदानं ॥ ॥ पद्मपुराणे ॥ ग्रहणीवानपद्मेहेतिनिदानमभिहितं ॥ अत्र
गौतमोनिष्कृतिमाह ॥ धेनुं पयस्विनीं दद्याद्वराजनरणत्तर्पितां ॥ हेमशृंगीं रूप्यखु ३४१
रां वासोभिर्वेष्टितं नरः ॥ नवधान्यसमायुक्तामेकैकं द्रोणपंचकं ॥ नवधान्यानि
व्रीहियवादीनि देशाकालोचितानि धान्यपरिमाणं दर्शितमेकैकमित्यादिना दि

नासहितं पंतु तां दद्यात् ॥ ब्राह्मणाय कुटुंबिने ॥ अत्रोनुपायत्तं तामधर्मत्वायवि
शेषतः ॥ होमंच पूर्ववत्कुर्यात्समिदाज्यचरूत्कटं ॥ स हिरण्यमिति क्रियाविशेष
णं दक्षिणार्थं यथाशक्त्यासुवर्णं दद्यादित्यर्थः ॥ पूर्ववदिति ॥ रूप्यवृषदानवदित्य
र्थः ॥ हेमाद्रौ अत्रायमभिप्रायः ॥ तत्र यथास्वगृह्योक्तविधिनाग्निस्थापनं समिधो
मानंतरं तु होम एव मंत्रोपि सर्वकार्यमिति यद्यपि तत्राहोममंत्रारौद्रास्तथाप्य
त्रावैष्णवास्तस्यचारवोक्तानप्रव्याः ॥ तत्रेदं विष्णुरिति मंत्राः ॥ कूष्मांडहोमे प्रकर
णद्दर्शिताः ॥ प्रतद्विष्णुर्विष्णोर्नुकमिति होमंत्रोनक्रोध्मग्रहणेपालदानेदर्शितो ॥ ग्र
तेत्र यो मंत्राः समिच्चर्वाज्यहोमेषु क्रमेण ग्राह्याः ॥ अत्र च वैष्णवमंत्रग्रहणे अयम
हेतुः ॥ देवकीपुत्रेत्यादिना दानमंत्रेण विष्णोर्देवतात्वप्रतीतिः ॥ तथाचाचार्यैर्मंत्र
वर्णिको देवताग्रहावतीत्युक्तं ॥ तथितेन चतुर्थ्यावामंत्रवर्णे न चेष्यते देवतासंग

म॰रा॰ ३४२ तिस्त्रश्च दूर्वांतंच परंपरमिति होमसंख्या प्रत्येकमष्टोत्तरशतादि कार्या क्वाथ तु सा
रेण कृत्वा तस्मै ऊ तवने दद्यात्मजिता याङ्गुलीयकं ॥ गां कृष्णां विष्णुरूपायं मंत्रेण
नेन रोगवान् ॥ मंत्रमाह ॥ देवकीपुत्र चाणूर कंसारिष्ट विनाशन ॥ नाशय ग्रह
णी कृष्ण गोपीजनमनोत्सव ॥ कृतेनानेन दानेन नश्यग्रहणी शांतिरृच्छति तस्मादेतं
तु कर्त्तव्यं ग्रहणीरोगिणस्तदा ॥ ॥ इति ग्रहणीहरधेनुदानं ॥ ॥ अथातिसाररोगेघि
त्क पक्वमपक्वमूल रोगहर प्रतिमादानंच ॥ तत्रातिसार प्रतिमालक्षणं त्वनुक्तेऽपु
तु रोषित्क पक्वमपक्वंजहर प्रकरणोक्तं विज्ञेयं ॥ उक्तमन्त्रेष्वप्ताकल्पापस्तु परि
भाषायां रोग प्रतिमा दान विधावातंको देवता तत्रेत्यादिना निरूपितः ॥ ॥ इत्यति ३४२
सार दानं ॥ ग्रहिणी प्रतिमादानंच ॥ ॥ महाराणीवास्ये महितेऽग्रबंधे ॥ ऋतुस्त्रिंशास्त
रंग ॥ ॥ अथ पादरोगहराणि ॥ तत्र खंजत्वहरं स्तरं स्तरंध्रपाद हरत्वंच शातात

प्रोक्ते ॥ हरिणानि हतेरवं जः स्वंगास्तेध्र पादकः ॥ अश्वस्तेन प्रदातव्यः सौवर्णो नि
ष्कसम्मितः ॥ निष्कलक्षणं परिमाणप्रकरणे द्रष्टव्यं ॥ निष्कपरिमितेन सुवर्णेन ना
श्वकारयित्वाश्विन मंत्रेणाश्वपूजयित्वाश्रोत्रियाय ब्राह्मणाय दद्यादित्यर्थः ॥ अ
श्विनो देवता गायत्री छंदः ॥ विहितार्थे विनियोगः ॥ अश्विना मज्वरीरिषोऽ दवत्याणा
सुतस्मती ॥ पुरु तुजा चनस्यते ॥ १ ॥ अश्विना पुरुदंससा नरा शवीरया धिया ॥ धि
ष्ण्यावनतं गिरः ॥ दस्ता युवा कवः सुतानासत्यावृक्तबर्हितः ॥ आयातं रुद्रवर्त्तनी
॥ उपलक्षणमेवैतत् ॥ अतः आश्विनी प्रकाशकास्वस्वशाखोक्ता मंत्रा ग्राह्याः ॥ अश्वर
नमंत्रस्तु नवग्रहयज्ञप्रकरणे दर्शितः ॥ ॥ इति खंजत्वहरं ॥ खञ्जपादत्वहरत्वं च ॥ ॥
अथ वक्रपादत्वहरं ॥ ॥ शातातप प्रोक्ते ॥ ॥ जायते वक्रपादस्तु निहतेश्च मुनिमान
वः ॥ निष्कत्रयमितं दद्यात्सौवर्णं विष्णुधये ॥ सुवर्णं विष्णुधये इति अपि पाठ

मह्रा.
३४३ ॥ अस्मिन्नागे सुवर्णं निष्कत्रयस्यैव दानं ॥ निष्कलक्षणं तु परिमाणप्रकरणेऽभ्य-
भिहितमस्मिन्नागे तु सौवर्णमिति तद्धितश्रवणान्निष्कत्रयपरिमितसुवर्णनिर्मितं श्वानं
देवशुन्याः सरमायाः प्रकाशकैर्मंत्रैः संपूज्य ब्राह्मणाय दद्यात् ॥ इंद्रस्य दूतीरिति
सरमाप्रकाश्यपोक्तताश्च ऋषिः सरमा देवता त्रिष्टुप् छंदः ॥ सरमापूजायां वि-
नियोगः ॥ इंद्रस्य दूतीरिषिता चरामि मह इच्छन्ती पणयो निधीन्वः ॥ अतिष्कदो भि-
यसा तन्न आवत्कथा रसाया अतरः पयांसि ॥ अन्येपि स्वस्वशाखोक्ताः सरमा दि-
व्याप्रकाशका मंत्रा ग्राह्याः ॥ ॥ इति वक्रपादत्वहरं ॥ अथाधिकांगहरं ॥ ज्ञात-
तपप्रोक्ते ॥ अजायानि घातने चैवाप्यधिकांगः प्रजायते ॥ अजानेन प्रशस्तव्या वि- ३४३
चित्रवसनान्विताऽजायाः प्राजापत्यत्वात्प्रजापतिं तत्प्रजापतिं तत्प्रकाशकमंत्रे-
णासंपूज्य प्राजापत्यं दृशेन तामजायथाशक्तिदक्षिणान्वितां ब्राह्मणाय दद्यात् ॥

प्रजापते न त्वदेतान्यन्य इत्यादयः प्रजापतिप्रकाशका मंत्रा नवग्रहमखप्रकरणे प्रदर्शि-
ताः ॥ अजादानमंत्रोपि तत्रैव दर्शितः ॥ अथ पादरोगहरं ॥ ज्ञानातपप्रोक्ते ॥ मार्ग-
हा पादरोगी स्यादश्वदानं समाचरेत् ॥ तत्रापि खंजत्वहरोक्तप्रकारेणाश्विनोः प्र-
जां कृत्वाश्वं ब्राह्मणाय दद्यात् ॥ अयं तु विशेषः ॥ तत्र सौवर्णाश्वे अश्विनी पूजा अ-
त्र तु अश्वस्तत्पूजादिषु अश्विनावाश्वपूजयेदिति ॥ ॥ इति पादरोगहरं ॥ ब्रह्मगीता-
स्तु पतितेन तु संपर्के वल्मीकव्याधिमान्भवेत् ॥ गोमूत्रयावकाहारो मासार्धेन
तु शुध्यति ॥ स हि रागं पतेद्यालापस्तु विमुच्यते यावकस्य व्रतस्वरूपं कृ-
च्छ्रप्रकरणे निरूपितं ॥ एतद्दानमंत्रस्तु प्रायश्चित्तोपक्रमपद्धतौ दर्शितः ॥
विशेषं नरमाह ॥ जायते यदि तत्रापि कृमिब्रह्मविशां वरः ॥ प्रतिरूपं प्रदद्याद्दे-
रोगशांत्यर्थमात्मनः ॥ आत्मनो रोगशांत्यर्थं व्याधिप्रतिमारूपं प्रतिमां दद्यादि-

म.हा.
३४४

स्वर्णः॥ प्रतिमालक्षणं प्रकरणांतरे विधास्यते॥ इति वल्मीकरोगहरं॥ ॥ अथ प्रकारांतरेण
श्लीपदरोगहरं॥ कर्मविपाकसंग्रहे॥ स्वगोत्रस्त्रीगमनात् श्लीपदी जायते नरः॥ यो
न्मासमसकृत्स्त्रवति तत्र चांद्रायणं चरेत्॥ मासं पयोव्रतं चैव तु॥ स्मात्तरोगाद्विमुच्य
ते॥ स्वगोत्रस्येतत्र लिंगमविविक्तं तं। योनिश्चाप्येनच मैथुनसाधनमिंद्रियं जलस्तते
॥ अथ स्त्रीपुंसयोरुक्तयोरपि। रोगिताण रेतेत्कर्मरोगहरं भवति॥ चांद्रायणपायोव्र
तमोत्क्षणं लघुप्रकरणोत्स्यधायि॥ ॥ इति श्लीपदरोगहरं॥ ॥ अथ श्लीपदरोगप्र
तिमादानं॥ ॥ तल्लक्षणं च॥ कर्मविपाकसारे॥ ॥ श्लीपदः स्त्रीपदः कंठः पतत्तत्तर
धनुर्धरः॥ इति कर्त्तव्यताविशेषस्तु परिभाषायां रोगप्रतिमादानात्कौरेवतानत्रे ३४४
त्यादिना निरूपितः॥ ॥ इति श्लीपदरोगप्रतिमादानं॥ ॥ अथ पादरोगप्रतिमादानं॥ ए
तल्लक्षणं पादरोगघ्नमुक्तेषु रोगगधिलादिना मूलरोगहरप्रकरणोक्तमेवात्रापि द्रष्टव्यं॥

॥ पूजादीतिकर्त्तव्यता तु परिभाषायां रोगे प्रतिमादानविधावातंकोरेवतात्तत्रेत्या
दिना निरूपितः॥ इति पादरोगप्रतिमादानं॥ ॥ महार्णवाख्ये महिते प्रबंधे मांधा
तृनाम्नो मदनात्मजस्य॥ सत्कर्मरत्नौघचितोत्रपंचत्रिंशस्तरंगो यमगाद्गाधः॥
॥ ॥ अथ त्वग्दोषहराणि॥ ॥ कर्मविपाकसमुच्चये॥ पुरुषत्रापतेत्सर्वं सत्वग्दोषयु
तो भवेत्॥ चांद्रायणत्रयं कुर्यात्सरद्याहौषधानि च॥ वैद्यकोक्तानि विप्रार्यमंत्राक्त्या
ब्राह्मणभोजनं वैद्यशास्त्रोक्तान्यौषधानि च क्रमहर्त्तीनि॥ चांद्रायणस्वरूप
कृच्छ्रप्रकरणे निरूपितं॥ ॥ इति त्वग्दोषहरं॥ ॥ अथ दुश्चर्मत्वहरं॥ ॥ कर्मविपा
कसंग्रहे॥ गुरुतल्पगदोषाच्च गवि मैथुनदोषतः॥ दुश्चर्मा स्याद्रसौ कुर्यात्कृ
तत्यातिदेशतः॥ प्रायश्चित्तं तथा प्रोक्तं ततो दोषात्प्रमुच्यते॥ गुरुतल्पातिदेशा
तः॥ प्राप्तप्रायश्चित्तं कुर्यादित्यन्वयः॥ षड्वार्षिकं कुर्यादित्यर्थः॥ व्याधिगुरुत्वे

महा. ३४५

सत्कारणस्यापि पापस्याभ्यासादिना गुरुत्वावगतेः॥ मूर्च्छादत्तावार्षिक कर्त्तव्यं
॥ कार्मस्य व्याधेर्गुरुत्वेन कारणस्यापि पापस्याभ्यासादिना गुरुत्वावगतेः प्रा
यश्चित्तोपक्रमप्रकारस्तु प्रायश्चित्तोपक्रमपद्धतौ निरूपितः॥ ॥इति उन्म
र्त्तहरं॥ ॥अथ पामहरं॥ ॥कर्मविपाकसंग्रहे॥ अनुत्तुपं तियोत्सेषां विषमा
न्नवर्जनि॥ सपामान्नवस्त्रं वस्त्रवृतिर्गोणितास्य प्रसं तन्निवृत्त्यर्थमुपवासत्र्यत्र
यं नवेत्॥ भोजयेच्च द्विजान्॥ दातान्नपंचाशत्संख्यया न्वितान्॥ अन्नपिव्याधि
गुलमुत्तावेनन्न नाधिकन्नावः परीकल्पनीयः॥ अनुत्तुपनं विनाशनमपहारे
वा। विषमाः स्लक्कं दनानुलेपनादयः॥ ॥इति पामाहरं॥ ॥अथ दद्रुहरोगमामहे ३४५
श्वरदानं॥ ॥बौधायनः॥ ॥ब्राह्मणानयमो हिंस्याद्दद्रुरोगी नवेन्नरः॥ तस्योपशम
नं वक्ष्ये सुवर्णेन तु कारयेत्॥ हिंस्यात्पीडयेत्॥ सुवर्णः षोडशमाषात्मकः॥ मा

षप्रमाणं च परिमाणप्रकरणोभ्यधायि॥ सुवर्णार्धेन वा कुर्यात्तादेनाप्यथवा
पुनः॥ उमामाहेश्वरं रूपं हृष्यत्ताधिष्ठितपरं॥ चतुर्भुजं तु द्विभुजामुमां कुर्या
द्विचक्षणः एकवक्त्रान्नवेत्तत्र त्रिनेत्रश्च महाभुज॥ अक्षमालां त्रिशूलं च तस्य द
क्षिणहस्तयोः॥ देवीष्वयगतस्त्वेको वरदश्चापरः करः॥ वामोत्संगगता देवी श्रीवृष्ट
ऐकपाणिका दर्पणोरूपतः कार्योधिरमालंकृतनोभवेत्॥ रूप्यतः सुप्रेणस्वश
क्त्या वित्तशाठ्यं न कुर्वीत कुर्वन्नो निष्फलं भवेत्॥ तस्मिन्नारोप्य देवं तामुमया सहि
तं प्रतुं वस्त्रमाल्यैस्त्वथागंधैर्मूलमंत्रेण पूजयेत्॥ मूलमंत्रः सैव पंचाक्षरः स
चमूलरोगहरत्रिशूलदानेदर्शितः॥ हामेरुद्रगायत्रीमंत्रश्च रुद्रगायत्री सर्वेति
विनिश्चितं इत्यग्रे वक्ष्यमाणत्वात् सर्वत्रेति सर्वशास्त्रस्य पूजाव्यतिरिक्तो होमविध
यः॥ अथवा मूलमंत्रो रुद्रगायत्री॥ अतः सर्वत्र पूजादावपि वित्तेनागतां वर्जते

॥मनोहोमविकल्पेनमंत्रंविधास्यते॥पूजानंतरंकर्त्तव्यमाह॥ततोब्राह्मणंमाहूय
दरिद्रंधर्मकोविदं॥कृतहृत्तोपवीतंतंचैवात्मनं॥वस्त्रांगुलीयकैस्तस्यपूजांन्
त्वामाप्रकल्पयेत्॥होमंचकारयेत्तेनसमिदाज्यतिलैरपिमंत्रमस्यरुद्रगायत्रीस
र्वत्रेतिविनिश्चयः॥रुद्रगायत्रीलिंगपुराणोक्तिहिता॥सर्वेश्वरायविद्महेशूल
हस्तायधीमहितन्नोरुद्रःप्रचोदयात्॥आस्याःश्रीवेदव्यासऋषिः॥श्रीरुद्रोदेव
तागायत्रीछंदः॥विहितार्थेविनियोगः॥एवंतुरुद्रगायत्रीपूजायांहोमेचसर्वत्र
विमुज्यसमिदाज्यतिलहोमेषुमंत्रांतराण्यपिविकल्पेनविनियुक्तानिमहार्णवके
नैवसमिधोनुक्रमास्तुधीः॥कद्रुद्रायेतिमंत्रेणजुहुयादाज्यमीरितः॥तिला
श्चमूलमंत्रेणत्येवमंत्रक्रमोभवेत्॥होमसंख्याप्रत्येकमष्टोत्तरशतं॥अथक
मंत्रस्याधुक्षद्वारहरेद्दितिं॥कद्रुद्रायेत्यस्याःकण्वऋषिः॥रुद्रोदेवतागायत्री ३४६

छंदः॥आज्यहोमेविनियोगः॥कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे॥वोचेमशं
तमंहृदे॥मूलमंत्रपंचाक्षरोवारुद्रगायत्रीवाहोमानंतरंकर्त्तव्यमाह॥तथाब्रह्मो
डासनंतेमिथुनंब्राह्मणायतु॥वृषभोपरिविन्यस्तंतन्मात्तुविनिवेदयेत्॥मंत्रेण
नेनविधिवद्रुद्रुरोगाजितात्मवत्॥ब्रह्मोडासनामस्वर्गलोकप्रकारेण॥ब्रह्मणोप्य
र्चिजोविसर्जनं॥मिथुनमुमामहेश्वरात्मकं॥दानमंत्रमाह॥कैलाशवासीभगवा
नुमयासहितःपरः॥त्रिनेत्रहरोहरतुरोगमाशुव्यपोहतु॥ततश्चब्राह्मणांस्तमंत्रक
प्रणिपत्यक्षमापयेत्॥ब्राह्मणान्भोजयेच्चापिस्वयंभुंजीतवाग्यतः॥एवंदत्वामहा
दानंदद्रुरोगात्प्रमुच्यते॥इतिदद्रुहरोमामहेश्वरदानं॥॥अथयत्कृतकिल्विहरंहरत्रा
तातपप्रोक्तं॥गोत्रहात्कृतकाचैवप्राजापत्यव्रतंचरेत्॥व्रतांतेमेदिनींदद्यात्स्वर्णमा
चैवचारतं॥ग्रमेरतावेमेदिनीप्रतिनिधित्वेनगांपयस्विनीमलंकृतांदद्यात्॥गोदानमं

महा॰
३४१

त्रस्तु नवम्य पत्त प्रकरणेह दर्शितः॥ प्राजापत्यन्तु तत्त्वं छत्र प्रकरणे निर्दिष्टं॥ नारतस्य
वणप्रकारस्तु महानारतेनैव दर्शितः॥ अतः परं प्रवक्ष्यामि यानि देयानि नारत॥ वा
च्यमाने तु विप्रेभ्यो राज्यन्‌पर्वणि॥ स्वस्तिवाच्य विधानादौ ततः कार्यं प्रवर्त्तते॥ समा
प्ते पर्वणि ततः स्वशक्त्या तर्पयेद्द्विजान्॥ आदौ तु वाचकं पूज्य रसं गंध समन्वितं॥ वि
धिवद्भोजयेत्प्राज्ञ न्नमधुपायसमुत्तमं॥ ततो मूलफलप्रायं पायसं मधुसर्पिषा॥ आ
स्तीकि भोजयेत्प्राज्ञ न्दद्याच्चैव गुडोदनं॥ स्वस्तिवाच्यैत्यादि विधिविधानं पुराणपाठः॥
तस्यादौ स्वस्तिवाच्य स्वगृह्योक्त प्रकारेण स्वस्तिवाचनं विधाय ततस्तदनंतरं कार्यं
कलसंस्थापन चंदन वस्त्र तांबूल भोजनकारादि निवरणरूपं कार्यं प्रवर्त्तते॥ ततः पुराणपा ३४१
वदति॥ एतच्च सर्वपुराणसाधारणं तथा समाप्तौ ब्राह्मण भोजनस्य त्राक्त्या पुराणपाठ
कपूजा च सर्वपुराण साधारणं आदौ तु वाचकं पूज्येति॥ समाप्तनंतरमादौ प्रथम

तो वाचकं पात्र प्रवक्तारं संपूज्य पश्चात्तदर्थव्याख्यातारं पूजयित्वा ततः इत्यादि जांतर्प
येदुक्त प्रकारेण पूजयेद्भोजयेच्च तर्पयेः॥ आस्तीक इति पर्वोक्त मधुपायसाद्यास्तीके दद्या
दित्यन्वयः॥ आस्तिक इत्यत्र एकवचनमविवक्षितं॥ आदि विप्रांसंभ्रत्राप्येकत्वमविवक्षि
तं एवमादिपर्वण्यपि विधाय सन्नापर्वादिक्रमेण हास्य प्रेष्यपैश्च्य दापैश्च मोदकैश्च
समन्वितं॥ सभापर्वणि राजेन्द्र हविष्यं भोजयेद्द्विजान्॥ हविष्यं व्रीहि गोधूम मुद्ग
मधु पायसमाषसादि॥ आरण्यकै स्तर्पयेच्च द्विजोत्तमान्॥ आरण्यपर्व मासाद्य ज
जकुंतान्न प्रदायमेत तार्पणानि सुरव्यानि धान्यमूल फलानि च॥ तर्पणानि सलकूच
दन प्रधानारव र्जूरादीनि सर्वगुणोपेतं विप्रेभ्योन्न प्रदापयेत्॥ विराटपर्वणि तथा
वासांसि विविधानि च॥ तथ्योद्योगेनु ब्राह्मण भोजनमनुकृष्यते॥ उद्योग नरतश्रेष्ठ
सर्वकामसमन्वितं॥ भोजनं भोजयेद्विप्रान् गंधरजकृता न्वितां॥ भीष्मपर्वणि राजेन्द्र दत्वा

महा. दानमनुत्तमं॥ अनुत्तमं दानं गोदानादि॥ ततः पूर्वणि गुणोपेतमन्नं दद्यात्तु संस्कृ
२४८ तं॥ शांतिपर्वण्यपि तथा भोजनं सार्वकामिकं॥ तथाश्वमणि वासो भोगः पर्वणि
विप्रेभ्यो भोजनं परमार्चितं॥ शराश्च देमाराजेंद्र चापान्यपि वरास्तथा॥ कर्ण
पूर्वणि राजेंद्र मोहकैः सगुडौदनैः॥ पितथा भोजनं सार्वकामिकं। विप्रेभ्यः संस्कृ
तसम्यद्दद्यात्तमनमानसः॥ शल्यपर्वणि राजेंद्र मोदकैः सगुडोदनं॥ सधूपे
स्तर्पणीयैश्च सर्वमन्नं प्रदापयेत्॥ गदापर्वणामपि तथा मुद्गमिश्रं प्रदापयेत्
॥स्त्रीपर्वणि तथा रत्नैस्तर्पयेद्विधिवद्द्विजान्॥ ततः पर्वगुणोपेतामन्नं दद्यात्स्व
संस्कृतं॥ शांतिपर्वण्यपि तथा भोजनं सर्वकामिकं॥ तथाश्वमणि वासोसिह २४८
विषा भोजनमेद्विजान्॥ अश्वमणि वासोसिद्द्यादित्सर्वं॥ मौसले सार्वगु
णिकं गंधमाल्यानुलेपनं॥ हरिवंशे तथा पायसपायसं चारु भोजनं॥ पारणे पार

णे राजन्यथावद्ग्रस्तर्पयन्॥ पारणोपारणतद्दति॥ इतरपर्वपारायणे पारायणोपाठेषु
थावत्पूर्वोक्तप्रकारेण वस्त्रालंकारभोजनादिभिर्यथाशक्त्या पूजयेदितिस्वार्थः॥ स
माप्य प्रयतः सिंहितां शास्त्रकोविदः॥ शुभे देशे निवेश्याथ क्षौमवस्त्र॥ स्वस्तिः संवृ
तां॥ शुक्लांवरधरस्तत्र शुचिर्भूत्वा स्वलंकृतः॥ अर्चयेत्तु यथान्यायं गंधमाल्यैः पृ
थक्पृथक्॥ संहितापुस्तकं प्रयतः सुसमाहितः॥ भक्ष्यैर्भोज्यैश्च पूपैश्च कौतुकै
र्विविधैः शुभैः॥ हिरण्यं च सुवर्णं च दक्षिणां तत्र दापयेत्॥ धूपैरधूपैः कौतुकैर्गीत
नृत्यादिभिः सुवर्णयोः उत्तमा यथाल्पकं॥ एतच्च पुराणश्रावयितुर्दक्षिणास्वशक्त्या
नुसारेण हिरण्यं तस्मादमेन्यश्च दक्षिणां दद्यात्॥ देवताकीर्तने चास्य सर्वाणि नरनाराय
णतपः॥ ततो गंधैश्च माल्यैश्च स्वलंकृत्य द्विजोत्तमान्॥ तर्पयेद्विविधैः कामैर्या
न्यरत्नाधिकैः॥ तथा॥ शुक्लवस्त्रे विप्रेषु मध्याव्वासनं प्रवाचयेत्॥ वाचकं च नरत श्रेष्ठ

नोजयित्वा स्वलंकृतं॥ ब्राह्मणेषु प्रसन्नेषु प्रसन्नास्तस्य दैवता॥ वांके प्रचरितु॥
भुक्ता प्रीतिरतुला मातनो विकरणं कार्यं संहितानां नतर्षभ॥ तुक्तवत्सु विप्रेषित्स्या
रम्यवतो विवरणं कार्यं संहितानां नरतर्षभ॥ इत्यनेन पुराणे पक्रम प्रकारो हि
तः॥ इतरस्तु स्तकपूजा सुपक्रमोपसंहारयोर्यथोचितं योज्य॥ इतिहास समस्तु
त्वा यथाव द्दत्तु पर्वशः॥ संयतात्मा सुचिर्भूत्वा पारगत्वा तु नारते तेषां आधानि दे
यानि श्रुत्वा श्रुत्वा तु नारत॥ तेषां आधानि देयानि श्रुत्वा अधयारीयत इति आधा
नि तानि च तत्र तस्य पर्वपक्रमे समाप्तौ च पर्व प्रदर्शितानि॥ ब्राह्मणेभ्यो यथा शक्ति
त्या चनरतर्षभ॥ महादानानि देयानि विविधानि च॥ नरत्नानि विचित्राणि भूमि
र्वासांसि कांचनं॥ वाहनानि च देयानि दध्यान्ना आश्व वारणाः शयनं शिबिका चैव
स्यन्दनाश्च दना अश्व जल्कृता॥ यद्यद्गृहे वरं किंचित् किंचिदस्ति महद्वसु॥ तत्तद्देयं

द्विजातिभ्य आत्मदाराश्च सनवः॥ श्रद्धया परया [illegible] क्रमशः पारगः॥ आत्म
दाराश्च सनवः इति॥ तत्र केः मुनिः कल्पमेनेन रवस्तुनं॥ कुटुंबाविरोधेन देयत्व
प्रतिपादनार्थं॥ नत्वात्मसत्त्वो देयत्वप्रतिपादनाय॥ अथवा आत्मातः करणं चित्ता
सदानमवचनं॥ दाराश्च सूनवः॥ पुत्र सदामा इत्यर्थः॥ शक्तितस्तन्मनान्त्वा
सुसूक्तं तस्य विमत्सरः॥ एवं करोति यो विद्वान्यापर्व प्रतिष्ठितं॥ सर्वयत्त फलं प्राप्य स
ह दैवैः सह मोदते॥ यस्यानेन प्रकारेण भारतं श्रावयेन्नरः॥ तथा तालादानमाहात्म्यं लो
कानुधरति ससौ॥ जोकांतर्यादिकालोकान्॥ उद्धरति आत्मसात्करोती त्यर्थः॥
॥ ॥ इति भारतहरिवंशेन रपुराणानां च श्रवणविधिः॥ ॥ इति नूतकित्वहरं॥ ॥
अथ वर्बरांगत्वहरं॥ ॥ शातातप प्रोक्ते॥ लोहहारी च पुरुषो जन्मवे दैव बर्बरांगकः॥
लोहपलशतं दद्यात्ऽपोष्य सतु वासरं॥ पलस्वरूपं परिमाणं प्रकूरणोप्यनि धा

मि॥ लोहदानं वसुनवग्रहयज्ञप्रकरणे॥ ॥इतिवर्बरांगत्वहरं॥ ॥अथ रूक्षांगत्व
त्वांगत्वहरं॥ ॥शातातपप्रोक्ते॥ कारुकाणां वधे कृत्वा रूक्षांगे प्रजायते॥ ते
न तस्यापमृत्युर्थं दद्याद् वृषभं सितं॥ कारुकाः शिल्पिनः वृषदानमंत्रो नवग्रह
यज्ञे प्रकरणे दर्शितः॥ ॥इतिरूक्षांगत्वहरं॥ ॥अथ कंडूतिरोगहरं॥ ॥शातातपप्रो
क्ते॥ ॥तैलचौर्येण त्ववृतिनरः कंडुमनसरः॥ उपोष्य सावित्रिमाप दद्यात्तैलघटद्वयं॥
॥ ॥इति कंडूतिरोगहरं॥ ॥अथ शीर्णांगत्वहरं॥ ॥शातातपप्रोक्ते॥ वस्त्रहारी च
शीर्णांगः संप्रदद्यात्तु शोचनं॥ हेमनिष्कत्रयमितं वस्त्रयुग्मं द्विजातये॥ हेमनि
ष्कत्रयं वस्त्रयुग्मं च दद्यादित्यर्थः॥ निष्कस्वरूपं परिमाणप्रकरणे दर्शितं॥ वस्त्र ३५०
युग्मं पीतवर्णं दानमंत्रेतादृशालिंगदर्शनात्॥ हिरण्यदानमंत्रो नवग्रहयज्ञप्रक
रणे वर्णितः॥ वस्त्रदानमंत्र॥ माह॥ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं॥ प्रद

नात्तस्मै विष्णोः अतः शांतिं प्रयच्छ मे॥ सहसमनिव्याहारात्तु वर्णमपि वासुदेव
प्रीत्यर्थमेव दद्यात्॥ ॥इति शीर्णांगत्वहरं॥ ॥अथ दद्रुमंडलहरं॥ ॥शातातप्रोक्ते॥
स्वाम्यंगनाभिगमने जायते दद्रुमंडलं॥ कृत्वा लोहमयीं धेनुं पलषष्टिप्रमाणतः॥ का
र्पासभारसंयुक्ता सप्तधान्यसमन्विता॥ दद्याद्विप्राय विदुषे पापमत्त्यायतामिति॥
भारस्वरूपं च परिमाणप्रकरणे निरूपितं॥ अत्र यद्यपि सामान्यतः पापमेत्त्यायता
मित्युक्तं तथापि दद्रुमंडलं निदानभूतपापं तत्पापकार्यभूतो रोगो वा त्त्यायतामिति का
र्पकर्पासादिसमन्विता॥ लोहमयीं धेनुं दद्यात्॥ ॥इति दद्रुमंडलहरं॥ ॥अथ गज
चर्मत्वहरं॥ ॥शातातपप्रोक्ते॥ विश्वस्तनारीगमने गजचर्म प्रजायते॥ तत्पापस्य
विनाशाय प्रायश्चित्तं विधीयते॥ विश्वस्तनारीगमने गुरुतल्पकप्रायश्चित्तानि
नेशात्पादार्धिकं प्रायश्चित्तं कर्त्तव्यं॥ प्रायश्चित्तशब्देन निष्कृतिरभिधीयते॥ सा

च कृच्छ्रादिरूपाद्दानरूपाच्च तदुत्तममपि प्रायश्चित्तत्राष्टे नोपात्तं॥ तत्रं व्याधिगुरुल
घुत्वावेक्षया: समुच्चयो विकल्पश्चावगंतव्याः॥ प्राजापत्यस्वरूपं कृच्छ्रप्रकरणेनि
रूपितं॥ प्रायश्चित्तोपक्रमप्रकारस्तु प्रायश्चित्तोपक्रमपद्धतौ दर्शितः॥ एवं प्राजा
पत्यादिरूपां निष्कृतिं तावत्यर्तो निधाय तदंगं विधित्सन्दर्शयति॥ कृत्वारूप्यमयीं धे
नुं निष्कविंशतिसंख्यया॥ सर्वोपस्करसंयुक्तां छत्रोपानहसंयुतां॥ दद्याद्धि प्राय
विधिवत्तद्रिमं मंत्रमुदीरयेत्॥ सर्वोपस्करसंयुतामिति॥ सुवर्णशृंगादयउपस्कराः॥
ते च महणीहरधेनुदाने दर्शिताः॥ अथवान्यावोपस्करास्तमो रोगहरप्रकरणे गुड
धेन्वादिविधिषु दर्शिताः॥ मध्येपुपस्करे खुरूप्यखुराणामपि परिगणने॥ तथापि
धेनो रजतमयीकृतात्द्वयवानाम्खुराणामपि रजतमयत्वसिद्धौ न पृथग्रूप्यखुरापेक्षे
ति उपस्कररूपखुरलोपः॥ दानमंत्रमाह॥ सुरभीवैष्णवीमाता नित्यं विष्णुपदेस्थिता

॥ गोदानतु मयादत्तं मम पापं व्यपोहतु॥॥ इति गजचर्मत्वहरं॥ ॥ अथवल्गुमंडलत्व
हरं॥ ॥ शातातपप्रोक्ते॥ नकुलस्यापिहनने जायते वल्गुमंडलं॥ निष्कद्वयमितं र
प्यानकुलं सविमुच्यति॥ निष्कलक्षणपरिमाणं प्रकरणेत्र्युक्तम्॥ शक्त्यानुसारेण
सौवर्णो राजतो वा निष्को भवति॥ विज्ञेयानुपादानात्॥ ॥ इति वल्गुमंडलत्वहरं॥ ॥
अथ कृष्णमंडलत्वहरं॥ शातातपप्रोक्ते॥ मयूरघातने चैव जायते कृष्णमंडलं॥ निष्क
त्रयमितो देयस्तेन स्वर्णमयः शिखी निष्कस्वरूपं परिमाणं प्रकरणे दर्शितं॥ ॥ इ
ति कृष्णमंडलत्वहरं॥ ॥ अथश्वेतमंडलत्वहरं॥ हंसघाती भवेद्यस्तु तस्य स्याच्छ्वेत
मंडलं॥ रौप्यपलत्रयमयुतं हंसं दद्याद्विमुच्यति॥ पललक्षणपरिमाणं प्रकरणेव
र्णितं॥ ॥ इति श्वेतमंडलहरं॥ ॥ अथविसर्पहरं॥ कर्मविपाकसमुच्चये॥ अमेध्य
स्यप्रहर्तातु विसर्पव्याधिमान्भवेत्॥ मासंपयोव्रतंकुर्याद्दद्यादंतेपयस्विनीं॥ यप

स्विनीनां॥ गोदानमंत्रोनवग्रहमखप्रकरणेदर्शितः॥ यथोक्तस्वरूपं कृच्छ्रप्रकर
णेदर्शितं॥ ॥इतिविसर्पहरं॥ ॥अथविसर्पहरगजदानं॥ ॥बौधायनः॥ ॥सर्पास्तु
मःस्वाहमतिसविसर्पेनवेल्लर॥ दानेनोपशमःकार्योहोमेनचविशेषतः॥ वक्ष्य
माणनागदानेनहोमेनचेत्सर्प॥ पलेनवातदर्धेनतदर्धेनाथवापुनः॥ कुर्यान्ना
गंसुवर्णेनपलंचकसंयुतं॥ माणिक्यानिच॥ देयानिप्रत्येकंफणापंचके॥ रत्नपुच्छे
तथाहेमवज्रंजीवनमोस्तथा॥ एवंकृत्वाम्बुनानागंकुंकुमेनानुलेपयेत्॥ रक्तवस्त्रे
णसंवेष्ट्यताम्रपात्रोपरिन्यसेत्॥ पात्रस्यचपरिमाणंपलानामष्टकंविदुः॥ उपचा
रैःषोडशभिरर्चयेन्नागसूक्तमंत्रजलदत्ताणपरिमाणप्रकरणेनिरूपितं॥ अत्र
निवर्त्तमाणहोममंत्रेष्वन्यतमोग्राह्यः॥ आचार्यःसर्वशास्त्रज्ञोधर्मशास्त्रवि
शारदः॥ होमंचापिप्रकुर्वीतसमिदाज्यतिलैर्युतैः॥ नमोस्तुसर्पेभ्यइतित्रिभिर्मं

त्रैर्घाक्रमेणाष्टोत्तरसहस्रंवा॥ त्वष्टोत्तरशतंतुवा॥ अष्टाविंशतिमेवाथपरिमा
णंप्रकल्पयेत्॥ परिमाहोमसंख्यामासंप्रभवेत्॥ प्रत्येकमष्टोत्तरसहस्रादि
नवेदित्यर्थः॥ नमोस्तुसर्पेभ्यइत्यस्यासोनिसरणामग्निऋषिःसर्पादेवताअनुष्टुप्छं
दः॥ क्रमेणाम्नमिदाज्यहोमेविनियोगः॥ नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु॥ येअं
तरिक्षेदिवितेभ्यःसर्पेभ्योनमः॥ येवामीरोचनेदिवोयेवासूर्यस्यरश्मिषु॥ येषाम
प्सुसदस्कृतंतेभ्यःसर्पेभ्योनमः॥ यात्तषवोयातुधानानांयेवावनस्पतीरनु॥ येवा
वटेषुशेरतेतेभ्यःसर्पेभ्योनमः॥ एभिर्मंत्रैःसमिदादिहोमोभवति॥ तत्राधिज्यहोमत्र
यमनपरोविशेषः॥ कृत्वाकृत्वास्त्ववशिष्टानांज्यविंदुन्नागंतेस्थापयेत्॥ तेवबिंद
वः॥ सपातादत्युच्यंते॥ तेनचसंपातोन्नेनाचार्योरोगिणांगात्रिभ्यन्मादितातदेत
दाहकृत्वाचाकृतिसंपातैपात्रंचैकरुतेस्वयं॥ आचार्योगानिचास्यरोगिणंतुवि

सर्पितां॥ अनु कुशादिभिः संमार्जयेत्॥ इत्यध्याहारः॥ संमार्जने मंत्रमाह॥ अ
पिस्तु सार्पराज्ञी त्रिभिर्ऋग्भिर्ऋग्भ्यादिभिः क्रमात्॥ स्वस्थो यथा सो भवति गात्राण्यपरो
गतः॥ ऋग्भिर्ऋग्भ्यादिभिः क्रमादिति॥ ऋग्भिर्ऋग्भ्येतौ मम च मारस्य क्रमालिखितौ कृ
रित्यर्थः॥ यथा सो रोगी स्वस्थो नीरोगो भवतीति संक्षेपेणाकृर्यं॥ एतदेव विव्याक
प्ययति॥ गात्राण्यपरोग इति गात्राण्यंगानि यथा रोगगतं॥ अपगानि भवंति तथा
संमार्जयेदित्यर्थः॥ सर्वावयवानपि यथा स्वयोगं संमार्जयेदिति तात्पर्यं॥ ऋग्भिर्ऋ
ग्भ्यासां तिसृणां सार्पराज्ञी ऋषिः॥ अग्निर्देवता द्वितीयस्तृतीययोरात्मा सूर्योऽग्नि
र्वा देवता सर्वत्र लिंगोक्ता वा देवता आद्यानुष्टुप् इतरे गायत्र्यौ संमार्जने विनि
योगः॥ ऋग्भिर्ऋग्भ्यो द्यौर्वरिणांतरिक्षमाहित्वा उपस्थे देव्यादिति आग्निमन्त्रा द्यमन्त्रा
याम्यादधे॥१॥ आयं गौः पृश्निरक्रमी दसदन्मातरं पुरः पितरं च प्रयन्स्व॥२॥ त्रिं ३५३

शद्धाम विराजति वाक्पतंगाय धीयते॥ प्रति वस्तोरह द्युभिः॥३॥ संमार्जनानंतरं कर्तव्य
माह॥ गुग्गुलं च सुगंधि च प्रतिदारु च निक्षिपेत्॥ प्रकल्प्य कलशं कुर्यादभिषेकजले
ऽप्सु जे॥ नमोस्तु सर्पेभ्य इति शाक्तो वा सर्वतत्रिगकैरपि॥ हिरण्यवर्णाः शुचयः पाव
माना नुवाक॥ आपो हि ष्ठा मयो इति शाक्तो वा नमुरीरयेत्॥ गुग्गुलं चेत्यादि गुग्गुलप्र
सिद्धः॥ सुगंध कर्पूरादि प्रतिदारु देवतां दारु सर्जरस इति रसः॥ अनसं छ कुज्जान्मन्त्र
यस्यंते॥ एतान्यभिषेककलशे निक्षिपेत्॥ प्रकल्प्य निक्षिप्य च तं कलशं मृभिषेकोप
युक्तैस्तीर्थजलैः परिपूर्णं कुर्यात्॥ नागपूजाप्रदेशात्तस्मिन्नेव नागे कलशं सस्थाप्यतौ
र्थोदकेन पूरयित्वा गुग्गुल्वादींस्तत्र निक्षिप्य नागं स्वप्रतिमायां पूजयित्वा संस्थापिते
कलशे नवग्रहयज्ञोक्तप्रकारेण वरुणमावाह्य संपूज्य नमोस्तु सर्पेभ्य इत्यादिभिर्मं
त्रैरुदकमण्डं वृत्त्वा रसानि मंत्र्य पूर्वोक्तहोमविधाय संपातैरोगिणां मा निंसमज्य

पश्चादभिषेकं कुर्यादिति क्रमः॥ तत्राभिषेकमंत्रानाह॥ नमोस्तु सर्पेभ्य इत्यादिना आ
पो हि ष्ठा मयो भुव इत्यनेन॥ अत्राभिषिंचेदित्यध्याहारः॥ तल्लिंगकैरभिषेकप्रकारोऽके
र्हिरण्यवर्णा इत्यादिभिः सार्धं॥ नमोस्तु सर्पेभ्य इति आपो हि ष्ठा मय इति चरचौ परि
जाप्यामो रोगप्रतिमादानविधावुपवर्णितौ॥ पवमानानुवाकस्तु गणहोमगणप्रकरणे द
र्शितः॥ शान्तो वातः पवतामित्यादि तैत्तिरीयमंत्रास्तिस्रः पाप्मजायनघोषमंत्रास्तिस्र प
रिजाप्यामां दर्शितः॥ अमंच शांति पाठ अभिषेकानंतरं कार्यः॥ ततः किं कुर्यादि
त्यत आह॥ उक्तादित्तांगं तु चिरंलिसे दगरुचंदनैः॥ ततः सुक्लांबरधरः सुक्लमा
ल्यानुलेपनः॥ स्वयमर्चयेन्नागं गंधपुष्पाक्षतादिभिः॥ सर्पदैवत्यमंत्रेणाचा
र्योपि समर्चयेत्॥ अनंतसर्पराज तमाचार्यो निवेदयेत्॥ उक्तादित्तांगः श्रेष्ठिनाग
: वस्त्रेण पाककृतद्वारीरसजिजइत्य सर्पः तं तु चिरं यथ्या अगरुणा श्रीचंदनादिभिश्च ३५४

लिंपेत्॥ स्वयमिति रोगिणा तत्र समर्चनं दानकाले पूर्वं कृतपूजातोन्य देवसर्पदैव
त्यो मंत्रोऽत्रैव होमांगत्वेन दर्शितः॥ अधुना नागदानमंत्रमाह॥ योरस्ते पृथिवीं कु
र्त्स्नां सशैलवनकाननां॥ क्षीरसौम्यमभ्ये शय्या च वासुदेवस्य तत्पगः॥ स्वीयदाने
न नागोसौ तुष्टो व्याधिमपोहतु॥ विसर्पकविकारं वा दोषजनितं तथा॥ रक्तदोषोद्
भवं वापि मारुतोपिवा॥ अंगप्रत्यंगसंभूतं विकारमेव्यपोहति॥ एवं दत्वानुनन्नागमा
चार्योपसर्पेत्॥ नमोस्तु सर्पेभ्य इत्यसा मंत्रैः शतपदं व्रजेत्॥ आचार्यमनुव्रजेदि
त्यर्थः॥ आचार्यं दक्षिणां प्रतिगृह्याचानुव्रजेत्॥ आचार्यमनुव्रजेदित्यर्थः॥
आचार्य दक्षपत्नी प्रतिगृह्णनं कुर्यादिति यावत्॥ आचार्येणाभ्यनुज्ञातः स्वगृ
हं प्रविशेत् सुधीः॥ ब्राह्मणान्भोजयित्वा तु स्वयं भुंजीत बंधुभिः॥ ॥इति विसर्पहर
नागदानं॥ ॥अथ पंडुर्गंधत्वहरं॥ शातातपः॥ इत्यनेन जातवेदसे सुनवाम सोमम्

महा॰ ३५५ पप्रोक्ते॥ सौगंधिवस्तुहरणाद्दुर्गंधांगः प्रजायते॥ तत्तमेकं तु पद्मानां जुहुयाज्जातवे
दसे॥ जातवेदस इत्यनेन जातवेदसे सुनवाम सोममित्यृचं डपादं॥ अतो हंम मंत्रश्च
मेव रुक्॥ अस्या रुष्याद्द्विशीतज्वरहरे उक्तं॥ ॥ इति दुर्गंधांगत्वहरं॥ ॥ अथ वस्त्रगं
धत्वहरं॥ ॥ शातातपप्रोक्ते मधुचौरस्तु पुरुषो जायते वस्त्रगंधवान्॥ स दद्यान्मधु
धेनुं च उपोष्याद्य द्विजातये॥ मधुधेनुविधानं तु तत्तद्रोगप्रकरणे गुडधेनुविधाने
दर्शितं॥ चत्वारिंशन्त्राः प्रायश्चित्तं समुच्चीयते तच्च व्याघ्रानुसारेण चान्द्रायणादिकल्प्य॥
चान्द्रायणादिस्वरूपं कृच्छ्रप्रकरणे निहितं॥ ॥ इति वस्त्रगंधत्वहरं॥ ॥ अथ त्वग्दो
षहर॥ प्रतिमादानं॥ एतच्चत्वारि चानुक्तेषु तु रोगेष्विलादिना प्रजरोगहरप्रकर ३५५
णे निहितमेवात्रापि विज्ञेयं॥ इति कर्त्तव्यताकलापस्तु परिज्ञाषायां रोगप्रतिमाद
नविधावात्तकोदेवतातत्रेत्यादिना निरूपितः॥ इति त्वग्दोषरोगप्रतिमादानं॥ ॥ महा

र्लवारव्येम हि तेभवं धेमां धारनाम्नो मदनात्मजस्य॥ अगारदग्धे रुचिरः समासि
रव्यातो वृषध्विंवातमातरंगः॥ ॥ अथ कुष्ठरोगहराणि॥ शातातपप्रोक्ते॥ ब्रह्महा नं
रकस्यांते पांडुकुष्ठी प्रजायते॥ प्रायश्चित्तं प्रकुर्वीत तत्पातकविशुद्धये॥ प्राय
श्चित्तं षडाब्दिकं कुर्वीत॥ पापस्योपयोगेन तत्त्वात्॥ प्रायश्चित्तोपक्रमप्रकार
स्तु प्रायश्चित्तोपक्रमप्रतावुदीरितः॥ एवं कृतप्रायश्चित्तस्य तदनंतरकर्त्तव्यमाह॥
चत्वारः कलशाः कार्याः॥ पंचपल्लवसंयुताः॥ पंचरत्नसमायुक्ताः सितवस्त्रेण वेष्टि
ताः॥ अश्वस्थानादिमृद्युक्ता तीर्थोदकैस्तु पूरिताः॥ काषायपंचकोपेता नानाविधफ
लान्विताः॥ सर्वौषधिसमायुक्ताः स्थाप्य प्रतिदिशं ततः॥ पंचपल्लवाः आम्राश्वत्थवटो
टजत्तोडुंबराणां मृदश्वगजाश्वरथ्यावल्मीकनदीसंगमहृदगोकुलेभ्यो ग्रासः कृत्वा
माषाम्राम्रत्वग्दीनात्वचः॥ प्रतिदिशं॥ पूर्वादिदिक्षु॥ एवं चतुरः॥ कलशाः स्थापयि

त्वा तन्मध्ये परं कलशं संस्थाप्य तस्योपरि पूर्णपात्रं रौप्यपात्रं निधाय तत्र वासुदेवं स्थाप
येदित्यर्थः॥ रौप्येनाष्टदलेन पद्मं मध्यकुंडोपरि न्यसेत्। तस्योपरि न्यसेद्देवं उक्तं चतु
र्भुजं पलार्धार्धप्रमाणेन सुवर्णेन विनिर्मितं॥ यजेत्पुरुषसूक्तेन त्रिकालं प्रतिवास
रं॥ यजमानः शुचैर्गंधपुष्पैर्धूपैर्यथाविधि॥ पूर्वादिकुंडेषु ततो ब्राह्मणान्ब्रह्म
चारिणः॥ पारयेयुः स्वकान्वेदान्ऋग्वेदप्रभृतीन्यथाविधि॥ पूर्वादिकुंडेषु ततो
ब्राह्मणान्ब्रह्मचारिणः॥ पारयेयुः स्वकान्वेदान्ऋग्वेदप्रभृतीन्त्रानैः॥ दत्त्वां तेन
ततो होमो ग्रहशांतिपुरःसरं॥ अत्र कुंडे विधातव्यो घृताक्तैस्तु तिलैर्यवैः॥ दाहगृहा
निरं कर्म समाप्य द्विजपुंगव॥ तत्रासने यजमानस्याभिषेकं समाचरेत्॥ पलार्धार्ध
प्रमाणेनेति पलस्यार्धं तदर्धं परिमाणप्रकरणे निरूपितं॥ पलेन पलार्धेन वा पलचतुर्था
शेन वेत्यर्थः॥ यजेत्पुरुषसूक्तेनेति॥ यजेत पूजयेत् पूजाप्रकारश्च परिभाषायां पौरुष ३५६

सूक्तविधाने दर्शितः॥ द्वादशसाध्यमेतत्कर्म तत्र प्रतिदिनं प्रातर्मध्यंदिनसायंकाले
ष्वाचार्येणाराजितं देवं यजमानोपि गंधपुष्पादिभिः पूजयेत्॥ तथा पूर्वं स्थापितेषु चतु
र्षु पूर्वादिकुंडेषु ऋग्वेदादीन् पठेयुः॥ ऋग्वेदचतुष्टयपारायणं कारयेदित्यर्थः॥ पूर्वकुं
डे ऋग्वेदं दक्षिणकुंडे तु यजुर्वेदं पश्चिमकुंडे अथर्वांगिरसमुत्तरकुंडे तु सामवेदं
पाठयेत्॥ वेदचतुष्टयमविहाय सामवेदमथासने वरुणाध्यायिभिश्चतुर्भिर्ब्राह्मणैश्च
त्वारि वेदपारायणानि कारयेत्॥ दक्षार्थत्वादस्य कर्मणः॥ रोगनिरसनमेव दृष्टप्रधान
प्रयोजनं॥ अवांतरप्रयोजनं तु दुरितापूर्वनिवृत्त्यर्थः॥ सच वेदपारायणचतुष्टयसा
ध्यवेदानामपि चातुर्विध्यं स्वतः सिद्धमित्यृग्वेदादिपारायणकथनं पारायणकथं
विधिस्तु परिभाषायां निरूपितः॥ यद्यपि सामसु पठ्यमानेषु वेदांतरे भूत्वपव्यमा
नेषु साम्नां तथापि वेदचतुष्टयपारायणविधिबलात्कर्तृकुंडस्थापनाविधानाच्च

यावत्तापरस्परसंवादोधिकं कर्माकृतिश्च न भवेत्तावत्तिन्नागेकलशांश्चतुष्टयं स्थाप
यित्वा मध्ये वासुदेवाधिष्ठानकलशं स्थापयेत्॥ दशांशेन होम इति॥ यस्मिन्दिवसे
यावान्वेदपाठो जायते तावत्तं ग्रंथसंख्यायां गणयित्वा तद्दशांशहोमाख्यं तद्दशांशाधावि
जन्यप्रतिदितिभिः कार्यः॥ अत्राप्यपरिगणनादि प्रकारः॥ मंत्रब्राह्मणेभिर्जित्वाय
स्मिन्वेदे यावान्ग्रंथः॥ तावत्तदंशाधाविजन्यप्रतिदिनमेकैकांशसंख्ययो वा
हुतिहोमः कार्य इति होमद्रव्यं च घृताक्तास्तिलायवाः॥ शुक्रमंदिने षु प्रथमदिन
एव ग्रहयज्ञप्रकारेणादित्यादिग्रहाः स्थापयित्वा ग्रहशांतिहोमान्तानि वर्त्य यावत्क
र्मसमाप्तिस्तावत्स्थापितान्नवग्रहान्प्रतिदिनं गंधपुष्पादिभिः समर्चयेत्॥ क
र्मांते दक्षिणा देयात्॥ ग्रहयज्ञप्रकारस्य परिभाषायां दर्शितः॥ द्विजपुंगव इति द्वि
जपुंगवः आचार्यः॥ भद्रासन इति भद्रासनस्वरूपं विनायकशांतौ दर्शितं॥ अभिषे

कं समाचरेदिति॥ एवंविधभद्रासनोपविष्टस्य रोगिणः अभिषेकमाचार्यः इतरब्रा
ह्मणसहितो वैदिकैः स्मार्तैश्च मंत्रैः कुर्यात्॥ अभिषेकसमये च वासुदेवाधिष्ठान
कलशोदकं नवग्रहयज्ञे चोक्तप्रकारेण यजमानमभिषिंचेयुः॥ ततः किं कुर्यादि
त्यत आह ततो दद्याद्यथाशक्त्या गो भू हेम तिलादिकं॥ ब्राह्मणेभ्यः तथा देवमाचा
र्याय निवेदयेत्॥ देवं पूर्वोक्तं चतुर्भुजं वासुदेवस्य प्रतिमां एवं तत्प्रतिमादानमंत्र
माह॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः॥ प्रीतास्सर्वे व्यपोहंतु मम पापं सुदा
रुणं॥ इत्युदीर्य समुत्कृत्या तमाचार्यं समापयेत्॥ एवंविधानैर्विहितैः श्वेतकुष्ठी वि
शुध्यति॥ ॥ इति शातातपप्रोक्ते पांडुकुष्ठीहरं॥ अथ प्रकारांतरेण कुष्ठहरं॥ शा
तातपप्रोक्ते कुष्ठी गोवधकारी स्यात्तस्य निष्कृतिः॥ स्थापयेद्घटमेकं तु पू
र्वोक्तद्रव्यसंयुतं॥ समंतरेतरप्रोक्ते पांडुकुष्ठहरे यानि पंचरत्नवारीणि द्रव्याणि

हितानि तैर्युक्तमेकं कलशं स्थापयेदितिशेषः॥ तत्र कलशगतं कारादिविशेषमाह॥ र
क्तचंदनलिप्तांगं रक्तपुष्पावृतं॥ रक्तगर्भं तु तं कलशं स्थापयेद्दक्षिणादिशि॥ तं कल
शं दक्षिणादिशि कुंडस्य दक्षिणदिग्भागइत्यर्थः॥ ताम्रपात्रं तु न्यसेत्तत्र तिलपूर्णं सु
पूरितं॥ तत्रेति कलशोपरि न्यसेद्देवं हेमनिष्कमितं यमं यजेत्पुरुषसूक्तेन पा
पं मे शमयस्वामिति॥ निष्कस्वरूपं परिमाणप्रकरणेऽस्माभिरुक्तं॥ यममूर्त्तिस्तु दक्षिणह
स्तेन दंडधारिणी वामहस्तेन नयनरमहिषाधिरूढा च भवति॥ पुरुषसूक्तेन यजेत्॥
पूजाप्रकारस्तु परिभाषायां पुरुषसूक्तविधानेन निरूपितः॥ पापं मे शमयस्व मम ता
मिति पापं शरीरवर्त्तमानं रोगस्वरूपं तन्निदानभूतं दुरितं च शमयस्व मम तामिति॥ संकल्पे
त्यर्थः॥ सामपारायणं कुर्यात्कलशे नत्र कामतः पूर्णं सुपूर्णिनं॥ तत्रेति कलशस्ये
॥ दत्तांशं सर्पिषा कृत्वा पावमान्या निषेचने॥ विहितं धर्मराजं तमाचार्याय निवेदये

त्॥ सामवेदविदो नावेवमृचं वायुपाजानोपपन्नशाखाभिन्नं वा वेदपारायणे वृत्ती
ता वेदपारायणविधिश्च परिभाषायां दर्शितः॥ पावमान्याः पारायणसमाप्तिस्तावत्प्रति
दिनं यमं पूर्वोक्तप्रकारेण पूजयेत्॥ होममंत्रा व्याहृतयः॥ दशांशदानप्रकारश्चा
पांडुकुष्ठरोगहरोक्तरीत्या विज्ञेयः॥ पावमान्येति पावमानः सुवर्जनः स्वादिष्ठयेम
ना प्याः स्वस्वशाखोक्तः पवमानो मास्व॥ पवमानः सुवर्जन इत्यनुवाको गणहोमप्र
करणे दर्शितः॥ स्वादिष्ठयेति पांडुरोगहरप्रयोगे दर्शितं॥ दानमंत्रमाह॥ यमो
महिषमारूढो दंडपाणिर्यमापह॥ दक्षिणाशापतिर्देवो मम पापं व्यपोहतु इत्युच्चा
र्य विसर्जयेन्नमस्कृत्य गोत्रं क्रियमाचरेत्॥ ब्रह्मगोवधयोरेषा स्याद्दत्यानं स्ति निष्कृतिः॥
ब्रह्मवधस्य समनंतरं पूर्वोक्तं कर्म गोवधस्येति तद्दिति विज्ञागः॥ ॥इति प्रकारांत
रेण कुष्ठहरं॥ ॥अथापरं कुष्ठहरं॥ ॥शिवगीतायां॥ योन रोहंति वै शंतन कुष्ठरोगी

महा.
३५८

त्वेत्तुसः॥ सांतपनं प्रकुर्वीत नागवान्नहं तुरंकरः॥ सांतपनं॥ ततः कृत्वा च कृच्छ्र
प्रकरणोक्तं धाय्यि॥ स्तुइ जंतुहननेइदं प्रायश्चित्तं तत्रापि व्याधिरल्पश्चेत्॥ तानसिज
घुनि लघूनि गुरूणि गुरूणीति गौतमवचनात्॥ इत्यपरकुष्ठहरं॥ अथ कुष्ठ
रोगहरं वृषदानं॥ वायुपुराणे॥ कुष्ठी स्यात् — — — वेदिकपंचकम्याचिहितं॥
अथ कुष्ठकुष्ठहरं वृषभदानमनुत्तमं॥ यत्कुर्यात्कुष्ठरोगार्त्तः शारीरसुख
कारकं पंचैस्त्रिभिः स्तुकुर्वीत कामाने नवापुनः॥ राजतं वृषभं मुख्यं हेमपृष्ठं खुरं
तथा॥ हेमश्वरेण मायाच कुर्वीत तमधिष्ठितं पलजस्ता परिमाणप्रकरणोक्तं
धायि॥ महेश्वरस्योमायाश्च प्रतिमे हे सुवर्णस्य पंजैस्त्रिभिर्वान्यामेकेनवा रूपेदि ३५८
त्याह॥ सौवर्णी प्रतिमे द्वे तु पूर्वोक्तेनक्रमेण तु यथा विभवमानेन वित्तशाठ्यं का
रयेत्॥ अत्र वृषभदानस्य प्राधान्यात् उमामहेश्वरप्रतिमे विहितपलत्रितयादि प

रिमाणादपि न्यूनपरिमाणेन सुवर्णेन कृते अपि दोषाभावेनेत्येतत्सूचयति वित्त
शाठ्यमित्यनेन॥ वृषभप्रतिमा तु उक्तपरिमाणेनैककार्यप्रधानत्वात्॥ पट्टोष्टके
कांस्यपात्रे सर्पिषेयत्तं विचक्षणः॥ श्वेतपुष्पैरक्तनाद्यैः श्वेतवस्त्रैरलंकृतं॥ एवं
विधे तदृषं कांस्यपात्रे निक्षिप्य दद्यादिति शेषः॥ ब्राह्मणं तु विप्रमामुक्ते स्वाचारं संयतें
द्रियं॥ सर्वशास्त्रशास्त्रभृत्कारं प्रतिग्रहपराङ्मुखं॥ दांतं कुलीनं धर्मज्ञमनुद्वे
गकरं नृणां॥ क्रोधलोभविहीनं च सर्वशास्त्रार्थकोविदं॥ गृहमाहूय नत्वा तत
था विधिसमर्चयेत्॥ कैयूरकटकैर्वस्त्रैर्माल्यैश्चैव वाग्गुलीयकैः॥ होमं च पूर्ववत्
कुर्यान्मंत्रै माहेश्वरैस्तथा॥ पूर्ववदिति स्वगृह्योक्तप्रकारेणाग्निं प्रतिष्ठाप्य समि
द्व्य्वाज्यतिलहोमान् प्रत्येकमष्टोत्तरसहस्रसंख्यया कुर्यादिति शेषः॥ माहेश्वरा मंत्रा रुद्र
॥ प्रकारकाः॥ ते च स्व स्वशाखोक्ता ग्राह्याः॥ तत्र त्र्यंबकमंत्रो दर्शितः॥ उक्त

ज्वरहरे॥ कनुजांयेतिद्रुहरे मामहेश्वरदानं॥ अत्रैव रुद्रयामलेपि॥ मूलहर त्रिशूल
दाने॥ त्रैव पंचाक्षरो दर्शितः॥ पूर्वोक्तगुणविशिष्टेन ब्राह्मणेन वृषचंवक्तेमा॥ दान
मंत्रस्थिताष्टमूर्त्तिरधिष्ठानमिन्मनेन श्लोकेन पूजयित्वा तथा तत्रस्थितेनैव सर्वक
र्मविपाकोस्मिन्सनेन श्लोकेनो मामहेश्वर पूजां कारयित्वा ततो होमं निवर्त्तयित्वा
यवविशिष्टवृषभं ब्राह्मणाय दद्यात्॥ दानप्रकारमाह॥ उदङ्मुखोपविष्टाय महादेव
स्य संनिधौ॥ प्राङ्मुखो व्याधितो दद्यात्॥ मंत्रेणानेन धर्मतः॥ अष्टमूर्त्तेरधिष्ठानं कु
पयाद्वृषभध्वजः॥ स्वेनमोडुंबरं॥ सर्वमप्यवाप्तित्रमेव च॥ त्वमेवाधजनितं यत्वमुज्ज
न्मयवाहर॥ सर्वकर्मविपाकोक्त पार्वतीनाथ सर्वग॥ कुष्टहानव सर्वेश्वरस्तमांपा
र्वतीपतो वृषभध्वजेति धजइति सबुध्यं तं निन्नंपरं॥ अष्टमूर्त्तेर्ध्वजेति वृषभ वि
शेषणं॥ ॥इतिकुष्टहरवृषभदानं॥ ॥अथहीनकुष्टहरपीतकुष्टहरं च॥ चाणात २६०

पश्लोके॥ स्वसुतागमने चैव रक्तकुष्टं प्रजायते॥ नागिनीगमने चैव पीतकुष्टं प्र
जायते॥ तस्मात्प्रतिक्रियां कुर्यात्पूर्ववतः कलशान्न्यसेत्॥ पूर्ववतः पूर्वदिग्भागे होमस्था
नापेक्षया इत्यर्थः॥ कलशेतु पांडुकुष्टहरोक्तानि पंचपल्लवादीनि स्थापयेत्॥ य
स्मिंश्च दिने यावद्वक्ष्यमाणवेदपारायणं प्रजायते तद्दशांशहोमो व्याहृतिभिःका
र्यः॥ होमद्रव्यं घृताक्ततिलायवकाष्टं तमेव वा॥ कुंभस्थापनं च स्वरसोक्तमार्गे
ण॥ दशांशहोमे दशांशापरिकल्पनाप्रकारस्तु पांडुरोगहरे निहितः॥ पूर्ववतः कलं
शान्न्यसेदित्युक्तं॥ अधुना तत्कलशाणां करणप्रकारमाह॥ पीतवस्त्रसमाच्छन्नं पी
तमाल्यविभूषितं॥ रक्तकुष्टेतु रक्तवस्त्रादिभूषितं कलशं स्थापयेत्॥ पीतकुष्टे
तु पीतवस्त्रादिभूषितमिति नेरः॥ तस्मिन्कलशे वक्ष्यमाणगुणोपेतमिंद्रं स्थापये
दित्याह॥ तस्योपरि न्यसेद्देवं हेमपात्रे सुरेश्वरं॥ सुवर्णनिष्कषट्केन निर्मितं वज्र

भारितां॥ यजेत्पुरुषसूक्तेन वा ससंविष्णुरूपिणां सर्वौषधिमुते कुंभे ऋग्वेदं तु समापये
त्॥ वज्रधारणमित्यादि॥ इंद्रमूर्त्तिस्तु वज्राभयकरा वज्रायुधा गौरा वा स्यात्समारूढा च स्यादे
त्॥ यजेत्पुरुषसूक्तेनेति॥ यजेत्पूजयेत्॥ पूजाविधानं च परिशिष्टे पुरुषसू
क्तविधाने निर्दिष्टं॥ ऋग्वेदं समापयेदिति॥ ऋग्वेदपारायणं कारयेत्॥ यावद्वेदसमा
प्तिश्च प्रतिदिनमिंद्रं तत्प्रकाशकैर्वैदिकैः स्वस्वशाखोक्तैः पूजयेत्॥ इयं प्रकारान्तरकर्म
त्वस्तु न वयः हयत्ते प्रकरणे दर्शितः॥ तथा वक्ष्यमाणरोगप्रतिमापि प्रतिदिनं पूजनी
या रोगप्रतिमा जन्तूनां चानेन प्रकरणेन कल्पादर्शयिष्यति॥ प्रयोगक्रमस्तु मूत्रकृ
च्छ्रहर वरुणमूर्त्तिदानोक्तो ज्ञेयः॥ अत्र कलशस्थापनादि विशेषोऽत्रैव दर्शितः॥ र
क्तकुष्ठाधिदेवतायै नमः॥ पीतकुष्ठाधिदेवतायै नमः॥ इति च रोगप्रतिमापूजायां
मन्त्रावूह्यौ॥ अधुना तामेव रोगप्रतिमामाह॥ सुवर्णपुत्रिकां कृत्वा सुवर्णदशकेन तु॥ ३६१

द्विप्रायसं पद्मपुष्पायः स्यामिति ब्रुवन्॥ टीका॥ सुवर्णदशकेन सुवर्णदशकपरिमा
णवाची सुवर्णशब्दः तथा पूर्वोक्तनिष्कलक्षणं च परिमाणं प्रकरणेऽपवर्णितं॥ नि
ष्पापः स्यामिति ब्रुवन् प्रतिमां दद्यादित्यर्थः॥ प्रतिमादानमंत्रमाह॥ देवानामधिपो
देवो वज्री वज्रनिकेतनः॥ शतयज्ञसहस्राक्षो मम पापं व्यपोहतु॥ इमं मंत्रं स
मुच्चार्य आचार्याय यथाविधि॥ दद्यादेवं सहस्राक्षः सर्वपापस्य पतनं तये॥ ॥ इति
रक्तकुष्ठहरं॥ ॥ अथ गुल्मकुष्ठहरं॥ स्ववधूगमने चैव कृच्छ्रकुष्ठं प्रजायते
॥ स्ववधूः स्वपुत्रभार्या तेन कार्यं विशुध्यर्थं प्राजापत्यं स्यार्धमेव च॥ दद्याद्होम
सर्वत्र॥ घृताक्तैः क्रियते तिलैः॥ प्राजापत्यः स्यार्धमिति॥ प्राजापत्यः स्यार्धमिति॥
प्राजापत्य षडब्दिकं प्रस्तुतं तदर्धं त्रिवार्षिकं प्रायश्चित्तोपक्रमप्रकारस्तु प्रा
यश्चित्तोपक्रमप्रबंधे तौ परिशिष्टाख्यायां निरूपितः॥ प्राजापत्यार्धस्यमित्यस्यान्या

महा
३६२

व्याख्या॥ समनंतरकुष्टहरोक्तसार्धतत्त्रयम्॥ कलशस्थापनाप्रकारः पूर्वो
क्त एव॥ सुवर्णनिष्कत्रयेणैव प्रतिमा॥ सुवर्णपंचकेन रोगप्रतिमा॥ कुर्वेदेतद
ज्ञा वे वेदांतरे वा संहितामात्रस्यैव पारायणमिति॥ पूर्वोक्तेन कल्पेन॥ पूजादि
प्रकारस्तु तद्वदेव॥ ॥इति गुल्मकुष्टहरं कृष्णकुष्टहरं॥ ॥अथ कटिकुष्टहरं॥
शातातपप्रोक्ते। पितृव्यपत्नीगमनात् कटिकुष्टं प्रजायते॥ निष्कृतिस्तेन कर्त्त
व्या कन्यादानेन यत्नतः॥ उक्तरोगानुसारेण त्रिवर्षादि समाचरेत्॥ कन्यादाना स
नवे॥ अन्नं धनादिनाप्राज्ञोऽन्य तस्मात्कन्यादानफलप्राप्यं॥ कन्यादानजनितसुह
नापनोपपत्न्या दस्युः कर्मणः॥ उत्ते पिपृत्तांतरं॥ तच्च त्रिवार्षिकादि प्रायश्चित्ताच ३६२
रणं॥ प्रायश्चित्तोपक्रमप्रकारस्तु परिभाषायां प्रायश्चित्तोपद्धतौ दर्शितः॥ ॥इ
तिकटिकुष्टहरं॥ ॥अथ नेत्रकुष्टहरं॥ ॥शातातपप्रोक्ते॥ मातुलान्यास्तु गमना

त्तद्दृष्टिकुष्टं प्रजायते॥ कृष्णाजिनप्रदानेन प्रायश्चित्तं समाचरेत्॥ यद्गमनस्तु
संतकं प्रायश्चित्तमुदारितं॥ तदेव मुनिभिः प्रोक्तं नियतं तत्सुतास्वपि॥ पूर्वोक्त
त्रैवार्षिप्रायश्चित्तं समाचरेत्॥ इत्यर्थः॥ कृष्णाजिनदानं विस्तुस्तुतो॥ अथ वैशा
ख्यां पूर्णमास्यां कृष्णमृगाजिनं सखुरं॥ सश्रृंगं सुवर्णश्रृंगं रौप्यखुरं मुक्तालांगुलभू
षितं कृत्वा विवेकवस्त्रे प्रसारितं प्रसारयेत्॥ ततस्तिलैः प्रच्छादयेत् सुवर्णनाभिं
कुर्यात्॥ अहतेन वाससा युगेन प्रच्छादयेत्॥ सर्वरत्नगंधैश्चालंकुर्यात्॥ चतसृदि
क्षु चत्वारि तैजसानि पात्राणि दधिमधुक्षीरसर्पिः पूर्णानि दद्यादाहिताग्नये ब्रा
ह्मणायालंकृताय वाससा युगेन प्रच्छाद्य इति॥ अस्यार्थः॥ वैशाख्यां पौर्णमास्यामिति
॥ एतच्च कालीतरेणामप्युपलक्षणार्थं तेच कालामत्स्ये प्रदर्शिताः॥ वैशाखी पौर्ण
मासी च ग्रहणं शशिसूर्ययोः पौर्णमासी तथा माघी आषाढी कार्त्तिकी तथा॥ उक्त

महा.
१६३

रायणो ह्यारण्यं तस्मै दत्तं महत्फलमिति॥ व्याधिनिमित्तः कालः शातातपवचनेन
प्रागुद्दिष्टः॥ कृष्णमृगाजिनं सखुरं सशृंगं सुवर्णशृंगं रौप्यखुरं मुक्तालांगुलं तत्त्वपि
तं॥ कृत्वा विवेक वस्त्रे प्रसारयेदिति॥ गोमये च लिप्तभुवौ देशे आविकं वस्त्रं क
बलमास्तीर्य तत्र स्वर्णावसिधत्तु रम्यगसहितं पुनरौप्यखुर हेमशृंगरजतदंता
लंकृतं मौक्तिकयुक्तं तपुच्छं सुतं वि— मालं कृत पुच्छोपेतं वामनेत्रयो मौक्तिकं कृते
नितं कृष्णमृगचर्म प्रसारयेत्॥ कंबले कृष्णाजिनमास्तीर्य तस्य स्तुरादिपुरौ खुर
हानि स्थापयेदित्यर्थः॥ तथा च मत्स्ये॥ गोमयेनोपलिप्ते तु भुवौ देशे नराधिपः॥
आ राववसमास्तीर्य तत्रोपनवं वस्त्रमाविकं ततः सशृंगं सखुरं मास्तरे कृष्णमगेमय १६३
णं॥ कृष्णमार्गेण कृष्णसंगसंबंधि चर्मेत्यर्थः॥ कर्त्तव्यं रूक्मशृंगं तद्रूप्यदंत तथैव च
लांगुले विद्रुमं चैव नेत्रयो मौक्तिकं तथेति॥ ततस्तिलैः प्रस्थापयेत्॥ सुवर्णनाभिं च

कुर्यात्॥ इतेन वासोयुगेन प्रच्छादयेत् सर्वरत्नं गंधैश्चालंकुर्यात् तस्य चदि
क्षु चत्वारि तैजसानि पात्राणि क्षीरदधिमधुसर्पिः पूर्णानि दद्यादिति॥ तिलैः प्रच्छा
दयेद् जिनं तिलैरात्मसमं राशिमजिने कुर्यादित्यर्थः॥ तत्राशौ स्तु वर्णषोडशमाष
त्मकं वा सुवर्णं हेम यथाशक्त्यनुसारेण नाभिस्थाने क्षिपेत्॥ एतदेव सुवर्णनाभत्वं॥ अ
हतं वासो नूतनं॥ अत्र वस्त्रद्वयमुपात्तमन्यत्रैकमेवाभिहितं॥ अतो वस्त्रविषये
विकल्पः॥ कृष्णाजिनस्य चतसृषु दिक्षु क्षीरादिपरिपूरितानि तैजसानि पात्राणि
सौवर्णराजताम्रादीनि पात्राणि यथाशक्त्यनुसारेण निदध्यात तैजसपात्रेषु सर्वथाश
क्तौ किंश्चैन्मयानि वा क्षीरादिपरिपूरितानि स्युः॥ सतिसंभवे तैजसानामन्यथा
नां च समुच्चयः॥ अन्यथा शक्तिपेत्त्रमायाविकल्पः॥ एतदिति प्रामेयौ वमास्या ति
लैरात्मसमं कृत्वा वाससाच्छादयेद्बुधः॥ सुवर्णनाभिं तं कुर्याद्रत्नकुर्याद् विशेषतः॥

रत्नैर्गंधैर्यथाशक्त्या तस्य दिक्षु च विन्यसेत्॥ धातुपात्राणि चत्वारि दिक्षु दद्याद्यथा
क्रमं॥ मन्मयेषु पात्रेषु पूर्वादि क्रमेण तु॥ घृतं क्षीरं दधि क्षौद्रमेवं॥ कुर्याद्विचक्षणः
इति विष्णुवचनाद्दिष्टहिताय ये कृष्णाजिनं दद्यादित्यस्मिन्नुक्ताहिताग्निमुख्यं
प्रदानं तदभावे॥ अन्योप्यतुसंज्ञाग्निग्राह्यः॥ अत्र दाने फलश्रुतिर्विष्णुस्मृताव
वोक्ता॥ अत्रागाथा भवति॥ यस्तु कृष्णाजिनं दद्यात्सखुरं शृंगसंयुतं तिलैः प्रच्छा
द्य वासोभिः सर्वरत्नैरलंकृतं॥ ससमुद्रगुहा तेन सशैलवनकाननां॥ चतुरंता भ
वेद्दत्ता पृथिवी नात्र संशयः॥ कृष्णाजिने तिलान्कृत्वा हिरण्यं मधुसर्पिषी॥ ददाति
यस्तु विप्राय सर्वं तरति दुष्कृतं॥ ॥इति कृष्णाजिनविधिः॥ ॥इति नेत्रकुष्ठहरं॥ ॥अथ ३६४
श्वेतोष्ठहरं॥ ॥शातातपप्रोक्ते॥ ताम्बूलहरणाच्चैव श्वेतोष्ठः संप्रजायते॥ दक्षिणास
हितं दद्यात्सवे रूप्यं मणिद्वयं इति॥ ॥इति श्वेतोष्ठहरं॥ ॥अथ चित्रकुष्ठहरं॥ शातात

पप्रोक्ते॥ ॥ब्रह्महा नरकस्यांते जायते चित्रकुष्ठवान्॥ प्राजापत्यत्रयं कुर्याद्देयं रूप्य
पलत्रयं॥ प्राजापत्यस्वरूपं कृच्छ्रप्रकरणेऽस्याभिपालनद्दत्तं तु परिमाणप्रकर
णे॥ ॥इति चित्रकुष्ठहरं॥ ॥अथोदुंबरकुष्ठहरं॥ ॥शातातपप्रोक्ते॥ ॥ब्रह्महा नर
कस्यांते जायते चित्रकुष्ठवान्॥ प्राजापत्यत्रयं कुर्याद्देयं रूप्यपलत्रयं॥ प्राजापत्य
स्वरूपं कृच्छ्रप्रकरणेऽभ्यधायिषि॥ उदुंबरी ताम्राचौ नरकांते प्रजायते॥ प्राजापत्यत्र
तं कृत्वा ताम्रपलद्वातं द्विजोत्तमे॥ प्राजापत्यमोजनं तृणं कृच्छ्रं॥ प्रकरणे परिमाणप्रकर
णे च निरूपितं॥ ॥इत्यौदुंबरकुष्ठहरं॥ ॥अथ कुष्ठरोगप्रतिमादानं॥ तत्रलं तां
च कर्मविपाकसारे॥ कुष्ठकुंचितसर्वांगः श्वजमत्तोपवीतधृक्॥ धावत्प्राणहरे॥
वृधःस्त्रिनेत्रः किंकणीयुतः॥ पूजाविधानं त्वातं कोरेवता तत्रैव सादिना परिभाषायां
रोगप्रतिमादानविधानमुक्तं॥ ॥इति कुष्ठरोगप्रतिमादानं॥ ॥महार्णवाख्येमहिते

महा. प्रवंधेमोधारत्नाम्नोमरत्नात्मजस्य॥ सत्कर्मरत्नप्रकरेणसम्यक्स्विंशस्तरंगः॥ ॥अथा
३६५ पुष्पवतीत्वादिहरणं॥ ॥तत्रपितामहः॥ स्तुलिपासातुरंनारीनर्त्तारमन्यमामिपान्नंस्व
यमश्नातिनसापुष्पवतीनवेत्॥ मिथुनानिचपंचाशज्ञोजयेत्॥ तन्निवृत्त्यैप्रदद्याच्छा
त्राप्यवस्त्रनितान्मः शक्त्यानुसारतः॥ इत्तवस्त्रवराजंचहरिद्राचैवधान्यकं॥ विका
रवृत्त्येणतीरंदद्याच्चकुंसंज्ञकं॥ लवणंचाष्टमंखेतत्स्त्रीणांपापाष्टकमुते॥ स्त्रवराजः
त्राप्यकंसुवर्णग्रावकमथ्यमुच्यते॥ कर्पूरोवाशर्करावाविकारवृत्त्येणतीरमिति॥
तीरनिर्मितामिस्त्राद्योविकाराः॥ दध्यादीनिवातघृतमित्यर्थः॥ इत्तवस्त्रवराज
श्वनिष्पावाश्चैवधान्यकमित्यपिपाठः॥ निष्पावाधान्यविशेषः॥ इत्तवस्त्रवराजश्र ३६५
जीरकंचैवधान्यकमित्यपिपाठ्यते॥ अत्रप्रतिवधाधिकोशक्त्यनुसारेणैक्ककर्म॥
आरन्निद्रष्टव्या॥ ॥इत्यन्पुष्पवतीत्वहरं॥ ॥अथवंध्यात्वहरसुवर्णधेनुदानं॥ ॥

वायुपुराणे॥ ॥चतुर्विधाचवंध्यात्वंध्यानवेध्यस्त्रवियोजनात्॥ वक्ष्येतस्याप्रतीकारंत
त्स्वरूपंनिवोधमे॥ हिरण्येनयथाशक्त्यासवत्साकारयेद्दशधेनुंपलेनवत्संच
पादेनमनुरब्रवीत्॥ हिरण्येनयथाशक्तेति॥ पलेनवातदर्धेनतदर्धेनवापवायु
न॥ रितिपरिज्ञाषोक्तप्रकारेणशक्त्यनुसारेणकुर्यादित्यर्थः॥ पलस्वरूपंपरिमाण
प्रकरणेनिरूपितं॥ धेनुंरूप्यखुरांरत्नतस्माःपुच्छतिमोजयेत् घंटांगलेचवध्रीत॥
स्त्रवस्त्राभ्यांप्रयुत्तमसुचिः॥ चंदनागुरुकर्पूरगंधमाल्यैःसुशोभने॥ उपचारैःषोड
शाभिर्नैवेद्यंपायसंन्यवेत्॥ मोदकंचतथापूपंगुलंलवणमेवच॥ जीरकंवसुविस्ती
र्णंस्वर्पंवेणुमयेदहे॥ धेनोरेकंप्रदातव्यंब्रह्मणस्त्रीषुचैवहि॥ षउपैरदशावाद
द्यात्तद्दनंतरमेवच॥ उपचारैःषोडशाभिरित्यादि॥ पूजयेदिति॥ शेषः॥ मोदकादि
भिःपरितपूरितमेकंस्वर्पंधेनोःपुरस्तात्स्थापयित्वाद्यपरिपूरितान्येवंस्वर्पाणि

पउषैर्दत्वा सवत्सं तु कांस्योपदोहां स्मरेदित्यर्थः॥ ब्राह्मणं सर्वशास्त्रार्थकुशलं
धर्मवेदिनं॥ विद्याविनयसंपन्नं शांतं चैव जितेंद्रियं॥ अजातुपंसवं जनप्रियं कल्मष
वर्जितं॥ आरूपयन्नकासं पूज्यवस्त्रादिभिर्गंधपुष्पकैः॥ तेनैव कारयेत्सूजामादेता
धेनुवत्सयोः॥ होमं च कारयेत्तत्र समिदाज्यचरूत्कटं पूजां मां होमे च मंत्रमाह॥
सोमो धेनुमिति मंत्रस्तु स्वार्थं ततः पुनः॥ अस्या गौतम ऋषिः॥ धेनुर्देवता त्रिष्टु
प्छंदः॥ विहितार्थे विनियोगः॥ सोमो धेनुं सोमो अर्वंतमाशुं सोमो वीरं कर्म
ण्यं ददाति॥ सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै॥ सोमविनियुक्ता
या अस्याः संयोगमस्यक्स्या येनात्र धेनुरेवता॥ होममत्कटं कारयेद्दिजैः प्रत्येक
मष्टोत्तरसहस्रं कुर्यात्॥ धेनुदानप्रकारमाह॥ प्राङ्मुखायोपविष्टाय प्रदद्यात्ता
मुदङ्मुखः॥ मंत्रेणानेन विधिवत्पुच्छे हस्तं विधाय च॥ दानमंत्रमाह॥ सार्धश्लोके ३६६

दमेन॥ धेनुर्वांगिरसामस्त्रैप्रविष्टासुरसेभ्यया॥ दुरितायात्तथा नानोरम्ये श्रेवरु
णस्य च॥ मम श्रगाश्रवर्त्ते तेवनेषु पवनेषु च॥ प्रीणातु मम सदा पुत्रपौत्रसदा सुखं
॥ प्रयच्छ दिवारात्रमविछेदं च संततं॥ एवं दत्वा तु दानं च प्रणिपत्य विसर्जयेत
॥ ॥ इति वंध्यत्वहरं सुवर्णधेनुदानं॥ ॥ अन्नदानं हृध गौतममाह॥ स्त्रवरूणोत्त
वेत्ता तु बालकं हंति या विधौ॥ ॥ वायुपुराणे॥ यज्ञोपवीतं कुर्वीत कांचनं तु स्व
र्णाक्तितः॥ अलंतवर्णमुक्ते न राजतं चोत्तरीयकं॥ अलंतवर्णमुक्तं च मितान्वयः॥
उत्कृष्टमित्यर्थः॥ तेन कांचनेन वक्ष्यमाणफं पलादि तितेन स्वशक्तितो यज्ञोपवी
तं कुर्वीत कारयेदित्यर्थः॥ तथा समीचीनं राजनं मुत्तरीयं च उन मत्र न व्यप्रमा
णमाह पलार्धेन तदर्धेन तदर्धेनापि वा पुनः॥ यथाशक्त्या देशोदेयं॥ तु मौक्तिकं वज्र
मेव च॥ पलन्यूनं परिमाणं गोणं न्यूनं च परिमाणस्य धात्॥ यज्ञोपवीतस्य

महा.
३६१

प्रिस्थाने मौक्तिकमुत्तरीयमप्युतुवस्त्रवितिविवेकः॥ प्रक्षाल्य पंचगव्येन णप्रम्माताम्र
भाजने॥ द्रोणप्रमाणं तस्मिंस्तु निक्षिपेद्दधिमध्वृतं॥ आज्यस्योपरि संस्थाप्यमुपवी
तं सुपूजितं॥ गंधपुष्पाक्षतैर्धूपैर्नैवेद्यैः परितर्कितः॥ पंचगव्यस्थाने गायत्र्या मंत्र
त्वेनापारानारवस्त्रिष्टपूजामपिसेवमंत्र॥ एवं प्रक्षालितमुत्तरीयं च ताम्रभाजने
मध्यतो मध्ये निक्षिपेत्॥ क्वथमिश्रतत्राह॥ द्रोणपरिमाणमित्यादि॥ अस्यार्थः॥ द्रो
णप्रमाणं दधि तस्मिंस्ताम्रभाजने तस्मिंस्ताम्रभाजनमध्ये तो निमध्ये निक्षिपेत्॥
दध्युपर्याज्यं तत्प्रमाणं॥ यथा जानोपन्नप्रमाणं वा स्थापयेत्॥ घृतं द्रोणपरि
माणाज्यं संनवे यथा जानो पंचप्रमाणमाणमाज्यमिति व्यवस्था॥ तत्राज्ये उपवी ३६१
तमुत्तरीयं च निक्षिपेत्॥ तदुपवीतं सुपूजितं कुर्यात्॥ युक्तं चैतत्॥ उपवीतस्याग
र्भस्थानीयत्वात् दध्यादेर्जरायादिस्थानात्वात् उपवीतं सुपूजितमित्यत्रोपवीतत्राह॥

सहचरितमुत्तरीयमपि लक्ष्यतीति तत्सहितमेवोत्तरीयसहितमुपवीतं निक्षि
प्य पूजयेदिति॥ पूजानंतरकृत्यमाह॥ ततो ब्राह्मणमाहूय होमं तत्र च कारये
त्॥ तिलैराज्येन मधुना मिश्रैरष्टोत्तरं शतं॥ होममंत्रो व्याहृतयो गायत्री वा॥ व्या
हृतीनां मध्यादिनवग्रहप्रकरणे ग्रहाद्यावाहनप्रस्तावे दर्शितं॥ गायत्र्यास्तु कू
ष्मांडहोमप्रकरणात्तस्मैकृतव्रते देवं वस्त्राद्यैः पूजितायै॥ मंत्रेणानेन विधिवदा
नुरक्तायोपवीतकं॥ मंत्रमाह॥ उपवीतं परमिदं ब्रह्मणा निर्मितं पुरा॥ त्वं नौ कं
स्मरणानेनगर्भं संधारयेस्त्वहं॥ अत्रादितीमार्थस्यामपर्थः॥ नवजाकासंसारे
द्विजकर्मनिष्पादकत्वेन मतस्तारयितुमुपवीतं॥ अतो नौरिव नौका॥ अथ वा
नवउत्पत्तिः॥ अपत्योत्पत्तिविरहितानामपत्योत्पत्तिदायकत्वेन पुत्रामादिनर
कोत्तारकत्वान्नौरिवन्नौका दृष्टस्य पंधनान्यपि ब्राह्मणेभ्यस्तस्मिन्काले प्रद

पयेत्॥ अनुव्रज्य तथा धर्मं प्रणिपत्य क्षमापयेत्॥ गर्भस्रावकरो दोषो देवं कृत्वा
विमुच्यते॥ अस्मिन्कर्मणि स्त्रिया अधिकारः॥ ॥ इति गर्भस्रावहरमतोपवीत
दानं॥ ॥ अथ प्रस्रवद्योनिशोणितहरं॥ ॥ कर्मविपाकसंग्रहे॥ मासोपवासिनी ना
री रेतः प्रस्रावमेध्यदिमेदि संपर्कदोषेण जायते सान्यजन्मनि॥ अवकृत्वा स सदायो
नैतन्निः कृतिरिहोच्यते॥ मासोपवासं कुर्वीत तथा मासं पयोव्रतं॥ मासोपवासवि
धानं पयोव्रतस्वरूपं च कृच्छ्रप्रकरणे निरूपितं॥ ॥ इति प्रस्रवयोनिशोणितहरं॥
अथ स्त्रीस्तन्यान्तरणहरं॥ कर्मविपाकसमुच्चये॥ ॥ क्षीरं मुष्णाति या नारी पूर्वज
न्मनि सुव्रता॥ जन्मान्तरे तु तस्या वै क्षीरं न क्षरतः स्तनौ॥ क्षीरान्नं भोजयेद्विप्रान्सा ३६९
ज्यसमधुसंस्त्रिकं॥ क्षीराज्यमध्वाज्यसहितान्मोदकांश्च विप्रेभ्यो दद्यात्॥ विप्रानिति
बहुवचनात्त्रयोऽवरं पञ्चोजनीयाः॥ तदुपरि शक्त्यनुसारेण॥ अनुलिंपेत्तेनैव न

न्त्रिष्टान्ते न नक्षितः॥ विप्रपादोदकेश्चैव स्नानमेकं च मण्डजं॥ सुरामांसस्तौद्रघृतं
॥ पुष्पान्नैर्गन्धपुष्पकैः॥ भूतेभ्यश्च बलिं दद्याद्भूतानां च संस्मरणं॥ मधुश्च नवनी
तं च पिण्डमाजो स्नविन्नकः॥ भूतनव्यः सशक्तिश्च भूतानां पञ्चकं विदुः॥ सशक्ति
रिति मद्यादीनां पञ्चानां विशेषः॥ अत्र सुरादीन्यनिहितानि बलिद्रव्याणि तेषु ब्राह्म
णादिभिर्निषिद्धान्यवश्याहार्याणि॥ ॥ इति स्त्रीस्तन्यान्तरणहरं॥ ॥ महार्णवे रेव्यमहि
श्र॰ पूर्वोक्तत्रिरात्रकल्पस्तरंग॥ ॥ अथ प्रकीर्णकप्रकरणमारभ्यते॥ तत्र रक्तो
र्बुदहरं॥ ॥ उमामहेश्वरसंवादे॥ विधवागमनेनापि निर्न्मनारदेवैमतिः॥ रक्तार्बु
दीन्नवेत्कुर्यात्लापश्चित्तं प्रकीर्णतमे॥ कृच्छ्रातिकृच्छ्रं कुर्वीत चान्द्रायणमथापि वा
॥ एवमेवापि विधवाप्रकुर्वीर्णजोगणतमे॥ कृच्छ्रादीनि व्याधिगुरुलघुभावेन स
मस्तानि वा द्विगुणानि योज्यानि॥ एतद्व्रतानि कृच्छ्रप्रकरणे दर्शितानि॥ ॥ इति र

क्तार्बुदहरं॥ ॥अथप्रकारांतरेणरक्तार्बुदहरं॥ शातातपप्रोक्ते॥ रक्तार्बुदीवैश्य
हंताजायतेधर्ममाचरेत॥ तमेवेमाह॥ प्राजापत्यानिचत्वारिसप्तधान्यानिचोत्सृजे
त्॥ आरोग्यस्येतिचोषः॥ सप्तधान्यानिब्रीहियवादीनियथाज्ञानोपपत्त्यानि॥ प्रा
जापत्यस्वरूपंकृच्छ्रप्रकरणेऽभिधास्यामि॥ ॥इतिप्रकारांतरेणरक्तार्बुदहरं॥ ॥अ
पस्मारहरं॥ ॥कर्मविपाकसंग्रहे॥ मात्रावैगुरुणावापि॥ योनरःशास्त्रनिर्णये॥
स्पर्धतेसोप्रजायेतप्रदरव्याधिमान्भुवि॥ चांद्रायणंप्रकुर्वीतकृच्छ्रंचैवातिकृच्छ्र
कं॥ तद्धिस्तोरितिचजपेत्पुत्रसंरव्यया॥ सर्पिर्मधुसमायुक्तं॥ मंडकान्नेनभोज
येत्॥ विप्रांस्तत्सारसलिलान्मार्जयेत्प्रदरं॥ तथा॥ मात्रावेत्यादि॥ मात्रागुरुणापि
ज्ञातयावामादिभियोनरः॥ शास्त्रनिर्णयेशास्त्रविचारविषयेस्पर्धते॥ कृतकेन
तदुक्तमन्यथामतविवेदेत॥ सएवतद्व्याधियुक्तोभवेदित्यर्थः॥ चांद्रायणादिस्वरू

पाणिकृच्छ्रप्रकरणेनिरूपितानितद्धिस्तोरित्यत्रचऋग्द्वयमंत्रः॥ त्र्यंबकंचयुच
कर्णस्तज्जहरेप्रदर्शित॥ विप्रांस्त्रिचतुरादीन्स्वचारानुसारेणभोजयेदित्यर्थः॥ ॥
इतिप्रदररोगहरं॥ ॥अथसंकटहरधेनुदानं॥ शातत्रिदानेपद्मपुराणे॥ असत्य
रास्तवतिपस्तुहिंसाद्यापमनरःधवोधामनः॥ असत्यरीदारम्यति॥ योरहस्ता
निविस्तताव्॥ अत्रनिःकृतिमाह॥ गौतमींधेनुपयस्विनींदांतांजोहितांहेमशृं
गिकांतथारूप्यखुरांरक्तवस्त्रेणसमलंकृतां॥ ब्राह्मणायाग्निवर्णायदद्यात्स्वकृ
त्यमानवीअग्निवर्णाकपिलायातद्दत्वाकारकवर्णायापजेनवातदर्धेनतस्या
प्यर्धेनवापुनः॥ सुवर्णेनपुष्पानांस्तुत्वातथास्वविजवेनतु॥ द्विजोत्तमायप्रेष्यमस
र्वज्ञास्त्रार्थदर्शिने॥ धेनुमप्यतिसंहृष्टांमंत्रेणानेनचक्रितदद्यादितिसर्वेणान्वयः॥
पजस्वरूपपरिमाणप्रकरणेत्वभिधास्यामि॥ गोदानमंत्रमाहगावोमेरूद्रमेसंतुगावोमेस

तुष्टये॥ देवानां त्वं हि सुरभी तृप्तिप्रदा स्वर्गदं मम॥ विनाशाय मति गोदानं पिंडार्घ्यम संग्रहं
॥ तेनेदं मन्त्रतः कुर्यात् स्वर्गदं रोगशांतिदं॥ ॥ इति स्वर्गदं रहदं धेनुदानं॥ ॥ अथाकस्मि
क कार्यं हस्तकं स्मृतं निंदानं वा मुहुर्गणो। अन्यो चौरो भवेद्यस्तु सोकस्मात् ज्ञायते तत्
त्रः॥ वक्ष्ये तु तत्प्रतीकारं दानहोमाभिषेचनैः॥ पलेन वा तदर्धेन तदर्धार्धेन वा पु
नः॥ सुवर्णेन प्रतिकृतिं कुर्यात् कृष्णस्य चक्रितः॥ पलस्य रूपं परिमाणप्रकरणे निरू
पितं यथा वित्तवसारेण त्रिनेत्रं चतुराननं॥ चतुर्बाहुं ध्यानपरं सुप्रविष्टं सुखास
ने व्याघ्रचर्मपरीधानं नागयज्ञोपवीतिनं॥ सौवर्णेन वा राजतेन वा नागयज्ञोप
वीतिनं कुर्यात् इत्ययं॥ श्वेतवस्त्रेण संवेष्ट्य तंडुलोपरि न्यसेत्॥ तंडुलानां परिमाणं
द्रोणानां तु शतं॥ पद्मास्वविनवे नैव तत्र पूजां प्रकल्पयेत्॥ गंधमाल्यैः सुरभिः धूपैर्नाना
नाविधैरपि उपचारैः षोडशाभिराचार्यः सर्वशास्त्रवित् मूलमंत्रेण सर्वं तु कार्यं

रुद्रस्यार्चनं मूलमंत्रः॥ शैवः पंचाक्षरो रुद्रगायत्री॥ आद्यः सप्तज्वररोगहर त्रिमूलज
दाने दर्शितः॥ ॥ द्वितीयस्तु दद्रुरोगहरो मामहेश्वरदाने॥ होमश्चात्र कर्तव्यः स्थंडि
ले सुपरिष्कृते॥ स्वगृह्योक्तविधानेन चाग्नेः स्थापनं भवेत्॥ समिदाज्यतिलैर्मंत्रानि
त्यायांत्र्यंबकं कुर्यात् मे तिवाते पितरि क्रमात्॥ संख्या चाष्टोत्तरशतं प्रत्येकमिह ग
ह्यते॥ कृत्वा कृत्वा च संपातान्पात्रे कुर्याद्विधानतः॥ त्र्यंबकं यजामहे इत्यस्या आर्षा
द्युक्तज्वरे निहितं कल्पे तस्या दद्रुरोगहरोमामहेश्वरदाने आनेपितरित्यस्या रु
द्रविधानोक्तासाध्य सर्वरोगहरा संपातानिति॥ आज्यहोमं कृत्वा प्रत्याहुति संपातान्
स्रुचादि स्थितान् बिंदून् रयत्नकृ॥ पात्रे कुर्यात् तानि: संपाते राज्ये विदुषी रोगिणः
शरीरं वक्ष्यमाणसमये स्नपतजातु॥ अग्नेः पूर्वोत्तरदेशे स्थापयेत्कलशं दृढं॥ वास
सा वेष्टयित्वा तु पंचपल्लवसंयुतं॥ पल्लवानि च आम्राश्वत्थवटप्लक्षोदुंबराणां॥ अथ

म.हा०
३२१

स्यानाऽऽज्यस्यातवःसीकातन्नंगमार्करुहात्॥ अत्रेवामन्तिकाचरोनागुग्गुलस्तत्पातेनासि
मंत्रमंत्रोवातरोगहरश्चामस्त्रिवेत्तेदर्शितः॥ यदिकृच्छ्रादिकंप्रत्ताम्नायमन्त्रतन्द्रव्यधारणेनिषा
दमति॥ तदाप्राजापत्यकृच्छ्रंचांद्रायणमथोःदिनानिपरिगणय्यतावतिसहस्राणिजपेत्॥
हत्यस्थिरोगहरं॥ अथमेदोवृद्धिहरं॥ ज्ञानातपप्रोक्तेदधिचौरस्तुपुरुषोमुक्तोनवतिमेध
स्तादधिधेनुप्रदातव्यातेनविप्रायविश्रुधमे॥ दधिधेनुविधानंतुज्ञातातपप्रोक्ते॥ राज्यस्त्र
हरेत्स्वधापि॥ ॥इतिमेदोवृद्धिहरं॥ ॥अथमतत्वार्यत्वदुःकर्महरं॥ ज्येष्ठेन्नातमन्देतु
मातुजोहहतिस्वयंसन्तवेन्मतपल्लाकुउग्रज्वरसमन्वितः॥ प्राजापत्यत्रयंकुर्याद्देवत
मेववागतामग्निमितिचाज्येनचरुणापोत्तरशतं॥ जुहुयाज्जोजपिप्राणेनेवंपापात्प्रमुच्यते॥ ३२१
प्राजापत्यत्रयमग्निमित्वादिसकृन्नतन्त्वार्यत्वेप्राजापत्यत्रयं॥ द्विश्चवांद्रायणात्रयं॥ पुनःपुन
श्चेत्प्राजापत्यत्रयंचांद्रायणत्रयंचाब्दताववाद्रायणोप्यवस्थितकल्पार्थ्येता॥ मग्निवर्णी

मिमस्यसूक्तस्यकृषिर्देवतादिस्त्रीस्तनस्फोटहरे॥ विहितंअर्धचरुणार्धमाज्येनाग्नय
मेचरोःपश्चाराज्यस्य॥ अतःपाठक्रमोनविवत्तितः प्रस्रचंहोमः॥ अग्निस्थापनंस्वग
सोक्तमार्गेण॥ इतिमृतत्वार्मःप्रजामते॥ तस्यपापस्यशुध्यर्थंद्विजमेकंविवाहमेत्॥
॥ ॥इतिप्रकारांतरेणामृतत्वार्यत्वदुरितहरंवा॥ ॥अथस्त्रीविरक्तिहरं॥ ॥कर्मविपा
कसमुच्चये॥ धर्मपत्नीं सुव्रतामांसुरेवैमेथुनकारिणः पत्न्यां विरक्तिर्भवतिसुवर्ण
कजन्तोनसः॥ उमामहेश्वरंदेवं॥ रुद्रैकादशिनींजपन्॥ स्नापयेच्छूलपाणिसुक्तोस्यविछ
त्वांबुधारया॥ त्र्यंबकेनमन्त्रेण॥ जुहुयाज्जजपेदपि॥ उमामहेश्वरमित्यादि॥ यदिफच
तदेवतापनेउमामहेश्वरप्रतिमाजन्यतेतर्हितत्रैवाभिषेकः॥ अथकर्मपिलञ्य
तेतदास्वर्णसुवर्णोनामामहेश्वरप्रतिमांराजतवृषारूढांकारयित्वातत्रोमामहे
श्वरायवाभिषेकंकुर्यात्॥ रुद्रैकादशिनीलक्षणंपरिभाषायांरुद्रविधानेदर्शि

महा०
३७२

ततश्चाभिषेकप्रकारोपिस्त्रविच्छिन्नां बुधारयेति॥ अंबुग्रहणाग्रदत्तानार्थरुद्रविधाना
भिषेकविधौ स्त्रीरेकादशसारीनाग्रदर्शितत्वात्॥ होमं त्र्यंबकमंत्रः॥ सावाग्रजस्य रहदेद
र्शितः॥ अनेनैव जाप्यः जपहोमयोश्च संख्यानुक्तत्वाद्दृष्टोत्तर—तमष्टोत्तरसहस्रं च
॥ एवमभिषेकानंतरं तां सुवर्णप्रतिमां तत्कलशं ब्राह्मणाय दद्यात्॥ ॥ इति स्त्रीविरक्तिहरं॥॥
अथ मृतपुत्रत्वहरं॥ जगतातपप्रोक्ते॥ बालघाती च पुरुषो मृतवत्सः प्रजायते॥ ब्राह्म
णो दाहनेचैव कर्त्तव्यं तेन शुध्यति॥ श्रवणं हरिवंशस्य कर्त्तव्यं च यथाविधि महारुद्र
जपं चैव कारयेच्च यथाविधि॥ जुहुयाच्च दशांशेन दूर्वामाज्यपरिप्लुतां॥ एकादशास्व
र्णनिष्कः प्रदातव्याश्च दक्षिणा॥ एकादशपलं श्चैव दद्याद्वित्तानुसारतः॥ अन्येभ्यो ३७२
पि यथाशक्ति द्विजेभ्यो दक्षिणां दिशेत्॥ स्नापयेद्दंपती पश्चान्मंत्रैर्वरुणदैवतैः॥ आ
चार्याय प्रदेयानि वस्त्रालंकरणानि च॥ ब्राह्मणो दाहनं चैवेत्यादि॥ ब्राह्मणो दाहनं

चैव कर्त्तव्यं तेन शुध्यति॥ श्रवणं हरिवंशस्य कर्त्तव्यं च यथाविधि महारुद्रजपं चैव का
रयेच्च यथाविधि॥ जुहुयाच्च दशांशेन दूर्वामाज्यपरिप्लुतां॥ एकादशास्वर्णनिष्कः प्रदात
व्याश्च दक्षिणा॥ एकादशपलं श्चैव दद्याद्वित्तानुसारतः॥ अन्येभ्योपि यथाशक्ति द्विजेभ्यो
दक्षिणां दिशेत्॥ स्नापयेद्दंपती पश्चान्मंत्रैर्वरुणदैवतैः॥ आचार्याय प्रदेयानि वस्त्राल
करणानि च॥ ब्राह्मणो दाहनं चैवेत्यादि॥ ब्राह्मणो दाहनं चैव कर्त्तव्यं तेन शुध्यतीती॥ ब्रा
ह्मणो दाहनस्यैव पापविशुद्धिहेतुत्वाभिधानादेतस्य तत्र तत्रानिष्कृतिः॥ तेन शुध्यतीत्ये
तत्कार्यसिद्धिजनकत्वमत्र संबध्यते॥ अतः श्रवणं हरिवंशश्रवणविधिस्तुल्पदोषहरस
करणे प्रतिकृत्व हरेर्निरूपितः॥ विशेषप्रयोग॥ क्रमस्तत्र निरूप्यते॥ तद्यथा देशकार
नुकूलेशुभेदिने स्वस्तिवाचनं कृत्वा स्वशक्त्यानुसारेण विनायकशांति पूजां वा विभवा
नुसारेण विधाय पुत्रकामनया हरिवंशश्रवणं करिष्ये इति वा संकल्पयेत्॥ श्रव

एककर्त्त्वे करिष्यावह इति प्रयोगः॥ अन्यतरकर्तृत्वे करिष्यति॥ वासंकल्पयेत॥ एवं संक
ल्पाकृताध्ययनसंपन्नब्राह्मणान्विजवाक्यानुसारेण वस्त्रमुद्रिकाकुंडलतांबूलादिभिः संपू
ज्य तेभ्य वरणं वृणीत॥ एतस्मिन्दिने तावत्कालादिदिनहरिवंशश्रवणं त्वामहं वृणे इति प्रयोगः॥
ततश्च प्रतिदिनमसमाप्तिकं प्रतिबंधेन्माना वृजनकृतौ दंपती एकचित्तौ कृतमाध्यणुया
तां॥ प्रतिदिनमाचार्यं पुस्तकं च पूजयेत॥ अंते च स्वलंकृतां गां पयस्विनीं सवत्सां सु
वर्णशृंगीं रूप्यखुरां ताम्रपृष्ठीं कांस्यदोहनां सवस्त्रां सदक्षिणां च दद्यात॥ गोदानमं
त्रश्चास्मद्गृहरथधेनुदानेन दर्शितः॥ विनायकशांतिस्तु परिभाषायां दर्शिता॥ अहृत
मनुसारामः॥ ब्राह्मणो ह्यहनमेकं ग्राममश्विलंब्यपपरं हरिवंशश्रवणं परिश्रेषो
ऽमहारुद्रजपो विहितो मंत्राम श्वित्ताश्च तएव वचनस्मिताश्च राष्ट्राष्ट्राः एतानि त्री
णपत्रकाध्यापेतमाध्यस्तानि समस्तानि वा योज्यानि॥ महारुद्रप्रकरणे रुद्रानु ३१२

वाकानामार्षादि सर्वं परिभाषायां रुद्रविधाने समुपदर्शितं॥ निष्कृत्तणं परिमाणप्र
करणेऽस्य धाय॥ एकादशपर्यं श्वै वेति॥ पय्युरत्र णौः॥ रुद्रायणामिति श्रुतः॥ वरुण
देवतामंत्राः कस्यनूनं कतमस्यामृतानामित्यादयः॥ तथास्वस्त्यखोक्तावारुणमंत्रास्त
घापरवमानः सुतर्जनश्चाद्यस्मात्राभिषेके आस्याः॥ एवमानसुतर्जनमित्यम
नुवाकोगणहोमप्रकरणे दर्शितः॥ कस्यनूनमित्यस्य पंचदर्चस्य सूक्तस्याजीग
र्तिः शुनःशेफ ऋषिः॥ रसावेव विश्वामित्रो देवरात इति वोच्यते॥ वरुणः देवताऽऽद्या
काद्याच॥ द्वितीयाग्नेयी न तीयाद्यास्तिस्रः सावित्र्यश्च पंचमी भगवद्दैवत्या च त्रिष्टु
प्छंदास्तृतीयाद्यास्तिस्रो गायत्र्यः॥ विहितार्थे विनियोगः॥ कस्यनूनं कतमस्यामृता
नाम मनामहे चारु देवस्य नाम॥ मनो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं
च॥१॥ अग्निता देवसवितरीशानं वार्याणां सदावन्भागमीमहे॥२॥ अग्नेर्वयं प्र

महा. ३२४ थमस्यामृतानांमनामहेचारुदेवस्यनाम।मनोमह्याअदितयेपुनर्दात्पितरंचदृशेयं
मातरंच॥३॥यश्चिद्धितइत्थाभगःशशमानःपुरानिदः॥अद्वेषोहस्तयोर्दधे॥४॥भग
भक्तस्यतेवयमुदशेमतवावसा।मूर्धानंरायआरभे॥५॥नहितेक्षत्रंनसहोनम
न्युंवयश्चनामीपतयन्तआपुः॥नेमाआपोअनिमिषंचरन्तीर्नयेवातस्यप्रमिनन्त्यभ्वं।अ
बुध्नेराजावरुणोवनस्योर्ध्वंस्तूपंददतेपूतदक्षः॥नीचीनाःस्थुरुपरिबुध्नएषामस्मेअ
न्तर्निहिताःकेतवःस्युः॥उरुंहिराजावरुणश्चकारसूर्यायपन्थामन्वेतवाउ॥अपदे
पादाप्रतिधातवेकरुतापवक्ताहृदयाविधश्चित्॥८॥शतंतेराजन्भिषजःसहस्रमुर्वी ३२४
गभीरासुमतिष्टेअस्तु॥बाधस्वदूरेनिरृतिंपराचैःकृतंचिदेनःप्रमुमुग्ध्यस्मत्॥९॥
अमीयऋक्षानिहितासउच्चानक्तंददृश्रेकुहचिद्दिवेयुः॥अदब्धानिवरुणस्यव्रतानिवि
चाकशच्चन्द्रमानक्तमेति॥१०॥तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भि।

अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥११॥तदिन्नक्तंतद्दिवामह्यमाहु
स्तदयंकेतोहृदआविचष्टे।शुनःशेपोयमह्वद्गृभीतःसोअस्मान्राजावरुणोमुमोक्तु
॥१२॥शुनःशेपोह्यह्वद्गृभीतस्त्रिष्वादित्यंद्रुपदेषुबद्धः॥अवैनंराजावरुणःससृज्या
द्विद्वाँअदब्धोविमुमोक्तुपाशान्॥१३॥अवतेहेळोवरुणनमोभिरवयज्ञेभिरीमहेहवि
र्भिः।क्षयन्नस्मभ्यमसुरप्रचेताराजन्नेनांसिशिश्रथःकृतानि॥१४॥उदुत्तमंवरुणपाश
मस्मदवाधमंविमध्यमंश्रथाय॥अथावयमादित्यव्रतेतवानागसोअदितयेस्याम॥१५॥
इतिकस्यनूनमितिसूक्तं॥॥इतिमृतपुत्रत्वहरं॥॥अथानपत्यहत्वरं॥॥त्रण
तातपयोक्तं॥विश्वरलापहारीच॥सानपत्यप्रजायते।तथाचगौतमः॥न्यासोपहारीअ
नपत्यइति॥तेनकार्यंविष्णुपूजनमहारुद्रजपादिकं॥आदित्यादेःप्रतिलोमानित्रायेणह
रिंत्राश्रवणब्राह्मणोदानहजन्तपति।तेचप्रागेवमृतपुत्रत्वहरेदर्शितं॥अमुमेवअनि

प्रायश्चित्तं करोति॥ मृतवत्सोदितः सर्वो विधिरत्र विधीयते॥ दशांशहोमः कर्त्तव्यः॥ पा
लाशेन यथाविधि॥ दशांशहोमद्रव्यमाह॥ पालाशेनेति॥ पालाशकुसुमैनैत्यर्थः॥ एकव
चनं जात्यभिप्रायेण॥ इत्यनपत्यत्वहरं॥ ॥अथ मृतपुत्रत्वविशिष्टचर्मकीलत्वहरं॥
कर्मविपाकसंग्रहे॥ अष्टकादिपितृश्राद्धहीनो निरंकुशघातकः॥ प्राणिनां संमतद्वेषी गु
रुद्वेषी तथा परः॥ जातको मृतगर्भाः स्युर्नरकान्ते च जन्मनि॥ मृतपुत्रश्चर्मकीलव्याधिदु
कोन्नवेधसः॥ दुर्मना भवेज्जायते तस्य मे निष्कृतिपरा॥ लक्षचान्द्रायणेकुर्याद्धोमः कूष्मा
ण्डसंज्ञकः॥ गणहोमस्वर्णदानं तथा परं॥ कन्यादानं च पंचम्यां श्राद्धं कुर्वीत यत्न
तः॥ सहस्रनामजपी च॥ न वेदे वेचमुच्यते॥ अष्टकादीत्यादि अधिकारे सम[illegible]कादिपि
तृश्राद्धरहितः॥ प्राणिनां निरंकुशघातक इत्यर्थः॥ एतान्यष्टकादिश्राद्धरहितेनः प्रमु
मुग्धास्मतु हितादीन्यंचापि पृथक्पृथक् निमित्तानि॥ कृच्छ्रचान्द्रायणयोर्लक्षणं कृ
नि

च्छ्रप्रकरणे निरूपितं॥ कूष्माण्डहोमो गणहोमश्च परिभाषायां दर्शितः॥ पंचम्यां श्रा
द्धमित्यर्थः॥ सहस्रनामजपीति तीर्थीत्येके निन्नि॥ अतो यावद्व्याधिशमनं तावत्सह
स्रनामस्तोत्रं जपेत्॥ अस्य चापादि परिभाषायामेवाभ्यधायि कृच्छ्रादीन्येतानि व्याधि
गुरुत्वलघुत्वापेक्षया द्वित्र्याद्यावृत्त्या वा समस्तानि वा योज्यानि॥ ॥इति मृतपु
पुत्रत्वविशिष्टचर्मकीलत्वहरं॥ ॥अथ दन्तपातनत्वहरं॥ ॥शातातपप्रोक्ते॥ ॥दन्तपात
नकाम्युक्तः॥ अनाहिताग्निर्वेचनरः॥ दंतपातनमेवाद्दं दंतापातनके तेनोमुक्तः॥ अथवा दं
तापातनकमिति रोगांतरं दंतापतनकमिति सपिपारः॥ अत्र निःकृतिमाह॥ प्राजा
पत्यं चरेदेकं दद्यात् धेनुं सदक्षिणां॥ प्राजापत्यस्वरूपं कृच्छ्रप्रकरणेऽभ्यधायि॥ धेनुदा
नमंत्रस्तु नवग्रहयज्ञप्रकरणे दक्षिणादानप्रस्तावे निहितः॥ ॥इति दंतापातनत्वहर
॥ ॥अथ सर्वांगवेदनाहरं॥ कर्मविपाकसमुच्चये॥ अतिस्मृतिनिषिद्धानि यानि

महा.
३१६

रत्नानि संति वै॥ अजाश्वमहिषादीनि तत्र तिष्ठ हकारणात्॥ निषिध्यमोयिद्रुमनाद्धि
जाश्वस्य वधादपि॥ वेदस्य च परीक्षायां दस्कव्याघ्रादितिर्मतौ विषो बंध नवास्त्रादि मन
ण रुरु धिकृते। तडागे अंतर्गतावा स्वत्रास्त्रोपजीवनात् ब्राह्मणस्वापहरणात् रोगे
षुप्र जायते॥ वेदनाहारुणा वध ज्वरस्तदुपशांतये॥ कृच्छ्रातिकृच्छ्रे कुर्वीत चांद्रायण
मथापरं॥ गोवृहिरण्यवासांसि दद्यात् कुर्याज्जपं तथा॥ तद्विष्णो रिति मंत्रस्य वच
स्यात्रायुतत्रयं॥ कृच्छ्रातिकृच्छ्रस्य चांद्रायणस्य स्वरूपं कृच्छ्रप्रकरणे निरूपितं गवा
दिदानमंत्राः प्रायश्चित्तोपक्रमपद्धतौ निरूपिताः॥ तद्विष्णोरिति ऋचः कर्मम्लनहरे॥
ब्रह्मपुराणे॥ ॥प्रानीयपापसंभूताः त्वर्कं शाद्यतसंभुत॥ इदमाव नपकंदेयं सर्वरोगोप ३१६
शांतये॥ ॥सर्वांग वेदनाहरं॥ ॥अथ प्रतिष्ठहरं॥ ॥ज्ञातातपप्रोक्तो। प्रतिमा यात्वग
कारी तत्प्रतिष्टः प्रजायते॥ संवत्सरत्रयं सिंचेत् अश्वत्थमनुवासरं॥ उद्वाहमेतमकारी

श्वत्थं समसिम्भाविधानतः॥ अश्वत्थस्यात्र सेचक रोपितानवृक्षाः सः यदित्वामीश्व
तः समीपे स्थिता तर्हि तया सह॥ अश्वनतस्तेतदा वृषो स्थं इव वन्तांत्वामी ज्ञातेवा
त दत्ता वेकुंठास्तेवं समानीय विधानतो विवाहकार्यं॥ शिष्टाचारप्राप्तं विधानं त्वेत
त्॥ शुभेदिने चंद्रताराबलान्वितेऽश्वत्थत्वामीचवृक्षादि निरंजं कृत्य स्वगृह्योक्तविधिना
ग्निं प्रतिष्ठाप्य व्याहृतिनिर्मिस्ति त्वाना ज्यं परमकृपरम्पराष्टोत्तरसहस्रं वा कुलाब्रा
ह्मणान् भोजयित्वा यथाशक्ति दक्षिणां दद्यादिति॥ एवमश्वत्थोद्वाहनं विधाय तत्र
विनायकं॥ अश्वत्थमूले संस्थापयेद् देवं विघ्नराजं प्रपूजितं॥ तत्राश्वत्थमूले समीपे वा
विनायकमूर्तिं दार्वादिनिर्मायत स्यैव यथा वितवमालयं विधाय तत्र विनायकं व्या
हृतिभिः संस्थापयेत्॥ तत्रायं प्रयोगः॥ ॐ भूर्भुवः स्वः विनायक प्रकाशं को मंत्रो ग्रा
स्य॥ हागच्छे हतिष्ठेति गंधाक्षतैः प्रतिमायामावाहयेदिति॥ ततश्चाश्वत्थोद्वाहोपचार

चारैः पूजां कुर्यात्॥ अत्र च विनायकप्रकारका मंत्रा ग्राह्याः॥ ते च मंत्रा नवग्रहमखप्र
करणे विनायकशांतौ ये दर्शिताः॥ अत्रापि तिलाज्यं च जुहुयात् व्याहृतिभिः॥
अश्वत्थविवाहो विनायकप्रतिष्ठा चेति द्वे कर्मणी॥ उभयोर्मिलितयोगक्रमः॥ शु
नदिनेऽश्वत्थसमीपे ब्राह्मणानुपवेश्य स्वगृह्योक्तप्रकारेणाश्वत्थविवाहं विधाया
ग्निप्रतिष्ठाप्याश्वत्थशमीं च पूर्वोक्तप्रकारेण तं कृत्वा विनायकं पंचामृतैः स्ना
पयित्वा तस्मात् मेषसंस्थाप्य पूर्वोक्तरीत्यावाह्य प्रतिष्ठाप्य पूजयित्वा ब्राह्मणान् भोज
यित्वा दक्षिणां दद्यादिति॥ ॥ इत्यप्रतिष्ठत्वहरं॥ ॥ अथ पुंडरीकरोगहरं॥ ॥ शातात
पप्रोक्ते॥ कांस्यहारी च भवति पुंडरीकसमन्वितः॥ कांस्यं पलशतं दद्यादुपोष्य दि ३११
वसं नरः॥ पलप्रमाणं परिमाणप्रकरणे निरूपितं॥ ॥ इति पुंडरीकरोगहरं॥ ॥
अथ कुब्जहरं॥ ॥ शातातपप्रोक्ते कुब्जो मूषकहरः स्यात् स धान्यं सकांचनं॥ अ

त्रपरिमाणविशेषानभिधानात्स्वपरिमाणं शास्त्रश्रीकृतं ग्राह्यं। तच्च शोडिषवाडिकं
॥ षड्विंशं सप्रधान्यमिस्तकवृत्ताकारसमुचितमेवाकांचनं स्वशक्त्यनुसारेण धान्य
राशौ स्थापनीयं॥ सकांचनमित्युक्तत्वात्॥ दक्षिणा च यथाशक्ति तथा दानं गत्वा द
स्यः॥ ॥ इति कुब्जत्वहरं॥ ॥ अथ निकृष्टहरं॥ ॥ अधरो निकृष्टो दरिद्र इति यावत्॥
शातातपप्रोक्ते॥ ॥ अनिवेद्य सुरादिभ्यो भुंजानो जायते धरः॥ स नो जपेत्सहस्रं तु गा
तं चापि द्विजोत्तमान्॥ सुरादिभ्यो हरिहरादिभ्यो वैश्वदेवकर्मदेवताभ्य आदिशा
द्यादिति पितृपुत्रादिभिश्च॥ अधरः निकृष्टो दरिद्र इति यावत्॥ गात सहस्रसंख्यावि
कल्पः शक्त्याद्यनुसारेण॥ ॥ इति कृष्टत्वहरं॥ ॥ अथ सदादुःखहरं॥ कर्मविपाक
संग्रहे॥ सर्वदा दुःखचित्तः स्यात् परविनाशकः॥ चांद्रायणं कुर्यादुद्युक्तं जातवेद
सा नत्सहस्रकं जपन्नाममंत्रितमंत्रं च विमुच्यते॥ चांद्रायणस्वरूपं कृच्छ्रप्रकरणे निरू

मह॰ ३१८

तं॥उदुत्यंजातवेदसमित्यस्यमंत्रस्यप्रस्कण्वऋषिः॥सूर्योदेवतात्री
घानवगायत्रीत्यास्यतस्तोनुष्टुप्जपेविनियोगः॥एतन्मंत्रकंपाठतः॥परिज्ञाषायां
महासौरवर्गेषुप्रदर्शितंनाममंत्रस्यापाहिवानरोगहरेदृष्टव्यं॥अनेनमोक्षजपः॥
चांद्रायणादिनेषुदिवाकर्मविरोधिनिकालेकर्त्तव्यं॥प्रत्याम्नायप्रकाराश्चांद्रायणक
रणेप्रत्येकमयुतंजपेत्॥ ॥इतिसर्वदाहहरं॥ ॥अथसर्वकार्यसिद्धिहरं॥॥त्रग
ताणतपप्रोक्तेसर्वकार्यप्रसिद्धार्थंगजधीतीत्वेवन्तरः॥प्रासादकारमेतत्रगणे
नाथस्यसन्निहितः॥अथवागणनाथस्यमंत्रंलक्षंजपेद्बुधः॥दशांशहोमपुष्पैश्च ३१८
गणत्वंतिपुरःसरं॥प्रासादोदेवालयः॥गणनाथस्यमंत्रोगणानांत्वेत्यादिःअस्यग
णानामदऋषिर्गणपतिर्देवताजगतीछंदः॥जपेविनियोगः॥गणानांत्वागणपतिंहवा
महेकविंकवीनामुपमश्रवस्तमं॥ज्येष्ठराजंब्रह्मणांब्रह्मणस्पत॥आनःशृण्वन्नूति

भिःसीदसादनं॥१॥आनूतंइदेतिनवग्रहयज्ञप्रकरणेदर्शितः॥गणपतिगायत्रीं
वाजपेत्॥इयंतुविनायकशांतौदर्शिता॥अथवास्वशाखासमाम्नाताविनायक
प्रकाशकावास्योपदेशानुसारेणवक्रतुंडगणपतिमंत्राहमोवाश्राह्यः॥पुष्पाति
करवीरादिनिरक्त—अत्रतानिवागणपतिविनायकशांतिः इयंतुपरिज्ञाषायामप
रिज्ञाषायामुदीरिता॥गणघोषशांतिर्घोषशांतिः॥गणसङ्घःशांतिप्रविमादर्के
मंत्रसमुदायइतियावत्॥अनेनचस्वशाखोक्ताशांतिरुपलक्ष्यतेतत्राग्नेनग्रहस्था
श्वतांमनशांतिः॥वान्नोवातइतिचतैत्तिरीयशांतिरपिपरिज्ञाषायांद्रष्टव्या॥इति
सर्वकार्यसिद्धिहरं॥ ॥अथरेवंतरगतस्यातिक्रेत्वहरं॥कर्मविपाकसमुच्चये॥
नयनतातान्नरःतैषः क्षुत्पिपासातुरस्त्वमात्राक्तःसत्तत्वदाजंतुःकंपनोवधहनि
क॥निषिद्धधिजीवीचजातोपिश्रीमतांकुलेदेशाद्देशांतरंयातिक्षेत्रामुक्तोनवेत्त्र

महा०
३९५

र्वैद्याजंतुःकः ॥ निद्या ॥ चांद्रायणं प्रकुर्वीत तथा कृच्छ्रातिकृच्छ्रकं जुहुयाच्चरु सर्पिस्त्वामी
सूक्तान्मंत्रं चं तथा ॥ होमप्रोक्तो व्याहृतिभिर्जपेत्सूक्तं च वारुणं ॥ दद्याच्च दक्षिणां स्वर्णं ति
लाद्यान्यपि निर्दिशेत् ॥ स्वयंत्रक्तः सन्नरस्त्वेदित्यन्वयः ॥ चांद्रायणं स्य कृच्छ्रातिकृच्छ्रस्य
जत्तृणां कृच्छ्रप्रकरणे ऽन्यथापि वरुणां सर्पिषा च प्रत्येकमष्टोत्तरशतं सहस्रं वा श्रीसू
क्तांतर्गताभिर्ऋग्भिः प्रत्यृचं जुहुयात् ॥ तथा व्याहृतिभिरपि पूर्वोक्तसंख्ययैव जुहुयात्
श्रीसूक्तस्यार्षादि नात्रिकाब्रणहरे त्नहितं ॥ व्याहृतीनां तु कूष्मांडहोमे न वक्ष्यहयज्ञेय
प्रदर्शितं ॥ जपेच्छ्रीसूक्तं च ॥ वारुणमिति ॥ वरुणदैवत्यं सूक्तं वारुणं तच्च स्वसमाम्नातेष्व ३९५
न्यतमं ॥ ऊह्यं ॥ तस्य कृच्छ्रस्यानुनं कत स्याम तानामिति सूक्तं मतपुत्रलहरे प्रदर्शितं ॥ ति
लाद्यान्यपि निर्दिशेदिति ॥ निर्दिशेद्द्यात् ॥ आदित्याद्येन यत्ताहं श्रीसाद्यो व सते ॥ ति
लादीनि यथाशक्त्या दद्यात् ॥ ॥ इति देवगणतरंगतस्मानिकेशाहरं ॥ ॥ अथ पराद्रिहरेध

नदमर्त्ति दानं वायुपुराणे ॥ दरिद्रो जायते मर्त्यो दानैर्विघ्नं करोति यः ॥ रोग्य मे जायते
न कर्मणा तन्निवृत्तमय ॥ पलार्धेन तदर्धेन चतुर्थांशेन वा पुनः ॥ धनदस्य प्रति
कृतिं कुर्यात् धर्मसमीप्सुता ॥ विधजा वाहनोपेतां नमनानंदकारिणीं ॥ शंखपद्मनि
धिभ्यां च संयुक्तां पार्श्वयोर्द्वयोः ॥ श्वेतवस्त्रेण संवेष्ट्य तंडुलोपरि न्यसेत् ॥ तंडुलानां
परिमाणं तु द्रोणचतुष्टयं ॥ तदर्धं वा वित्तशाठ्यं न कारयेत् ॥ श्वेतगंधैस्तथा माल्यैर
नुलिप्य तु पूजयेत् ॥ आग्नेय्यां दिशि होमं च समिदाज्यतिलैरपि ॥ मंत्रो राजाधिराजाय
तिषांयाज्यः स्वलिंगकैः ॥ तिलहोमो व्याहृतिभिः कर्त्तव्यो धनकांक्षिभिः ॥ पलार्धेनेत्या
दि पलद्रोणयोः स्वरूपपरिमाणप्रकरणे निरूपितं ॥ द्विभुजां वरदाभयकरां वाहनोपेतां
॥ कुवेरस्य वाहनं मनुष्यः ॥ नरवाहन इति प्रसिद्धः ॥ द्वयोः पार्श्वयोः शंखनिधिभ्यां युक्ते
त्यन्वयः ॥ शंखेन कमलेन च वोज्ज्ञासितो लमांगो शंखपद्मनिधीजवतः ॥ मूर्त्ते मूर्ध्नि

म.हा. प्रधा विकृमित्यर्थः॥ आग्नेय्यां दिशि तिथेन दत्राति कृतिपूजास्थाने दाग्नेयदिग्भागे तु कसं
३८० रव्याकत्लौ न्यस्ते कं समिदाज्य तिलान् घोत्तरशतं सहस्रं वा जुहुयात्॥ पूजायां होममं
त्रमाह॥ मंत्रो राजाधिराजायेति स्वलिंगकैः॥ कुबेरनामद्योतकैः पदैर्युक्तमित्यर्थ
॥ मंत्रस्यायं षडवसानः॥ अस्यारुण ऋषयः विश्वेदेवा वा ऋषयः॥ कुबेरो देवता॥
जित्राघ्यर्थे विवाछंदः। राजाधिराजाय प्रसह्यसाहिने नमो वैश्रवणाय कुर्महे॥ सा
मकामात्कामकामाय मह्यं कामेश्व वैश्रवणो ददातु कुबेराय वैश्रवणाय महाराजा
यनमः॥ एवं पूजा होमं मंत्रमभिधाय तिलहोमविशेषमाह॥ तिलहोमो व्याहृतिभिरिति॥ ३८०
व्याहृतीनामष्यादिन वयह यज्ञप्रकरणे देवतावाहनप्रस्तावे प्रदर्शितं॥ पूर्वं उक्तं
कर्मकेन कारयेदित्यत्राह॥ आचार्यः सर्वशास्त्रज्ञो विनीतः संवत्सं महाकुलप्रसू
तस्य धर्मज्ञः सत्यवादी भवेत्॥ कारयेद्दर्चनां तेन धनदस्यापि नकितः॥ तदेवं स्येनम

त्रेण सच कामीश्वरो भवेत्॥ सच धनदमूर्तिदाता। कामी ईश्वरो भवेत्॥ अस्मिन्दा
ने कृते॥ तस्मै होमकृते प्रदद्यात्प्रतिमां तु मीं तां॥ मंत्रेणानेन विधिवत्प्रा्ङ्मुखाय सु
दङ्मुखः॥ दानमंत्रमाह॥ उत्तराशापते देव कुबेर नरवाहन॥ यक्षरक्षोनिधीनां
त्वं पतिः श्रीकं ववक्त्रकः॥ आदानेन मया प्राप्य दारिद्र्यं मम दुःखदं। तत्सर्वं तव दानेन पा
पमाशु विनाशय एवं कुबेरयनयः करोति विधिपूर्वकं। धनदेन समो मर्त्यस्तत्क्षणा देव
जायते। तत्क्षणादेवैस्य सर्वं वा दोषा सुवैन्नपिण देवते तिवत्। — — कर्मफलदायकं क
र्मेत्यर्थः॥ ॥ इति दारिद्र्यहर धनदमूर्तिदानं॥ ॥ अथ प्रकारांतरेण धनत्वादिहरं॥ कर्म
विपाकसमुच्चये॥ ऋग्वेदाधिकावृधिगृह्यातयज्ञयोनवं॥ उत्तारयतिमोन्येषां पापा
णानप्रहारदः॥ तत्प्रहारकश्चैव जातोपि धनिनांकुले॥ धनेन रहितः प्रायो देशगत
रगतोभवेत्॥ महाक्लेशी च हृद्रोगी उदावर्ती भवेन्नरः॥ अधिवधिप्रहतानाम शास्त्र

निषिद्धग्रहणं॥ नमः मुत्साद्यतीति॥ निमित्तमंतरेण नयोत्सादनं॥ तथापापाणांश्रहारादि
॥ तदुक्तं ग्रहारोगमुष्टिग्रहारश्च॥ पटादानेवा उदावर्तीति। ऊरुमावर्त्तं इत्क्रदावत्तीवमन
वानिलघ्नः॥ अत्र प्रायश्चित्तमाह॥ कृच्छ्रः कृच्छ्रातिकृच्छ्रस्य चांद्रायणमथापरं॥ कुर्या
दाज्यचरूणां च होमो व्याहृतिभिस्तथा॥ यत्किं वेदमिदं सूक्तमष्टुतं वारुणं जपेत्॥ प्राज्य
प्रकृच्छ्रस्य कृच्छ्रातिकृच्छ्रस्य चांद्रायणस्य च लक्षणानि कृच्छ्रप्रकरणे निरूपितानि॥
निमित्ततारतम्येन नैमित्तिकानि व्यस्तानि समस्तानि वा योज्यानि॥ आज्यचरूणां प्रत्येकम
ष्टोत्तरशतं होमः॥ व्याहृतीनामष्टादि नवग्रहयज्ञप्रकरणे देवतावाहनप्रस्तावे अभि
हितं॥ यत्किंचेदमिता नन मोषुवरुणमन्त्रमयमिसेतत्सूक्तं लक्ष्यते॥ तस्मात्कुर्यात्
न्यस्कांतपातित्वात्॥ अयस्य सूक्तस्य वसिष्ठ ऋषिर्वरुणो देवता गायत्री छंदः॥ अंत्या त्रि
गती जपे विनियोगः॥ मोषुवरुण मृन्मयं गृहं राजन्नहं गमं॥ मृळा सुक्षत्र मृळय॥१॥

क्रत्वः समह दीनता प्रतीपं जगमा शुचे मृळा सुक्षत्र मृळय॥२॥ अपां मध्ये तस्थि
वांसं तृष्णाविदज्जरितारं मृळा सुक्षत्र मृळय॥ यत्किंचेदं वरुण दैव्ये जने भिद्रोहं
मनुष्याश्चरामसि अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः
॥ ॥इति मोषुवरुणेति सूक्तं॥ ॥इति प्रकारांतरेणाधनित्वादिदोषहरं॥ ॥अथ ब्रह्म
